Te	37×3.5	15–17	6	60	C	G	
Na	15.3×3	190–111	7	30	C	G	
Gr	25.5×3.5	1–8	10	22	C	G	
Na	20×3	One	5	28	Inc.	G	28th. folio
Gr	15×20	3–4	15	16	C	G	
Na	13×3	4–6	6	22	C	D.W	

1	2	3	4	5	6
20470	P. 8307/57	Svāhāṣṭottara nāmāvaliḥ			Pl
20471	P. 1059/2	Hanumaddvādaśa nāmastotram			„
20472	P. 342/5	Hanumatsahasra nāmastotram (Āñjaneyasahasra nāmam)			„
20473	P. 800/4	„			„
20474	P. 5659/6	Hanumatsahsra nāmāvaliḥ (Āñjaneya sahasranāmāvaliḥ)			„
20475	P. 5886/3	„			„
20476	P. 5917/2	„			„
20477	P. 5920/1	„			„
20478	P. 10073/13	„			„
20479	P. 211/1	Hanumadaṣṭottaram (Āñjaneyāṣṭottaram)			
20480	P .3508/2	„			
E20481	P. 3698/5				P

7	8	9	10	11	12	13	14
Na	13.8× 4	188–190	9	20	C	G	
Te	33.5×3.5	One	3	40	C	G	
,,	45×3.5	5–11	6	72	C	W	
Gr & Te	34.5×4	8–13	6	54	C	W	
Na	21×3	72–83	7	50	C	O	
,,	21×3	91–98	9	38	C	G	
,,	39×3.5	1-8	9	62	Inc. 1–820 nāmas	O.D	
Te	45×3.5	14–25	6	40	C	G	
,,	41×4	1–12	6	54	C	O	
Kan	38×3.5	1–2	5	40	Inc.	D.W	
Gr	29×3	2–3	7	40	Inc.	O.D	
Te	20×16	8–9	14	22	C	O	

1	2	3	4	5	6
20482	P. 1433/10	Hanumadaṣṭottara śatanāmāvaliḥ			Pl
20483	P. 5574/7	,,			,,
20484	P. 4922/14	Hayagrivasahasra nāmastotram			,,
20485	P. 6128/7	,,			,,
20486	P. 7526/16	,,			,,
E20487	C. 728	,,			P
20488	C. 4447	,,			,,
20489	P. 4922/13	Hayagrivasahasra nāmāvaliḥ			Pl
E20490	P. 1433/28	Hayagrīvāṣṭottaram			,,
20491	P. 4922/8	,,			,,
20492	P. 4922/11	,,			,,
20493	P. 6128/9	,,			,,

7	8	9	10	11	12	13	14
Te	43×3.5	31–32	8	48	C	G	
Na	39×4	35–36	6	44	C	W	
Gr	40.5×3.5	15–23	7	54	C	D	
,,	31×3	27–29	5	45	Inc.	G	
Te	17×3.5	One	8	22	Inc.	G	
D	32.5×10.5	1–6	9	50	C	G	
,,	24×10	One	11	34	Inc.	O	5 th. folio
Gr	40.5×3.5	1–14	8	34	C	G	
,,	43×3.5	224–225	7	41	C	W	
,,	40.5×3.5	11–12	7	48	C	W	
,,	40.5×3.5	15–16	7	50	C	D	
,,	31×3	34–36	5	45	C	G	

1	2	3	4	5	6
20494	P. 7526/7	Hayaarivāṣṭottaram			Pl
20495	P. 7526/12	,,			,,
20496	P. 10264/13	,,			,,
20497	P. 4922/12	Hayarivāṣṭottarśata nāmāvaliḥ			,,
20498	P. 6128/46	,,			,,
E20499	P. 10344/29	Hariharāṣtottara stotram			,,
20500	P. 8307/58	Hariharāṣtorttara nāmāvaliḥ			,,

7	8	9	10	11	12	13	14
Te	17×3.5	1–2	8	32	C	G	
,,	17×3.5	1–2	8	32	C	G	
Gr	30.5×3.6	3–4	11	104	C	D	
,,	40.5×3.5	17–18	8	34	C	G	
,,	31×3	1–2	7	45	C	G	
Na	21×4	75–77	8	34	C	O	
,,	13.8×4	190–192	9	20	C	G	

APPENDICES

APPENDIX I

EXTRACTS

I

Sl. No: 16576 अद्भुतरामायणम् Ms. No: C. 3705

Beginning :

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं पुंसां महापातकनाशनम ॥
नमस्तस्मै मुनीन्द्राय श्रीयुताय महात्मने ।
शान्ताय सुविनीताय वाल्मीकिमुनये नमः ॥

End ;

शान्तिप्रतिष्ठा सर्वेषां निवृत्तिरमृते प्रदा ।
व्योममूर्तिः व्योममयी व्योमधाराच्युतामता ॥
अनादिचिद्भ्रनायेषा कारास्यात्मकलाकुला ।
प्राणेश्वरप्रिया .... ॥ (?)

Colophon :

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अद्भुतोत्तरकाण्डे अष्टादशः सर्गः ॥

2

Sl- No : 16577 अद्भुतरामायणम् Ms No : C. 3989

Beginning :

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं वाचं ततो जयमुदीरयेत् ॥
नमस्तस्मै मुनीन्द्राय श्रीयुताय तपस्विने ।
शान्ताय वीतरागाय वाल्मीकाय नमो नमः ।
\+ \+ \+ \+ \+ ॥
तमसातीरनिलयं निलयं तपसां गुरुम् ।
वचसां प्रथमं स्थानं वाल्मीकिं मुनिपुङ्गवम् ॥

End :

भजेत योऽरूपमचिन्त्यरूप
एकेन भावेन च भूमिपुत्रीम् ।
एतत्सुपुण्यं शृणुयात्पठेद्वा
भूयो भवेन्नो जठरे जनन्याः ॥

Colophon :

इत्यार्षे श्रीरामायणे वाल्मीकीये अद्भुतोत्तरकाण्डे रामायोध्यागमनं नाम सप्तविंशतितमः सर्गः ॥

3

Sl. No : 16582 अध्यात्मरामायणम् Ms. No : P. 1549/1

Beginning :

कदाचिन्नारदो योगी परानुग्रहवाञ्छया ।
पर्यटन् सकलान् लोकान् ब्रह्मलोकमुपागतः ॥
तत्र दृष्ट्वा मूर्तिमद्भिः छन्दोभिः परिवेष्टितम् ।
बालार्कप्रभया सौम्य भासयन्तं सभागृहम् ॥
मार्कण्डेयादिमुनिभिः स्तूयमानं मुहुर्मुहुः ।
सर्वार्थगोचरज्ञानं सरस्वत्या समन्वितम् ॥

End

श्रुतिस्मृतिपुराणेतिहासागमशतानि च ।
अर्हन्ति × × ध्यात्मनारायणकलामपि ॥
अध्यात्मरामचरितस्य मुक्षनीराय
माहात्म्यमेव दुरिताकमलासनेन । (?)
यः श्रद्धया पठति वा शृणुयात् स मर्त्यः
प्राप्नोति विष्णुपदवीं सुरपूज्यमानः ॥

Colophon :

इति श्रीमत्यध्यात्मरामायणे ब्राह्मोत्तरखण्डे ब्रह्मनारदसंवादे एकषष्टितमस्सर्गः ॥

4

Sl. No : 16583 अध्यात्मरामायणम् Ms. No : P. 1549/2

Beginning :

यः पृथ्वीभरवारणाय दिविजैः सम्प्रार्थितश्चिन्मयः
सञ्जातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः ।
निश्चक्रं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां
कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे ॥
विश्वोद्भवस्थितिलयादिषु हेतुमेकं
मायाश्रयं विगतमामयचिन्त्यमूर्तिम् ।
आनन्दसान्द्रममलं निजबोधरूपं
सीतापतिं विदिततत्त्वमहं भजामि ॥
पठन्ति ये नित्यमनन्यचेतसः
शृण्वन्ति चाध्यात्मकसंज्ञितं शुभम् ।
रामायणं सर्व + हरिमेव यान्ति ते ॥

End :

रामायणं जनमनोहरमादिकाव्यं
ब्रह्मादिभिः सुरवरैरपि संस्तुतं च ।
श्रद्धान्वितः पठति यः शृणुयात्स नित्यं
विष्णोः प्रयाति सदनं स विशुद्धदेहः ॥

Colophon :

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे विश्वामित्रप्रोक्ते उत्तरकाण्डे नवमस्सर्गः ॥ अध्यात्मोत्तरकाण्डे सर्गा ग्रहसंख्यया परिक्षिप्ताः । ऋतुशतसंख्या श्लोकाः । पुराणसंख्या × × रे प्रोक्ताः ॥

पार्वत्यै परमेश्वरेण गदिते ह्यध्यात्मरामायणे
सप्तर्थिनिर्णितेति शुभदे सर्गाश्चतुषष्टिकाः । (?)
श्लोकानां तु शतद्वयेन सहितान्युक्तानि चत्वारि स-
हस्राण्येव समासतः श्रुतिशतेनोक्तानि तत्वार्थतः ॥

5

Sl. No : 16597 अध्यात्मरामायणम् Ms. No : P. 1058/1

Beginning :

सूत उवाच—
कदाचिन्नारदो योगी परानुग्रहवाञ्छया ।
पर्यटन् सकलान् लोकान् सत्यलोकमुपागमत् ॥
तत्र दृष्ट्वा मूर्तिमद्भिः छन्दोभिः परिवेष्टितम् ।

End :

यत्पादपद्मयुगलं तुलसीदलाद्यैः
संपूज्य विष्णुपदवीं अतुलां प्रयन्ति ।
तेनैव किं पुनरसौ परिरब्धमूर्तिः
रामेण वायुतनयः कृतपुण्यपुञ्जः ॥

Colophon :

इत्यध्यात्मरामायणे उमामहेश्वरसंवादे सुन्दरकाण्डे पञ्चमस्सर्गः । सुन्दरकाण्डस्समाप्तः ॥

6

Sl. No : 16604 अध्यात्मरामायणम् Ms. No : C. 3255/1

Beginning :

ततो जगन्मैङ्गलामङ्गलात्मना
विधाय रामाय च कीर्तिमुत्तमाम् ।
चचार पूर्वाचरितं रघूत्तमो
राजर्षिवर्यैरभिसेवितं यथा ॥

End ;

विज्ञानसारमखिलं श्रुतिसारमेकं
वेदान्तवेद्यचरणेन मयैव गीतम् ।
यः श्रद्धया परिपरिपठेद्गुरुभक्तियुक्तः
मद्रूपमेति यदि मद्वचनेषु भक्तिः ॥

Colophon :

— — —

7

Sl. No : 16607 अध्यात्मरामायणम् Ms. No : C. 3986

Beginning :

रामं दूर्वादलाभं सरसिजनयनं तप्तकौशेयवासं
व्याकुर्वन्तं मुनिभ्यो निरुपमकृपया वेदसर्वार्थतत्त्वम् ॥
आसीनं पद्मपीठे सुरगणनमितं पूर्णचन्द्रप्रसन्नं
विद्याश्रीकल्पवल्ल्या श्रुतिपथसुलभं मूलकन्दं नमामि ॥

End :

राम त्वमेव भुवनानि विधाय तेषां
संरक्षणाय सुरमानुषतिर्यगादीन् ।
देहान बिभर्षि न च देहगुणैर्विलिप्तः
त्वत्तो बिभेत्यखिलमोहकरी च माया ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे अयोध्याकण्डे आत्मरामायणे (?) उमामहेश्वर-
संवादेअयोध्याकाण्डे अत्रेराश्रयगतं नाम नवमः सर्गः । आयोध्याकाण्डस्समाप्तः ॥

8

Sl. No : 16608 अध्यात्मरामायणम् Ms. No : C. 4013

Beginning :

महादेव उवाच —

यथावद्भाषितं वाक्यं श्रुत्वा रामो हनूमतः ।
उवाचानन्तरं वाक्यं हर्षेण महता वृतः ॥

कार्यं कृतं हनुमता देवैरपि सुदुष्करम् ।
मनसापि यदन्येन स्मर्तुं शक्यं न भूतले ॥

End :

आलोड्याखिलवेदराशिमसकृद्यत्तारकब्रह्मत-
द्रामोऽविष्णुरहस्यभूतिरिति यो विज्ञाय भूतेश्वरः ।
उद्धृत्याखिलसारसंग्रहमिदं संक्षेपतः प्रस्फुरत्
श्रीरामस्य निगूढतत्त्वमखिलं प्राह प्रियायै भवः ॥

Colophon :

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवदे युद्धकण्डे श्रीरामायणस्य फल-श्रुतिर्नाम षोडशः सर्गः ॥

9

Sl. No : 16611 अध्यात्मरामायणव्याख्या Ms. No : C 509/b

Beginning :

वंशेनवंशजलधौ पूर्णः शीतकरोऽपरः ।
प्रजाह्लादकरो विष्णुः भूषणं कौस्तुभोऽपरः ॥
अत्र विष्णुभूषणत्वेन परमभक्ततया सदाभगवद्धृदयारूढताऽस्य ध्वनिता ॥

End :

अध्यात्मरामायणस्य तदध्ययनस्य कलां षोडशांशभमपि नार्हन्ति तदध्ययनानी-त्यर्थः । सर्वाध्ययनफलत्वादस्येति भावः । पठतीत्यत्र उक्तमाहात्म्याध्यायः कर्म ।

Colophon :

इति श्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्य हिम्मति-वर्मणः पुत्रस्य श्रीरामवर्मणः कृतौ अध्यात्मरामायणविवरणे सेतौ बालकाण्डे तन्माहात्म्यकथनं नाम प्रथमः सर्गः ।।

10

Sl. No : 16618 अध्यात्मरामायणमाहात्म्यम् Ms. No : P. 8926/2

Beginning :

× × × सम्यक् भासयन्तं सभागृहम् ।
मार्कण्डेयादिमुनिभिः स्तूयमानं मुहुर्मुहुः ।।
सर्वार्थगोचरज्ञानं सरस्वत्या समन्वितम् ॥

End :

बहुना किमिहोक्तेन शृणु नारद तत्त्वतः ।
× × × रामायणकलामपि ॥
अध्यात्मरामचरितस्य मुनीश्वराय
माहात्म्यमेतदुदित कमलासनेन ॥
यः श्रद्धया पठति × × × ॥

Colophon :

× × ण्डे ब्रह्मनारदसंवादे अध्यात्मरामायणमहिमानुवर्णनं नामषष्टितमोऽध्यायः ॥

II

Sl. No : 16619 अध्यात्मरामायणमाहात्म्यम् Ms. No : C. 509/a

Beginning :

अप्रमेयत्वयातीतनिर्मलज्ञानमूर्तये ।
मनोगिरां विदूराय दक्षिणामूर्तये नमः ॥
सूत उवाच—
कदाचिन्नारदो योगी परानुग्रहवाञ्छया ।
पर्यटन्सकलांल्लोकान्सत्यलोकमुपागमत् ॥
तत्र दृष्ट्वा मूर्तिमद्भिश्छन्दोभिः परिवेष्टितम् ।
बालार्कप्रभया सम्यक् भासयन्तं सभागृहम ॥

End :

अर्हन्ति नाध्यात्मरामायणकलामपि ।
अध्यात्मरामचरितस्य मुनीश्वराय
माहात्म्यमे-दु देतं कमलासनेन ।
यः श्रद्धया पठति वा शृणुयात्स मर्त्यः
प्राप्नोति विष्णुपदवीं सुरपूज्यमानः ॥

Colophon :

इति ब्रह्माण्डपुराणे उत्तरखण्डे एकषष्टितमोऽध्यायः ॥

12

Sl. No: 16623 अध्यात्मरामायणसंग्रहः Ms. No. P. 7577/2

Beginning :

य: पृथ्वीभरवारणाय सर्वैदिविजैस्सम्प्रार्थितश्चिन्मयः
सञ्जातः पृथिवीतले रघुकुले मायामनुष्योऽव्ययः ।
निश्चक्रं ह्यनराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां
कीर्तिं पापहरां विधाय जगतां श्रीजानकीशं भजे ॥

End :

तस्माद्भामिनि सङ्क्षेपाद्वक्ष्येऽहं भक्तिसाधनम् ।
सतां सङ्गतिरेवात्र साधनं प्रथमं स्मृतम् ॥
द्वितीयं मत्कथालापः तृतीयं मद्गुणे रतिः ॥

Colophon :

इत्यरण्यकाण्डे नवमस्सर्गः ॥

13

Sl. No 16631 इतिहाससमुच्चयः Ms. No : A. 188

Beginning :

मुनिं स्निग्धाम्बुदाभासं वेदव्यासमकल्मषम् ।
वेदव्यासं सरस्वत्यावासं व्यासं नमाम्यहम् ॥
कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ।
कोह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत् ॥

End :

अजममरमनेकं ध्येयमाद्यन्तशून्यं
सगुणमगुणमाद्यं स्थूलमत्यन्तसूक्ष्मम् ॥
निरुपममुपमेयं योगिभिर्ज्ञानगम्यं
त्रिभुवनगुरुमीशं त्वां प्रपन्नोऽस्मि विष्णुम् ॥
द्वात्रिंशद्भिरिहाख्यातैः सुपुण्यैः पुण्यविवर्धकैः ।
समाप्तश्चानुत्तमोऽयमितिहाससमुच्चयः ॥

Colophon :

इति श्री इतिहाससमुच्चये नारदपुण्डरीकसंवादो नाम द्वात्रिंशोऽध्यायः ॥

14

Sl- No : 16635 इतिहासोत्तमः Ms No : C. 1300

Beginning :

प्रणिपत्य जगन्नाथं नारायणमनामयम् ।
इतिहासोत्तमं पुण्यं प्रवक्ष्यामि यथातथम् ॥
इतिहासोत्तममं पुण्यं इममर्थनिषेवितम् ।
यः पठेत्प्रयतो नित्यं सोऽपि पापैः प्रमुच्यते ॥

End :

इत्यष्टादशपुराणसंक्षेपे इतिहासोत्तमे सप्तदशोऽध्यायः ॥

\+ + + + +

स्रष्टा सर्वेश्वरो विष्णुर्लोकानां द्विजसत्तम ।
स एव पूज्यस्तेनैव सृष्टिस्सञ्जायतेऽनघ ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।

Colophon :

— — —

15

Sl. No : 16638 गायत्रीरामायणम् Ms. No : P. 4001/10

Beginning :

तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिः मुनिपुङ्गम् ॥
स हत्वा राक्षसान् सर्वान् यज्ञघ्नान रघुनन्दनः ।
ऋषिभिः पूजितस्तत्र यथेन्द्रो विजयी पुरा ॥

End :

यामेव रात्रिं शत्रुघ्नः पर्णशालामुपाविशत् ।
तामेव रात्रिं सीता च प्रसूता दारकद्वयम् ॥
इदं रामायणं कृत्स्नं गायत्रीबीजसंयुतम् ।
यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥

Colophon :

इति गायत्रीरामायणं सम्पूर्णम् ॥

16

Sl. No : 16650 **जैमिनीयभारतम्** Ms. No : P. 2506/2

Beginning :

जनमेजयः—

सत्यमुक्तं महाभाग यद्राम कुशयोर्व × × ।
× क्तुमर्हसि त्वं हि श्रोतुं कौतूहलं हि मे ॥

जैमिनिः—

शृणु राजन् महाबाहो रामस्य चरितं महत् ।
विस्तरेण यथा पूर्वं वदतस्त्वं निशामय ॥

End :

हनुमान्—

मेघनादशरैर्भिन्नो मूर्च्छितो लक्ष्मणस्तथा ।
यथाह×शरैर्भिन्नो भवतीत्यतिकश्मलम् ॥
एवं वदति वीरेऽस्मिन् हनूमति महाबले ।
तथा भेरीश्च शङ्खांश्चावादयन् बहुनर्दिनः ॥

Colophon :

इति श्री जैमिनीये महाभरते आश्वमेधिकपर्वणि चतुस्त्रिंशोऽध्यायः ॥

17

Sl- No : 16651 **जैमिनीयभारतम्** Ms No : P. 3405

Beginning

जनमेजयः –

जनापवादमसहद्रामस्तत्याज जानकीम् ।
सम्पूर्णगर्भां × × × × × × × ॥
× × × × पुत्रौ यमजौ वीर्यशालिनौ ।
वाल्मीकिशिष्यौ सर्वज्ञौ सर्वास्त्रकुशलौ क्षितौ ॥

End

इत्युदीरितमाकर्ण्य जैमुनिर्मुनिसत्तमः ।
जगादाश्रमवासाख्यं पर्व पुण्यकथाश्रयम् ॥

जैमिनिः—

सीताविजयमारभ्य धृतराष्ट्रस्य भूपतेः ।
परलोकाप्तिपर्यन्तं यदुक्तं नृपसत्तम ॥
ख्यातमाश्रमवासाख्यं पर्व तत्कथयामि ते ॥

Colophon :

इति श्रीसीताविजये जैमिनिभारते आश्रमवासपर्वणि पञ्चाशोऽध्यायः ॥

18

Sl. No : 16656 ज्ञानवासिष्ठसारसंग्रहः Ms. No : P. 3312

Beginning :

ओं नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रसन्नाय दक्षिणामूर्तये नमः ॥
कटाक्षवीक्षाक्षपितशिष्यसङ्घनमस्ततिम् ।
वन्दे वन्दितमौनीन्द्रवृन्दं परशिवं गुरुम् ॥
सारस्संगृह्यते ज्ञानवासिष्ठेन भवार्दिनाम् ।
जीवन्मुक्तिसुखानन्दमकरन्दरसाश्रयः ॥

End :

असङ्कल्पः – तूष्णींभाव इति यन्नैष्कर्म्यं प्रकृतं तस्यायमुपसंहार इति सर्वं समञ्जसम् । एतच्चात्यन्तरहस्यं स्वानुभवैकवेद्यं सुखेन बोद्धुमशक्यं च । स्वगुरुकृपया सर्वं ज्ञातुं शक्यम ॥

Colophon :

इति ज्ञानवासिष्ठसारसंग्रहे × × ॥

19

Sl. No : 16657 ज्ञानवासिष्ठसारसमुच्चयः Ms. No : P. 3444

Beginning :

प्रत्यूहतिमिरव्यूहनिवारणदिवाकरम ।
महेश्वरयशस्कन्दं वन्दे गजमुखं महः ॥
नमः श्रीज्ञानवासिष्ठकर्त्रे × × नमः ॥

इह जन्मनि जगदेकबीजं भगवान् सच्चिदानन्दघनः पुरुषोत्तमः — —

End :

असौ वदन्विमुच्यते यदीप्सितं तदाचर ॥
शिवं सर्वगतं शान्तं बोधात्मकमजं शुभम् ।
तदेकभावना राम कर्मत्याग इति स्मृत: ॥

इति श्रीज्ञानवासिष्ठे वाल्मीकीये मोक्षोपाये निर्वाणाख्यायिका नाम त्रिचत्वारिंश: सर्ग: ॥

Colophon :

श्रीवाल्मीकिप्रोक्तायां शतसाहस्रिकायां ज्ञानसंहितायां श्रीवसिष्ठराघवसंवादे श्रीकाश्मीरपण्डितेनोद्धृत: सारसमुच्चय: समाप्त: ॥

20

Sl. No : 16659 तत्त्वसंग्रहरामायणम् Ms. No : P. 2024

Beginning :

शुक्लाम्बरधरं.. शान्तये ॥ योऽग्रेसर्गा..देवताम् ॥
गुरुं वाणींगणेशं च नत्वा व्यासं शिवं शिवाम् ।
वाल्मीकिं नारदादींश्च भजे रामकथाविद: ।
रामायणे पुराणेषु संहितास्वागमादिषु ।
रामतत्त्वचरित्रादौ विशेषा: सन्ति भूरिश: ॥
कुर्वे रामायणं नत्वा संग्रहाख्यं मनोरमम् ।।

End :

तत्त्वसंग्रहरामायणमिदं पार्थिव: पठेत् ।
न संशयस्तस्य रामतत्त्वे संजायते क्वचित् ॥
श्रवणान्मननादस्य तदर्थानुस्मृतेर्नर: ।
भुक्त्वेह वाञ्छितान् भोगान् मोदन्ते विष्णुमन्दिरे ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमत्स्वयंप्रकाशानन्दसरस्वती पूज्यपादशिष्य श्रीमद्ब्रह्मानन्दस्वामिविरचिते पुराणागमादिनिष्ठरामतत्त्वसंग्रहभूते तत्त्वसंग्रहरामायणे उत्तरकाण्डे रामायणपठनश्रवणमहिमानुवर्णननाम द्वाविंश:सर्ग: ॥

21

Sl- No : 16661 तत्त्वसंग्रहरामायणम् Ms No : P. 9622

Beginning

योगे सम्रादेक एवासपश्वा
देकं सन्तं वहुधा यं वदन्ति ।
यः सर्वज्ञाः सर्वगश्शन्तयेक
सं रामाख्यं देवमाद्यं भजेऽहम् ॥ (?)

× × × × ×

रामायणे पुराणेषु संहितास्वागमादिषु ।
रामतत्त्वचरित्रादौ विशेषाः सन्ति भूरिशः ।

End

तस्यागमनकार्यं किं पम्पातीरे निवेशनम् ।
बालिना प्रेरितो वापि स्वतन्त्रो वा × न क्षमः ॥
भयमस्मा × × × × ×

Colophon :

इति तत्त्वसंग्रहरामायणे अरण्यकाण्डे + + श्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपादशिष्यश्रीमद्रामब्रह्मानन्दसरस्वतीस्वामिविरचिते अरण्यकाण्डे रामनाम वैभवकथनं नाम विंशस्सर्गः ॥

22

Sl. No : 16563 तत्त्वसंग्रहरामायणम् Ms. No : B. 1259/3

Beginning :

सूतः—
साधु पृष्टं महाभागाः प्रश्नोऽयं लोकसम्मतः ।
× न्तु श्रीरामचन्द्रस्य पुनाति भुवनत्रयम् ॥

+ + + + +

योऽयं साक्षात्परब्रह्म सच्चिदानन्दविग्रहः
एकः परोऽव्ययस्साक्षी कूटस्थोऽव्यक्तसंज्ञकः ॥

End :

यदा हि यत्कार्यमुपैति किञ्चित्
उपायनं चोपहृतं महार्हम् ।
स पादुकाभ्यां प्रथमं निवेद्य
ततः परं तद्भरतो यथावत् ॥
भरते तु गते रामस्सत्यसन्धो दृढव्रतः ।
भरद्वाजान्तिकं भूयः जगाम मुनिभिस्सह ॥

Colophon :

इति श्रीतत्त्वसङ्ग्रहरामायणे अयोध्याकाण्डे भरतस्य पादुकाप्रदानरामभक्तिसाधन-कथनं नाम एकोनविंशस्सर्गः ॥

23

Sl. No : 16666 तत्त्वसंग्रहरामायणविषयसंग्रहः Ms. No : C. 3683/1

Beginning :

बालकाण्डः—

सर्वऋषिसमागमनं, सूतं प्रति ऋष्युक्तिः, तत्वसंग्रहरीतिः, सत्पुरुषलक्षणम्, श्री रामचन्द्रस्य विष्णुत्वनिरूपणं, सीतादीनां च तत्तदंशत्वनिरूपणम् ॥

End

रामायणमहिमा, रामायणस्य श्रवणेतिहासः, पारायणमहिमा, प्रतिकाण्डप्रति-सन्दर्भमहिमा । प्रतिकाण्डसन्दर्भमहिमफलश्रुतिः ॥

Colophon :

इति तत्त्वसङ्ग्रहरामायणस्थविषयसूचिका समाप्ता ॥

24

Sl. No : 16675 धर्मसारः Ms. No : P. 1090

Beginning :

वैशम्पायनः—

इत्येवं दुर्लभान् धर्मान् श्रुत्वा प्रीतो महीपतिः ।
पुनरेव शुभं वाक्यं प्रत्युवाच जगत्पतिम् ॥

श्री युधिष्ठिरः—

नमामि पुण्डरीकाक्ष वासुदेव जगत्पते ।
त्वत्पादकमलं वन्द्यं योगिनामपि दुर्लभम् ॥

End :

सर्वयज्ञफलं प्राप्य सर्वान् कामान् विजित्य च ।
कोटिवंशसमायुक्तो मम लोकं स गच्छति ॥

श्री वैशम्पायनः—

य इदं पुण्यमाख्यानं शृणोति सततं नरः ।
तस्य धर्मे स्थिरा बुद्धिः जायते धर्मजे यथाः ॥

Colophon :

इति श्री भारते आश्चर्यपर्वाणि हरिवंशे शेषधर्मे अष्टादशोऽध्याय ॥

25

Sl- No : 16676 महाभारतम् Ms. No : P. 211/4

Beginning :

युधिष्ठिरः—

गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ।
य इच्छेत् सिद्धिमास्थातुं देवतां कां यजेत सः ॥
कुतो ह्यस्य ध्रुवः स्वर्गः कुतो नैश्रेयसं पदम् ।
विधिना केन जुहुयात् दैवं पित्र्यमथापि वा ॥

End :

नमस्व हव्यदं विष्णुं तथा शरणदं नमः ।
वरदं नम कौन्तेय हव्यकव्य × × × × × ×

Colophon :

— — —

26

Sl. No : 16677 महाभारतम् Ms. No : P. 371

Beginning :

सत्यैकव्रतपारगो द्विगुणधी त्र्यर्थी चतुर्वेदिता
पञ्चस्कन्धकृती षडन्वयदृढः सप्ताङ्गसर्वंसहः ।

अष्टव्यक्तिकलाधरोन्नतनिधिः पुष्यद्दशप्रत्ययः
स्मातोछाय(?)दुरन्धरो विजयते श्रीबुक्कपृथ्वीपतिः ॥
पुराणोपपुराणेषु पुरुषार्थोपयोगिनी ।
उपदिष्टा मया राजन् कथान्ते कथयिष्यति ॥
इति प्रसाद्य राजानं सायणार्यमुदैक्षत ।
सायणार्योऽग्रजन्मत्वात्प्राह बुक्कमहीपतिम् ॥

End :

स तु वै राजते लोके ब्राह्मणो नात्र संशयः ।
भृगुणा शौनकायोक्तमिदमाख्यानमुत्तमम् ॥
यः पठेत् शृणयाद्वापि स नरः सुखमश्नुते ॥

Colophon :

इति पुरुषार्थसुधानिधावर्थस्कन्धे महाभारते अभयदानप्रशंशा नाम पञ्चदशोऽध्यायः ॥

27

Sl. No : 16679 महाभारतम् Ms. No : P. 10249/4

Beginning :

वेदव्यासोक्तसकलपुराणार्थविदुत्तमम् ।
दृष्ट्वा पौराणिकं सूतं नैमिशारण्यवासिनः ॥
प्रत्युत्थानानि विन्युक्तं पाद्यार्घ्याचमनादिभिः ।
विष्टरार्पणकल्याणवृत्तान्तैरपि पूज्य तम् ॥

End :

प्रययौ स्वाश्रमपदं सूतः पौराणिकोत्तमः ।
ऋषयो रामचरितं श्रुत्वा स्वस्थाः प्रतुष्टुवुः ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे ब्रह्मसंहितायां तारकब्रह्मकथासङ्ग्रह प्रतिपादने सीतारामपट्टाभिषेकमहोत्सवकथनं नाम त्रिंशदुत्तरशततमोऽध्यायः ॥

28

Sl- No : 16680 भरतज्यैष्ठ्यनिर्णयः Ms. No : P. 1497/5

Beginning :

लक्षिते भरतो ज्येष्ठो लक्ष्मणो वेति संशये ।
ज्यायोभिर्युक्तिरत्नैस्तज्ज्यैष्ठ्याज्यैष्ठ्यं विविच्यते ॥

तत्र तावत् लक्ष्मण एव भरतात् ज्येष्ठ इति युक्तम् । तथा हि—

End :

हा हतोऽस्मीत्यादिमहाकविवचनानामविरोध इति यत्किञ्चिदेतत् ॥

Colophon :

इति भरतज्यैष्ठ्यनिर्णयवादः ।।

29

Sl. No : 16681 भवप्रशंसा Ms. No : P. 376/5

Beginning :

गुरो वासिष्ठ सर्वज्ञ कालत्रयविदां वर ।
सर्वभूतहितार्थाय वद रामः कुतुद्गिरेः ॥
यात्रां कृत्वा महायोगी किञ्चकार हरिः स्वयम् ।
तत्सर्वं × × × वद सर्वार्थविद्वर ॥

वासिष्ठः—

रामः स्कन्दपुराद्गत्वा बृहदद्रिगतस्तदा ।

End :

ततःप्रभृति तद्रामतीर्थं स्वल्पोदकं शुभम् ।
पीत्वा स्नात्वापि दृष्ट्वैव तत्पुरस्थापितं शिवम् ॥
पूजयित्वा नरामोवैः मुच्यते नात्र संशयः ।
य इदं शृणुयाध्याय सर्वपापैः प्रमुच्यते ॥
हत्यादीन्पुग्रपापानि नश्यन्त्यस्मिन् कलौ युगे ।

Colophon :

इति श्रीमद्रामायणे शतसाहस्रिकायां भवप्रशंसायां त्रिपञ्चाशोध्यायः ॥

30

Sl. No : 16683 भारतसावित्री Ms. No : P. 905/6

Beginning :

रणयज्ञेन यज्ञेन दीक्षितो धर्मनन्दनः ।
वेदिं कृत्वा कुरुक्षेत्रं यूपं कृत्वा जनार्दनम् ॥
दुर्योधनं पशुं कृत्वा भीष्मद्रोणौ महाहवे ।
पाञ्चालीमरणिं कृत्वा वह्निं कृत्वा वृकोदरम् ॥

End :

होतारमर्जुनं कृत्वा घृतं स्यात् सूर्यनन्दनः ।
गाण्डीवं सुकृस्रुवं कृत्वा हूयमानेषु राजसु ॥
एवं भूतं महायज्ञं कृष्णेन समजायत ॥

Colophon ;

इति भारतसावित्र्यां व्यासः ॥

31

Sl. No : 16684 भारतसावित्री Ms. No : P. 947/2

Beginning :

मुनिं स्निग्धाम्बुजाभासं वेदव्यासमकल्मषम् ।
वेदावासं सरस्वत्यावासं व्यासं नमाम्यहम् ॥

सञ्जय उवाच—

द्वारवत्यां स्थितं कृष्णं चिन्तयामास पार्थिवः ।

End :

द्यूने स्त्रीहरणं वने विहरणं संधिक्रियाजृम्भणं
पश्चाद्भीष्मसुयोधनादिहरणं एतन्महाभारतम् ॥

Colophon :

इति श्रीशतसाहस्रसंहितायां वैयासिक्यां स्वर्गारोहणपर्वणि भारतसावित्रीस्तोत्रं सम्पूर्णम् ॥

32

Sl- No : 16685 **भारतसावित्री** Ms. No : P. 7637/4

Beginning :

प्रणम्य परमात्मानं पूर्णानन्दाद्वयं हरिम् ।
पुण्यां भारतसावित्रीं प्रवक्ष्याम्यनुपूर्वशः ॥
सूत उवाच—
द्विजः प्रातः समुत्थाय नत्वा गुरुपरम्पराम् ।
पठेद्भारतसावित्रीं सर्ववेदफलप्रदाम् ॥

End :

पठन् भारतसावित्रीं वाञ्छितार्थमवाप्नुयात् ।
आयुष्यमारोग्यमनन्तसौख्यं
विद्यां घनं कीर्तिमुदारपुण्यम् ।
आनृण्यमिष्टार्थमघापनोदं
व्यासः प्रमादात् कुरुते कुलं च ॥
व्यासःकृष्णोऽर्जुनः कृष्णः कृष्णा च द्रौपदी मता ।
कृष्णानुस्मरणं तस्मान्मङ्गलानां च मङ्गलम् ॥

Colophon :

हरिः ओं तत्सदिति श्री भारतसावित्र्यां पञ्चमोऽध्यायः ॥

33

Sl. No : 16686 **भारतसावित्री** Ms. No : C. 3640

Beginning :

महर्षिर्भगवान् व्यासः कृत्वेमां संहितां पुरा ।
श्लोकैश्चतुर्भिर्धर्मात्मा पुत्रमध्यापयेत् शुकम् ॥
पितृमातृसहस्राणि पुत्रदारशतानि च ।
संसारे त्वनुभूतानि याता यास्यन्ति चापरे ॥

End :

इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् ।
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ॥

Colophon :

इति चतुश्श्लोकीभारतं सम्पूर्णम् ॥

34

Sl. No : 16694 महाभारतम् Ms. No : c. 535/2

Beginning :

रामायणद्रुमं नौमि रामरक्षानवाङ्कुरम् ।
गायत्रीबीजमाम्नायमूलं मोक्षमहाफलम् ॥

अत्र रामरक्षाया रामायणद्रुमाङ्कुरत्वं स्पष्टमवगम्यते । तत्स्थाने राघवादि-पदानां क्रमेण रामायणार्थसूचकत्वात् ।

End :

नावा न नौकया यथा क्षोदुः महादुदः । (?)
आक्रम्यते . . . . . . इति दर्शितम् ।
लक्ष्मणार्थपरतां . . . . . . प्रमोदताम् ।
श्रीरामरक्षाव्याख्यानं मन्त्ररामायणाभिधम् ।
व्याख्यातं राघवस्तेन प्रीयतां करुणानिधिः ॥
दर्शितः सीताया ध्यायं (?) वेदारण्ये निरध्वनि ।
सन्तो विपुलयन्त्वेनं यास्कभाष्यानुयायिनः ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणज्ञमर्यादादुरंधरचतुर्धरवंशावतंसगोविन्दसूरिसूनोः श्री नीलकण्ठस्य कृतौ स्वोद्धृतमन्त्ररामायणव्याख्या मन्त्ररहस्यप्रकाशिकाख्या समाप्तिमगमत् ॥

35

Sl. No: 166700 महाभारतम् Ms. No: P. 1427

Beginning :

श्रीवैशम्पायन उवाच—

कृत्वोदकं ते सुहृदां सर्वेषां पाण्डुनन्दनाः ।
विदुरो धृतराष्ट्रश्च सर्वाश्च भरतस्त्रियः ॥
तत्र ते तु महात्मानो न्यवसन् कुरुनन्दनाः ।
शौचं निवर्तयिष्यन्तो मासमात्रं बहिः पुरात् ॥

End :

इति जन्मगतिश्चैव शुकस्य भरतर्षभ ।
विस्तरेण मया ख्यातं यन्मां त्वं परिपृच्छसि ॥
एतदाचष्ट मे राजन देवर्षिर्नारदः पुरा ।
व्यासश्चैव महायोगी सज्जल्पेषु पदे पदे ॥

Colophon :

इति श्री महाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां शान्तिपर्वणि मोक्षधर्मे सप्तम्युत्तरशततमोऽध्यायः । शान्तिपर्व समाप्तम् ।

36

Sl. No : 16701 महाभारतम् Ms. No : P. 1340

Beginning :

जनमेजयः —
अर्जुनो जयतां श्रेष्ठो मोक्षयित्वा मयं तदा ।
किं चकार महातेजाः तन्मे ब्रूहि द्विजोत्तम ॥
वैशम्पायनः —
शृणु राजन् अवहितश्चरितं पूर्वकस्य ते ।
मोक्षयित्वा मयं तत्र पार्थः शस्त्रभृतां वरः ॥

End :

तस्य ते शम एवास्तु पाण्डवैर्भरतर्षभ ।
उभयोः पक्षयोर्युक्तं क्रियतामविशङ्कया ॥
एव गावल्गणे क्षत्तः धर्मार्थसहितं वचः ।
उक्तवान्न गृहीतं च मया पुत्रहितैषुणा ॥

Colophon ;

इति श्री महाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां सभापर्वणि धृतराष्ट्रानुतापो नाम विंशत्युत्तरशततमोऽध्यायः ॥
सभापर्व समाप्तम् ॥

37

Sl. No : 16712 महाभारतम् Ms. No : P. 2047

Beginning: :

वैशम्पायन उवाच—

× प्राप्य भारत × × × × ।
× × घोरं सूतपुत्रस्य पाण्डवैः ॥
× पुरं प्रपद्यैव संजयो राजसत्तमः ।
अश्रुकण्ठो भृशं त्रस्तः राजा × वान् ॥

End :

कुरुक्षेत्रं तु तत्सर्वं शून्यमासीन्महीपते ।
निहतैः पाण्डवैः × राष्ट्रैश्च संशयः ॥
× ज्ञविषयं वृत्तं धार्तराष्ट्रस्य संनयेत् ।
निवेदयत तत्सर्वं यथावृत्तं यथाविधि ।
इदं महायुद्धमिदं महात्मानो धनञ्जय ॥
× × × × ×

Colophon :

इति श्रीमन्महाभारते × कर्णपर्व समाप्तम् ॥

38

Sl. No : 16715 महाभारतम् Ms. No : P. 2123

Beginning :

जनमेजयः—

कथं विराटनगरे मम पूर्वपितामहाः ।
अज्ञातवासमुषिता दुर्योधनभयार्दिताः ॥
× × ×

वैशम्पायनः—

तथा तु स वरान् लब्ध्वा धर्मराजो युधिष्ठिरः ।
गत्वा सभां ब्राह्मणेभ्यो ह्याचख्यौ वृत्तमात्मनः ॥

End :

जनमेजयः—

वृत्ते विवाहे धर्मात्मा यदुवाच युधिष्ठिरः ।
सुहृद्भिस्सहितस्सर्वैः बहून् कृच्छ्रानचिन्तयत् ॥

\+ + + +

द्रुपदश्च तथा पुत्रैः कृतवान् किं महाबलः ।
तत्सर्वं कथयस्वेह कृतवान् किं यदूत्तमः ॥

Colophon :

इति श्रीमहाभारते शतसाहस्रसंहितायां वैय्यासिक्यां विराटपर्वणि अभिमन्यु-विवाहो नाम सप्तसप्ततितमोऽध्यायः ॥

39

Sl. No : 16716 महाभारतम् Ms. No : P. 2131

Beginning :

धृतराष्ट्र × × × राजा शोकव्याकुललोचनः ।
किमचेष्टत विप्रर्षे हते पितरि वीर्यवान् ॥
तस्य पुत्रो हि भगवान् भीष्मद्रोणमुखा × × ।
राजन्यमहेष्वासान् पाण्डवान् राज्यमिच्छति ॥ (?)

\+ + + + +

End :

अधीते यत्फलं वेदे तदस्मिन्नपि पर्वणि ।
क्षत्रियाणां कुलीनानां युक्तमत्र मह × × ॥
पठेदिमं पर्व महार्थयुक्तं रणे जयं पाण्डववृष्णिसिंहयाः ।
सदाऽशुभघ्नं शृणुयाच्च तत्परः प्रमुच्यते पापकृतैः स्वकर्मभिः ॥

\+ + + + +

अत्राध्यायद्विशतकमध्यायद्वयसंयुतम् ।
नवश्लोक × नवश्लोकशतानि च ॥
श्लोका नव तथाऽशीतिसङ्ख्याता तत्त्वबुद्धिभिः ॥

Colophon :

इति श्रीमन्महाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां श्रीमति द्रोण पर्वणि शतरुद्रीयनिरूपणं नाम द्व्युत्तरद्विशततमोऽध्यायः । द्रोणपर्व समाप्तम् ।।

40

Sl. No : 16718 महाभारतम् Ms. No : P. 2133

Beginning :

जनमेजय :—

कथं युयुधिरे वीराः कुरुपाण्डवसोमकाः ।
पार्थिवाश्च महात्मानो नानादेशसमागताः ।।
निवेशं चक्रिरे योद्धुं तन्मे शंस महामते ।

वैशम्पायनः—

यथा युयुधिरे वीराः कुरुपाण्डवसोमकाः ।
कुरुक्षेत्रे तपःक्षेत्रे शृणु तत्पृथिवीपते ।।

End :

श्रद्धावन्तश्च ये चापि श्रोष्यन्ति मनुजा भुवि ।
विधूय सर्वपापानि विहायान्ते कलेबरम ।।
प्रयन्ति तत्पदं विष्णोः यत्प्राप्य न निवर्तते ।
तस्मात्सर्वप्रयत्नेन भारतं भरतर्षभ ।
शृणुयात्सिद्धिमन्विच्छन्निह चामुत्र मानवः ।।

Colophon :

इति श्री महाभारते शतसाहस्रकायां संहितायां वैयासिक्यां श्रीभीष्मपर्वणि कर्णभीष्मसंवादो नामाष्टादशशततमोऽध्यायः ।।

41

Sl. No : 16720 महाभारतम् Ms. No : P. 2167

Beginning :

श्रीवैशम्पायन उवाच—

शिबिरात् हस्ति पुरं प्राप्य भरत सञ्जयः ।
प्रविवेश महाप्रज्ञो धृतराष्ट्रनिवेशनम् ।।

शोकेनोपहतः सूतः विह्वलो भृशदुःखितः ।
चिन्तयन् निधनं घोरं सूतपुत्रस्य पाण्डवैः ॥

End :

स ताभिः सह धर्मात्मा प्रेतकार्यमनन्तरम् ।
सर्वं चकार कर्णस्य विधिवद्भूरिदक्षिणः ॥
स राजा धृतराष्ट्रश्च कृत्वा जलमतन्द्रितः ।
समुत्ततार गङ्गायां भार्यया सह भारत ॥

Colophon :

इति श्रीमन्महाभारते शतसाहस्रिकायां वैयासिक्यां संहितायां स्त्रीपर्वणि कर्णजन्मावबोधनं नाम सप्तविंशोऽध्यायः ॥

42

Sl. No : 16723 महाभारतम् Ms- No:P. 2220

Beginning :

श्रीवैशम्पायन उवाच—
कृतोदकं तु राजानं धृतराष्ट्रं युधिष्ठिरः ।
पुरस्कृत्य महाबाहुरुत्तताराकुलेन्द्रियः ॥
उत्तीर्य च महीपालो बाष्पपर्याकुलेक्षणः ।
पपात तीरे गङ्गायाः व्याधविद्ध इव द्विपः ॥

End :

× × × प्रातरुत्थाय यः पठेत् ।
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ।
यथा समुद्रो भगवान् यथा च हिमवान् गिरिः ॥
ख्यातावुभौ रत्ननिधी तथा भारतमुच्यते ।
कृत्स्नं वेदफलं विद्वान् श्रावयेत् × × ॥
इदं भारतमाख्यानं यः पठेत् सुसमाहितः ।
स गच्छेत् परमां सिद्धिमिति ते नात्र संशयः ॥

Colophon :

इति श्रीमहाभारते शतसहस्र्यां संहितायां वैयासिक्यां स्वर्गारोहणिके पर्वणि × × × ध्यायः × ॥

43

Sl. No : 16726 | महाभारतम् | Ms. No : P. 2390

Beginning :

वैशम्पायनः—

कृत्वा विवाहं तु कुरुप्रवीराः
तदाभिमन्यो × × × पक्षाः ।
विश्रम्य चत्वार्युषसप्रतीताः
सभा तु सा मत्स्यपतेस्समृद्धा ॥
मणिप्रवेकोज्वलरत्नचित्राः
न्यस्तासना माल्यवती सुगन्धाः
तामभ्ययुस्ते नरदेववर्य × × ॥

End :

ततोऽन्ये गणशः पश्चात् सहस्रं शतशो नराः ।
नदन्तः प्रययुस्तेषां अनीकानि सहस्रशः ॥
शङ्खभेरिसहस्राणि शङ्खानामयुतानि च ।
वादयन्ति स्म संहृष्टाः सहस्रशतशो नराः ॥

Colophon :

इति श्रीमहाभारते शतसाहस्रिकायां वैयासिक्यां उद्योगपर्वणि अष्टनवत्युचरशततमोऽध्यायः ॥ उद्योगपर्व सम्पूर्णम् ॥

44

Sl. No : 16736 | महाभारतम् | Ms. No : P. 2448

Beginning :

जनमेजय उवाच—

एवं निपातिते कर्णे समरे सव्यसाचिना ।
अल्पावशिष्टाः कुरवः किमकुर्वन वै द्विज ॥
वीदीर्यमाणं च बलं दृष्ट्वा राजा सुयोधनः ।
पां+वं प्राप्तकालं तं प्रत्यपद्यन कौरवः ॥

End :

दुर्योधनोऽपि राजेन्द्र शोणितौघपरिप्लुतः ।
तां दिशं प्रति सं× दे सर्वभूतभयावहम् ॥
अपक्रम्य तु ते तूर्णं तस्मादायोधनान्नृप ।
शोकसन्तप्तमनसः चिन्तामापेदिरे भृशम् ॥

Colophon :

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां गदापर्वणि एकादशोऽध्यायः ।
गदापर्वः समाप्तः ।। (i)

45

Sl. No : 16743 महाभारतम् Ms. No : P. 2457

Beginning :

जनमेजयः —

मुनीन्द्र × × श्चार्य्यं श्रुतं × नो मया ।
ख्यातिस्त्रयाणां लोकानां कृता देवेन धीमता ॥
निकुम्भस्य हतं देहं द्वितीयं चक्रपाणिना ।
यदर्थं च यदा चैव तद्भवान् वक्तुमर्हति ।।

End :

आत्मनो भावनिर्वृत्तेः भावे कृतयुगे तथा ।
जनित्री सर्वभूतानां अण्डजानां तथोद्भिदाम् ।।
निनिन्द जननी धात्री चेति मात्रा प्रचोदिता ।
अणुना तनुना चैव जन्तूनां कर्मभागिनाम् ॥

Colophon :

इति श्रीहरिवंशे त्रिंशाधिकशततमोऽध्यायः ।।

46

Sl. No : 16745 महाभारतम् Ms. No : P. 2470

Beginning :

जनमेजय उवाच—

राज्यं प्राप्य नरव्याघ्र पितृपैतामहं महत् ।
कथमासन् महाराजे धृतराष्ट्रे महात्मनि ॥

स हि राजा सहामात्यः हतपुत्रो निराश्रयः ।
कथमासीद्धतैश्वर्यः गान्धारी च यशस्विनी ॥

End :

एतद्विदित्वा सर्वं तु सर्ववेदार्थविद्भवेत् ।
वन्दनीयश्च सततं माननीयो भवेद्द्विजः ॥
एतत्सर्वमशेषेण शौनकाद्यास्तु नैमिशे ।
सूतं संपूजयामासुः वाक्यैः मधुरसहितैः ॥
एतं समाप्य सत्रं ते हृष्टाः समभवन् भृशम् ।

Colophon :

इति श्रीमहाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां श्रीस्वर्गारोहण पर्वणि पञ्चमोऽध्यायः ॥

47

Sl· No :16783 महाभारतम् Ms. No : P·3118

Beginning :

श्रीवैशम्पायन उवाच—

कृतोदकस्तु राजानं धृतराष्ट्रं युधिष्ठिरः ।
पुरस्कृत्य महाबाहुः उत्तताराकुलेन्द्रियः ॥
उत्तीर्य च महीपालः बाष्पव्याकुललोचनः ।
पपात तीरे गङ्गायाः व्याधविद्ध इव द्विप ॥

End :

एवमुक्तं पुरा वृत्तं वैष्णवं धर्मशासनम् ।
मया ते कथितं राजन् पवित्रं पापनाशनम् ॥
तच्छृणुष्व महाराज विष्णुप्रोक्तं कुरूद्वह ।
तेन गच्छसि नान्येन तद्विष्णोः परमं पदम् ॥

Colophon :

इति श्रीमन्महाभारते — — — आश्वमेधिके पर्वणि पञ्चाधिकशततमोऽध्यायः ॥

48

Sl. No : 16822 महाभारतम् Ms. No : P. 7476/2

Beginning :

ಶ್ರೀಗೌರೀ ಪಲ್ಲವಿ ಪುಟ ॥
ಯೋಗಾಶ್ರಯಮಜಂರೀ ಸಮುಜ್ವಲ ಮೂರ್ತಿ.
ಯೋಗೀಂದ್ರ ಸಂತತಾಂತ
ರ್ಯಾಗಮುಪರಿಪಾಕರೂಪಹರನ್ಮಥಾಂದೇವಾ ವೈಶಂಪಾಯ
ನುಂಡು ಜನಮೇಜಯುನಕಿ × × ×

End :

ಸಮರ್ಪಿಂಚಿ ಯತ್ಪುಂಡರೀಕಾಕ್ಷುಚರಣಾರ
ವಿಂದಂಬುಲಾತ್ಮುಚುನಾ
ನಂದಬಾಷ್ಪಪೂರಂ ಚುಲುಗಾರೋಮಾಂಚುಕಂಚುಕಿತ ಶರೀ
ರುಂಡುಗುಚುತನನರತ - - -

Colophon :

— — —

49

Sl. No : 16823 महाभारतम् Ms. No : P. 7632

Beginning :

ಸ್ತ್ರೀಪರ್ವಂ —
ಶ್ರೀಸಾಂಗತ್ಮವಿಧಾಯಿ ವಿಕಾಸೋ
ಲ್ಲಸಿತಕಟಾಕ್ಷಕರುಣಾಮುಯುಮೂರ್ತಿಸಾರಬೋಧ ಚರಿತ .
ವ್ಯಾಸಾದಿ ಮನೋ ನಿವಾಸ ಪರಿಹರನಾಥಾ ॥ಕ॥
ದೇವಾಜನಮೇಜಯು

End :

ಅಮಿತವೈ ಭವ ಲೋಭವೋಹ ಭಯಾದಿದುರ್ಲಭಮಂದು ವಿ
ಭ್ರಮವಿಕಾಸಿ ವಿಲಾಸಿನಿ ಜನ ಪಂಚಬಾಣಾನಿರಂತರಾ .
ನಮದಶೆಷನೃಪಾಲ ಮೌಳಿಪಿನದ್ಧ ಮುಗ್ಧಮಣಿ ಪ್ರಭಾ
ಕ್ರಮುಸಮರ್ಚಿತ ವಿಸ್ಫುರದ್ರತ್ನಕಾಂತಿನಿರ್ಗತ ಪಂಕಜಾ .

Colophon :

ಇತಿ ಶ್ರೀ ಸಕಲಸುಕವಿಜನವಿನುತ ನನ್ನಯಭಟ್ಟ ಪ್ರಣೀತಂಬೈನ ಮಹಾ
ಭಾರತಂ ಬುನಂದು ಶ್ರೀಮದಾರಣ್ಯ ಪರ್ವಂಬುನಂ ಆಪ್ತಮಾಶ್ವಾಸಂ ॥

50

Sl. No : 16824 **महाभारतम्** Ms. No : P. 7633

Beginning :

ಶಲ್ಯಪರ್ವಂ —
ಶ್ರೀ ಗಿರಿಜಾ ಸಮುದಾಯುಂದುಹಾಗುರುತ್ತಾ
ಶುಭಗಸಂಪದಾಲಂಬ ಸದಾ
ಯೋಗಿಜನಕ್ಷೇಮ ಸಮೋಹಾಗರ್ಭೇತದಿವ್ಯ ಚಿತ್ತಪರಿಪರ
ನಾಥಾದಿಕಂ ದೇವಾ ಜನಮೇಜಯ ಧರಿತ್ರೀವಲ್ಲಭುಡು

End :

ಶಿರಂಬುನ್‌ತದ್ಗಾತ್ರಮುಂಬಾಪೆವಿಲನ್ ಅಟ್ಲು ನಕುಲಸೂನುಂಡು
ಸಮಾಪಿನಾಂತು ಶ್ರುತಸೇನುಂಡ ಪಡುಕೋಪ
ಸ್ಫುರಣದರುಣ ಮರೀಚುಂದಲಿರ್ಪಂ ಗಜಕ್ಷುಂದ್ರಿತಯುಂಬುಗ್ರಂಬುನ
ಬೋಂದಿನ ಚೆಲುವಮು ಸಂದೀಪ್ತಘೋರಂಬುಗಾಬಿ—

Colophon :

— — —

51

Sl. No : 16841 **महाभारतम्** Ms. No : A. 506/a

Beginning :

नारायणं + + जयमुदीरयेत् ॥
जनयेजय उवाच—
एवं द्यूतजिताः पार्थ कोपिताश्च दुरात्मभिः ।
धार्तराष्ट्रैस्सहामात्यैः निकृत्या द्विजसत्तम ॥

End :

भृत्यान् सुतान् संविभज्य ततो व्रज यथेप्सितम् ।
एष वै परमो धर्मः धर्मविद्भिरुदाहृतः ॥
अत्रिरुवाच —
कथितो मे महाभागे गौतमेन महात्मना ।
वैन्यो धर्मार्थसंयुक्तः सत्यव्रतसमन्वितः ॥

Colophon :

इत्यारण्यके पर्वणि मार्कण्डेयसमस्यायां चतुरशीत्यधिकशततमोऽध्यायः ॥

52

Sl. No: 16935 **महाभारतकथासंग्रहरत्नमालिका** Ms. No: C. 2307

Beginning:

रमाया रमणं व्यासं पूर्णप्रज्ञगुरूनपि ।
वैशम्पायनसूतौ च सञ्जयं च नमाम्यहम् ॥
भारते याः कथाः प्रोक्ताः सङ्ग्रहेण वदामि ताः ।
भारतेऽहं करिष्यामि कथासङ्ग्रहमालिकाम् ॥

End:

न × ता व्यासदेवस्य भक्तिप्रीत्यर्थमेव च ।
महाभारतसम्प्रोक्तकथारत्नसुमालिका ॥
वनमालेव मालेव गुम्भिता शान्तसूनुना ।
वेदव्यासस्य सुग्रीवे भाजतां च विराजताम् ॥

Colophon:

भारतकथासङ्ग्रहरत्नमालिका समाप्ता ॥

53

Sl. No: 16938 **महाभारतव्याख्या** Ms. No: A. 125/1b

Beginning:

कृतोदकास्ते सुहृदामित्यादेर्युधिष्ठिरः प्रीतमना बभूव, जनमेजयेनेत्यन्तस्य शान्तिपर्वाद्यराजधर्मस्य ग्रन्थस्य सोपायधर्मकामाख्यास्त्रिवर्गास्तात्पर्यार्थः । कृतोदकाः – कृतप्रेततर्पणाः । शौचं निवर्तयिष्यन्तः निवर्तयितुम् ।

End:

नोभौ संभवत इत्यत्र उभौ एकस्मिन् शुभकर्मणि दोषादोषौ न संभवतः । समुद्रोदके ईषदिङ्गुसमेलने तत्परिमलो यथा नास्ति, एवं बहुतरपुण्यानुकूलेषत्पापं पुण्यमेव । ईषदपि दोषो नास्तीत्यर्थः । धर्मस्संशब्दतो राज्ञामित्यत्र राज्ञां धर्म एव समीचीन इति शब्दतः आपद्धर्मः । अतः धर्माद्यन्यथा ॥ यथा नास्तिक्यः तथा । धरा ४२ । बलवतः पूर्वोत्तरदशाबलवतः ५२ ॥

Colophon:

इति शान्तौ रा०टीकायां मिश्रीये १३४ अध्यायः । मिश्रटीकायां राजधर्मः समाप्तः ॥

54

Sl. No : 16914 महाभारतव्याख्या Ms. No : C. 1350/2

Beginning :

नत्वा जगद्गुरुं नम्यं व्यासं पितरमेव च ।
क्रियतेऽर्जुनमिश्रेण मोक्षधर्मार्थदीपिका ॥

राजधर्मश्रवणजातहर्षः परमधर्मिष्ठो राजा युधिष्ठिरः आश्रमिणां — —
. . . . . अलङ्कृतवान् ॥

End :

. . समत्वे यत्नः कार्यः इति उपदेशोऽपि मुमुक्षुमुञ्छवृत्तिक × मात्ता दुत्पन्नतत्त्वज्ञानं प्रतीत्याशयः । उपदिष्टपरम्पराकथनं युधिष्ठिरस्य श्रद्धा दार्ढ्यार्थम् । तदर्थानुष्ठानद्वारा परमश्रेयोर्थमिति सूचितम् ॥

Colophon :

इति भारताचार्यपाठकराजश्रीमदीशानतनयस्य श्रीसप्त × न श्रीमानदत्ता श्रयस्य भारताचार्यश्रीमदर्जुनमिश्रकृतौ महाभारतार्थदीपिकायां शान्तिपर्वणि मोक्षधर्मे उञ्छवृत्त्युपाख्यानं समाप्तम् ॥

प्रागुपायस्य . . . . . धर्मार्थदीपिका ॥

55

Sl. No : 16942 महाभारतव्याख्या Ms. No ; C. 1392/2

Beginning :

अगुणोऽपि रजः समुपाश्रितः
सृजति सत्वमयो ह्यखिलं जगत् ।
तमुपेत्य नयत्यपि संक्षयं
तम × × × मीश्वरमाश्रये ॥
विराटपर्वतात्पर्यप्रकाशनपटीयसी ।
श्रीमदर्जुनमिश्राणामियं जयति भारती ॥

इदानीं क्रमप्राप्तमज्ञातवासवृत्तान्तावच्छिन्नं चतुर्थपर्वोपक्रमते—कथमिति ।

End :

गोवृषो भोगे श्रेष्ठः गोश्रेष्ठः तस्येवाक्षिकिस्य स तथा । वृषभे श्रेष्ठगोरिति मेदिनीकारः । गोवृषमेक्षणइत्यर्थः । घण्टरमावकशीघ्रं रहस्ति × × पटहवाद को नरधेटा माणवकः नामा भृत्यः ॥ (?)

Colophon :

— — —

56

Sl. No : 16943 महाभारतव्याख्या Ms. No : C. 3042/2

Beginning :

स्वबोधानन्द.........कृष्णाय मुनये नमः ।

देवबोधमुनिर्जीयात्.......स्थानदारिणः ॥

ततो द्रोणे हते राजन् इत्यादेरस्मात् शल्यपर्व भविष्यतीत्यन्तस्य कर्णपर्वणः —

End :

गोसुप्रभम्–सूर्यप्रभम् । गोशब्देन इन्द्रेण गोभिस्तेजोवद्भिः पूरितं तस्य मर्दनः । अर्जुनः गोगतकं भूतं मुकुटं दृष्ट्वा मृत्योर्वशमप्राप्य ययौ ॥

Colophon :

— — —

57

Sl. No : 16944 महाभारतव्याख्या Ms. No : C. 2268

Beginning :

पूर्वानुभूनां स्त्रियं स्वपत्नीं अवमत्यान्ते पृथक् शयनादिकं कुर्वन्ति । कृतार्थाः कृतप्रयोजनाः पुरुषाः प्रयोजनं तमेव कार्यं पुनः कर्तुं पूर्ववत्प्रयत्नं कुर्वन्ति । परिज्ञाततत्स्वरूपत्वात ॥

End :

परापवादे निरताः परदुःखोदयेषु × × कलहं × × पदस्य विरोधेन य × × सततोत्थिताः इदानीं त्वया सह सर्वे त्वदीयाः स्वभावत एव परमदुर्जना × × त्वां × × दापयितुं दुर्जन × × षड्गुणानांनपादश × परापवादीति ॥

Colophon :

नवरत्नरामाचार्यविरचितायां नवमः ॥

58

Sl. No : 16945 | महाभारतव्याख्या | Ms. No : P. 147

Beginning :

यद्वक्त्रं मुकुरा . . . वेन्द्रियमनोमायाः परामृश्यता
निन्युस्तद्भुवि चादिनापि च विराट्सूत्रीशभावं गतम् ।
तं प्रत्यग्दृगदृश्यमक्षरमणुं त्यक्तोपनेत्रत्रयं
श्रीगोपालमुपास्महे श्रुतिशिरोवंशीरवेर्दर्शितम् ॥

× × × × ×

इह खलु भगवान् पाराशर्यः परमकारुणिको मन्दमध्यममतीननुग्रहीतुं + + शिक्षायै श्लोकरूपेण + + + दर्शयति—नारायणमिति ॥

End :

सन्ध्यायां भारतं पठनीयमित्युक्तम् । तत्र पठनयोग्यं भारतसारसंग्रहं चतुश्लोकीरूपेणाह ॥

Colophon :

इत्युद्योगर्वणि भारतभावदीपे स्वर्गारोहणं समाप्तम् ॥

59

Sl. No : 16946 | महाभारतव्याख्या | Ms. No : P. 2786

Beginning :

बीजाङ्कुरद्रुमसमेश × विश्वान्
मोक्षाय चिन्तयत पूर्णमभेदबुद्ध्या ।
शस्याय बीजशतगर्भफलाभमेकं
गोपालमेव कलयाम जगन्निदानम् ॥
प्राचां गुरूणां हृदयानुरूपं
कुर्मः सभापर्वणि तत्त्वदीपम् ॥

End :

व्यासे श्रद्धां बद्ध्वा भारतं अध्येतव्यमित्यर्थः । सन्ध्यायां भारतं पठनीय मित्युक्तम् । तत्र पठनयोग्यं भारतसारसङ्ग्रहं चतुःश्लोकीरूपमाह—मामेति ।

Colophon :

इति भारतभावदीपे स्वर्गारोहणं समाप्तम ॥

60

Sl. N : 16948

महाभारतव्याख्या

Ms. No : A. 504/2

Beginning :

यद्वक्त्रं मुकुराहवेन्द्रियमनोमायाः पराग्दश्यतां
निन्युस्तद्भुवि मादिनापि च विराट्सूत्रेशभावं गतम् ।
तं प्रत्यग्दगदश्यमक्षरमणुं त्यक्तोपेनेत्रत्रयं
श्री गोपालमुपास्महे श्रुतिशिरोवंशीरवैर्दर्शितम् ॥

+ + + + +

पूर्वान् समाहृत्य विभिन्नदेश्यान्
कोशान्विनिश्चित्य च पाठमग्र्यम् ।
प्राचां गुरूणामनुसृत्य वाच-
मारभ्यते भारतभावदीपः ॥

End :

अतः स्त्रीणां आप्तो नास्तीत्याह–न हीति ॥ कारबं भर्तृशुश्रूषा . . . . . मातुर्धर्मज्ञतां वचः मातुर्वः युष्मत्सम्बन्धितया धर्मज्ञतां युष्मदीयं परमधर्मज्ञानं मातुरस्तीति विज्ञायेत्यर्थः । ब्रह्म वेदान्तप्रसिद्धम् ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणमर्यादाधुरन्धरचतुर्धरवंशावतंस गोविन्दसूरिसूनोः श्रीनीलकण्ठस्य कृतौ भारतभावदीपे आदिपर्वणि खाण्डवदाहार्थ प्रकाशो नाम चतुस्त्रिंशदुत्तरद्विशततमोऽध्यायः ॥

61

Sl. No : 16949

महाभारतव्याख्या

Ms. No : A. 505/1b

Beginnig :

बीजाङ्कुरद्रुममभेश्वरस्थलविश्वान्
मोक्षाय चिन्तयत यूयमभेदबुध्या ।
दास्याय बीजघनगर्भफलाभमेकं
गोपालमेव कलयाम जगन्निदानम् ॥

जीवे भुजिः स्वपरसृष्टवपुर्युजेव
यत्रेशता परधिया निजमायया वा ।
सृष्टैरुपाधिभिरसङ्गचितावपीष्टा
तस्मिन्ममास्तु रतिरात्मनि लक्ष्मणार्ये ॥
प्रणम्य नारायणतीर्थवर्यान्
धरेशमिश्रांश्च हमीरपुर्यान् ।
प्राचां गुरूणां हृदयानुरूपं
कुर्मस्सभापर्वणि भावदीपम् ॥

तत्र पूर्वस्मिन् पर्वणि अन्ते शार्ङ्गकाः ज्ञानबलादेव वह्निमुखाद्विमुक्ता इत्युक्तम् । तच्च ज्ञानं भगवद्भक्तिबलादेव लभ्यत इति प्रतिपादनायेदं सभापर्व आरभ्यते ॥

End :

निष्ठानकः प्रलयदुन्दुभिश्चण्डवात इत्यर्थः । निषातक इति पाठेऽपि स एवार्थः । निर्हृतः वज्रशब्दः ॥ शिवाः सृगालाः ॥ अनुज्ञातवान् । अडभाव आर्षः । पाठान्तरे तु सुगमम् ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरन्धर चतुर्धरवंशावतंस श्रीगोविन्दसूरिसूनु श्रीनीलकण्ठविरचितभावदीपे सभापर्वार्थप्रकाशः समाप्तः ॥

62

Sl. No : 16950 महाभारतव्याख्या Ms. No : A. 506/b

Beginning :

अज्ञानतिमिरान्धस्य + श्रीगुरवे नमः ॥
यो देवो मुनिनिचयक्षुधा क्षुधावान्
यत्तृष्णा मुनिनिवहोऽपि तृप्तिमाप ।
तस्यैवं निजजगदन्तरात्मभावं
व्याकर्तुः पद्ममुपयामि गोपसूनोः ॥ + +
प्रणम्य नारायणतीर्थवर्यान्
धरेशमिश्रांश्च हमीरपुर्यान् ॥

कुर्मो गुरुणां हृदयानुरूपम्
आरण्यके पर्वणि भावदीपम् ॥

End :

अनधीत्यद्विजो वेदाननुत्पाद्य सुतानपि।
अनिष्ट्वा विधिवद्यज्ञैः मोक्षमिच्छन् व्रजत्यधः ॥इति विवदद्भिः ।
शुनां दशसहस्राणि नित्यं वहति सानिकः । + +
मनुवाक्यादेव राजप्रतिग्रहदोषं जानंस्तत्र विघ्नमुपन्यस्यति-कथित इत्यादिना ॥

Colophon :

— — —

63

Sl. No : 16951 महाभारतव्याख्या Ms. No : A. 507/2

Beginning :

व्यवसामि उद्यमं करोमि । निरर्थकामपि वाचं वदतां पराजयोऽपि पापवह इति भावः । तथा च स्मृतिः । गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः । अरण्ये निर्जले देशे भवति ब्रह्मराक्षस इति ।

End :

साशंकतः आर्तिग्रस्तत्वात् शुचिरित्येव पाठः । स्वच्छः उष्य वासंकृत्वा न चचाला छलेन शत्रुवधं नाङ्गीकृतवान ॥ × मन्त्राय विचारार्थम् ।

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारीणमर्यादाधुरन्धर चतुर्थकवंशावतंस श्रीगोविन्दसूरिसूनोः श्रीनीलकण्ठस्य कृतौ भारते भावदीपे अरण्यकपर्वार्थ प्रकाशः समाप्तिमगमत् । अध्यायः ३२२ ॥

64

Sl. No : 16952 महाभारतव्याख्या Ms. No : A. 508/b

Beginning :

श्रीमद्गोपालमानम्य प्राचीनाचार्यवर्त्मना ।
विराटपर्वप्रद्योती भावदीपो वितन्यते ॥
तत्र पूर्वपर्वणि—
दिष्ट्या पञ्चसु रक्तोऽसि दिष्ट्या ते षड्‌दी जिता ।

End :

उपप्लाव्यं विराटनगरसमीपस्थं नगरान्तरम् । सुरा नानाद्रव्यसाररूपं मद्यम् । मैरेयं वृक्षरसरूपं मद्यम् । अभ्यभवन् अभिभूता: । आत्मानमेव प्रादादिति पूर्वेणान्वयः ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाण मर्यादा धुरन्धर चतुर्धरवंशावतंस श्रीगोविन्दसूरि सूनोर्नीलकण्ठस्य कृतौ भारतभावदीपे विराटपर्वार्थप्रकाशो नाम द्विसप्तति तमोऽध्यायः ॥

65

Sl. No : 16953 **महाभारतव्याख्या** Ms. No : A. 509/2

Beginning :

कृत्वेति । सपक्षाः –यादवपाण्डवाद्याः । अभिमन्योर्विवाहं कृत्वा मुदिताः अभूवन्निति शेषः । प्रतीताः–प्रबुद्धाः ॥ १ ॥

मणयः मुक्ताप्रवालादयः, तेषां प्रवेशो मालादिरूपः समूहः, तेन उत्तमरत्नैः हीरपद्मरागाद्यैश्च चित्राः ।

'मणिः स्त्रीपुंसयोरश्मजातौ मुक्तादिष्वपि'

इति मेदिनी ॥

End :

शशूदनसंचयः । कोष्ठे धान्यादिसामग्रीसम्पादनं कोष्ठागारम् । आयु धोपकरणवेश्म । भेरीमहस्राणि जयसूचकसहस्रसंख्याकभेर्यः । ताः शंखाना मयुनानि च वादयन्ति स्म ॥

Colophon :

इति श्रीमत्पदवाक्य प्रमाणमर्यादाधुरन्धर चतुर्धरवंशावतंस श्रीगोविन्द सूरि सूनोर्नीलकण्ठस्य कृतौ भारतभावदीपे उद्योगपर्वार्थप्रकाशः समाप्तः ॥ समाप्तः द्विशततमोऽध्यायः ॥

66

Sl. No : 16954 महाभारतव्याख्या Ms. No : A. 510/b

Beginning :

श्रीलक्ष्मणार्यगुरवे . . . विदध्महि भावदीपम् ॥

पूर्वस्मिन् पर्वणि भगवद्भक्तः सत्यपि सामर्थ्ये यः सत्यं पालयति ऐश्वर्यं च न प्रकाशयति काले प्राप्ते अन्यस्मै उपकरोति चेति पाण्डवाचारप्रदर्शनव्याजेन दर्शितं तमेवंभूतं स्वयं भगवान् हितोपदेशेनानुगृह्णाति ।

End :

निष्कूजाः शब्दाः । रथं अन्यस्य गन्तुं प्रार्थयाना मध्यमार्गे निपतिता इति योज्यम् । के तुनेतिमार्थः । अत्र चन्द्रकेत्वोः मेरुसरथभीष्मयोश्च उपमोपमेयभावः ॥ भीष्मस्य रुक्मरथत्वात् ॥

Colophon :

इति नीलकण्ठीये भारतभावदीपिकायां भीष्मपर्वटीका ॥

67

Sl. No : 16955 महाभारतव्याख्या Ms. No : A. 511/2

Beginning :

स च मामकान् प्रति न धर्मो धारणात्मा न भवति, किन्तु सर्वविनाशायेत्यन्वयः । नाधर्म इति पाठे नाशब्दः नञतिशयेन, सर्वविनाशाय वर्तते इत्यन्वयः ॥ विपद्यन्ते — विवर्तन्ते ॥

End :

अर्धं दक्षिणो भागः सोमार्धं सोमेन संबद्धं अधोभागः । एवमात्मनश्चार्धमग्निः पुनरन्यत्सोमार्धं सोम्यो भागः । यद्यपि आत्मनि भागो न सम्भवति, तथापि × × × × × रसाम्यदेहभागाधिष्ठानमेव । देवेभ्यः देवानधिकृत्य ॥

Colophon :

इति भारतभावदीपिकायां द्रोणपर्वटीका ॥

68

Sl. No : 16957 | महाभारतव्याख्या | Ms. No : A. 513/2

Beginning :

अथ शल्यपर्व व्याख्यायते। सव्यसाचिना-अर्जुनेन । अवशिष्टेत्यत्राकार लोपः। शिबिरं-सेनानिवेशस्थानम् । उपसृत्य-प्राप्य। यस्मिन्नहनि पातितः तस्याह्नः अपराह्णः। रथाः-रथिनः। पुरीं-हस्तिनापुरीम् । सूतः-सञ्जयः।

End :

दाररक्षिणः । अन्तःपुराधिकृताः षण्डाः ।। ।। गोपालाः + ग्रामे अधिकृताः ॥ स्कन्धावारानिवासि सेनामुखनिवासि यत् सैनिकं तत्सर्वं नगरं प्रतिपाद्रवदित्युन्तरेण न्वयः ॥

Colophon :

इति श्रीमैत्पदवाक्यप्रमाण पारावार पारीण धुरीणमर्यादा धुरन्धर चतुर्धर वंशावतंस श्रीगोविन्दसूरिसूनु श्रीनीलकण्ठ विरचिते भावदीपे शल्यपर्वार्थप्रकाशे २७ अध्यायः ॥

69

Sl. No :16958 | महाभारतव्याख्या | Ms. No : A.514/2

Beginning :

श्रीमद्गोपालमानम्य श्रीलक्ष्मणपदानुगः ।
नीलकण्ठो भावदीपं कुरुते शान्तिपर्वणि ।।
यत्साधनेषु रुच्यर्धमितिहासोऽग्रमीरितः ।
धर्मार्थकाममोक्षास्ते सम्यगत्र निरूपिताः ।।

End :

कथातात्पर्यमाह — परित्याज्य इति। नीलकण्ठीये अध्यायः ।। ४२ ॥
कथा तात्पर्यमाह परित्याच्य इति ॥ २४ ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाण पारावारीणमर्यादाधुरन्धर चतुर्धरवंशावतंस श्रीं गोविन्दसूरिसूनोः श्रीनीलकण्ठीय्ये महाभारतदीपिकायां शान्तिपर्वणि आपद्धमार्थ प्रकाशनमातिर्गन त्रिचत्वारिंशोऽध्यायः ।।

70

Sl. N : 16959 महाभारतव्याख्या Ms. No : A. 515/2

Beginning :

तरणिमुकुरनेत्रोत्तेजनाभां . . . ईडे गवेन्द्रम् ॥
बहून् समाहृत्य विभिन्नदेश्यान्
कोशान् विनिश्चित्य च पाठमग्र्यम् ।
प्राचां गुरूणामनुसृत्य वाचं
व्याकुर्महे भारतमोक्षधर्मान् ॥

End :

उपसंहरति स चेति । यमाः अहिंसादयः । नियमाः शौचादयः । वनान्तरं वनमध्यं प्रविष्टः । उञ्छः कणश आदानं कणिशाद्यार्जनं शिलम् । परिगणितं परिमितम् । . . . . शेषः ॥

वेदान्ते लक्ष्मणार्यं . . . भूम्नि गोपालदेवम् ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणज्ञ पारावारीण मर्यादाधुरन्धर चतुर्धरवम्शावतंस श्रीगोविन्दसूरिसूनोः श्रीनीलकण्ठस्य कृतौ भारतभावदीपे मोक्षधर्मार्थप्रकाशः समाप्तिमगमत् ॥

71

Sl. No : 16960 महाभारतव्याख्या Ms. No : A. 517/2

Beginning :

श्रीमद्गोपालमानम्य प्रचीनाचार्यवर्त्मना ।
आश्वमेधिकभावार्थः श्रीकृष्णेन प्रकाश्यते ॥
\+ \+ \+ \+ \+
मोक्षधर्मेषु च पुनः नानाख्यानोपबृंहणैः ।
अतीव व्यकुलं प्रत्यगात्मतत्त्वमनाकुलम् ॥
तज्जिज्ञासोदयायैव जपदानादयः स्मृताः ।
आनुशासनिके सम्यक् चित्तदोषविनाशकाः ॥

End:

ध्यायाम्यनेनेत्यस्य प्रपञ्चः—अथ स इत्यादिः । कोसावित्यादि शेषकथा क्रोधजयोत्कर्षवर्णनार्था । पिठरम् । घर्म आविशनू . . तत्पयः पीतवानित्यर्थः । रोषेण त्वमेव मिथ्यारोषस्य × × त्वया ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणपरावारपारीणमर्यादाधुरन्धरचतुर्धरवंशावतंसगोविन्द सूरिसूनोः श्रीनीलकण्ठस्य कृतौ भरतभावदीपे आश्वमेधिकपर्वप्रकाशः समाप्तः ॥ समाप्तं च पर्व ॥

72

Sl. No: 16965 **महाभारतव्याख्या** Ms. No: C. 1064/2

Beginning:

यद्वक्त्रं मुकुराहवेन्द्रियमनोमायाः पराग्दृश्यतां
निन्युस्तच्छविमादिनापि च विराट्सूत्रेशभावं गतम् ।
तं प्रत्यग्दृगदृश्यमक्षरमणुं त्यक्तोपनेत्रत्रयाः
श्रीगोपालमुपास्महे श्रुतिशिरोवंशीरवैर्दर्शितम् ॥
+ + + +
प्राचां गुरूणामनुसृत्य वाचं
आरभ्यते भारतभावदीपः ॥

End:

अनुध्याति मनसि करोति । युष्माकं मातुः धर्मज्ञतां च वः मातुः वः युष्मत्सम्बन्धितया धर्मज्ञतां युष्मदीयपरमधर्मज्ञानं मातुरस्तीति विज्ञायेत्यर्थः । चरन्तं यत्र वाञ्छितं इत्यनेन अप्रतिहतगतित्वं द्वयोरपि दत्तं मयेत्यर्थः ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणज्ञमर्यादाधुरंधरचतुर्धरवंशावतंसगोविन्दसूरिसूनोः श्री नीलकण्टस्य कृतौ भारतभावदीपे आदिपर्वणि खाण्डवदाहार्थप्रकाशः । समाप्त श्चायं आदिपर्वणि भावदीपः ॥

73

Sl. No : 16970 **महाभारतव्याख्या** Ms No : C. 1068/2

Beginning :

नरनारायणौ नत्वा प्राचिनाचार्यवर्त्मना ।
कर्णपर्वार्थविद्योतिभावदीपः वितन्यते ॥

ननु विराटादिपर्वचतुष्टयतात्पर्यं क्रमेणाह । लुब्धानामर्थः सेवया नीत्या कपटपूर्वकेण कुलवृद्धवधेन नृशंसाऽनृतपूर्वकेण महागुरुवधेन च—

End :

शुचिः शुक्रयोः आषाढज्येष्ठयोर्मध्ये गतः । आयुधं आयुधजातम् । उपनिकीर्य निषङ्गकोशादिभ्यः निष्कास्य । भूतले भूतलतुल्ये । हताश्वसारथिध्वजस्योपस्थे ॥ अङ्गोगतिभिः पूर्णायतोत्सृष्टैः । प्रतिश्रुवाः प्रतिस्वनाः ॥

Colophon :

इति भारतभावदीपे कर्णपर्वार्थप्रकाशः समाप्तः ॥

74

Sl. No : 16971 **महाभारतव्याख्या** Ms. No : C. 1068/4

Beginning:

अथ नवमं शल्यपर्व व्याख्यायते । उक्ता सङ्गतिः कर्णपर्वादौ । एवं निपतित इति । उद्यमं पलायनं वा चक्रुः इति प्रष्टुरभिप्रायः । तत्र द्वितीयमेवमस्त्वाह–उदीर्यमाणमिति । पाण्डवबलस्योत्कर्षं दृष्ट्वा किमभिप्रायः । पलायनमेवास्य श्रेय इति भावः

End :

प्राणहेतोः जीवितार्थित्वात् । भयात् बन्धनादित्रासात् । विषादात् शोकाभिभूतात् ॥ हत्वैकं अस्माकं पञ्चानां मध्ये एकं अभिहत्वा कं राज्यं प्राप्स्यसीत्यर्थः ॥

Colophon :

इति शल्यपर्वशेषगदापर्वार्थप्रकाशः ॥

75

Sl. No : 16976 महाभारतव्याख्या Ms. No : C. 1071/b

Beginning :

यज्ज्योतिस्तमसः परं महदहो निर्माय रूपाणि त-
न्नामानि प्रतिभज्य च व्यवहरन्त्येतैर्गुहायां गणम् ।
आनन्दाकरसन्तदद्वयमथो तन्मायया देवकी-
कुन्तीसत्यवतीषु जन्मधृतयत्कृष्णत्रयं पातु नः ॥
+ + . चिन्तामणिं साम्बशिवं च नत्वा व्याकुर्महे भारतदानधर्मान् ।

End :

भगवन्नित्यादिफलाध्यायः व्यासेन हरिवंशे उक्तः । अत्र तु श्रोतृप्ररोचनार्थं लिखित इति ज्ञेयम । अष्टस्थानानि चोक्तानि शिक्षायाम् । अष्टौ स्थानानि वर्णानां उरः कण्ठः शिरस्तथा । जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु चेति ज्ञेयानि ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरन्धरचतुर्धरवंशावतंसश्रीगोविन्दसूरिसूनोः श्रीनीलकण्ठस्य कृतौ भारतभावदीपे स्वर्गारोहणाग्रम् ॥

76

Sl. No :16981 महाभारतव्याख्या Ms. No : P.2554/ı

Beginning :

व्यासायाप्रतिमेतिहासरचनोल्लासाय दुर्वादिनां
त्रासायासकराय सत्सु कृतविश्वासाय दोषद्विषा ।
भासा यामुनरम्यतोयसदृशा चासायमासेविने
दासायाभयदाय मध्वगुरुहृद्वासाय तुभ्यं नमः ॥

End :

गन्धर्वाः द्रमिलादयो दुर्जीवाः ।
व्यासेन मुनिना विप्रा रचितं स्तव्यदर्शिना ॥
इत्यत्र स्तोतुं योग्याः स्तव्या देवाः तान् पश्यतीति स्तव्यदर्शी, तेन । ऐश्वर्येऽ वर्ततेत्यत्र ऐश्वर्ये—अणिमाद्यष्टैश्वर्ये॥

Colophon :

इति श्री महाभारते स्वर्गारोहणिके पर्वणि श्री वादिराजकृतलक्षालङ्काराख्य टीकायां चतुर्थोऽध्यायः ।।

77

Sl. No : 16939 महाभारतव्याख्या Ms. No : P. 7/2

Beginning :

यः श्वेतत्वमुपागतः कृतयुगे त्रेतायुगे रक्ततां
यात्मे यः कपिलः कलौ च भगवान् कृष्णत्वमभ्यागतः ।
यं वेदान्तविदो वदन्ति मुनयो यो योगिभिर्गीयते
स ब्रह्मा यदि वा हरो यदि हरिर्योऽसौ स तस्मै नमः ॥

× × × × × × × ×

राजधर्मद्वारा त्रिवर्गं श्रुत्वा तत्र गूढोत्तमवर्गं विस्तरेण बुभुत्सुर्युधिष्ठिरः चोदयति भीष्मम् ॥

End :

वेदवादविद इति । मन्वादय इत्यर्थः । 'यद्वै किञ्च मनुरवदत् तद्भेषजम्' इति श्रुत्या तेषां परमाप्तत्वेन तद्वचनमेव उभयकर्मत्यागे प्रमाणमिति बोध्यम् ॥

Colophon :

इति मोक्षधर्मव्याख्याने पञ्चनवतितमोऽध्यायः ।।

78

Sl. No : 16990 महाभारतव्याख्या Ms. No : A. 385

Beginning :

नारायणं नमस्कृत्य . . . . जयमुदीरयेत् ।
नारायणमिति नारायणं परमात्मानं ।।
. . . .
वीक्ष्य व्याख्या विरचिता दुर्घटार्थप्रकाशिनी ।
भगवद्विमलबोधेन भारताख्यानवेदिना ।।

End :

. . . पिबति तथाऽहं सोमं न पिबामि नापि कलिम् । गोधूम्यारः पक्षी । स यत्र धूमं पश्यति तत्रैवाटति । तदनुकारि सोममहं पिबामि इत्यर्थः । किं वाहूया चिंतो भृत्यैः सहेति शेषः पूर्ववत् । एते आश्वमेधिके पर्वणि विषयश्लोकाः ॥

Colophon :

इति श्रीमद्विमलबोधाचार्यविरचिता महाभारतदुष्कर[कठिन]श्लोकटिप्पणी सम्पूर्णा ॥

79

Sl- No : 16962 महाभारतव्याख्या Ms No : C. 2187

Beginning :

रामव्यासहयग्रीवनरसिंहान् गुरुनपि ।
प्रणम्यार्यान् व्यातनोमि विराटोद्योगपर्वणि ॥
भारतद्रुर्यतः पर्वण्यादौ सङ्ग्रहपूर्वतः ।
स्वयं भगवता प्रोक्तो विराटोद्योगसारवान् ॥

End :

अन्ते नगरपदं प्रयुञ्जानः कथाया एतत्पर्वगताया निर्विषयतया अमृतरूपकृत मित्येव श्रोतृणां पठतां चानन्तरममृतप्राप्तिर्भवतीति सूचनाय विशेषणमिति मङ्गलम ॥

विराटपर्वविवृतिं × × ज्ञाज्ञाः कृतां मया ।
निन्दन्तु × × × हर्षामर्षौ न नस्ततः ॥
क्व भारती भारतस्य क्वातिचाल्पस्य जल्पनम् ।
के चिदीशुश्चेत्तुष्टोऽहं द्रुतो मया जीवतु ।। (?)

Colophon :

इति श्रीसत्यधर्मकृता विराटपर्वव्याख्या समाप्ता ॥

80

Sl. No : 16997 महाभारतव्याख्या Ms. No : P. 3851

Beginning :

शुक्लाम्बरधरं + यस्य द्विरद + व्यासं वसिष्ठ+ ।
व्यामाय . . . . . विष्णवे प्रभविष्णवे ।।
श्रीमान् पौराणिकः सूतः कदाचिद्रोमहर्षणिः ॥

उग्रश्रवा नाम पुण्यं नैमिशारण्यमागमत् ॥
वर्तमाने शौनकस्य सत्रे द्वादशवार्षिके ॥

End :

तस्मात्त्वमपि गान्धारे क्रोधं मानं च वर्जय ।
सन्धत्स्व पाण्डवैर्वीर संरंभं त्यज्य पार्थिव ॥
समर्थैर्विग्रहं कृत्वा विमनस्थो भविष्यसि ॥

Colophon :

इति श्री भारते उद्योगपर्वणि अष्टमोऽध्यायः ॥

8

Sl. No : 16998 महाभारतसारः Ms. No : P. 211/3

Beginning :

सम्यङ्न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥
यो नित्यमच्युतपदांबुजयुग्मरुक्म-
व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये ॥
श्रीमान् वेङ्कटनाथार्यः + + सदा हृदि ॥
वेदान्तरामानुज + + + राजगोपालमुनिं प्रपद्ये ॥
+ + + + + +
श्रीमद्वेङ्कटनाथार्यदासेन यतिना हरेः ।
प्रीत्यै भारतसारोऽयं लिख्यते विदुषां प्रियः ॥

End :

नृत्तस्य सप्तधात्वं गन्धर्ववेदविद्भिरुक्तम् ॥
शुद्धं नृत्तं करणांगहारानुगतं भावानुगतं तालानुगतं वाद्यानुगतं लास्या
नुगतं वलनावर्तनात्मकं चेति ॥

Colophon :

— — —

82

Sl. No : 17000 **मुखभूषणम्** Ms. No : A. 686

Beginning :

प्रणम्य परमात्मानं विमुक्तोपाधिविप्लवम् ।
इतिहासे पदं किञ्चिद्यथाशक्ति निरूप्यते ॥
नूनमार्षप्रयोगोऽयमित्येवोक्त्वा विहापतेत् ।
अपशब्दाशयत्वं वा मुग्धत्वं वा निजं भृशम् ॥

End :

अत्र आभ्य इति निर्दिष्टं कोटिकाभ्य इति खलु वाच्यम् ॥
श्री भागवते—
अरिहणमुपपेद ईक्षणीयो मम हारी गोचर एष आविरात्मा ।
अत्र वृत्तपरिपालनार्थमरिहणशब्दे रेफं इकारं चान्तरा इकारो निवेशितः ॥

Colophon :

— — —

83

Sl. No : 17004 **योगवासिष्ठरामायणम्** Ms. No : P. 3573/1

Beginning :

यतस्सर्वाणि भूतानि प्रतिभान्ति स्थितानि च ।
यत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः ॥
ज्ञाता ज्ञानं तथा ज्ञेयं द्रष्टा दर्शन दृश्यभूः ।
. . . . तस्मै सर्वात्मने नमः ॥

End :

कायेन मनसा बुध्या केवलैरिन्द्रियैरपि ।
कर्म कुर्वन् न कुर्वन् वा निस्सङ्गस्सन्न लिप्यते ॥
गतसङ्गेन मनसा कुर्वन्नपि न लिप्यते ।
सुख × × × × × × × ×

Colophon :

इत्युपशमप्रकरणे संसृतिबीजनिराकरणोपदेशो नाम सप्ततितमः सर्गः ॥

84

Sl. N : 17005 **वासिष्ठरामायणम्** Ms. No : P. 5171/1

Beginning :

दिवि भूमौ तथाऽऽकाशे बहिरन्तश्च मे विभुः ।
यो विभात्यवभासात्मा तस्मै ज्ञानात्मने नमः ॥
अहं बद्धो विमुक्तः स्यां इति यस्यास्ति संशयः ॥

End :

दशवर्षसहस्राणि राज्यं कृत्वा महीतले ।
सह चूडालया राम विरतो देहधारणात् ॥
भुक्त्वा भोगाननन्तान्
भुवि सकलमहीपालचूडामणित्वे
स्थित्वाऽसौ दीर्घकालं
× × × तमनन्तं प्राप्तवान × न्य दो(शे)षः ॥

Colophon :

इति श्री वासिष्ठरामायणे निर्वाणप्रकरणे . . . . . . शिखिध्वजोपाख्यानं नाम सप्तत्रिंशः सर्गः ॥

85

Sl No : 17007 **वासिष्ठरामायणम्** Ms. No : P. 6445/1

Beginning :

वाल्मीकिरुवाच—
साधु वत्स भरद्वाज योग्यो हि कथयामि ते ।
श्रुतेन येन सम्मोहमलं दूरीकरिष्यसि ॥
ये शुद्धवासना भूयो न जन्मानर्थभाजिनः ।
ज्ञानयोगास्त उच्यन्ते जीवन्मुक्ता महाधियः ॥

End :

अहंकारादयो दोषास्स्थानमायान्त्यलं धियः ।
मनःप्रसादमायाति शरदीवामलं रसः ॥

समुद्रस्येव गाम्भीर्यं स्थैर्यं मेरोरिव स्थितम् ।
अन्तश्शीतलतां चेन्दोरिमादेति विरागिणः ॥ (?)

Colophon :

इति वासिष्ठरामायणे फलश्रुतिर्नाम चतुश्चत्वारिंशत्सर्गः ॥

86

Sl. No : 17011 **योगवासिष्ठरामायणटीका** Ms. No : A. 281/2

Beginning :

सत्यं ज्ञानमनन्तमेकमजरं नित्यं विभुं शाश्वतं
प्रत्यग्ब्रह्मरसायनं सुखघनं पूर्णं परं पावनम् ।
स्वात्मज्योतिरनादिमध्यनिधनं मायाविलासैर्मुहुः
विश्वाकारमथास्तमायमभयं वन्दे विशुद्धं पदम् ॥
इति प्रागुक्तरीत्या पर्यवसानमिति दर्शयति—वाग्भाभिरित्यादिना ॥

End :

असत् अज्ञानं तन्मयं तत्परिणामभूतं मनः स्वयमेव चिति स्वाधिष्ठाने चैतन्यचितेन उपचयेन संस्फुरज्जगद्वपुः पुरस्सदिव साक्षिणा विलोक्यते । यथा महार्णवे पूर्णे सत्तामात्रसिद्धावपि भिन्नजलवलयानां पङ्क्तिरित्यर्थः ॥

Colophon :

इति श्रीपरहंसपरिव्राजकाचार्यश्रीमत्सर्वज्ञसरस्वतीपूज्यपादशिष्यश्रीमद्रामचन्द्रसरस्वतीपूज्यपादशिष्यश्रीगङ्गाधरेन्द्रसरस्वतीपूज्यपादशिष्येण श्रीमदानन्दबोधेन्द्रसरस्वत्याख्यभिक्षुणा विरचिते वासिष्ठतात्पर्यप्रकाशे उत्पत्तिप्रकरणे द्वात्रिंशदुत्तरशततमः सर्गः ॥

87

Sl. No : 17013 **योगवासिष्ठरामायणटीका** Ms. No : P. 3478

Beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
× × गुणिनि पुरुषा ध्यानकर्मणि

निष्प्रत्यूहं फलं प्राहुस्तं वन्दे गणानायकम् ॥

भगवान् कविकुलगुरुर्वाल्मीकिः लोकानुग्रहाय काव्यप्रबन्धे सङ्ग्रहे वासिष्ठमिदं मोक्षशास्त्रम् ॥

End :

इति स्मृतः — स्मृत इति विधीयमानकर्मत्यागरूपापेक्षया पुलिङ्गनिर्देशः । तूष्णींभाव इति यन्नैष्कर्म्यं प्रकृतं तस्यायमुपसंहार इति सर्वं समञ्जसम् ॥

Colophon :

सूनुना पदवाक्यप्रमाणपारावारदृश्वनः श्रीमुम्मुडिदेवविद्वदाचार्येण विरचिते संसारतरणिनाम्नि वासिष्ठविवरणे निर्वाणप्रकरणे योगसप्तभूमिकोपाख्यानं नाम त्रिचत्वारिंशत्सर्गः ॥

88

Sl. No : 17015 महाभारतव्याख्या Ms. No ; C. 3573/2

Beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
यत्प्रसादात् त्रिगुणानि पुरुषार्थस्वकर्मणि ।
निष्प्रत्यूहं फलं प्राहुः तं वन्दे गणनायकम् ॥
जगत्त्रयं यदुद्भूतं . . . . . मुपास्महे ॥
वाणीमेणीदृशं वन्दे . . . . . कारणम् ॥

इह निखिलजगदेकबीजं भगवान् . . . . मङ्गलमङ्गीकरोति ग्रन्थकारः —यतस्पर्वाणीति ।

End :

विषं प्रसिद्धम्, प्रतिविषं विषनिवर्तकं प्रतिविषाधिकारे निरूपितं द्रव्यान्तरम् । कल्कं अकल्मषं यत् क्षीरं तत्र च अन्धसि अन्ने सम इति समदृष्टिः । नेति । निगिरन्ति ग्रसन्ति.॥

Colophon :

— — —

89

Sl. No: 17019 योगवासिष्ठरामायणटीका Ms. No: P. 7981/4

Beginning:

शुक्लाम्बरधरं . . . . चतुर्भुजम् ॥
प्रसन्न . . . . शान्तये ॥
अभीप्सितार्थ . . . . . पतये नमः ॥
. . . .

भगवान् कविकुलगुरुः वाल्मीकिः लोकानुग्रहाय कान्तासम्मितेन काव्य बन्धेन सङ्गृहे । वसिष्ठोपदेशप्रवृत्तत्वात् वासिष्ठमिदं मोक्षशास्त्रम् ॥

End:

ततः परं तावन्योन्यानुमत्या स्वाराज्योत्सुकौ सङ्कल्पसिद्धेर्न सर्वतीर्थजलेन परस्परमभिषिक्तौ महता साम्राज्यवैभवेन स्वपुरीं प्रविश्य दशवर्षसहस्राणि साम्राज्यसुखमनुभूय भूयो जन्मविमुक्तं विदेहमुक्तिं जग्मतुः इति कथाशेष सङ्क्षेपः ॥

Colophon:

इति श्रीवासिष्ठरामायणे निर्वाणप्रकरणे किरातचिन्तामणि . . . . शिखि ध्वजोपाख्यानं नाम सप्तत्रिंशः सर्गः ॥

90

Sl. No: 17020 रामंदशरथंविद्धिश्लोकव्याख्या Ms. No: P. 8

Beginning:

उपास्महे नृसिंहाख्यं ब्रह्म वेदान्तगोचरम् ।
भूयो लालितसंसारच्छेदहेतुं जगद्गुरुम् ॥

× × × × × वासगमनाय संप्राप्तसमुत्साहं सज्जीकृत प्रयाणसन्नाहं गमने कृतदृढनिश्चयं सप्रणयावनतं सौमित्रिं —

End:

शुभलक्षणसंपन्न, श्रीसीतारामयोः पट्टाभिषेकमहोत्सवेन कलत्रमित्रादि संदर्शनसंल्लापादिभिश्च तव यथा सुखं वैषयिकं भवति तथा गच्छ वर्तस्व— ऐहिकसुखानुभवतत्परश्च भवेत्यर्थः ॥

Colophon:

— — —

91

Sl. No : 17021 **रामंदशरथंविद्धिश्लोकव्याख्या** Ms. No : P. 2362/2

Beginning :

रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।
अयोध्यामटवीं विद्धि गच्छ तात यथासुखम् ॥

अस्य श्लोकस्यार्थो लिख्यते —

प्रथमं तावत् वनं गमिष्यन्तं रामं अनुजिगमिषुं स्वपुत्रं लक्ष्मणं सुमित्रा हितमनुशास्ति ॥

End :

एतत् सर्वं मनसाऽवगन्तुं समर्थो भवेत्याशंसनं कृतम् इति दशमोऽर्थः । अस्य श्लोकस्यार्थाः बहुलाः सन्ति । मनुष्याणामल्पबुद्धित्वात् गुरूपदेश परम्परया दशमोऽर्थः प्रकाशितः ॥

Colophon :

— — —

92

Sl. No : 17022 - **रामकथासंग्रहः** Ms. No : P. 895/3

Beginning:

देवदेव महादेव काञ्चनाद्रिधनुर्धर ।
भगवन् चन्द्रकोटीर प्रसीद परमेश्वर ।
ब्रूहि मे रामचरितं दशकण्ठवधं विभो ॥

End :

ब्रह्मवालं शम्भुमूलं भ्रातृशाखं सुहृत्सुमम् ।
सीताकरं ज्ञानफलं सेवे रामसुरद्रुमम् ॥
रामनामाङ्कयन्त्रेण संयोज्य मसितं तथा ।
धार्यते येन स क्षिप्रं सर्वबाधास्समातरेत् ॥

Colophon :

— — —

93

Sl. N : 17025 रामदिनचर्या Ms. No : P. 946/4

Beginnign:

अथ रामस्तु वैदेह्या राज्यभोगान् मनोरमान् ।
बुभुजे सानुजो नित्यं मन्त्रिभिश्चारलोचनः ॥
अकृष्टपच्या पृथिवी फलवन्तश्च पादपाः ।
काले वर्षी च पर्जन्यः रामे राज्यं प्रशासति ॥

End:

अन्तःपुरं समासाद्य द्वारि स्थाप्य मरुत्सुतम् ।
सीतया सह पर्यङ्के वात्स्यायनविधानतः ॥
स सङ्गीतं नृपः श्रुत्वा पारितोषश्च धर्मवित् ।
विश्राणयन् ततो राजा विससर्ज शनैश्शनैः ॥

Colophon:

इति वामनपुराणे उमामहेश्वरसंवादे श्रीरामदिनचर्या नाम एकषष्टितमोऽध्यायः ॥

94

Sl. No : 17026 रामदिनचर्या Ms. No : P. 4807/4

Beginning:

देवि रामस्य वक्ष्यामि दिनचर्यामिह शृणु ।
ब्राह्मे मुहूर्ते चोत्थाय चिन्तयन् वैदीकीं मतिम् ॥
हनुमत्करमालम्ब्य कक्ष्यां प्राप्य च पञ्चमीम् ।
सुमन्त्रेणात्तदीपेन क्षणं तत्र स तिष्ठति ॥

End:

पुनश्च गृहमासाद्य शेते शेषशयो हरिः ।
एवं दिने दिने देवि वर्तते रघुनन्दनः ।
एवं शासयते भूमिं राघवः स महेश्वरि ॥

Colophon:

इति श्रीस्कान्दे महापुराणे श्रीरामदिनचर्या सम्पूर्णा ॥

95

Sl. No: 17028 रामविवाहादिकालनिर्णयः Ms. No: P. 5451

Beginnig:

श्रीरामचन्द्रस्य द्वादशवर्षे विवाहः, अयोध्यायां द्वादशसंवत्सरं वासाः। श्रीरामचन्द्रस्य पञ्चविंशद्वर्षे, देव्या अष्टादशवर्षे वनवासाय यानम्। मुनीना साश्रमेषु दशवर्ष + + + + +

End:

शिष्टषष्ठीयुक्तसप्तम्यां पुनर्वसुनक्षत्रे अयोध्याप्रवेशः। श्रीरामस्यैकोनचत्वारिंशद्वर्षे देव्यास्त्रयस्त्रिंशे वर्षे चैत्रशुक्लसप्तम्यां पुष्यनक्षत्रे श्रीरामचन्द्रस्य पट्टाभिषेकः ॥

Colophon:

— — —

96

Sl. No: 17032 रामायणम् Ms. No: P. 1049

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये॥
तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्॥

End:

एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तुवः।
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम्।
× यन्तीह च नराः तेषां वासस्त्रिविष्टपे॥

Colophon:

इत्यार्षे श्रीमद्रामायणे आदिकाव्ये वाल्मीकीये चतुर्विंशत्सहस्रिकायां संहितायां श्रीमद्युद्धकाण्डे एकविंशत्यधिकशततमः सर्गः॥

97

Sl. No : 17048 | रामायणम् | Ms. No : P. 1516

Beginning :

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥
को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥

End :

एतदाख्यानमायुष्यं पठेद्रामायणं नरः ।
सपुत्रपौत्रो लोकेऽस्मिन् प्रेत्य चापि महीयते ॥
एतदाख्यानमायुष्यं सभविष्यं सहोत्तरम ।
कृतवान् प्रचेतसः पुत्रः तद्ब्रह्माप्यनुमन्यते ॥

Colophon :

इत्यार्षे श्रीमद्रामायणे आदिकाव्ये वाल्मीकीये चतुर्विंशत्सहस्रिकायां संहितायांश्रीमदुत्तरभविष्यद्रामायणे श्रीरामाभिधानश्रीमहाविष्णुनिजपरन्धामप्रवेशो नाम नवशततमः सर्गः ॥

98

Sl. No : 17053 | रामायणम् | Ms. No : P. 2160

Beginning :

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताभावं वन्दे वाल्मीकिकोकिलम् ॥
वाल्मीकेर्मुनिसिंहस्य कवितावन......णः ।
शृण्वन्रामकथानादं को न याति परां गतिम् ॥

End :

रामायणं जनमनोरथमादिकाव्यं
ब्रह्मादिभिः सुरवरैरपि संमितं च ।
शुच्याऽन्विनः पठति यः शृणुयाच्च नित्यं
विष्णोः प्रयाति सदनं स विशुद्धदेहः ॥

Colophon :

इत्यार्षे श्रीमद्रामायणे आदिकाव्ये वाल्मीकीये चतुर्विंशत्सहस्रिकायां संहितायां श्रीमद्युद्धकाण्डे श्रीरामचन्द्रपट्टाभिषेको नाम एकत्रिंशोत्तरशततमः सर्गः ॥

99

Sl. No : 17082 रामायणम् Ms. No : P. 6576/5

Beginning :

शुक्लाम्बरधरं . . . . . विघ्नोपशान्तये ।
आयुरारोग्य . . . . . शायिनः ॥
कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥
तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिः मुनिपुङ्गवम् ॥

End :

यं कर्णाञ्जलिसम्पुटैरहरहः सम्यक् पिबन्त्यादरात्
वाल्मीकेः वदनारविन्दगलितं रामायणाख्यं मधु ।
जन्मव्याधिजराविपत्तिमरणैः अत्यन्तसोपद्रवं
संसारं स विहाय गच्छति पुमान् विष्णोः पदं शाश्वतम् ॥

Colophon :

इत्यार्षे श्रीमद्रामायणे उत्तरकाण्डे वाल्मीकीये दशाधिकशततमः सर्गः ॥
चरितं रघुनाथस्य . . . . . पतये नमः ॥

100

Sl. No : 17188 रामायणम् Ms. No : P. 10249/3

Beginning :

जातानां राक्षसानां तु लङ्कायां वै कुले कुले ।
रावणः करुणं शब्दं शुश्राव परिदेवितम् ॥
स तु दीर्घं विनिश्वस्य मुहूर्तं ध्यानमास्थितः ।

अत्राधिकपाठः—

समीपस्थमुवाचेदं रावणो रणकर्कशः ॥

End :

समरविजयलक्ष्मीं प्राप्य सङ्ग्रामकाले
रिपुवधपरितोषात् श्लाघ्यमानः कपीन्द्रैः ।
सुरवरकरमुक्तैः पुष्पवर्षैः प्लुताङ्गः
सदसि कपिवराणां रामपार्श्वं जगाम ॥
हनूमत्कर्म तद्दृष्ट्वा चारी रावणसंमतः ।
प्रविश्य लङ्कां वेगेन रावणाय न्यवेदयत् ॥
श्रुत्वा चारमुखात्सर्वं रावणो भयविह्वलः ।
मुहूर्तमात्रं सञ्चिन्त्य प्रेक्ष्य दैवविपर्ययम् ॥
इत्यधिकपाठः सम्पूर्णः ॥

Colophon :

इति श्रीमद्युद्धकाण्डे अधिकपाठे ऐरावणवृत्तान्ते पञ्चमः सर्गः ॥

101

Sl. No : 17241 महाभारतव्याख्या Ms. No : P. 5880

Beginning :

अत्र 'सञ्जीवनार्थं वीरस्य' इत्यारभ्य पुस्तकान्तरे स्थितातिविस्तारकाल-नेमिकथा लिख्यते—

समुद्रं त्वं समाक्रम्य लवणोदं महोदधिम् ।
कुशद्वीपं समाक्रम्य क्षीरोदं च महार्णवम् ॥
तस्मादुत्तरतो भागे क्षीरोदस्य हरीश्वर ।
सस्थलीकौ महद्दिव्यौ विशालौ देवनिर्मितौ ॥

End :

नापि श्रुत्वा कथां दिव्यां रामस्याद्भुतकर्मणः ।
बुबुधे स दशग्रीवः कालपाशवशं गतः ॥
निर्गत्य भवनात्तस्मात् क्रुद्धः सर्प इव श्वसन् ।

रावणो रथमास्थाय प्रययौ यत्र राघवः ॥

इति श्रीमद्युद्धकाण्डे प्रक्षिप्तकथायां षष्ठः सर्गः ॥

Colophon :

प्रक्षिप्तकथा समाप्ता ॥

102

Sl. No : 17243 रामायणतात्पर्यदीपिका Ms No : C. 2819

Beginning :

श्रीरामं करुणासारं नत्वा वैकुण्ठनायकम् ।
श्रीरामायणतात्पर्यदीपिकां प्रवदाम्यहम् ॥
जन्मप्रभृति रामस्य यानि कृत्यानि भूतले ।
तानि कृत्यानि तात्पर्यगर्भितानि वदाम्यहम् ॥

End :

प्रथमायां तस्य संस्कारः । द्वितीयायां विभीषणाभिषेकः । तृतीयायां देवीसमागमनवृत्तान्तः । चतुर्थ्यां किष्किन्धाप्राप्तिः । पञ्चम्यां भरद्वाजाश्रमप्राप्तिः । षष्ठ्यां नन्दिग्रामम् । दशम्यां पट्टाभिषेकः ॥

Colophon :

इति वाल्मीकिरामायणतात्पर्यदीपिका ज्ञानवासिष्ठिका समाप्ता ॥

103

Sl. No : 17245 रामायणव्याख्या Ms. No : P. 5020

Beginning:

न शक्तः सर्वरत्नानि समुद्धर्तुं महार्णवात् ।
रामायणार्थरत्नेषु कतिचिल्लब्धुं समुद्यन: ॥
नानाटीकार्थसंयुक्तं लेखकोऽहं न कल्पकः ।
मधुरान्तकवाल्मीकिमुनिना भाषितं शुभम् ॥

End :

अभ्यषिञ्चन्—अभिषेकं कृतवन्त इत्यर्थः ।
राममिन्दीवरश्यामं नलिनायतलोचनम् ।

स्मरामि पुण्डरीकाक्षं तेन स्नातो भवाम्यहम् ।
इति वचनात् । अनेन पूतो भवामि ॥

Colophon :

इति श्रीमधुरान्तकाभिनववाल्मीकिकृतायां सर्वार्थसंग्रहटीकायां युद्धकाण्ड व्याख्यानं समाप्तम् ॥

104

Sl. No : 17251 रामायणव्याख्या Ms. No : P. 6282

Beginning :

चन्द्रार्धचन्द्रैः चन्द्रार्धचन्दाकारैः रचनाविशेषैः जाम्बूनदमहाकम्बुसौवर्ण वलययुक्तः, कम्बुर्ना वलयः शङ्ख इत्यमरः । हुत्वाऽग्निं राक्षसैः मन्त्रैरन्तर्धान गतोऽब्रवीत् । राक्षसैः निर्ऋतिदेवताकैः अन्तर्धानोक्ति × प्राप्त इत्युक्त्वा ।

End :

ब्रह्मपञ्चमे त्रिविष्टापाख्ये देवलोके । एकविंशति × सर्वे देवलोक इति श्रुतेः । यद्वा त्रिविष्टपे ब्रह्मलोके स याति ब्रह्मणः स्थानं इति वचनात् वासः भवतीत्यर्थः ॥

Colophon :

इति कौण्डिन्यकुलतिलकेन पदवाक्यप्रमाणज्ञेन षष्टिघटिकाश्रावितसप्त- × × × होपाध्यायेन वरदराजसूरिसूनुना ईश्वरदीक्षितेन विरचिते ईश्वरदीक्षितीयनाम्नि रामायण × × द्विवरणे युद्धकाण्डं सम्पूर्णम् ॥

105

Sl. No : 17253 रामायणव्याख्या Ms. No : P. 1254/1

Beginning :

प्रभातायामिति । सहितौ अविनाभूतौ । अभिवाद्येति मधुरोदारोक्तौ हेतुः — मधुरभाषिणाविति ॥ ३ ॥ इमाविति । स्मेति भूतार्थसूचक- मव्ययम् । इमौ स्म — आज्ञापितं सर्वमनुष्ठितवन्तावित्यर्थः । मुनिशार्दूल ॥

End :

अतीव अतिशयेन । शुशुभे—रेजे । तुल्यानुरागस्यातिशयितत्रिका-मस्य भोगसमृद्धिहेतुत्वादिति भावः ।

वेदे शास्त्रेषु वादेऽप्यनितरसुलभां कीर्तिमाटीकमानः +
गोविन्दार्यो विचार्य व्यतनुत विमलां बालकाण्डस्य टीकाम् ॥

Colophon :

इति श्रीमद्रामायणभूषणे बालकाण्डव्याख्याने मणिमञ्जीराख्याने गोविन्द-राजीये सप्तसप्ततितमः सर्गः ॥

106

Sl· No : 17254 रामायणव्याख्या Ms. No : P· 2635

Beginning :

तत्त्वज्ञानसमुच्छ्रयो घनदयो सारस्यसारो महान्
निष्कर्षः कमलानिवासचरणद्वन्द्वानुरागश्रुतेः ।
अक्लेशः परिपाक एष जगतामक्षय्यपुण्ये पदे
अस्माकं निधिरक्षयो विजयते श्रीमान् शठारिर्गुरुः ॥
श्रीरामायणभूषायै प्रवृत्तो रामभक्तितः ।
व्याख्यां सुन्दरकाण्डस्य तिलकं कलयाम्यहम् ॥

उक्तं परत्वासाधारणं समस्तकल्याणगुणात्मकत्वं किष्किन्धाकाण्डे, अत्र सर्वसंहर्तृत्वमुच्यते ॥

End :

अथा × मयेति तव शोकेनापि नैव दंशानित्यादिमदुक्त्या श्रुते तदा मम पुरस्तादभिपीडिता अदीनभाषिणी मया शिवाभिः वाग्भिः इष्टाभिः प्रासादिता शान्तिं दुःखनिवृत्तिं जगाम । इति रामायणभूषणे सुन्दरकाण्डव्याख्याने शृङ्गारतिलके अष्टषष्टितमस्सर्गः ॥

Colophon :

इत्थं कौशिकवंशमौक्तिकमणिर्गोविन्दराजाभिधो
वात्स्यश्रीशठकोपदेशिकपदद्वन्द्वैकसेवापरः ।
पूर्वाचार्यकृता विलोक्य विविधव्याख्या मुहुर्जानकी-
कान्तस्याप्रतिमाज्ञयैव तिलकं सौन्दर्यकाण्डे व्यधात् ॥

107

Sl. No : 17262 रामायणव्याख्या Ms. No : P. 9059

Beginning :

धर्मार्थप्रतिपादनकुशलैः स्वार्थे अण्प्रत्ययः । श्रेष्ठैः अभिजनविद्याव्रतयुक्तैः अभिविनीतः सर्वतः सुशिक्षितः ॥२५॥ यदेति । ग्रामार्थ इत्यत्र अविभक्तिको निर्देशः ग्रामस्य नगरस्य वा अर्थे प्रयोजने निमित्ते ।

End :

व्रजमध्ये गोवृषेण गोपुङ्गवेन गवां पत्नीं धेनुं आचरन्तीं खादन्तीं, चरगतिभक्षणयोः × × × × स्फटिकैः तदाद्यैः मणिभिः अन्तः अन्तरान्तरा ग्रथितैः संहृतः निवारितः । द्युति विस्तारे, यस्यास्तं शीघ्रं दवाग्निः × ×

Colophon :

— — —

108

Sl. No : 17264 रामायणव्याख्या Ms. No : P. 9096

Beginning :

वात्स्यश्रीशठकोपदेशिकवरश्रीपादरेण्वञ्जनैः
दृष्ट्या निर्मलया निरीक्ष्य बहुधा वल्मीकजन्माशयम् ।
श्रीमत्कौशिकवंशसागरमणिः गोविन्दराजाह्वयः
व्याचक्षेऽहमरण्यकाण्डमधुना पश्यन्तु निर्मत्सराः ॥

End :

ततो महदिति । दूरतः संक्रम्यत इति दूरसंक्रमः । दूरतो गम्यमानमित्यर्थः वर्त्म—मार्गं गत्वा वनं प्रविलोकयन् पम्पां ददर्शेत्यन्वयः ॥
इत्थं कौशिकवंश्य . . . . . गोविन्दराजाभिधः ॥

Colophon :

इतिश्रीगोविन्दराजविरचिते रामायणभूषणे . . . अरण्यकाण्डव्याख्याने पञ्चसप्ततितमः सर्गः ॥

109

Sl. No : 17265 — रामायणव्याख्या — Ms. No : P. 9130

Beginning :

क्वाहं मन्दमतिः गभीरमधुरं रामायणं तत्क्व च
व्याख्यानेऽस्य परिश्रमन्नहमहो ह्यासाम्पदं धीमताम् ॥
को भारोऽत्र मम स्वयं कुलगुरुः कोदण्डपाणिः कृपा-
कूपारो रचयत्यदः सपदि मज्जिह्वाग्रसिंहासनः ॥
श्रीरामायणराजस्य समर्प्य मणिमेखलाम् ।
सारोद्धारमिमं भारमर्पयिष्यामि सम्प्रति ॥
एवं पूर्वस्मिन् काण्डे दीनजनसंरक्षणरूपो धर्मो निरूपितः ।

End :

पानप्रवृत्तौ दृढाभिविवेशैरित्यर्थः । उद्घातः समूहः ऋषिभिरिति । सार्थ हीनः अभूदिति शेषः । स इति । वेगसमाहितात्मा वेगविषये समर्पितमनाः मनःसमाधाय मनः समाहितं कृत्वा ॥

इत्थं शठारिगुरुवर्यपदारविन्द-
सेवारसाधिगतसर्वरसस्य बोधः ।
गोविन्दराजविबुधः प्रमुदे बुधानां
कैष्किन्धकाण्डविषयां विततान टीकाम् ॥

Colophon :

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥

110

Sl. No : 17269 — रामायणव्याख्या — Ms. No : C. 491/2

Beginning :

सुन्दरे यस्य दासोऽब्धिं तीर्त्वा दृष्ट्वा च मैथिलीम् ।
दृष्टा सीतेत्यभ्यवोचत् तं रामं नौमि चिद्घनम् ॥
पूर्वस्मिन् काण्डे मनसा गमनं कृतमित्युक्तम् । इदानीं कायेनापि गमनं कर्तुमैच्छत् इत्याह — अथ समुद्रतरणं इच्छति स । तत इति ॥

End :

पूर्वमुक्तया मदुक्त्या श्रुतेन त्वच्छोकेन अतिपीडिताऽप्यदीनभाषिणी सा मया शिवाभिः वाग्भिः अभिप्रसादिता शान्ति निवृत्तिं उवाह प्राप्तेत्यर्थः । ळखमानः ॥

Colophon :

इति श्रीरामाभिरामीये श्रीरामायणतिलके सुन्दरकाण्डे अष्टषष्टितमःसर्गः ॥

111

Sl. No : 17270 रामायणव्याख्या Ms. No : p. 4633/2

Beginning :

कश्शक्तः सर्वरत्नानि समुद्धर्तुं महार्णवात् ।
रामायणार्थरत्नेषु किञ्चिल्लब्धुं समुद्यतः ॥
क्षन्तुमर्हथ मां सन्तः . . . . . कल्पकाः ॥
मधुरान्तकवाल्मीकिमुनिना भाषितं शुभम् ॥
. . . . . श्रीपराशरभट्टार्य . . . . भूयसे ॥

End :

कुतोऽन्यथान्यरमतश्च आत्मना सीताकृतानि व्यसनानीश्वरस्य अनेन प्रकारेणापि श्रीरामचन्द्रदुःखाभावमेव वर्णयन्ति । एवमन्यत्रापि एवंविधविषये परिहारो द्रष्टव्यः ॥

Colophon :

इति श्री मधुरान्तकाभिनववल्मीकिकृतायां नानाटीकार्थसंग्रहटीकायां अयोध्याकाण्डः समाप्तः ॥

112

Sl. No : 17273 रामायणव्याख्या Ms. No : P. 1952

Beginning :

कारुण्यामृतनीरमाश्रितजन श्रीचातकानन्ददं
शार्ङ्गाखण्डलचापमम्बुजभवाग्रेद्राविबर्हिष्पदम् । (?)
चारुस्मेरमुखोल्लसज्जनकसौदामिनीशोभितं
श्रीरामाम्बुदमाश्रयेऽखिलजगत्संसारतापापहम् ॥

प्रणम्य नारायणतीर्थदेशिकान्
भवानलार्तामृतपूरनीरदान् ।
करोति रामायणतत्त्वदीपिकां
महेशतीर्थाख्ययतिः यथामति ॥

End :

त्रिविष्टपे ब्रह्मलोके वासो भवति ।
शृण्वन् रामायणं भक्त्या यःपादं पदमेव वा ॥
स याति ब्रह्मणःस्थानं ब्रह्मणा पूज्यते सदा ॥
इति वचनात् ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीनारायणतीर्थशिष्यश्रीमहेश्वरतिर्थविरचितरामायणव्याख्यायां युद्धकाण्डदीपिकायां त्रिंशोत्तरशततमः सर्गः ॥
महेशतीर्थरचिता रामपादसमर्पिता ।
टीका श्रीयुद्धकाण्डस्य समाप्ता तत्वदीपिका ॥

113

Sl. No : 17285 रामायणव्याख्या Ms. No : P. 2604

Beginnig :

आपृच्छैव साधयामीत्युक्त्वैव अनुज्ञतश्चैव यथासुखं विहरतामिति वाल्मीकिनानुगमनपूर्वकं अभ्यनुज्ञातश्चैव आभ्यां गुरुशिष्ययोः ।

End :

अयोध्यापीत्यादि ।रम्या अयोध्यापुर्यपि बहून् वर्षगणान् शून्या सती कालान्तरे ऋषभं नाम राजानमवाप्य निवासं जनाश्रयत्वमुपयास्यति . . . .
इति द्रष्टव्यम् । . . . . उत्तरकाण्डसमेतं कृतवान् प्रचेतसः पुत्र इति . . . .
सर्वार्थसाधकत्वेन चानुगृह्य अङ्गीकरोति स्म ॥ आलीमानस्सर्गः ॥

Colophon :

इति श्रीमद्रामायणामृतकतकटीकायामुत्तरकाडे श्रीमत्परमहंसपरिव्राजकदेशिकाचार्यगुरुराजश्रीमन्माधवयोगीन्द्रविरचिते दशाधिकशततमस्सर्गः ॥

114

Sl. No : 17287 | रामायणव्याख्या | Ms. No : P. 5735

Beginning :

× × × देपि महाषोढा मूलपादकरात्मकैः ।

पञ्चपादैः पञ्चकाण्ड पञ्चपादैः निवृत्ता षण्मतःपरम् ।।

अथ श्रुतवृत्तान्तो रामः कथा × × × —

श्रुत्वा हनुमत इत्यादि । उत्तरवाक्यमिति । कृतशौर्यहनुमदुपश्लाघाविषयमिति यावत् ।।

End :

शत्रुघ्नचोदिता राजभवनरक्षका इत्यर्थः । × × × × तदर्हस्येतीत्यर्थः । सहस्रशतलक्षं अपेक्षमाणेति । तत्कृतमुपकारमनुचिन्तयन्तीत्यर्थः । प्रददाविति । दातुमिच्छतीत्यर्थः ।।

Colophon :

इति श्रीमद्रामायणामृतकतकटीकायां एकविंशाधिकशततमः सर्गः ।।

115

Sl. No : 17288 | रामायणव्याख्या | Ms. No : P. 8351

Beginning:

× × × × × स्तकम् ।

महाषोढाढ्यकाण्डं यत्तद्रामायणमाद्रिये ।।

असंगतव्याकृतिपांसुपङ्किलं

रामायणं तीर्थ × तामृतम् ।

योगीन्द्रवाणीकतकाद्रिपङ्किलं

सर्वोपकारक्षममस्तु सर्वदा ।।

End :

अथ ताराया हितो × × × तुह्यस्तर्हि कथं कालात्ययं न जानीत । इत्यत्राह सुदुःखेत्यादि । सुदुःख × × × एतद्वचनात् × × तस्यार्थसिध्यर्थं तान् प्रतीक्षमाणस्तिष्ठति । अत एव ×

Colophon :

— — —

116

Sl. No: 17289 रामायणव्याख्या Ms. No: P. 4797

Beginning:

अथ सर्वलोकोत्तरसत्यलोकस्थित × × श्रीरामायणाभ्यासनिर्मलान्तःकरण परमकारुणिक + रामायणाकलनसामर्थ्याभावमालोक्य वाल्मीकिमुखेन गायत्र्य क्षरसंख्यया + +

End:

अत एव श्रीभागवत उक्तं —

पत्न्यस्तु षोडश सहस्रमतिप्रकामं यस्येन्द्रियं विमथितुं करणैर्न शेकुः इति । विलासमन्मथपारवश्यादिकं लोकैर्मनुष्यादिवदभिनयमात्रमिति ध्येयम् ॥

Colophon:

इति श्रीरामायणभूषणव्याख्यायां सप्तसप्ततितमः सर्गः ॥

117

Sl. No: 17292 रामायणव्याख्या Ms. No: A 521/2

Beginning:

श्रीमद्रामपादपद्मयुगलं पद्मार्चितं पद्मया
पद्मस्थेन तु पद्मजेन विनुतं पद्माश्रयस्याप्तये ।
यद्वेदैश्च नुतं शुभैकनिलयं सर्वाश्रयं निष्क्रियं
शश्वच्छङ्करशङ्करं मुहुरहो सन्नौमि तल्लब्धये ॥ १ ॥

\+ + + + + + +

नत्वा रामं शिवं साम्बं रामो रामप्रवर्तकः।
रामायणस्य तिलकं कुरुते रामतुष्टये ॥

End:

तत्र द्वादशवर्षाणि राघवः सह सीतया ।
रमयामास धर्मात्मा नारायण इव श्रिया ॥

इति पाद्मे उक्तम् । एकोनषोडशवर्षस्य विश्वामित्रेण नयनात्पञ्चदशवर्षसमाप्तौ विवाह इति बोध्यम् ॥

Colophon:

इति श्री रामाभिरामे श्रीरामीये रामायणतिलके बालकण्डे सप्तसप्ततितमः सर्गः ॥

118

Sl. No : 17292 **रामायणव्याख्या** Ms. No : A. 522/2

Beginning :

अयोध्यारुये तु गुर्वर्थे त्यक्त्वा राज्यं गिरौ वसन् ।
पादुके भरतायादात स रामः शरणं मम ॥

अथ रामस्य राज्याभिषेकादिगुणान् प्रतिपादयितुं राज्याभिषेकादि च प्रतिपादयितुं एतदारम्भः । गच्छतेति ॥ मातुलकुलं मातुलगृहम् ।

End :

सञ्चारं देशम् । समभिप्लुतं सम्यगुपद्रुतम् । + व्याळा इत्यमरः । उच्छिष्टमशुचि । प्रमत्तमसावधानं तान् रक्षोव्याळान् । समं युक्तम् । इतीरितः एवमुपदिष्टमार्गः । कृतस्वस्त्ययनः कृतमङ्गलाशीर्वादः ॥

Colophon :

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकाण्डे एकोनविंशाधिकशततमः सर्गः ॥

119

Sl. No : 17293 **रामायणव्याख्या** Ms. No : A. 523/2

Beginning :

अथ ऋषिदर्शितवर्त्मना रामस्य दण्डकारण्यप्रवेशमाह— प्रविश्येति । ऋषिदर्शितवर्त्मनेति शेषः । दण्डकारण्यं तत्संज्ञितं महारण्यं दण्डस्य राज्ञो देशो शुक्रशापवशात् अरण्यमभवत् ततः प्रभृति दण्डकारण्यसंज्ञा । प्रायेण महाराष्ट्रदेशोऽयम् ॥

End :

शुभदर्शनं काननं यस्यां तां पम्पादर्शनं सर्वतः इति शेषः । विवेश—मतङ्ग सरसोऽवच्छेदेनेति बोध्यम् ॥

विराधादिकबन्धान्तान् हत्वा स्वपदमाविशत् ।
विचरन् दण्डकारण्ये भवारण्ये स मे गतिः ॥

Colophon :

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अरण्यकाडे पञ्चसप्ततितमस्सर्गः ॥

120

Sl. No : 17294 रामायणव्याख्या Ms. No : A. 524/2

Beginning:

सुग्रीवस्यावनं तुर्ये इन्द्रसूनोश्च मर्दनम् ।
मारुतेः मुद्रिकादानं कृतं येन स मे गतिः ॥
सः विराधादिवधेन प्रसिद्धपराक्रमः पम्पादर्शनोद्दीपितकामो वा ॥

End :

स वेगवानिति। वेगसमाहितात्मा खे गमने सम्यगाहितः अर्पितः आत्मा बुद्धिः, येन मनस्समाधाय मनस्समाधानं कृत्वा मनसा जगाम सस्मारेत्यर्थः ॥

Colophon :

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके किष्किन्धाकाण्डे सप्तपष्टितमः सर्गः ॥

121

Sl. No : 17295 रामायणव्याख्या Ms. No : A. 525/2

Beginning :

सुन्दरे यस्य दासोऽब्धिं तीर्त्वा दृष्ट्वा च मैथिलीम् ।
दृष्टा सीतेत्यभ्यवोचत्तं रामं नौमि चिद्घनम ॥
अथ समुद्रकूर्दनमिच्छति ऽस–तत इति ॥

End :

पूर्वमुक्तया मुदुक्त्या कृतेन त्वच्छोकेनातिपीडीताऽप्यदीनभाषीणी सा मया शिवाभिः वाग्भिः अभिप्रसादिता शान्तिं दुःखनिवृत्तिं उवाह प्रापेत्यर्थः ॥ खळमानः ।

Colophon :

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके सुन्दरकाण्डेऽष्टपष्टितमस्सर्गः ॥

122

Sl. No :17296 रामायणव्याख्या Ms. No : A. 526/2

Beginning:

युद्धे रक्षोगणान् हत्वा पुष्पकेन निजां पुरीम् ।
सीतया स ह चागत्य रेजे रामोऽभिषेचितः ॥
एवं हनुमतः सकाशात् सीतावृत्तान्तं . . . . . इत्याह—श्रुत्वेति

End :

अत्र फलश्रुतिश्लोकाः कतकव्याख्याने नोपलभ्यन्ते ॥
निर्मलं कतकक्षोदादपि रामायणार्णवम् ।
अत्यन्तनिर्मलं चक्रे रामः स्वमतिवासमा ॥ १ ॥
भट्टनागेशपूज्येन सेतुः श्रीरामशर्मणा ।
कृतः . . . अम्बुधौ । युद्धे हतो . . . रामो बभूव ह ॥

Colophon :

इति श्री गोमतीतीरनैमिषारण्याश्वमेधसप्ततन्तुवाटगत . . . तद्व्याख्याने श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकाण्डे त्रिंशदधिकशततमे सर्गे . . समाप्तः ॥ कतकरीत्या सर्गसंख्या । १२१ । सर्गसंख्या ॥ १३० ॥

123

Sl. No : 17297 रामयणव्याख्या Ms. No : A. 527/2

Beginning :

उत्तरेऽनूत्तरं कार्यं कृत्वाऽयोध्यां निजे पदे ।
स्थापयित्वा स्वयं रेजे रामो नः कुलदैवतम् ॥
अथ रावणस्य ब्रह्मानुग्रहजबलवैभवप्रतिपादनद्वारा तज्जेतृत्वेन भगवति पराक्रमातिशयं प्रतिपादयितुं त्वद्वृत्तवैभवं त्वयैवोपसंहृतमिति भगवन्महिमानं च स्तोतुं ऋषय आगताः इत्याह – प्राप्तेति ॥

End :

एतद्रामायणाख्यानं कृतवान् प्रचेसः पुत्रः इत्यक्षराधिक्यं आर्षत्वात् । तत् ब्रह्मा हिरण्यगर्भोऽपि अन्वमन्यत तस्य शब्दतया वेदोपबृंहणतया सर्वार्थ साधकतया च अङ्गीकृतवानिति सर्वेष्टसिद्धिः ॥

Colophon :

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके श्रीमदुत्तरकाण्डे एकादशाधिकशततमः सर्गः ॥

124

Sl. No : 17308 | रामायणव्याख्या | Ms. No : P. 1126

Beginnig :

राममिन्दीवरश्यामं राजीवायतलोचनम् ।
ज्याघोषनिर्जितारातिं जानकीरमणं भजे ॥
वाल्मीकिनामधेयाय मुह्यवान्ति मुचे नमः । (?)
श्रीरामकथावर्षैः जगत्तापमशीशमत् ॥

\+ + + + + +

तत्राद्यकाण्डव्याख्यानं क्रियते विदुषां मुदे ।
रामानुजेन विदुषा रामभक्तैकसिन्धुना ॥

तप इत्यादि ।

End :

आयुष्यमिति । सौत्रामृतकम् (?) । तत्कृतेति । संहिता संहितार्थत्वात् संहितेति व्यपदेशः ।

Colophon :

इति श्रीकन्दाळुरामानुजीये श्रीमद्युद्धकाण्डे व्याख्याने द्वात्रिंशच्छततमः सर्गः ॥

125

Sl. No : 17327 | रामायणव्याख्या | Ms. No : P. 402

Beginning :

रमापतिपदाम्भोज × × स्फुरितमानसम् ।
सेनापतिमहं वन्दे विष्वक्सेनं निरन्तरम् ॥
प्रपद्ये रघुनाथस्य चरणौ शरणं परम् ।
वनायनं ययोरासीन् देहभाजां रसायनम् ॥

\+ + + + + + +

को न्वस्मिन्नित्यादि । अत्र गुणशब्दः —

End :

तस्यां हि नत्याभनुनये यस्यावसरो नास्ति । अतः पूर्वैः हेतुभिः सहानेनापि हेतुना भरत एव ज्येष्ठ इति प्रतिष्ठितः ॥

Colophon :

इत्यात्रेयेन × × कुलसंभवेन वरदराजेन बोलिपण्डितब्रह्माधिराजापर नाम्ना विरचिते विवेकतिलकानाम्नि श्रीमद्रामायणव्याख्याने उत्तरकाण्डं सम्पूर्णम् ॥

126

Sl. No : 17331 रामायणव्याख्या Ms. No : P. 3449

Beginning :

गच्छतेति । मातुलकुलं मातुलः मातुरग्रजः । कुलं गृहे इत्यमरः । नित्य शत्रुघ्नः नित्यशत्रून् अहङ्कारममकारादीन् हन्ति इति नित्यशत्रुघ्नः शत्रुघ्नः ।

End :

सम्यगुपलिप्तं सम्यगुप × तं । व्यालाः श्वापदानि । सेवलिङ्ग × × श्वापदसर्पयोरिति निघण्टुः । उच्छिष्टं अशुचि . . . (?) कृतस्वस्त्ययनं कृतमङ्गलाशीर्वादम् ॥

Colophon :

इति वैद्यनाथदीक्षितविरचितायां रामायणदीपिकायां अयोध्याकाण्डे एकोन × × अयोध्याकाण्डः समाप्तः ॥

127

Sl. No : 17314 रामायणव्याख्या Ms. No : C. 2098/2

Beginning :

आरामधाम श्रीराम रामं द्रष्टुं गतो बुधैः ।
पारं स पारयेदेतत्काण्डकाण्डनिधिं मया ॥

राज्ञ आज्ञां सफलीकर्तुं स्वच्छहृदय इच्छति स्म इत्याह –तत इति । सीतायाः उत्करीत्या प्रतिकृतेः । पदं आवासस्थानम् ।

End :

नम: सकलसंपाता: मनोरथसद्दशगतय: + + मन्यु: दैन्यम् तौ ·रामलक्ष्मणौ + + + अदीनभाषिणा मया भवान् केन वृद्धियोग: जनदु:खेनाभिपीडीताऽपि इष्टाभिर्वाग्भि: त्वामिव शान्ति जगाम ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकान्वाचनेकगुणसंपन्नश्रीमद्रामचन्द्रदिव्यश्रीपादपद्माराधकश्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनाचार्याणां श्रीमत्सयमिवर (?) श्रीपादानां कमलसञ्जातेन सत्यधर्मयतिना विरचिते श्रीमद्रामायणे भावदीपसुन्दरकाण्डे अष्टषष्टितम: सर्ग: ॥

128

Sl. No : 17336 **रामायणव्याख्या** Ms. No : P. 164/2

Beginning :

+ मं च सततं बभौ । मुदिगोण्ड हरि: कुरुते टीकां रामायणस्य . . . त: पूर्वैर्नीतेष्वपि मणिषु रत्नाकर इत: प्रभृत्यन्यो धन्यो मणिगण—

End :

+ निवारय परिहर । गन्तुं क्षमं योग्य इति । एवं प्रकारेणैव प्राञ्जलिभि: मङ्गलाशासनाङ्गतया बद्धाञ्जलिपुटै: तपस्विभि: कृतस्वस्त्ययन: कृताशीर्वचन: ॥

Clophon

इति श्रीजानकीरमणचरणशरणवरणसमासादितसारस्वतेन कौण्डिन्यसगोत्र मुदिगोण्डवंशपारावारसुधाकरलक्ष्मयामात्यरङ्गमाम्बातनुजेन हरिपण्डितेन विरचितायां गुरुवाल्मीकिभावप्रकाशिकायां अयोध्याकाण्डे एकोनविंशतितमस्सर्ग: ॥

129

Sl. No : 17352 **रामायणव्याख्या** Ms. No : P. 2127

Beginning :

करशक्तस्सर्वरत्नानि समुद्धर्तुं महार्णवात् ।
रामायणार्थरत्नेषु कि × × × × म्रता: ॥
क्षन्तुमर्हन्तु मां सन्त: रामभक्तं सदा भुवि ।
नानाटीकार्थसंयुक्तं लेखकोऽहं न कल्पक: ॥

End :

+ राममेवानुपश्यन्तीत्यत्र लङ्कायां सीतासमीपे × × × × खलु वर्तत इत्युक्तम् । हनूमान् राममेवानुपश्यन्तीति राममदृष्ट्वा कथं पश्यन्तीत्युक्तवानिति चतुरस्य हनूमतः × रामः सकृद्दृष्टस्वरूपं दर्शितवानिति भावः ।

Colophon :

इति श्री रघुगन्तकाभिनववाल्मीकिकृतायां नानाटीकार्थसङ्ग्रहटीकाय युद्धकाण्डः समाप्तः ॥

130

Sl. No : 17353 **रामायणकथातात्पर्यार्थः** Ms. No : C. 3053/1

Beginning :

सेतुबन्धन्तु पञ्चम्यां समुद्रं दशयोजनम् ।
षष्ठ्यां बद्धो नलेनाशु सेतुः विंशतियोजनम् ॥
द्वाविंशतिस्तु सप्तम्यां अष्टम्यां विंशतिस्त्रयः ।
नवम्यां तु चतुर्विंशो दशम्यामेकविंशतिः ॥

End :

व्यासः —

सङ्क्षेपतश्च तात्पर्यं श्रीमद्रामायणस्य च ।
कालस्य नियमोक्तिर्वा राघवस्य क्रियादिषु ॥
प्रोक्ता यस्यास्तु विस्तारः श्रवणात्पठनादपि ।

Colophon :

इति उत्तररामायणकथातात्पर्यमपि जातम् ॥

131

Sl. No : 17356 **रामायणघटनाकालनिर्णयः** Ms. No : C. 3697

Beginning :

आदौ सङ्गृह्य मया लिख्यते —

स्वामिनो जननानन्तरमष्टमे वर्षे उपनयनम् । द्वादशे विश्वामित्रेण मार्गगमनम् । ततस्ताटकावधयज्ञसंरक्षण + सीतापाणिग्रहणाद्यनेकव्यापारयुक्तस्य श्रीरामस्य पुनरयोध्याप्रवेशपर्यन्तं द्वादशवत्सर एव ॥

End :

किञ्च –

प्रजगुर्देवगन्धार्वा ननृतुश्चाप्सरोगणाः ।
अभिषेके तद × न्यतदा रामस्य धीमतः ॥
भूमिस्सस्यवती चैव फलवन्तश्च पादपाः ।
गन्धवन्ति च पुष्पाणि बभूवू राघवोत्सवे ॥

Colophon :

इति श्रीवेङ्कटाचार्यकृतश्रीमद्रामायणसारसङ्ग्रहे अर्धदिनान्तरद्वाविंशद्दि युद्धकाण्डस्समाप्तः ॥

132

Sl. No : 17357 रामायणचूर्णिका Ms. No : A. 656/11

Beginning :

ग्रन्थाः स्युः बालकाण्डे निजखुरगणिना मन्यभावा द्वितीये
रं × राश्रीस्तृतीये नरचरसहितास्स्युश्चतुर्थे च का × ।
× × × × गणिता मा × सामा च षष्ठे
भोगी रागी परस्मिन् सतुनख इति स्याः समस्ता च संख्या ॥

End :

शिष्टपञ्चम्या युक्तषष्ठ्यां आर्द्रायां नन्दिग्रामप्रवेशः । तस्य जटाशो × × नम् । शिष्ट × × × × युक्तसप्तम्यां पुनर्वसूनक्षत्रे अयोध्याप्रवेशः । श्रीरामचन्द्रस्य एकोनचत्वारिंशे वर्षे देव्या × × × × शे: वर्षे चैत्रशुद्धसप्तम्यां पुष्यनक्षत्रे श्रीरामचन्द्रस्य पट्टाभिषेकः । × × म × × राजा × × × पुष्येन श्रवणेन × प्रौष्ठा सावित्र × × स्या राहनू × × × रा × × × चेति ॥

Colophon :

— — —

133

Sl. N : 17360 **रामायणतनिश्लोकी** Ms. No : P. 5103/1

Beginnign:

शम्पामध्यस्फुरन्नीलतोयदद्युतिसन्निभम् ।
सीतयाऽऽलिङ्गितं रामं कलयेऽभीष्टसिद्धये ॥
भक्तप्रतिष्ठा नीलाद्रौ . . . . पराङ्कुशमुनिं भजे ॥
द्रमिडोपनिपद्व्याख्याकारै रामायणस्य ये ।
श्लोकास्संगृह्य तां दैव्या भाषया विवृणोम्यहम् ॥
तपस्स्वाध्याय . . . मुनिपुङ्गवम् ॥
तपश्शब्देन निदिध्यासनं —

End:

वधार्थं रावणस्येह प्रविष्टो मानुषीं तनुम् । सीतेति । कृष्णः—भविष्यत्कृष्णावतारश्च तवैवेत्यर्थः । त्वमेव प्रजापतिः । प्रजापतिशब्दवाच्यस्त्वमेव । अवतारप्रयोजनमाह । वधार्थमिति । मानुषीं मनुष्यसंस्थानरूपां तनुं अप्राकृतशरीरम् ॥

एवमेतत् पुरावृत्तं . . . प्रवर्धताम् ॥

Colophon:

आन्त्रो बहुलकृते प्रत्येकार्थस्य विस्तरे । (?)
रामायणस्य जयति युद्धकाण्डस्सुखोदयः ॥
द्रमिडोपनिषद्व्याख्यानं समाप्तम् ॥

134

Sl. No : 17362 **रामयणतात्पर्यसंग्रहः** Ms. No : A. 397/1

Beginning:

अत्रेदं प्रतिपद्यन्ते । रामचन्द्रस्य द्वादशे वर्षे विवाहः । अयोध्यायां द्वादशसंवत्सरं वासः । देवस्य पञ्चविंशे वर्षे देव्या अष्टादशे वर्षे वनप्राप्तिः । मुनीनामाश्रमेषु दश संवत्सरा गताः ।

End :

हरिणा च जगत्कर्त्रा कृतं सर्वं चराचरम् ।
हरिः पाति जगत्सर्वं हरिरेव गतिर्मम ॥
हरिर्गुरुर्हरिर्ब्रह्मा हरिर्भ्रातः हरिः पिता ।
कथानेता कथाकर्ता कथातुष्टस्स्वयं हरिः ॥

Colophon :

इति श्रीमद्रामायणतात्पर्यदीपिकायां व्यासप्रोक्तः रामायणतात्पर्यसंग्रहस्सम्पूर्णः ॥

135

Sl. No : 17363 रामायणतात्पर्यविरोधभञ्जनी Ms. No : P. 8723

Beginning :

अष्टमे वर्षे उपनयनम् । ततः विश्वामित्रानयनम् । ताटकावधः । यज्ञसं-रक्षणम् । अहल्याशापविमोचनम् । धनुर्भङ्गः । सीताकल्याणम् । परशुराम-जयम् । अयोध्याप्रवेशः । द्वादशे वर्षे अयोध्यावासः ।

End :

यथा प्रत्यूषसमये चतुर्णां सागराम्भसाम् ।
पूर्णैर्घटैः प्रतीक्षध्वं तथा कुरुत वानराः ॥
सप्तम्यां गुरुवासरे पुष्यनक्षत्रे अष्टादशघटिकामध्ये पट्टाभिषेकः ॥
ततस्तु प्रयतो वृद्धः वसिष्ठो ब्राह्मणैस्सह ।
रामं रत्नमये पीठे सहसीतं न्यवेशयत् ॥
अभ्यषिञ्चन्नरव्याघ्रं प्रसन्नेन सुगन्धिना ।
सलिलेन सहस्राक्षं वसवो वासवं यथा ॥

Colophon :

इति श्रीमद्रामायणतात्पर्यविरोधभञ्जनीसमाप्तिः ॥

136

Sl. No : 17364 रामायणपारायणक्रमः Ms. No : P. 367/2

Beginning :

× × × ङ्गन्यासम । अस्य श्रीरामायणमहामंन्त्रस्य वाल्मीकि-ऋषिः । अनुष्टुप्छन्दः श्रीरामचन्द्रो देवता । रां बीजं, नमः शक्तिः । × × रामायेति कीलकम् । श्रीरामप्रीत्यर्थे पारायणे विनियोगः ।

End :

रामं शक्ति × × ध्यायेदमोघं रामसायकम् ।
धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि ॥
पौरुषे चाप्रतिद्वन्द्वः तमेवं जहि रावणिम् ।
दशकृत्वो जपेन्मन्त्रं पश्चात् पारायणं भवेत् ॥

Colophon :

— — —

137

Sl. No : 17367 रामायणपारायणक्रमः Ms. No : P. 7242/1

Beginning :

शुक्लाम्बर . . . शान्तये ॥
यस्य द्विरदवक्त्रा + तमाश्रये ॥
कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥

End :

शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा ।
स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा ॥

Colophon :

— — —

138

Sl. No : 17368 रामायणपारायणक्रमः Ms. No : P. 7441/3

Beginning :

श्रीदेवी —
भगवन् देवदेवेश परमानन्दविग्रह ।
सर्वलोकैकजनक × × × कृतशेखर ।
× × भाजयुगलं प्रणमामि पुनः पुनः ॥
× × × ×
रामायणस्य श्रवणपारायणफलं वद ॥

End :

रामायणं यः पठति स एवाहं हिमाद्रिजे ।
श्रीरामचरितं सर्वं × कं ते प्रीतिभावतः ।
श्रीरामं परमानन्दकन्दं रामायणैकनिरता ॥ (?)

Colophon :

इति श्रीस्कान्दपुराणे सनत्कुमारसंहितायां × रहस्यतन्त्रे उमामहेश्वर-संवादे रामायणपारायणफलकथनं नाम पञ्चदशः पटलः ॥

139

Sl. No : 17373 रामायणमहिमादर्शः Ms. No : C. 513

Beginning :

परमान्नविभागघट्टो नामा प्रथमबिम्बः ॥ श्रीमद्वाल्मीकिरामायणे बालकाण्डे १६सर्गे वाल्मीकिमहर्षिणा परमान्नविभागः श्लोकत्रयेण प्रतिपादितः । (बाल-काण्ड । सर्ग १६,श्लो २७) ॥

कौसल्यायै नरपतिः पायसार्धं ददौ तदा ॥

End :

संस्कृतं रामचरितं परित्यज नराधमः ।
पठन् भाषान्तरकृतं मृगतृष्णाजलं पिबेत् ॥
किञ्च, पठन् भाषान्तरकृतं कथं तरति पापधाः । (?)
क्षुन्निवृत्तिर्भोजनेन विना तत्कथया कथम् ॥
अवशिष्टांशः तत्रैव द्रष्टव्यः ॥

Colophon ;

श्रीमद्रामायणमहिमादर्शे श्रीमद्रामायणप्रारम्भणपारायणकथाश्रवणादिविधि-निर्णयप्रकाशकघट्टो नाम सप्तमबिम्बः समाप्तः ॥

140

Sl. No : 17374 रामायणरहस्यम् Ms. No : P. 4807/1

Beginning :

रामायणरहस्यं लिख्यते—

गुणान्यत्वं कारणत्वं शरण्यत्वं प्रकाशता ।
प्रकाशकत्वं निखिलैर्ध्येयनत्वनियन्त्रता ॥

एते ब्रह्मगुणा नित्या गायत्रीपदबोधिताः ।
प्रथमेन गुणाढ्यत्वं द्वितीयेन च लक्षणम् ।।

End :

तस्मादिदं स्वादिकाव्यं गायत्रीं महतीं विदुः ।
इत्येतदादिकाव्यार्थरहस्यं साम्प्रदायिकम् ।।
विद्यारण्यमुनिर्ब्रह्मविदां प्राकाशयन्मुदा ।।

Colophon :

इति परमहंसपरिव्राजकपरिवृढेन माधवारण्यमुनिवराल्लब्धबोधेन श्रीविद्यारण्यमुनीश्वरेण कृतं रामायणरहस्यं सम्पूर्णम् ॥

141

Sl. No : 17376 **रामायणविरोधभञ्जनी** Ms. No : P. 1420/2

Beginning :

विनताशेषहृदयजनितानन्दवैभवः ।
प्रसाद × हो भूयात्प्रह्लादाय सदा मम ।।
सर्वाणि पूर्वगदितानि निबन्धनानि
शर्वाणि तानि तव चर्वितचर्वणानि ।
वाक्यं कृतस्तुतिरथापि नवीनवाङ् मे
कीरस्य गीरिव तनोतु मनोविकासम् ।।
येन भागवती टीका पञ्चटीकाविशोधिनी ।
कृता वाचस्पतिन्यायाः × × षष्ट्या विवेचिताः ।।
विरोधभाञ्जिनीव्याख्या वाल्मीकीये विरच्यते ।।

End :

अस्मदुक्तप्रकारेण सामञ्जस्याच्च × × कुलकल्पनं प्राचीनानां किमर्थमिति न जानीमः तस्मात्पूर्वोक्ता प्रागुक्तव्यवस्थेति संक्षेपः ॥

Colophon :

इति श्रीलनाम्येन नृसिंहसूनुना ब्रह्मविद्याभरणेन्द्रेण विरचिता वाल्मीकीयविरोधभञ्जिनी परिपूर्णा ।।

142

Sl. No : 17382 | रामायणश्रवणविधिः | Ms. No : A. 527/3

Beginning :

अथ रामायणश्रवणविधिः लिख्यते—

रामायणे श्रुते दद्यात् रथं हेममयं सुधीः ।
चतुर्भिः वाजिभिः युक्तं तथा क्षौमपताकया ॥
रत्नैश्च विविधैर्मुक्तं किङ्किणीनादनादितम् ।
सम्पादिते रथे सम्यग्धेनुं दद्यात् पयस्विनीम् ॥

End :

यः शृणोति सदा भक्त्या स गच्छेत् वैष्णवीं गतिम् ।
पुत्रदाराश्च वर्धन्ते सन्ततिस्सम्पदस्तथा ।
सत्यमेतद्विदित्वा तु श्रोतव्यं नियतात्मभिः ॥

Colophon :

इति रामायणश्रवणविधिः समाप्तः ॥

143

Sl. No : 17385 | रामायणसंग्रहः | Ms. No : P. 2287/1

Beginning :

गच्छता मातुलकुलं भरतेन तदाऽनघः ।
शत्रुघ्नो नित्यशत्रुघ्नः नीतः प्रीतिपुरस्कृतः ॥
तेषामपि महातेजा रामो रतिकरः पितुः ।
स्वयम्भूरिव भूतानां बभूव गुणवत्तरः ॥

End :

रावणं बान्धवैस्सार्धं हत्वा लब्धं महात्मना ।
धनदस्य प्रसादेन दिव्यमेतन्मनोजवम् ॥
भक्त्या रामस्य ये चेमां संहितां मुनिना कृताम् ।
लिखन्ति ये महात्मानः तेषां वासः त्रिविष्टपे ॥

Colophon :

— — —

144

Sl. No : 17389 **रामायणसारः** Ms. No : P. 4843/2

Beginning :

श्रीशारदाचरणपद्मयुगं निधाय
चित्ते गणेशचरणौ प्रणयेन नत्वा ।
रामायणीयमखिलं मुनिभिः × प्रणीतं
माघैरदन्तदि × सारतरं प्रवक्ष्ये ॥

End :

इत्येतद्यश्चरितं पठति रघुपतेर्यो नरो वा श्रृणोति
सारं रामायणस्य प्रतिदिनमृषिणैवाग्निवेशेन गीतम् ।
सोऽयं निर्धूतपापो जलधरण्दमारुह्य यानेन याति
स्वर्गं दिव्येन देवैरभिमुखमखिलैरागतैः स्तूयमानः ॥

Colophon :

इति श्रीअग्निवेशमुनिप्रणीतः रामायणीयसारः समाप्तः ॥

145

Sl. No : 17390 **रामायणसारः** Ms. No : P.2917/1

Beginning :

तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥
पठन् द्विजो वागृषभत्वमीयात्
स्यात् क्षत्रियो भूमिपतित्वमीयात् ।
वणिग्जनः पण्यफलत्वमीयात्
जनश्च शूद्रोऽपि महत्त्वमीयात् ॥

End :

पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम ।
कार्यं करुणमार्येण न कश्चिन्नापराध्यति ॥
पूजिता मामिका माता दत्तं राज्यमिदं त्वया ।
तद्ददामि पुनस्तुभ्यं यथा त्वमददा मम ॥

कुटुम्बवृद्धिं धनधान्यवृद्धिं
स्त्रियश्च मुख्याः सुखमुत्तमं च ।
श्रुत्वा शुभं काव्यमिदं महार्थं
प्राप्नोति सर्वां भुवि चार्थसिद्धम् ॥

Colophon :

इति श्रीकौशिकवेङ्कटाचार्यतनूजेन श्रीनिवासराघवार्येण कृते रामायणसारे युद्धकाण्डः समाप्तः ॥

146

Sl. No: 17393 रामायणसारव्याख्या Ms. No: P. 2917/2

Beginnig :

श्रीरामकल्पकतरुः प्रददात्वभीष्टं
सीतालतः कपिवरिष्ठमनोज्ञशाखः ।
साकेतनाकवरभूषणमग्रजन्मा
देवास्स्तु नः सुगुणपुष्पनतच्छदो नः ॥
पश्यन् गोविन्दराजप्रमुखबुधजनैः कारितां पूर्वटीकां
ध्यात्वा व्याख्यां करोति स्फुटमिह सुहृदां प्रीतये रङ्गवासी ॥

End :

पूजिता मामिका माता । पूजिता राज्यपरित्यागपूर्वकवनवासङ्गीकारेण त्वया तोषिता । मम मया इदं तुभ्यं चित्रकूटे दत्तम् । . . . पुनर्ददामी त्यर्थः ॥

कुटुम्बवृद्धिं . . . . . चार्थसिद्धिम् ॥

Colophon :

इति श्रीकौशिककुलतिलकवेङ्कटाचार्यसूनुना श्रीरङ्गवासिना श्रीनिवास राघवदासेन विरचितायां रामायणसंगृहीतश्लोकव्याख्यायां रामायणसार चन्द्रिकासमाख्यायां युद्धकाण्डः समाप्तः ॥

147

Sl. No : 17395 रामायणसारव्याख्या Ms. No : P. 4738

Beginning :

अथ बालकाण्डे व्याख्येयानि व्याख्यायन्ते । नारदस्येति वाक्यं परिपूर्णार्थसमूहं अनेन प्रश्नानुरूपमुत्तरमुक्तं भवतीति सूचितम् । तुशब्देन नारदवाक्यस्य वाक्यान्तरेभ्यः शब्दतोऽर्थतश्चोत्कर्षो द्योत्यते ॥ + +

End :

इन्दिरादिमयं शार्ङ्गं धनुः यस्य सः शार्ङ्गधन्वा । हृषीकाणां विषयेन्द्रियाणां ईशः हृषीकेशः । पुरुषः पुरुषोत्तमः । + + कदाचिदपि केनापि शत्रुणा नैव जित इत्यजितः । विद्यमानं दशाख्यं खड्गं धारयतीति खड्गधृत् ।

\+ + + + + +

Colophon :

इति मद्रामायणसारसंग्रहे सुन्दरकाण्डः समाप्तः ॥

148

Sl. No : 17399 रामायणसारव्याख्या Ms. No : P. 425

Beginning :

रामस्य जननानन्तरमष्टमेवर्षे उपनयनम् । द्वादशे विश्वामित्रेण सह निर्गमनम् । तदारभ्य ताटकावधयज्ञसंरक्षणसीतापाणिग्रहणादिपर्यन्तं द्वादशवत्सर एव ॥

End :

प्रजगुर्देवगन्धर्वाः ननृतुश्चाप्सरोगणाः ।
अभिषेके ततस्तस्य तदा रामस्य धीमतः ॥
भूमिः सस्यवती चैव फलवन्ति च पादपाः ।
गन्धवन्ति च पुष्पाणि बभूवुर्मङ्गलोत्सवे ॥

Colophon

इति श्रीमद्वेङ्कटाचार्यकविकृते रामायणसारसङ्ग्रहे अर्धदिनो . . . . विंशद्दिनसमितः युद्धकाण्डः समाप्तः ॥

149

Sl. No : 17401 — रामयणसारसंग्रहव्याख्या — Ms. No : P. 3196

Beginning :

× × देवी नटदुज्वलप्रविलसच्चाटोपमेणाङ्कितो
विस्त्रस्ताखिललोकभीतिहरणा श्रीवाक्यमञ्जुध्वनिः ।
दोर्गानि × × × × श्रीरामकालाम्बुदः ॥

प्रणम्य सीताहर × × लक्ष्मणं
गुणाकरं कुण्डिनवंशसम्भवः । इमं सतामीश्वरदीक्षितः प्रियं ।
करोमि रामायणसारसङ्ग्रहम् ॥ अथ भगवान् वाल्मीकिः सर्वारम्भस्य
भियुक्तोपदेशपूर्वकत्वान्—

End :

× × यमननुदुष्टजनपरिगृह्यस्य शिष्टगृहीतत्वात् शास्त्रविरुद्धत्वा-
दयुक्तमेतदित्याशङ्क्य सत्यमेतत् × ष्टजनत्ययाज्त्वप्रतिपादकमशास्त्र + +
सामान्यविषयम् । तस्मादपि वि + + प्रप्रपन्नं प्रतिप्रयच्छति +

Colophon :

— — —

150

Sl. No : 17402 — रामायणसारसंग्रहव्याख्या — Ms. No : B. 525

Beginning:

सम्प्राप्तार्जुनकीर्तिशोभित × × × ।
प्रौढश्रींकमहं भजामि सततं श्रीरामकालाम्बुदम् ॥
श्रीमद्रामायणस्येयं सारसङ्ग्रहदीपिका ।
उपजीव्य कृतं प्राचां वेङ्कटार्येण कथ्यते

End :

इति श्रीरामचन्द्रपट्टाभिषेकमहोत्सवः +
दशवर्षसहस्राणि दशवर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यति ॥
अब्दे धातौ मिलिन्दे मासे चैत्रे . . . . सहजनकभुवा रामचन्द्रो
ऽवतान्नः ॥

Colophon :

इति श्री चक्रवर्तिवेङ्कटार्यकृतिषु रामायणसारसंग्रहदीपिकायां युद्धकाण्डः सम्पूर्णः ॥

151

Sl. No : 17403 रामायणाङ्गन्यासविधिः Ms. No : C. 3733

Beginning :

अथ श्रीमद्रामायणस्य साक्षाद्वेदरूपत्वाद्वेदस्य च ऋषिछन्दोदैवतज्ञानमन्त फलपर्यवसायित्वानुपपत्यावश्यकतया ऋषिछन्दोदेवता ज्ञेया एव ।

End :

अस्य श्री सुन्दरकाण्डमहामन्त्रस्य वाल्मीकिर्भगवानृषिः × × ×
ध्यानम् —
आञ्जनेयमतिपाटलाननं–पवमाननन्दनम् ।
मनोजवं मारुत — शिरसा नमामि ॥
लंमित्यादि पञ्चपूजा । पारायणानन्तरं उत्तरन्यासः ॥

Colophon :

— — —

152

Sl. No : 17404 रामायणोपन्यासः Ms. No : P. 3597

Beginning :

स तां पुष्करिणीं + + भ्रिय: ।
तस्य × दिग्भिया × × कंम्पिनो स कामवशमापन्नः सौमित्रिमिदमब्रवीत् —
अये! लक्ष्मण! पश्य! पश्य! इयं किल निदाघविगमसमयसमुज्जृम्भित पर्जन्यघनगर्जितसमुद्गच्छदच्छतरनिबिडसिन्धुरमणिक × न्दळस × निर्मलसलिलान्तर + विरहिजनमनःकम्पा विभाति पम्पा ॥

End :

लङ्कां वापि समुत्क्षिप्य गच्छेयमिति मे मतिः ।

नन्वत्र हनुमता आत्मस्तुतिः कृतेति प्रतिपादितम् । × × ×

\+ + चेत् नात्मस्तुतेर्वीरवादत्वेनादोषत्वात् ।

\+ + वानरान् प्रोत्साहयन् महाबलिमर्दनो जनार्दन इव प्रवृद्ध-

तरकळेबरो हनूमानङ्गदजाम्बवदभ्यनुज्ञया रावणमन्दिरसन्दर्शनकृतह ×

Colophon :

— — —

153

Sl. No : 17405 रामावतारादिकालनिर्णयः Ms. No :P . 7499/4

Beginning :

ग्रन्थाःस्युर्बालकाण्डे निजखुगगणितामान्यभावा द्वितीये

रङ्गे सा श्रीस्तृतीये नरचरसहिते स्युश्चतुर्थे च काण्डे ।

ख्याताः स्मुः सुन्दराख्ये तनुनगगलिता मङ्गसामा च षष्ठे

भोगे रागे × × स्तुतनवर इति स्याच्च या ख्यातसंख्या ॥

श्रीरामचन्द्रस्य द्वादशवर्षे विवाहः । अयोध्यायां द्वादशसंवत्सरं वासः ।

End :

श्रीरामचन्द्रस्य एकोनचत्वारिंशद्वर्षे सीतायास्त्रयस्त्रिंशद्वर्षे चैत्रशुक्लपक्ष

सप्तम्यां श्रीरामचन्द्रस्य पट्टाभिषेकः ॥

Colophon :

— — —

154

Sl. No : 17409 लघुयोगवासिष्ठम् Ms. No : P. 389

Beginning :

विघ्नाचलभिदादक्षो विघ्नेशो भगवानयम् ।

स . . . तावस्मान् पातु सर्वत्र सर्वदा ॥

दिवि भूमौ तथाऽऽकाशे बहिरन्तश्च . . ।

यो . . . . . यस्यास्ति निश्चयः ।

End :

स्नातं तेन समस्ततीर्थसलिले सर्वापि दत्ताऽवनी
× × मिष्टमनघं देवाश्च सम्पूजिताः ।
संसाराच्च समुद्धृतास्स्वपितरः त्रैलोक्यपूज्योऽह्यसौ
यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं . . . . ॥

Colophon :

. . . . श्रीवाल्मीकीये मोक्षोपाये फलश्रुतिर्नाम चतुश्चत्वारिंशः सर्गः ॥

155

Sl. No : 17410 लघुयोगवासिष्ठव्याख्या Ms. No : P. 442

Beginning :-

यत्प्रसादात् त्रिगुणिनः पुरुषाः स्वस्वकर्मणि ।
निष्प्रत्यूहाः फलं प्रापुः त × × × ॥
× × × × × × ×
स्मिन् लयं यान्ति तत्कालमुपास्महे ॥
वाणिं एणीदृशं वन्दे वन्दकानन्ददायिनीम् ।
यत् × × × × × × × ॥

End :

यन्नैष्कर्म्यं प्रकृतं तस्याप्युपसंहारः इति सर्वं समञ्जसम् ॥

Colophon :

इति पदवाक्यप्रमाणपारावारपारदृश्वना मुम्मडिदेवविद्वदाचार्येण विरचिते संसारतरणिनाम्नि वासिष्ठविवरणे × ×

156

Sl. No : 17412 वासिष्ठरामायणम् Ms. No : A. 6479/1

Beginning :

गुरो वसिष्ठ सर्वज्ञ कालत्रयविदां वर ।
सर्वभूतहितार्थाय वद रामः ककुद्गिरेः ॥

यात्रां कृत्वा महायोगी किं चकार हरिः स्वयम् ।
तत्सर्वं श्रुतिपीयूषं वद सर्वार्थवित्तम ॥

End :

पूजयित्वा ननामोच्चैः मुच्यते नात्र संशयः ।
य इदं शृणुयात् ध्यायन् सर्वपापैः प्रमुच्यते ॥
इत्यादीन्युग्रगा × × × ।
सर्वाघराशिं विनिहत्य चाशु शुभं प्रयात्येव भवेच्छिवोऽन्ते ॥

Colophon :

इति वासिष्ठरामायणे शतसाहस्रिकायां संहितायां × × ।

157

Sl. No : 17417 शतकोटिरामायणसारसंग्रहः Ms. No : P. 4807/5

Beginning :

श्री सुतोवाच – (?)
गुरुमासीनमेकान्ते सत्यलोके सुखासनम् ।
मरीचिः सुस्थितो भूत्वा पप्रच्छ विनयान्वितः ॥
मारीचिरुवाच—
भगवन् सर्वधर्मज्ञ कमलासन मे मुदा ।
राघवस्य चरित्रस्य विस्तरं वद भो प्रभो ॥

End :

विभूतिविश्वरूपश्च देवदेवस्य शौरिणः ।
सर्वासामपि विद्यानां मातरौ कामदे सदा ॥
बहुनात्र किमुक्तेन सुधियो येन मानवाः ।
शृण्वन् हि रामचारित्रं ते यान्ति परमं पदम् ॥

Colophon :

इति कपिलमहापुराणे ब्रह्ममरीच्यादिसंवादे शतकोटिरामायणग्रन्थ संख्याविभागं (?) नाम पञ्चदशोऽध्यायः । शतकोटिरामायणसारसंग्रहं सम्पूर्णम् ॥

158

Sl. No: 17418 **शतश्लोकीरामायणम्** Ms. No: P. 6586/1

Beginning:

श्रीजानकीचरणपद्मयुगं निधाय
चित्ते रमेशचरणौ प्रणयेन नत्वा ।
रामायणीयमखिलं मुनिभिः प्रणीतं
आद्यैरहं तदिह सारतरं प्रवक्ष्ये ॥

End:

इत्येत + चरित्रं पठति रघुपतेः यो नरो वा शृणोति
सारं रामायणस्य प्रतिदिनमृषिणाऽग्निवेशेन गीतम् ।
सोऽयं निर्धूतपापो जलधरपदमारुह्य यानेन याति
स्वर्गं दिव्येन देवैरभिमुखमखिलैः आगतस्तूयमानः ॥

Colophon:

इति श्रीअग्निवेशमुनिविरचि × × × × श्लोकीरामायणं समाप्तम् ॥

159

Sl. No: 17491 **शुकानुशासनम्** Ms. No: P. 6516/1

Beginning:

युधिष्ठिरः—
कथं निर्वेदमापन्नः शुको वैय्यासिकः पुरा ।
एतन्मे तत्वतः सर्वं त्वमाचक्ष्व पितामह ॥

End:

य इदं शृणुयात् नित्यं व्यासेन परीकिर्तितम् ।
विमुक्तः सर्वपापेभ्यः विष्णुलोकं स गच्छति ॥

Colophon:

इति श्रीमन्महाभारते इतिहाससमुच्चये शुकानुशासनं नाम एकोनविंशोऽध्यायः ॥

160

Sl. No : 17424 | संक्षेपरामायणम् | Ms. No : P. 5187/7

Beginning :

तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥
को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ।
+ + एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ॥

End :

पठन् द्विजो वागृषभत्वमीयात्
स्यात् क्षत्रियो भूमिपतित्वमीयात् ।
वणिग्जनः पण्यफलत्वमीयात्
जनश्च शूद्रोऽपि महत्त्वमीयात् ॥

Colophon :

इत्यार्षे श्रीमद्रामायणे आदिकाव्ये बालकाण्डे नारदवाक्ये सङ्क्षेपो नाम प्रथमः सर्गः ॥

161

Sl. No : 17432 | संग्रहरामायणम् | Ms. No : C. 830

Beginning :

वन्दे वन्द्यं विधिभवमहेन्द्रादिवृन्दारकेन्द्रैः
व्यक्तं व्याप्तं स्वगुणगणतो देशतः कालतश्च ।
धूतावद्यं सुखचितिमयैर्मङ्गलैर्युक्तमङ्गैः
सानाथ्यं नो विदधदधिकं ब्रह्म नारायणाख्यम् ॥
भूषारत्नं भुवनवलय—

End :

गदति जगति भद्रां भारतीमेवमेवं
नवविधगुणभाजा काममेकान्तभक्त्या ।
अरमत परमश्रीरामया रामदेवः
स्वयमकृत पूर्णानन्दसन्दोहदेहः ॥

Colophon :

इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविराचिते श्रीमद्रामायणसङ्ग्रहे युद्धकाण्डे षोडशः सर्गः ॥

162

Sl. No: 17436 — संग्रहरामायणम् — Ms. No: C. 3062/1

Beginning :

वाणीं श्रुत्वा हनुमतो वाणीमाचष्ट राघवः ।
कुर्वन् प्रसाद सामग्रो × × जां सर्वतोऽधिकाम् ॥
पौरुषे पुरुषः कोऽन्यो विद्यते हनुमत्समः ।
रावणं यस्तृणीकृत्य सिन्धुमुलङ्घ्य लीलया ॥

End :

इति पवनसुताय प्रेष्ठभक्ताय रामो
हसितशितकगुवन्धून् प्रेमपीयूषसिन्धून् ।
भुवनभवनरक्षोभङ्गलीलाप्रसङ्गात्
वितरति कमलायै दत्तशेषानपाङ्गान् ॥

Colophon

इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायणपण्डितचार्यविरचिते श्रीमत्सङ्ग्रहरामायणे उत्तरकाण्डे अष्टमः सर्गः ॥

163

Sl. No: 17437 — संग्रहरामायणव्याख्या — Ms. No: C. 1708/2

Beginning :

वन्द इति । वन्दे नमस्करोमि स्तौमीति च । वन्द्यं वन्दितुं योग्यं । स्वगुण गणतः स्वगुणानां गणाः तेभ्यः देशतः देशात् । कालतः । कालात् अथवा सार्वविभक्तिकस्तसिरिति सप्तम्यर्थे देशतः कालतः देशकालेत्यर्थः ॥

End :

आलिङ्गनं तद्विषयाय लीला सैव छलं तेन आत्मानमेव प्रादात् । पुनरपि परिपूर्णानुग्रहं कृतवानित्यर्थः । स्रग्धरावृत्तं—म्रभ्नौयांनीत्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् इति तल्लक्षणम् ॥

Colophon :

इति श्रीमछ्रीनिवासकृतायां रामगुणरत्नप्रकाशिकायां सुन्दरकाण्डे षष्ठः सर्गः ॥

164

Sl. No : 17438 संग्रहरामायणव्याख्या Ms. No : C. 3062/1

Beginning :

अथ श्रीरामदेवस्य माहात्म्यज्ञापनाय युद्धादिप्रतिपदकास्यास्य × स्य व्याख्यानं क्रियते ॥ निश्चक्ये निश्चितवान् ॥

End :

इति सर्वसमीचीनमभूदिति स्थितम् ॥

लिकुचकविवरार्यो मूलरामायणार्थान्

उदहरदथ विद्याभूषणार्योऽस्य टीकाम ।

व्यधित बुधमनोज्ञां भावरत्नप्रदीप्ति

सनगमदिह सौख्येनोत्तरं काण्डमेतत् ।।

Colophon :

इति श्रीमत्संग्रहरामायणविवरणे विद्याभूषणमुनिविरचितायां भावरत्नप्रदीप्तायां उत्तरकाण्डे अष्टमः सर्गः ।। समाप्तोऽयं काण्डः ।

165

Sl. No : 17444 सनत्सुजातीयम् Ms. No : C. 2311/1

Beginnig :

वैशम्पायन उवाच —

ततो राजा धृतराष्ट्रो मनीषी

सम्पूज्य वाक्यं विदूरोदितं तत ।

सनत्सुजातं रहिते महात्मा

पप्रच्छ बुद्धिं परमां बुभूषन् ॥

धृतराष्ट्र उवाच —

सनत्सुजात यदिदं शृणोमि

. . तत्कृतरन्नु मुख्यम् ॥

End :

आत्मैव स्थानं मम जन्म चात्मा
ओतप्रोतोऽहमजरप्रविष्टः ॥
अणोरणीयान् सुमनः सर्वभूतेष्ववस्थितः ।
पितरं सर्वभूतानां पुष्करं निहितं विदुः ॥

Colophon :

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां श्रीमदुद्योगपर्वणि सनत्सुजातीये षष्ठोऽध्यायः ॥

166

Sl. No : 17445 सनत्सुजातीयव्याख्यानम् Ms. No : P. 4199

Beginning :

नूक्तं × रते किञ्चिद्वाचा विदुर दीयते तन्मे शुश्रूषवे ब्रूहि इत्यन्वयः । अत्र तात्पर्यम् । विदुरं पप्रच्छ । सोऽवदत् धर्मं पार्थानां राज × × सुखस्यापि कारणम् + + + × इति श्रीमहाभारते उद्योगपर्वणि सनत्सुजातीयव्याख्याने चतुश्चत्वारिंशोऽध्यायः ॥

End :

यथोक्तवृष्णिपतिः कृष्णः यथोक्तः × भवति । यदुक्तः पितामहेनेति शेषः । सत्यप्रतिज्ञः किल सूतपुत्रः + + +
अहं हनिष्यामीति आकर्ण्य × × ब्रुवाणः + पराक्रमं च । पराक्रमं निश्चित्य + समारभे पद्धतिमिति शेषः ॥

Colophon :

इति श्री उद्योगपर्वणि व्याख्याने षट्षष्टितमोऽध्यायः ॥

167

Sl. No : 17448 सुन्दरकाण्डपारायणफलम् Ms. No : C. 3704/2

Beginning :

ऋषयः —

संक्षेपमनुसंप्राप्तें किमुपायं वदस्व नः ।
इत्युक्तः कुम्भजो हृष्टः ऋषीन् प्रोवाच पूर्णधीः ॥

अगस्त्यः—

पशुपुत्रप्रदं पौत्रं वृद्धिदं कल्मषापहम् ।
धनमायुष्यमारोग्यदायकं पुण्यवर्धनम् ॥

End :

न केनापि भवेत्सिद्धिरिति ब्रह्मानुशासनम् ।
समस्तमन्त्रराजं तन्नात्र संशयमस्ति च ॥
बीजकाण्डमिति प्रोक्तं सर्वरामायणेष्वपि ।
तस्मात्पारायणं कृत्वा धन्या भवत तत्त्वतः ॥

Colophon :

इत्यगस्त्यसंहितायां सुन्दरकाण्डफलनिरूपणं नाम पञ्चमोऽध्यायः ॥

168

Sl. No : 17456 — शेषधर्मः — Ms No : P. 1589

Beginning :

अथ ते मुनयः सर्वे शौनकाद्या महर्षयः ।
सूतं धर्मविदां श्रेष्ठं पप्रच्छुरिदमादृताः ॥
सूत सूत महाभाग सर्वशास्त्रविशारद ।
व्यासप्रसादात् सर्वं च वेत्सि सर्वमशेषतः ॥

End :

शृण्वतां सर्वपापानि विलयं यान्ति भूरिदा ।

सूतः—

परमिदमितिहासं शृण्वतां लौकिकानां
सकलदुरितशान्तिः सद्य एवास्तु विप्राः ।
भवति च हरिलोकः सन्मतीनां मुरारौ
जगति सुलभमेतत् दुर्लभं पापिनां च ॥

Colophon :

इति भारते हरिवंशे × × × पर्वणि शेषधर्मे सप्तपञ्चाशोऽध्यायः ॥

169

Sl. No : 17463 हरिवंशः Ms. No : P. 2456

Beginning :

श्री शौनकः—

मा ते सुमहदाख्यानं भवता परिकीर्तितम् ।
भारतानां च सर्वेषां पार्थिवानां तथैव च ॥
देवानां दानवानां च गन्धर्वोरगरक्षसाम् ।
दैत्यानामथ बद्धानां गुह्यकानां तथैव च ॥

End :

मन्दरः पर्वतः श्रेष्ठः . . . .रराज ह ।
श्रिया परमया बु . . . . स्समुच्छ्रयाति ॥
रेमे सामश्च भगवान् पारिजातवनेहरः ।
सुप्रचारान् सुरान् . . . . त्वा शक्रादीन् धरतः प्रभुः ॥

Colophon :

इति श्रीमन्महाभारते आश्चर्यपर्वणि हरिवंशे अन्धकवधो नाम सप्तपञ्चाशच्छततमोऽध्यायः ॥

170

Sl. No : 17465 हरिवंशः Ms. No : P. 2655

Beginnig :

शुक्लाम्बरधरं . . . . . शान्तये ॥
नारायणं नमस्कृत्य . . . उदीरयेत् ॥
द्वैपायनोष्ठपुटनिस्सृतमप्रमेयं
पुण्यं पवित्रमथ पापहरं च वाचा ।
यो भारतं समधिगच्छति वाच्यमानं
किं तस्य पुष्करजलैः अभिषेचनेन ॥

End :

साल्वोऽपि भारतश्रेष्ठ कृतार्थो हृष्टमानसः ।
यवनेन्द्रं परिष्वज्य जगाम स्वपुरं नृपः ॥

जनमेजयः—

विदर्भनगराद्याते शक्रतुल्यपराक्रमे ।

किमर्थं गरुडो नीतः किञ्च कर्म चकार सः ॥

गरुडः—

देव यास्यामि नगरीं रैवतस्य कुशस्थलीम् ।

रैवतं च गिरिं रम्यं नन्दनप्रतिमं वनम् ॥

Colophon :

इति श्रीहरिवंशे रुक्मिणीस्वयंवरे कालयवनवाक्यं नाम एकादशशततमोऽध्यायः ॥

171

Sl. No : 17471 हरिवंशः Ms. No : C. 3438

Beginning :

शौनकः—

सौते सुमहदाख्यानं श्रवणं परिकीर्तितम् ।

भारतानां च सर्वेषां पार्थिवानां तथैव च ॥

देवानां दानवानां च गन्धर्वोरगरक्षसाम् ।

× नामथसिद्धानां गुह्यकानां तथैव च ॥

अत्यद्भुतानि कर्माणि विक्रमा ˎ निश्चयः ।

End :

सर्वान् जहीति शत्रूंस्त्वं प्रवृद्धान् पुरुषोत्तम ॥

विष्णुरेव महायोगी × × योगेनयन्निव ;

श्रूयते ब्रह्मसदृशैः ऋषिभिः सफरेण च ॥

ब्रह्मणा सहितैर्देवैः सम्पन्नबलपौरुषैः ॥

Colophon :

इति श्रीहरिवंशे शेषमहाभारते सूर्यपर्वणि त्रिपुरवधे त्रिपञ्चाशदुत्तरत्रिशततमोऽध्यायः ॥

172

Sl. No : 17478 हरिवंशः Ms. No : P. 8119/1

Beginning :

अथ ते मुनयः सर्वे शौनकाद्या महौजसः ।
सूतं धर्मविदां श्रेष्ठं पप्रच्छुरिदमादृताः ॥
सूत सूत महाभाग सर्वशास्त्रविशारद ।
व्यासप्रसादात् सर्वं त्वं वेत्सि धर्ममशेषतः ॥

End :

पुत्रकामो लभेत्पुत्रं धनकामो लभेद्धनम् ।
यं च कामयते कामं तं तमाप्नोति निश्चितम् ॥
य इदं पुण्यमाख्यानं शृणोति सततं नरः ।
सर्वपापविनिर्मुक्तः विष्णोर्लोके महीयते ॥

Colophon :

इत्याश्चर्यपर्वणि हरिवंशे शेषधर्मे पञ्चपञ्चाशोऽध्यायः । शेषधर्मः समाप्तः ॥

173

Sl. No : 17487 हरिवंशः Ms. No : C. 1072/1

Beginning :

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत ॥
द्वैपायनो . . . पुटनिस्सृतमप्रमेयं
पुण्यं पवित्रमथ पापहरं शिवं च ।
यो भारतं समधिगच्छति वाच्यमानं
किं तस्य पुष्करजलैरभिषेचनेन ॥

End :

कथितो नृपशार्दूल सर्वपापप्रणाशनः ।
वृत्तान्तं शृणुयाद्यस्तु सायं प्रातः समाहितः ॥

स याति वैष्णवं धाम लब्धकामः कुरूद्वह ।
धन्यं यशस्यमायुष्यं भुक्तिमुक्तिफलप्रदम् ॥ ३८ ॥

Colophon

इति श्रीमहाभारते शतसहस्रसंहितायां खिलेषु हरिवंशे वृत्तान्तसंग्रहसमाप्तो-ऽयमध्यायः + + + + खिलेषु हरिवंशे श्रवणफलं समाप्तं ॥

174

Sl. No : 17491 हरिवंशः Ms. No : C. 2982

Beginning :

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
+ + + +

जनमेजयः—
महाभारमाख्यानं बह्वर्थं श्रुतिसम्मतम् ।
कथितं भवता पूर्वं विस्तरेण मया श्रुतम् ॥

End :

शम्बरस्य वधश्चैव धन्योपाख्यानमेव च ।
वासुदेवस्य माहात्म्यं बा × युद्धं प्रपञ्चितः ॥
भविष्यं पुष्करं चैव प्रपञ्चेनैव कीर्तनम् ।
वाराहनारसिंहश्च वामनं बहुविस्तरम् ।
पुरत्रयस्य संहार इति वृत्तान्तसंग्रहः ॥

Colophon :

इति श्रीमहाभारते शतसहस्रसंहितायां वैयासिक्यां खिलेषु हरिवंशः समाप्तः ॥

175

Sl. No : 17493 हरिवंशः Ms. No: C. 3114

Beginning :

द्वैपायनोष्ठपुटनिःसृतमप्रमेयं
पुण्यं पवित्रमथपापहरं शिवं च ।

यो भारतं समधिगच्छति वाच्यमानं
किं तस्य पुष्करजलैरभिषेचनेन ॥
नैमिषारण्ये कुलपतिः शौनकस्तु महामुनिः ।
पप्रच्छ सौतिं धर्मात्मा सर्वशास्त्रविशारदम् ॥

End :

वाराहं नारसिंहं च वामनं बहुविस्तरम् ।
त्रिपुरस्यापि दाहश्च इति वृत्तान्तसंग्रहः ॥
इत्युक्त्वा विररामैव व्यासशिष्यो महातपाः ।
जनमेजयस्तु राजर्षिः विष्णोर्वंशमनुत्तमम् ॥
श्रुत्वा शशास च नृपः राज्यं निहतकण्टकम् ॥

Colophon :

इति श्रीमन्महाभारते—हरिवंशे हरिवंशश्रवणविधिर्नाम अष्टसप्तत्युत्तर द्विशततमोऽध्यायः ॥

176

Sl. No : 17496 हरिवंशव्याख्या Ms. No : A. 170/2

Beginning :

अथ हरिवंशाश्चार्यपर्वणः सम्प्रति टीका विरच्यते । अत्राश्चर्यपर्वणः कथं भारते सङ्गतिः । अष्टादशपर्वपरिमितस्य भारतस्य तावत् स्वर्गारोहण-पर्वान्तेनैव समाप्तत्वात् ॥ उक्तं च मुनिना ॥

End :

इमां पुष्करप्रादुर्भावरूपां यः श्रावयेत् । किं कृत्वा सर्वमिदमध्यात्म-रूपमाख्यानं अधीत्य । सत्व इति स्मरणे इति धातुः । अध्यात्मरूपां कथां श्रुत्वा यः श्रावयेत् सः देवलोके महीयत इति सम्बन्धः । सार्धश्लोकः ।
पुष्करव्याख्यया देवः पूजितः पुष्करेक्षणः ।
पद्मिनीपत्रवत्कुर्यादलेपं मां जले स्थितम् ॥

Colophon :

इति हरिवंशे पुष्करप्रादुर्भावटीकायां विश्वेश्वरकृतौ षड्विंशोऽध्यायः ॥
पुष्करप्रादुर्भावकथा समाप्ता ॥

177

Sl. No : 17497 हरिवंशव्याख्या Ms. No : C. 1352/2

Beginning :

× तं बहूपाख्यानसंयुक्तं तं तं परिचक्षत इति खिलेषु हरिवंश इति व्यधिकरणसप्तमी । खिलेष्विति निर्धारणे । शताश्वमेधस्येति । लोके हरिवंशदानश्रवणादिना बहुतरं पुण्यं भवेत् । दानादीत्युपलक्षणम् । शताश्वमेधनाम्नः —

End :

अलकाया: अलकानिकटे । अलकायामित्यन्ये । तत्र अलका स्थानविशेष: । तमस: पारे तम:प्रायलवणोदधे: पारे संस्थित: । वरदत्तो दत्तवर: । वासवक्षयात् इन्द्रलवनात् । सप्तस्कन्धान् सप्तवायुविषयान् । + केशवस्यापि इति पाठे कर्मणि षष्ठे ॥ अपे: पुनरित्यर्थ: ।

Colophon :

[इति अर्जुनमिश्रकृतौ श्रीहरिवंशे नरकवधे अध्याय: ११९]

178

Sl. No : 17498 कृष्णकथासंग्रह: Ms No : C. 1072/2

Beginning :

रीरन्तदेव अयनं प्रवेशस्थानं यस्य स: तं नारायणं जीवान्नियमयितुमन्त: प्रविष्टं शास्तारं । तथा च श्रुति: + अन्त: प्रविष्ट: शास्ता जनानामिति । तथा जीवं हिरण्यगर्भं तत उत्तमं हिरण्यगर्भात् + +

End :

तत्र ब्रह्मकुलं महद्विजयते गोत्रेण यद्गौतमं
धर्मज्ञानविरागवैभवचतुर्भेद्रेण चातुर्धरम ।
गोविन्द: स्वयमत्र जन्मधुनवान् यो नीलकण्ठं शिवं
कलसंत्रयम्बकमित्यमूनजनयत्फुल्लाम्बिकायां सुतान् ॥
तेषां ज्येष्ठो नीलकण्ठ: काश्यां विश्वेशतुष्टये ।
व्यतनोद्भारते भावदीपमान्यविनाशनम् ॥३॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरन्धरचतुर्धरवंशावतंसश्रीगोविन्दसूरिसूनोर्नीलकण्ठस्य कृतौ भारतभावदीपे हरिवंशान्तर्गतार्थप्रकाशक: समाप्तिमगमत् ॥

179

Sl. No : 17499 **हरिवंशव्याख्या** Ms. No : C. 1351/2

Beginning :

कालिन्दीं सूर्यस्य पुत्रीं यमुनां प्रथमां । मित्रविन्दा राजाधिदेव्यां पितृष्वसरि आवन्त्याजातां द्वितीयां । सत्यां अयोध्यापतेर्नग्रजितः पुत्रीं नाग्नजितीं तृतीयां जाम्बवतः सुतां जाम्बवतीं चतुर्थीम् ।

End :

गोविन्दः स्वयमत्र जन्म धृतवान् यो नीलकण्ठं (?)

कछूत्र्यम्बकमित्यमूनजनयत्फुल्लाम्बिकायां सुतान् ।

तेषां ज्येष्ठो नीलकण्ठः काश्यां विश्वेशतुष्टये ।

व्यतनोद्भारते भावदीपमान्ध्यविनाशनम् ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरन्धरचतुर्धरवंशावतंस श्री गोविन्द-सूरिसूनोः नीलकण्ठस्य कृतौ भारतभावदीपे हरिवंशान्तग्रन्थार्थप्रका . . वाकः समाप्तिमगमत् ॥

180

Sl. No : 17500 **हरिवंशव्याख्या** Ms. No : P. 4581

Beginnig :

× × × × शः बोद्धव्यविषये सति सामर्थ्ये सति समाज्ञातात् प्रसिद्धात् प्रतिरूपात् प्रतीतरूपात् सदृशरूपात् अन्तरमासाद्य वै आयुषो × × × × प्रत्यक्षमित्यर्थः ॥

End :

इति वृत्तान्तसंग्रहं विष्णुरेव महायोगेन प्रसमं + च सूयते ब्रह्मसदृशैः ऋषिभिः + शङ्करेण वा ॥

ब्रह्मादिसहितैः देवैः समन्तबलपौरुषैः ।

इति खलु कने पादानां व्याख्या वाचस्पतीन्द्रसूर्यानिकृतमंनिवनृकवे × × रसंभूतिकथनस्य ॥

phon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य अभिनवकौण्डपादाचार्यवाच(क)-स्यावीन्द्रश्रीकाणिकृतानां श्रीकरणिकाभिधायां हरिवंशदीपिकायां संक्षेपप्रथम + कीर्तनं समाप्तम् ॥

181

Sl. No : 17501 **अज्ञाननाशः** Ms. No : P. 50/15a

Beginning :

श्रीशिवः—

एतस्मिन्नन्तरे श्रुत्वा भरतस्य समागमम ।

वासिष्ठो मन्त्रिभिः सार्धं प्रययौ राजमन्दिरम् ।

रुदन्तं भरतं दृष्ट्वा वसिष्ठः प्राह सादरम ॥

End :

येन केनाप्युपायेन प्रतरन्ति मनीषिणः ॥

श्रीशिवः –

इत्यालोच्य ततस्सर्वे तस्मिन् चोरे च शृण्वति ।

वैराग्यसहितं तत्वं ऊचुः तद्बोधनाय ते ॥

Colophon

— — —

182

Sl. No : 17512 **मानवीयसंहिता** Ms. No : P. 3572

Beginning:

यस्याज्ञया जगत्स्रष्टा विरिञ्चः पालको हरिः ।

संहर्ता कालरुद्राख्यः नमस्तस्मै पिनाकिने ॥

सनकाद्या महात्मानः शिवभक्ता महौजसः ॥

दीर्घसत्रं प्रकुर्वं × ×

End :

त्वं वाक् सर्वपदार्थानां अर्थोऽहं परमेश्वरि ।

अनादिनिधना शक्तिः त्वमेका निष्कला परा ॥

Colophon :

[इति श्रीमदादित्योपपुराणे मानवीयसंहितायां शिवभक्तमाहात्म्यं नाम त्रिषष्टितमोऽध्यायः] ॥

183

Sl. No : 17516 | कन्यकापुराणम् | Ms. No : P. 5881

Beginning:

श्रीलक्ष्मीरमणं देवं जगद्रक्षापरायणम् ।
वन्देऽरविन्दनयनमिन्दीवरदलप्रभम ॥
+ + + +
सनत्कुमारमौनीन्द्रप्रोक्तां पौराणिकीं कथाम् ।
ज्ञात्वा तदनुसारेण वक्ष्येऽहं वणिजां कथाम् ॥

End :

विष्णुवर्धनराज्ञे च वासवाम्बा प्रदीयताम् ।
तेन सौख्यं तु सर्वेषां श्रेयश्चैव भविष्यति ।
नो चेद्दुःखं च सर्वेषां नाशश्चैव भवेद्ध्रुवम् ॥
इत्यालोचितवन्तः सर्वे तूष्णीं बभूवुः ॥

Colophon :

सम्पूर्णम् ॥

184

Sl.No : 17519 | कूर्मपुराणम् | Ms: No · P.2 072

Beginning :

माता तावदुमा पिता पशुपतिर्भ्राता मयूरासनः
स्तोतारश्चतुराननादिमरुतश्चक्रायुधो मातुलः ।
ब्रह्मानन्दमयं वपुर्बृहदहोभिरयां गणाधीश्वराः
शक्ताः किन्तव सद्गुणान् गणपते स्तोतुं वयं जन्तवः ॥
नमस्कृत्वाऽप्रमेयाय विष्णवे कूर्मरूपिणे ।
पुराणं सम्प्रवक्ष्यामि यदुक्तं विश्वयोनिना ॥

End :

तस्मात्सञ्जायते कृत्स्नं यत्र च प्रविलीयते ।
नमस्तस्मै सुरेशाय विष्णवे कूर्मरूपिणे ॥

Colophon :

इति श्री कौर्मे महापुराणे षट्सहस्रिकायां संहितायां उपरिभागे षट्चत्वारिंशोऽध्यायः । कूर्मपुराणं समाप्तम् ॥

185

Sl. No : 17523 कृष्णकथासंग्रहः Ms No : P. 6221/1

Beginning :

हिमांशोरत्रिपुत्रस्य बुधो नाम सुतोऽभवत् ।
पुरूरवा महाराजस्तस्य पुत्रो व्यजायत ॥

+ + + +

ज्ञानानन्दतनुं श्यामं शङ्खचक्रगदाधरम् ।
व्यक्तमात्रं हरिं बुध्वा तुष्टावानकदुन्दुभिमुः ।।

End :

श्रीकृष्णद्वेषिणो हत्वा सकृष्णाः कृष्णमाययुः ।
अथाभिमन्योस्तनयः परीक्षित्
राजारिरसुवज्ञो जगतीं विजित्य । (?)
सर्वात्मयोगं परमं दधानः
साम्राज्यलक्ष्मीमुपलभ्य रेमे ।।

Colophon :

— — —

186

Sl. No : 17524 कृष्णकथासंग्रहः Ms. No : P. 7257/2

Beginning :

श्लाधनीयगुणश्शूरः भवान् भोजयशस्करः ।
स कथं भगिनीं हन्यात् स्त्रियमुद्वाहकर्मणि ॥

End :

ततो धनं सन्त्यजन्ति स्वजनाद्दुखःदुःखितम् ।
शापप्रसादयोरीशाः ब्रह्मविष्णुशिवादयः ।।

Colophon :

— — —

187

Sl. No : 17529 **गणेशपुराणम्** Ms. No : C.4070

Beginning :

ओङ्काररूपी भगवान् यो वेदादौ प्रतिष्ठितः ।
यं सदा मुनयो देवाः स्मरन्तीन्द्रादयो हृदि ॥

ऋषयः —

सूत सूत महाप्राज्ञ वेदशास्त्रविशारद ।
\+ \+ \+ \+ \+
अष्टादशपुराणानि विस्तराच्छ्रावितानि नः ।
अन्यान्यपि पुनश्श्रोतुं इच्छास्ति द्विजसत्तम ॥

सूतः—

साधु पृष्टं महाभागाः भवद्भिः पुण्यकर्मभिः ।
ममापि परितोषोऽस्ति कथानां कथने द्विजाः ।
अतोऽहं साधुवृत्तेभ्यः कथयिष्ये विशेषतः ॥
अन्यान्यपि पुराणानि वर्तन्तेऽष्टादशैव तत् ।
गणेशं नारदीयं च नृसिंहादीन्यथापि च ।
गणेशस्य पुराणं च तच्चादौ कथयाम्यहम् ॥

End :

सर्वकामप्रदं भुक्तिमोक्षदं कामदं च यत् ।
गणेशस्य परेशस्य नानालीलाधरस्य च ।
वक्तृश्रोत्रोरघहरं किमन्यच्छ्रोतुमिच्छसि ॥

Colophon :

इति गणेशपुराणे उत्तरखण्डे फलश्रुतिनिरूपणं नाम षट्पञ्चाशदधिकशततमोऽध्यायः ॥

188

Sl. No : 17535 **गरुडपुराणम्** Ms. No: P. 8123/1

Beginning :

धर्मदृढबद्धमूलः वेदस्कन्धः पुराणशाखाढ्यः ।
क्रतुकुसुमो मोक्षफलः मधुसूदनपादपो जयति ॥
स्मरणाद्दुर्गतिहर्ता . . . . स मां हरिः पातु ॥

End :

स्थितोऽस्मि गतसन्देहः कृतार्थोऽस्मि न संशयः ।
इत्युक्त्वा गरुडस्तूष्णीं स्थित्वा ध्यानपरोऽभवत् ॥
स्मरणाद्दुर्गतिहर्ता पूजनयज्ञेन सद्गतेर्दाता ।
यः परया निजभक्त्या ददाति मुक्तिं स मां हरिः पातु ॥
(गरुडपुराण श्रवणफलम् —) . . . नात्र संशयः ॥

Colophon :

इति श्रीगरुडपुराणे सारोद्धारे — मोक्षधर्मनिरूपणं नाम षोडशोऽध्यायः ।
ग्रन्थः सम्पूर्णः ॥

189

Sl. No : 17538 **गरुडपुराणटीका** Ms. No : P. 5889/1a

Beginning :

स्मरणाद्दुर्गतिहर्ता पूजनयत्नेन मद्गतेर्दाता ।
यः परया निजभक्त्या ददाति भुक्तिं स मां हरिः पातु ॥
. . . . शिष्टसंप्रदायानुसारेण मङ्गलमाचरति — धर्मदृढबद्धमूल इति ।
अत्र वृक्षरूपेण हरिं निरूपयति । मधुसूदनपादपो जयतीति ॥
. . . × मानसीयघाते नैव बहुवर्धमानयातना × × तया युक्तम् ।

End :

इदानीं 'ग्रन्थारम्भे ग्रन्थान्ते च ग्रन्थकर्ता स्तवेद्धरिम' इतिसत्संप्रदायानुरोधेन ग्रन्थार्थमुद्घाटयन् हरिं स्तौति × × सप्तमादि नवाध्यायोक्तसद्गतेरिति भवतीति ॥ × × प्रीयतां मधुसूदनः ॥

Colophon

इति गरुडपुराणटिकायां षोढशोऽध्यायः ॥

190

Sl. No : 17539 गरुडपुराणसारोद्धारः Ms. No : P. 5889/1

Beginning :

धर्मदृढबद्धमूलः वेदस्कन्धः पुराणशाखावृतः ।
क्रतुकुसुमो मोक्षफलः मधुसूदनपादपो जयति ॥
नैमिशेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ।
सत्रं स्वर्गाय लोकाय सहस्रं सममासत ॥

End :

संतुष्टे तुष्टितां याति वाचके नात्र संशयः ॥
मया नौनिधिरामेण कृतोऽयं सारसंग्रहः ।
प्राचीनैर्यत्कृतः पूर्वं गारुडः सारसंग्रहः ॥
स तु नो बुद्धिदौर्बल्यात् ज्ञातः तस्मादयं कृतः ।
बलानां सुखबोधाय न तु पाण्डित्यगर्वितः ॥
. . . . निरूपणमिति ॥

Colophon :

इति गरुडपुराणसारोद्धारे षोडशोऽध्यायः समाप्तः ॥

191

Sl. No : 17541 गरुडपुराणसारोद्धारव्याख्या Ms No : C. 3855/2

Beginning :

अथ टीकाकारः समस्तग्रन्थार्थमुद्धारयन् हरिं स्तौति ॥
स्मरणाद्दुर्गतिहर्ता पूजनयज्ञेन सद्गतेर्दाता ।
यः परया निजभक्त्या ददाति मुक्तिं स हरिः पातु ॥
. . , . . तत्र चेयं मया टीका यथामति वितन्यते ॥
अथ सारोद्धारकर्ता . . . मङ्गलमाचरति ॥

Colophon :

निजभक्त्यैव एतदध्यायोक्ततत्त्वज्ञानं विनैव मुक्तिं ददाति । स हरिः मां पातु जन्ममरणात् रक्षतु ॥

इयं नौनिधिरामेण मया टीका कृताऽऽदरात् ।
अनया रमया सार्धं प्रीयतां मधुसूदनः ॥

Colophon :

इति श्री गारुडपुराणे टिकायां षोडशोऽध्यायः ॥
श्री भगवानुवाच — . . . . . (?)
. . . . फलम् । गरुडपुराणं समाप्तम् ॥

192

Sl. No : 17544 चतुश्श्लोकीभागवतम् Ms. No : C. 3651

Beginning :

ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ।
सरहस्यं तदङ्गं च गृहाण गदितं मया ।
यावानहं यथाभावो यद्रूपगुणकर्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात ॥

End :

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः ।
अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ।
एतन्मतं समातिष्ठ परमेन समाधिना ।
भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥

Colophon :

इति चतुश्श्लोकीभागवतं सम्पूर्णम् ॥

193

Sl. No : 17547 देवीभागवतम् Ms. No : P. 2815

Beginning :

सर्वचैतन्यरूपां तां विद्यामाद्यां च धीमहि ।
यथा व्याप्तमिदं सर्वं बुद्धिं सा नः प्रचोदयात् ॥

शौनक उवाच—

सूत सूत महाभाग धन्योऽसि पुरुषर्षभ ।
यदधीता त्वया सम्यक् पुराणी महिता शुभा ॥

End :

देवीप्रसादजनकं सदाचारविधानकम् ।
यदपि श्रृणुयान्मर्त्यो महासम्पत्तिसौख्यभाक् ।
सदाचारेण सिद्धेश्च ऐहिकामुष्मिकं सुखम् ।
तदेव ते मया प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥

Colophon :

इति श्रीमति भागवते महापुराणे अष्टादशसहस्त्रिकायां एकादशस्कन्धे चतुर्विंशोऽध्यायः ॥

194

Sl. No : 17560 धर्मखण्डः Ms. No : P. 4684

Beginning :

मूकं करोति वाचालम् + + महेश्वरम् ।
+ + + + + +
तपस्स्वाध्यायनिरतं तपस्वी × × वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिङ्गवम् ॥
ऋषयः ऊचुः—
अस्माभिर्वैष्णवं खण्डं श्रुतं श्रुतिमनोहरम् ।
× × दानीं × × मिच्छ × शिवखण्डमनुत्तमम् ॥

End :

मध्ये रामायणे पुं × वर्णमेकं श्रुतं यदि ।
प्रायश्चित्तं मनुष्याणां तदेव शतवार्षिकम् ।
संस्कृतं रामचरितं परित्यज्य × × ॥
× × तं श्रृण्वन्मृगतृष्णाजलं पिबेत् ।
भाषान्तरकृतं श्रृण्वन् कथं तरति पापधीः ॥
क्षुन्निवृत्तिर्भोजनेन न हि तत्कथनेन तु ॥

Colophon :

इति धर्मखण्डे पञ्चषष्ट्युत्तर शततमोऽध्यायः ॥

195

Sl. No : 17561 धर्मखण्डः Ms No : P. 4877

Beginning :

मीनाक्षीं नवनीरदाकृतिलसन्नीलालतालङ्कृतां
नीरन्ध्रेघरत्ननिर्मितनदत्पादाङ्गदां पावनीम् । (?)
वन्देऽहं वानितामणिं वरगुणां कारुण्यवारांनिधिं
कादम्बप्रसवाकृतिं × × × × विन्यस्तमारावलिम् ॥
पार्वतीं परमानन्दं शिवं ब्रह्महरिं गुरुम् ॥
सनकाद्या मुनिगणा नैमिशारण्यवासिनः ।
सूतं धर्मार्थसहितं पप्रच्छ धर्ममुत्तमम् ॥

End :

धर्मखण्डं श्रावयित्वा × × × येर्बुधः ।
पुत्रपौत्रैः सर्वान् × × समश्नुते ॥
शिवसायुज्यमाप्नेति शिवनामप्रभावतः ।
इदं सत्यमिदं सत्यं यथार्थं मुनिपुङ्गवाः ॥

Colophon :

इति धर्मखण्डे वाल्मीकिचरिते शततमोऽध्यायः ॥

196

Sl.No : 17564 नारसिंहपुराणम् Ms: No . P. 2166/2

Beginning :

पाराशर्यं परमपुरुषं विश्ववेदैकयोनिं
विश्वाधारं विपुलमनिदं वेदवेदाङ्गवेद्यम् ।
शश्वच्छान्तं शमितविषयं शुद्धबुद्धिं विशालं
वेदव्यासं विततयशसं सर्वदाऽहं नमामि ॥
- - - हिमवद्वासिनस्सर्वे मुनयो वेदपारगाः ।
त्रिकाल × नैमिशारण्यवासिन : ॥

End :

यो नारसिंहः वपुरास्तिथः पुरा
हिताय लोकस्य दितेस्सुतं युधि ।
नखैः सुतीक्ष्णैः विरराद वैरिणं
दिवौकसं तं प्रणमामि केशवम् ॥

Colophon :

इति नृसिंहपुराणे द्विषष्टितमोऽध्यायः ॥

197

Sl. No : 17568 | पञ्चगव्यविधिः | Ms. No: P. 741/3

Beginning :

नारदीये सनत्कुमारसंहितयां देवलं प्रति सनत्कुमारः—सर्वप्रायश्चित्तप्रयोगे कृच्छ्राचरणानन्तरं पञ्चगव्यप्राशनं कार्यम् ।

पिबेत्तु पञ्चगव्यं यः पौर्णमास्यामुपोष्य वै ।
तस्य नश्यति तत्सर्वं यत्पापं पूर्वसञ्चितम् ॥
तथैव ब्रह्मकूर्चन्तु समन्त्रं तु पृथक्पृथक् ।
मासि मासि पिबेद्यस्तु तस्य पापं प्रणश्यति ॥

End :

एवं यः प्राशयेद्भक्त्या पञ्चगव्यं यथाविधि ।
स मुक्तः सर्वपापौघैः शुद्धः स्याज्ज्ञानवान् सुखी ॥

Colophon :

— — —

198

Sl. No : 17571 | पद्मपुराणम् | Ms. No : P.211/2

Beginning :

पद्मपुराणोक्तरामाभिषेकः—

अथ तस्मिन् दिने पुण्ये शुभे लग्ने शुभान्विते ।
राघवस्याभिषेकार्थं × × × × श्च जाबलिरथ काश्यपः ॥

End :

इत्थं विसृष्टाःखलु ते च सर्वे
स्वं स्वं पदं जग्मुरतिप्रहृष्टाः ।
परं पठन्तस्तवमीश्वरोक्तं
रामं स्मरन्तोऽमरविश्वरूपम् ॥

Colophon :

इति पाद्मपुराणे उमामहेश्वरसंवादे रामाभिषेको नाम चत्वारिंशोऽध्यायः ॥

198

Sl. No : 17571 पद्मपुराणम् Ms. No : P.211/2

Beginning :

दिलीपः—
भगवन् भवता प्रोक्तं सर्वधर्ममशेषतः ।
वर्णाश्रमयुतायाथ नित्यनैमित्तिकाः क्रियाः ॥
राजधर्माश्च यज्ञाश्च तीर्थदानव्रतादिकम् ।
श्रुता मुने मया श्रेष्ठा अक्षयस्वर्गभोगदाः ॥

End :

तस्मात्सम्प्राप्तमन्त्रोऽसौ विधिना राजसत्तमः ।
अर्चयित्वा हृषीकेशं यावज्जीवमतन्द्रितः ॥
काले हरिपदं प्राप योगिगम्यं सनातनम् ।

Colophon :

इति श्रीपद्मपुराणे उत्तरखण्डं सम्पूर्णमभवत् ॥

199

Sl No : 17575 पद्मपुराणम् Ms No : P. 1591

Beginning :

सन्ध्यावन्दनकर्म क्रियतामिति रामो मुनिमाचष्ट ।
अयमुष्णद्युतिरस्तमुपैति द्विजकुलमेतन्नीडमुपैति ॥
स्वयमपि सन्ध्यावन्दनकामोऽव्रजदुत्तरदिशमुज्झितकामः ।
हाहाहूहूकृतसङ्गीतिः वन्दीप्रमुखप्रस्तुतकीर्तिः ॥

End :

शृणोत्येतदुपाख्यानं यःकश्चिदपि पातकी ।
सर्वपापविनिर्मुक्तः परं ब्रह्माधिगच्छति ॥
न दुर्गतिर्भवेत्तस्य यश्चेदं स्मरते नरः ।
यश्चापि कीर्तयेत्तस्य एवमेतदुदीरितम् ॥

Colophon :

इति श्रीपाद्मपुराणे पातलखण्डे शिवराघवसंवादे द्विशततमोऽध्यायः ॥

201

Sl. No : 17581 पद्मपुराणम् Ms. No : C. 2931/2

Beginning :

जयति पराशारसूनुः सत्यवतीहृदयनन्दनो व्यासः ।
यस्यास्यकमलगलितं वाङ्मयममृतं जगत् पिबति ॥

ऋषयः ऊचुः —

श्रृणु सूत महाभग सर्वतत्त्वार्थकोविद ।
सन्देह. . . . . . विनाशन ॥

End :

भूमिखण्डं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ।
अन्यमेवं परित्यज्य जपं यानं तथा श्रुतम् ।
श्रोतव्यं हि प्रयत्नेन पद्माख्यं पापनाशनम् ॥

Colophon :

इति पद्मपुराणे भूमिखण्डं समाप्तं इति ॥

202

Sl. No : 17582 पद्मपुराणम् Ms. No : C.2931/4

Beginning :

× × × × × × × × लान्वितम् ॥
तेऽपि तुष्टाः पुनस्तस्य प्रयच्छन्त्यमितं फलम् ॥

यत्नवान् प्रयतो नित्यं ततः पश्येत्पितामहम् ।
अनुलोमविलोमाभ्यां तथा अस्तमनस्तयोः ॥

End :

पुत्रदारादिसंयुक्तो दानं दापयते नरः ।
गृहीत्वापि तथा तीर्थे क्षेत्रे वापि तथैव च ॥
वाचकाय प्रदातव्यं दानमेतद्विशुद्धये ।
कुलीनाय च दान्ताय स्वकुले पूजकाय तत् ॥

Colophon :

इति श्री पाद्मे पुराणे पुष्करखण्डे सकलसृष्ट्यादिमहिमवर्णनं समाप्तम् ॥
पद्मपुराणे पुष्करखण्डः सम्पूर्णः ॥

203

Sl.No : 17586 **पराशरोपपुराण** Ms: No . P. 2630/2

Beginning :

ऐश्वर्याद्यन्तनिर्मुक्तं अति × शोभमादरात् ।
नमामि विग्रहं साम्बं संसारार्तिसुभेषजम् ॥
\+ + + + +
श्रीपराशरः—
सौरमण्डलमध्यस्थं साम्बं संसारभेषजम् ।
नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ॥

End :

या विभाति सदा साक्षी स्वरूपेण स्वभावतः ।
तां नमाम्यादरेणैव शिवामानन्ददायिनीम् ॥
अष्टोत्तरसहस्रेण श्लोकैनै × संमितम् ।
इयमष्टादशाध्यायी शिवोऽत्रैव प्रदर्शितः ॥

Colophon :

इति श्रीपराशरोपपुराणे अष्टादशोऽध्यायः ॥

204

Sl. No : 17597 | पुराणसङ्ग्रहः | Ms. No : P. 2882

Beginning :

श्रीमान्नारायणो विष्णुः सर्वधर्मानुदीरयत् ।
लक्ष्म्यै कथं तदुक्तं तान्वक्तु महंसि मे प्रभो ॥

स्कन्दः —

ऋषभाहं प्रतुष्टोऽस्मि त्वद्भा × × भक्त ।
× × वर्णितान् विष्णुधर्मान् ब्रवीमि ते ॥
तत्वं श्रीमूर्तिभेदश्च प्रथमे तदनन्तरे ।
लोकम्मृष्टिर्लोकजनाः स्वाराज्यं जातिरूपणम् ॥

End :

वेदशास्त्रपुराणा × × × × ।
तच्चच्छ्रवणमाहात्म्यात् सर्वज्ञोऽस्म्यहमव्ययः ॥
पूतः पुण्यः सर्वपूज्यः बुद्धिमानभवं प्रभो ।
इत्येवमुक्त्वा × × × × × संमन्त्र्य गुरुं प्रशान्तम् ।
ययौ मुनीनां निकरं पुराणं प्रवक्तुकामः परिपूर्णकामः ॥

Colophon :

इति श्रीवेङ्कटरायविरचिते पुराणसङ्ग्रहे लक्ष्मीनारायणसंवादे त्रिंशोऽध्यायः ॥

205

Sl. No : 17598 | पुराणसारः | Ms. No : P.198

Beginning :

वर्तमाने समृध्यर्थे सत्रे द्वादशवार्षिके ।
समासीनानभ्यगच्छत् ब्रह्मर्षीन् संशितव्रतान् ॥
विनयावनतो भूत्वा कदाचिद्रोमहर्षणः ।
तमाश्रममनुप्राप्तं जटावल्कलधारिणम् ॥

End :

काले कलौ च विषये कलुषायमाणे
वाराणसीपरिसरे वसतिं वितेनुः ।

शिवमस्तु सर्वजगतां परहितनिरताः भवन्तु भूतगणाः ।
दोषाः प्रयान्तु शांतिं सर्वत्र सुखी भवतु लोकः ॥

Colophon :

इति श्रीमत्पुराणसारे पुराणादिधर्मावतरणं नाम चतुरशीतितमोऽध्यायः ।
पुराणसारः सम्पूर्णः ॥

206

Sl. No : 17599 पुराणसारः Ms. No :P . 4562/1

Beginnig :

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं न त्वा कृतकृत्यास्स्युस्तं नमामि गजाननम् ।
यं ब्रह्म वेदान्तविदो वदन्ति
परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा
तस्मै नमो विघ्नविनायकाय ॥ +
वर्तमाने समृद्ध्यर्थे सत्रे द्वादशवार्षिके ।
समासीनानभ्यगच्छन् ब्रह्मर्षीन्संशितव्रतान् ॥

End :

शिवमस्तु सर्वजगतः परहित निरता भवन्तु भूतगणाः ॥
दोषाः प्रयान्तु शांतिं सर्वत्र जनः सुखी भवतु ॥

Colophon :

इति श्रीमत्पुराणसारे अनुक्रमणिकाध्ययो नाम चतुरशीतितमोऽध्यायः ॥

+ + + + +

हरिहर महराजामात्येन्द्र मादरस प्रभो
व्रजति भवतः साम्यं कीर्तिप्रतापमहोष्मणोः ।
पदसरसिजप्राप्तात्पतिर्नदी च भवद्विमो-
रधिकनयनं ज्योतिश्च तद्वयं च तयोर्द्वयोः ॥

207

Sl. No : 17601 **पुराणसरः** Ms. No : A. 472

Beginning :

वर्तमाने समृद्ध्यर्थे सत्रे द्वादशवार्षिके।
समासीनानभ्यगच्छत् ब्रह्मर्षीन् संशितव्रतान् ॥
विनयावनतो भूत्वा कदाचिद्रोमहर्षणः ।
तमाश्रममनुप्राप्तं जटावल्कलधारिणम् ॥

End :

शिवमस्तु सर्वजगतः
परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं
सर्वत्र जनः सुखी भवतु ॥
इति श्रीमत्पुराणसारे अनुक्रमणिकाध्यायो नाम चतुरशीतितमोऽध्यायः ॥

Colophon :

इति श्रीराजाधिराजराजपरमेश्वरस्य पूर्वपश्चिमसमुद्राधिपतेर्भाषातिलङ्घि राजन्यभुजङ्गस्य श्रीमतो हरिहरमहाराजस्य वसुमतीसाम्राज्यस्य महामन्त्रिणः मायणनन्दनस्य माधवाचार्यस्य सरस्वतीभाण्डागाराधिकृतेसुवनिना (?) पुराणसारकोशः समाप्तः ॥

208

Sl. No : 17602 **पुराणोपपुराणनामोल्लेखः** Ms. No : P. 6063/16

Beginning :

ब्राह्मं पुराणं प्रथमं पाद्मं वैष्णवमेव च ।
शैवं भागवतं चैव भविष्यं नारदीयकम् ॥

End :

स्कान्दं दूर्वासमादिश्यं वारुणं शाबरं तथा ।
एतान्युपपुराणानि अष्टादश च ईरिताः ॥

Colophon: — — —

209

Sl. No : 17603 पुरुषार्थसुधानिधिः Ms. No : P· 4608/1

Beginning :

ना × × × सर्वलोकानां विनायकमनायकम् ।
नानाकल्पपरं नौमि विघ्नादीनां विनायकम् ॥
× × त × स्तयीऽयर्थचतुर्वेदिता
पञ्चस्कन्धकृतिः षडन्वयदृढःसत्सङ्गसर्वमहः
अष्टव्यक्तकलाधरो नवनिधि पु × × दृशप्रत्ययः ।
स्मार्तोच्छ्रायधुरन्धरो विजयते श्रीबुक्कपृथ्वीपतिः ॥ + + +
सर्वाण्येतानि विप्रेभ्य : × × इना × × म् ।
ज्ञातुं कचिन्न शक्यन्ते पुरुषार्थार्थिनामपि ॥
तस्मादाख्यानरूपाणि सुखोपायानि सुव्रत ।
पुरुषार्थोपयोग्यानि सुखोपयानि × × ॥
तस्य तद्वचनं श्रुत्वा व्यक्तार्थं बुक्कभूपतेः ।
प्रशस्य तत्तदा युक्तं माधवः प्रत्यभाषत ॥

End :

अप्रार्थनीयां हीनाङ्गीं किमिति प्रार्थ्यते भवान् ।
अनेकयत्नेन परा प्राप्या त्वत्कुलनाशिनी ॥

Colophon :

इति पुरुषार्थसुधानिधौ कामस्कन्धे सुलक्षणस्त्रीचरितकथनं नाम प्रथमोऽध्यायः ॥

210

Sl. No: 17605 प्रह्लादविजयः Ms. No: A.620

Beginning

श्रीभारते भावते च विष्णोः :
धर्मोत्तरे वैष्णवमात्स्ययोश्च ।
श्रीनारसिंहेऽप्यथ नारदीये
कौर्मे पुराणेषु तथा परेषु ॥

प्रह्लादमुद्दिश्य कथाः प्रवृत्ताः
यास्तास्समाहृत्य तदानुपूर्व्या ।
श्लोकांश्च तानेव सुसङ्गतार्थं
संयोज्य मोदं विदुषां करिष्ये ॥ + + +
तस्य भागवताग्र्यस्य प्रह्लादस्य महात्मनः ।
प्रह्लादविजयं नाम वक्ष्ये चरितमद्भुतम् ॥

End :

एतच्च आदिपुराणस्य मृगेन्द्रलीलां
दैत्येन्द्र . . . . . ववधं प्रयतः पठेत् ।
दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं
श्रुत्वानुभावमकुतोभयमेति लोकम् ॥

Colophon :

इति श्रीमतो कठनाथार्यसंयोजिते श्रीप्रह्लादविजये षड्विंशोऽध्यायः ॥

211

Sl. No : 17606 **बृहन्नारदीयपुराणम्** **Ms. No : P. 2166/3**

Beginning :

शौनकाद्या महात्मनो ऋषयो ब्रह्मवादिनः ।
नैमिशारण्ये महापुण्ये तपस्तेपुर्मुमुक्षवः ॥
जितेन्द्रिया जिताहाराः सन्तः सत्यपरायणाः ।
यजन्तः परया भक्त्या विष्णुमाद्यं जगत्पतिम् ॥

End :

एतत्पुराणश्रवणं इहामुत्र फलप्रदम् ।
पठतां शृण्वतां सद्यः सर्वपापप्रणाशनम् ॥
सज्ञाद्वा यदि वा मोहात् ये शृण्वन्तीदमुत्तमम् ।
ते सर्वपापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति बृहन्नारदीये पुराणे नारदप्रणीते × × पुरणप्रवरे अष्टत्रिंशोऽध्यायः ॥
सम्पूर्णमिदं पुराणम् ॥

212

Sl. No : 17608 बृहन्नारदियपुराणम् Ms. No : P.8333

Beginning :

× × पितृतश्चैव लक्षकोटिकुलान्वितः ।
कल्पद्वयं विष्णुपदे तत्रैव परिमुच्यते ॥
शिलाभिः कुरुते यस्तु देवतायतनं नरः ।
यावत्पुण्यं भवेत्तस्य वदतस्त्वं निशामय ॥

End :

प्रत्यक्षतामगात्तस्य राज्ञः सर्वजगद्गुरुः ।
ददर्शाराद्धरिं राजा आभासितदिगन्तरम् ॥
अतसीपुष्पसङ्काशं स्फुरत्कुण्डलमं × × ।

Colophon :

— — —

213

Sl. No : 17612 ब्रह्मवैवर्तपुराणम् Ms. No: P. 4891

Beginning :

नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ।
सूतं धर्मविदां श्रेष्ठं परिप्रच्छुरादृताः ॥
शौनकं तु पुरस्कृत्य सर्वप्रश्नार्थकोविदम् ।
सूतस्याग्रेसमासीनं भासमानं स्वरोचिषा ॥

End :

इदं पुराणं नित्यं तु पठन्वै मानवो मुदा ।
शृणुयाद्वा सदा भक्त्या विष्णोः सायुज्यमाप्नुयात ।
विद्यार्थी प्राप्नुयाद्विद्यां मोक्षार्थी मोक्षमाप्नुयात् ॥

Colophon :

इति श्री ब्रह्मवैवर्तपुराणे रहस्ये सूतशौनकसंवादे चत्वारिंशोऽध्यायः ॥

214

Sl. No : 17617 ब्रह्मवैवर्तपुराणम् Ms No : C. 2117

Beginning :

नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ।
सूतं धर्मविदां श्रेष्ठं पप्रच्छुरिदमादृताः ॥
शौनकं तु पुरस्कृत्य सर्वप्रश्नार्थकोविदम् ।
सूतस्याग्रे समासीनं भासमानं स्वरोचिषा ॥

End :

अत्र धर्माः परिप्रोक्ताः निर्वाणादिसुखप्रदाः ।
गोपनीयमिदं सर्वं शुश्रूषोःश्राव्यमेव तत् ॥
किमत्र बहु वक्तव्यं भगवानत्र कीर्तितः ।
तज्ज्ञानं मोक्षदं प्रोक्तं तस्मात्परतरो न हि ॥
नमस्तस्मै भगवते पुरुषाय महात्मने ।
यद्भासा भासते सर्वं यत्पाल्यं सकलं जगत् ॥

Colophon :

इति श्रीब्रह्मवैवर्तपुराणरहस्ये द्वात्रिंशोऽध्यायः ॥

215

Sl. No : 17618 ब्रह्माण्डपुराणम् Ms. No : P. 3625

Beginning :

× × × ×कलांशांस्त्रिमूर्ती
तुष्ट्याधर्मो भवति सततं शक्तिलेशो यदीयः ।
शश्वच्छान्तं सकलभुवनव्यापि नारायणाख्यम्
प्रत्यग्ज्योतिः स्फुरति हृदि मे सच्चिदानन्दरूपम् ॥
हेमाम्भोरुहकेसरारुण. . . . व्यासक्तहस्तो हरेः ॥

ऋषय ऊचुः—

विचित्रार्थकथोपेता ब्रह्माण्डीया सविस्तरा ॥

End :

तत: प्रभृति लोकेषु सागराख्यामवाप्तवान् ॥
एतत्तेऽभिहितं सर्वं महतां चरितं मया ।
रामस्य कार्तवीर्यस्य सगरस्य महीपतेः ॥

Colophon :

इत्यादिमहापुराणे ब्रह्माण्डे पञ्चाशीतिसाहस्रिकायां संहितायां मध्यम भागे गोकर्णोद्धारणं नाम सप्तनवतितमोऽध्याय: ॥

216

Sl. No : 17619 ब्रह्मण्डपुराणम् Ms. No : P· 3923/1

Beginning :

नैमिशे पुण्यनिलये क्षेत्रे बहुगुणान्विते ।
सत्रं कर्तुं समायाता ऋषयो ब्रह्मवादिन: ॥
भारद्वाजो गौतमश्च × × × × ।
एते चान्ये च मुनयस्तत्र स × × ताः ॥
इतरेतरसंवादस्सुमहानभवत्तदा ।
केचित्तत्र कुरुक्षेत्रं प्रशंसन्ति मुनीश्वरा: ॥
एतस्मिन्नेव काले तु तत्र सूतस्समागत: ।
अब्रुवन् मुनयस्सर्वे व्यासशिष्यं महामुनिम् ।
सूतपुत्र × × × × × × · ×
लोकेऽस्मिन् पुण्यनिलयं विष्णुसान्निध्यसंयुतम ।
एते मुनिगणाः क्षेत्रं विविधं प्रवदन्ति वै ।
सर्वज्ञस्त्वं विचार्यैव समाचक्ष्वोत्तमोत्तमम् ।
+ + सूतपुत्रो महाभाग इदं बचनमब्रवीम् ॥
क्षेत्राणामुत्तमं क्षेत्रं प्रवक्ष्ये × × ×
अनेकतीर्थसंयुक्तं सिद्धक्षेत्रमनुत्तमम् ॥

End :

श्रुतिसुखमनुगीतं सूतपुत्रस्य वाक्यं
मधुरमतिरहस्यं नैमिशीया मुनीन्द्राः ।
मुनिव × × मुपचारैस्सम्यगाकर्ण्य हृष्टाः
× ×दनु मधुरवाग्भिः पूजयन्ति स्म पूज्यम् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे क्षेत्रकाण्डे कुरुकौ × × + + हात्म्ये त्रिंशो ऽध्यायः ॥

217

Sl.No : 17622 स्कान्दपुराणम् **Ms: No · P.367/3**

Beginning :

ऋषयः —
कथितं भवता सूत विष्णोर्माहात्म्यमुत्तमम् ।
सर्वा × × हनं पुण्यं समासेन श्रुतं च नः ।
इदानीं श्रोतुमिच्छामः माहात्म्यं त्रिपुरद्विषः ।
तद्भक्तानां च माहात्म्यं निर्देषे × ×
× × × × रं परम् ॥

End :

विविधगुणविभेदैः नित्यमुत्सृष्टरूपं
जगति च वहिरन्तः भासमानं महिम्ना ।
स्वमनसि विहरन्तं वाङ्मनोवृत्तिदूरं
परमशिवमनन्तानन्दसान्द्रं प्रपद्ये ॥
यः पठेत् शृणुयादेतत् पुराणं शैवमुत्तमम् ।
विधूय सर्वकर्माणि शिवलोके महियते ॥

Colophon :

इति श्रीस्कान्दपुराणे ब्रह्मोत्तरकाण्डे पुराणानुवर्णनं नाम एकविंशोऽध्ययः ॥

218

Sl. No: 17632 भागवतम् Ms. No: P 1487

Beginning:

शुक्लाम्बर . . प्राचिसंध्या . . विशुद्धविज्ञान . . .श्रीमन्नृसिंह
. . . लक्ष्मीनाथ . . गुरुपरम्पराम् । साधुबृन्दावनं . . .भवौषधाय ॥
जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्

End:

नमस्तस्मै भगवते वासुदेवाय साक्षिणे ।
य इमां कृपया कस्मै व्याचचक्षे × × ×
× × × × जरातमर्थं × × × × ॥

Colophon:

इति श्री भागवते महपुराणेऽष्टसाहस्रिकायां पारमहंस्यां संहितायां
द्वादशस्कन्धे त्रयोदशोऽध्यायः ॥ श्रीमद्भागवतं समाप्तम्

219

Sl. No: 17747 भागवतकथासङ्ग्रहमालिका Ms. No: B. 200/2

Beginning:

श्रीमद्भागवते द्वितीयस्कन्धे विद्यमानकथासङ्ग्रहमालिका प्रारम्भः ॥
परीक्षिद्राजसंप्रश्नसंपृष्टेन शुकेन हि ।
स्थविष्ठरूपध्यानस्य प्रकारस्संप्रकीर्तितः ॥
योगधारणयोत्क्रान्तिगतिरुक्ता मनीषिणाम् ।
ज्ञानिनां ब्रह्मणा साकं लिङ्गभङ्गश्च योगिनाम् ॥

End:

क्षत्तुर्मैत्रेयसंवादः सङ्कोचः स्कन्ध ईरितः ।
सूतशौनकसंवादः ततःपरमिहोच्यते ॥
नारायणेन व्यासेन द्वितियेऽस्मिन्प्रकीर्तिताः ।
दशाध्यायाः लक्षणानि संप्रोक्तानि महर्षिणा ॥

Colophon:

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे कथासङ्ग्रहमालिका समाप्ता ॥

220

Sl. No : 17750 भागवतव्यवस्थितिः Ms. No : C. 3112

Beginning :

ऐन्द्रजालिकवद्विश्वं रचितं स्वीयमायया ।
यथा तां भुवनेशानीं चिद्रूपां प्रणमाम्यहम् ॥
श्रींलक्ष्मीं मानदं रङ्गनाथाख्यं पितरं गुरुम् ।
नीलकण्ठः प्रकुरुते नत्वा भागवतस्थितिम् ॥

End :

रङ्गनाथसुतेनेयं श्रीलक्ष्मीतनयेन च ।
नीलकण्ठेन रचिता देवीभागवतस्थितिः ॥
विष्णुभागवतस्यापि सप्रमाणं यथामति ।
प्रीयतां तेन मे देवौ जगदम्बामधुद्विषौ ॥

Colophon :

इति श्रीशैवोपनामकनीलकण्ठविरचिता भागवतव्यवस्थितिः समाप्ता ॥

221

Sl. No : 17751 भागवतव्याख्या Ms. No : B. 236/1d

Beginnig :

श्रीमान्नीरदनीलदीप्तिरखिलाधीशः प्रसन्नाननः
सत्यज्ञानसुखामलद्वयपराकाशस्वरूपस्त्वयम् ।
नीरूपोऽविषयश्च वाङ्मनसयोः द्वंद्वातिगो यः प्रभुः
पायान्नः क्रमशः त्रिलिङ्गक इव श्रीवासुदेवो हरिः ॥

. . . .

अत्र खलु पदवाक्यप्रमाणज्ञेन भगवता बादरायणाचार्येण—

End :

इत्थमिति । शन्तमानि परममङ्गलानि । परमहंसगतौ श्रीकृष्णे ॥
मुक्तैः प्राप्यमिहैव वाङ्मनसयोर्दूरं . . . .

. . . .

यस्यैतत्त्रयमस्ति लिङ्गमनिशं कृष्णाय तुभ्यं नमः ॥

Colophon:

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ तत्त्वार्थचन्द्रिकाय एकत्रिंशोऽध्यायः ॥

222

Sl. No: 17752 भागवतव्याख्या Ms. No: P.2853

Beginning

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
अप्पाजीपण्डिताख्योऽहं चेन्नभट्टार्यसंश्रयः ।
श्रीकृष्णभक्तिनिरतः कुरुते भागवतान्वयम् ॥
रामानुजार्यकृपया कृतो भागवतान्वयः ।
बालानां सुखबोधाय भवेत्साधुपरिग्रहात ॥
कथित इत्यादिना . . . . . . सार्धश्लोकः ।
सत्तमा भवता

End:

तेषु गुणेषु आब्रह्मस्थावरादयः प्रकृताः प्रकृतिसम्बन्ध × × ग्रथिता हि । अतोयथा योगजमुपासनां कुर्वन्तीति भावः ॥

Colophon:

इति दशमे चत्वारिंशोऽध्यायः ॥

223

Sl. No: 17753 भागवतव्याख्या Ms. No: P· 10060/18

Beginning:

सम इत्यादिपद्यानां श्री भागवतवर्तिनाम्
व्याख्यां करोमि शिष्योऽहं श्रीदत्तात्रेययोगिनः ॥
पूर्वं तावत्परमकारुणिको भगवान् श्रीकृष्णस्तत्त्वबुभुत्सुमुद्धवं प्रति प्राधान्येन भक्तियोगमुद्दिश्य + + + धारणास्वरूपमाह ॥

End :

अस्यार्थः वितर्कानुगतः विचारानुगतः आनन्दानुगतः

कौर्मे तु—

वितर्कश्च विचारश्च विवेकश्चो जायते । मुनेः समा × ×

Colophon : — — —

224

Sl. No : 17755 भागवतव्याख्या Ms. No : P. 4111/1

Beginning :

यदखण्डमनाद्यन्तमनन्तं शान्तमद्वयम् ।
चिदेकरसमानन्दं ब्रह्म तं तदुपास्महे ॥

\+ + + + + +

एकादशाक्षाविषयप्रत्यक्तत्वानुभूतये ।
एकादशस्कन्धसारसङ्ग्रहः क्रियते मया ॥

End :

विरिञ्चिदेहकैवल्यसिद्धिः नातः × ×
प्रतिपाद्यमस्ति सर्वमनवद्यम् ॥

कालकूटसमो दोषो यस्य कण्ठे लयं ययौ ।
गुणोऽपि वा कलामात्रो यस्य भूषायितः ।
तमाद्य पुरुषं वन्दे ऽविद्यादोषहरं हरम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमत्कृष्णानन्दभारतीमुनिवरशिष्य-ब्रह्मानन्दभारतीकृता एकादशस्कन्धसारसङ्ग्रहव्याख्या समाप्ता ॥

225

Sl. No : 17759 भागवतव्याख्या Ms. No : P. 3447/2

Beginning :

यत्कारुण्यकटाक्षवीक्षणलवश्रद्धालवः साधवः
त्यक्त्वा पुत्रकलत्रवित्तधरणीदेहादिकं दूरतः ।
ग्रामात् काननमुपेत्य . . . . नमस्यामहे ॥

उक्ताः परे गतस्कन्धैरवतारा: परात्मनः ।
वासुदेवावतारोऽस्य दशमेन प्रकाश्यते ॥
अध्याया अत्र नवतिः—

End :

मर्त्यस्तयानुसवमेधितया स्ववृत्त्या
श्रीमत्कथाश्रवणकीर्तनचिन्तयेति ।
तद्धाम दुस्तरकृतान्तजयापवर्ग्यं
ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः ॥. . . . .

इति सूचयितुं पुनर्वचनं—ग्रहाद्वनं क्षितिभुजोऽपि ययुर्यदर्था इति । यः उरुगाय एव प्राप्योऽर्थः । अत्र पुंभोगविप्रलंभश्रृङ्गारसङ्करः ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीकृष्णन्नादपूज्यपादशिष्यश्रीमद्राघवानन्दमुनेः कृतौ श्रीमद्भागवतव्याख्यायां श्रीकृष्णपद्यां दशमस्कन्धे नवतितमोऽध्यायः ॥ नमोऽस्तु....शायिने ॥

226

Sl. No : 17761 भागवतव्याख्या Ms. No: P. 3448/4

Beginning :

करुणाकरुणा काचिदरुणाधरपस्करा ।
चरणानतये नः स्याद्वरुणाहृतसस्करा ॥
निरोधो नाम सृष्टानां संहारस्स चतुर्विधः ॥
. . . .

मन्वन्तरावसानकालीनं निरोधं विवक्षुर्मुनिः तत्प्रपञ्चयति . . . . योऽन्त्य इत्यादिना ॥ —

End :

य इदं पुराणं क्रियया हेतुनाऽस्याप्रणयनेन हेतुना तस्मै शुकाख्याय व्याचचक्षे उपदिदेश ! स्वगुरूत्नमति योगीन्द्रायेति ॥

विष्णुरातं परीक्षितं अमूमुचत्– मोचयामास ।
शिवश्शिवेत्यच्युत . . . . राघवानन्दतः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकृष्णानन्दपूज्यपादशिष्यस्य राघवानन्दमुनेः कृतौ भागवतव्याख्यायां श्रीकृष्णपद्यां द्वादशस्कन्धे त्रयोदशोऽध्यायः ॥

227

Sl. No: 17764 भागवतव्याख्या **Ms. No: C. 2378/2**

Beginning:

सृजति विधिरजस्रं लीलया विश्वमृद्रं
विदधति कविता ये × + मूकाः प्रसादात् ।
उदयगिरिविलङ्घी स्यात् + णाघस्यं
× × सकल निगमवाच्यः श्रीहयास्यः स नो व्यात् ॥
अथ लोकोपकाराय कृतानन्तादूभुत × वतारस्य श्रीहरेः . . . .

End:

आत्मना धैर्येणात्मानं मनः आ समन्तान्नियम्य शान्तो भगवन्निष्ठः समः स्वपरयोस्तुल्यभावः । हे दानव ते × अनया त्वद्वाचा न तृप्यामि ॥

Colophon:

(इति दशमे चत्वारिंशः) (?)

228

Sl. No: 17765 भागवतव्याख्या **Ms. No: C. 5**

Beginning:

उत्तरार्धे हरेर्लीला स्वतः सर्वात्मना कृता ।
यदर्थमवतीर्णोऽसौ सा निरूप्या विभागशः ॥
एषा निरोधलीलैव स्वसंसारपरापरा ।
भगवांश्च तदीयांश्च तच्छास्त्रं चेति स त्रिधा ॥

End :

तदाश्रयेण तद्दृष्ट्या तत्प्रसादात्तदात्मना ।

तदीयानां तदर्थार्थी तदेकश—

Colophon :

— — —

229

Sl. No: 17769 भागवतव्याख्या Ms. No: C. 1279/2

Beginning

यतो जन्माद्यस्य श्रुति स्तुत यमानैकविषया—

त्स्वतन्त्रस्तन्त्रज्ञो गुरुरपि गुरोर्यश्च जगताम् ।

विमूढा यत्तत्वं प्रकटमिह वेत्तुं सुमनसो

मुकुन्दं ध्यायामोऽदपहतकुहकं तं स्वह मा × मा ।।

अथ कलिकमलापनुत्तये विधिभवपुरः-

End :

सुखबद्धो सद्बुद्धो इहतत्र विनशौं न मन्वानाद्धषिकेशा तदुभयपवित्र सचिनाम् ।अतः किंस्वांगोमतरिद्भुरारे सुजनता कृपा तीर्थ स्वानामसूचि । पदरत्नावलीकटे राजताहिमुरद्विबुधः वनमालेव मौक्तिकी कृष्णवल्लभा ।। (?)

Colophon:

इति श्रीमन्महेशतीर्थपूज्यपादशिष्यविजयध्वजतीर्थयतीन्दुकृतायां श्री भागवतटीकायां पदरत्नावल्यां द्वादशस्कन्धे द्वादशोऽध्यायः ।।

230

Sl. No : 17770 भागवतव्याख्या Ms. No: C. 1382/2

Beginning :

यतो जन्माद्यस्य श्रुतिमुनियमानैकविषयात्

स्वतन्त्रस्तन्त्रज्ञो गुरुरपि गुरोर्यस्य जगताम् ।

विमूढा यत्तत्त्वं प्रकटमिह वेत्तुं सुमनसो

मुकुन्दं ध्यायामो हतकुहकिनं स्वेन महसा ।।

अनन्ततीर्थविजयतीर्थौ प्रणम्य मस्करिवन्द्यौ ।
तयोः कृतिं स्फुटमुपजीव्य प्रवच्मि भागवतं पुराणम् ॥

End :

मधुरया गिरा राजानं प्रत्यभाषतेत्येकान्वयः ॥
भागवतविवरणमिदं तुलसीदलमिव समर्पयामि हरेः ।
चरणनलिनयुगलेऽहं प्रथमस्कन्धोपगं सतां प्रीत्यै ॥

Colophon :

इति श्रीमद्भागवतटीकायां विजयध्वजतीर्थविरचितायां प्रथमस्कन्धे विंशोऽध्यायः ॥ प्रथमस्कन्धः समाप्तः ॥

231

Sl. No: 17779 भागवतव्याख्या **Ms. No: P. 9163**

Beginning :

अथाध्यायत्रयेण भगवतः स्वसखोद्धवमुखेन गोपीसान्त्वनात्मकं चरित्रमनुवर्ण्यते—गोपीनां सान्त्वनं अरतिहस्यं सन्निसाध्यमित्येतदर्थं उद्धवं विशिनष्टि वृष्णीनामिति ॥

End :

यद्वा यदनुवृत्तिकामाः । दुस्तरकृतान्तभवापवर्गमिति पाठान्तरम् । दुस्तरकृतान्तो मृत्युः तत्तुल्यो भवः संसारः तस्यापवर्गः अवसानम् यस्मात् तद्धामैतीति सम्बन्धः ॥

Colophon :

इति श्रीवत्सकुल.......श्रीवीरराघवविदुषा लिखितायां श्रीमद्भागवतचन्द्रिकायां दशमस्कन्धे नवतितमाध्यायः । स्कन्धश्च समाप्तः ॥

232

Sl. No : 17780 भागवतव्याख्या **Ms. No:C . 289b**

Beginning :

लौकिकोक्तमुत्तरं धृत्वा पुनरपि राजकृतप्रश्नानामेव शुकोक्तान्युत्तराणि विदुरमैत्रेयसंवादरूपेण श्रोतुकामः प्रपृच्छति ॥

End :

विभूतिप्रकाशकं तत्वानां चिदचिद्गतानां दीपमिव प्रकाशकं, अत एवाखिल-पापघ्नमिदं पुराणं यः कृपया व्यतनुत प्रकाशितवान्, तं व्याससूनुं नतोऽस्मि ॥

Colophon :

इति श्रीमद्वत्सकुलपयःपारावारराकासुधाकरस्य श्रीशैलगुरोस्तनयेन तच्चरणपरिचर्याप्रसन्नतत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवीरराघवविदुषा लिखितायां श्रीमद्भागवतचन्दिकायां श्रीभागवतव्याख्यायां द्वादशस्कन्धे द्वादशोऽध्यायः ॥ द्वादशस्कन्धः समाप्तः ॥

233

Sl. No: 17781 भागवतव्याख्या Ms No: P. 4754/2

Beginning :

परीक्षित् कथित इति । हे भगवन् भवता सोमसूर्ययोर्वंशविस्तरः कथितः उभयवंश्यानां सोमसूर्यवंशसम्भवानां राज्ञां परमाद्भुतं चरितं च कथितम् । तथा नितरां धर्मशीलस्य यदोश्चरितं च हे मुनिसतम कथितम् ॥

End :

क्षत्रेति । त्वां क्षत्रियं । स्थितस्सर्वत्र भयादिभिः जन्तूनवधीः मत्पदाश्रयस्समाहितस्सर्वतद × पराजहि । जन्मनीति । हे राजन् तं अनन्तरं ज्ञानी सर्वभूतसुहृत्तमः द्विजपरो भूत्वा केवलं मामुपैष्यसि ॥

Colophon :

इती श्री वेङ्कटकृष्णविरचितायां भागवततात्पर्यचन्द्रिकायां दशमस्कन्धे एकपञ्चाशदध्यायः ॥

234

Sl. No : 17784 भागवतव्याख्या Ms. No: P. 2653/2

Beginning :

रमापतिपदाम्भोजपरिस्फुरितमानसम् ।
सेनापतिमहं वन्दे विष्वक्सेनं निरन्तरम् ॥ . .
दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहम् ।
क्रीडद्यदुकुलाम्भोधौ परानन्दमुदीर्यते ॥ . .
कथितो वंशविस्तार इति ।

End :

राज्ञा पृष्ट इति ॥ अयमर्थः ॥ यत् यूयं पृच्छथ इदमेव राजापि शुकं पृष्टवान् । शुकोऽपि विदुरमैत्रेयसंवादं पुरस्कृत्य पूर्वं राज्ञा कृताः प्रश्नाः तदनुसारेण सर्वं पुराणार्थं अब्रवीत । तदहं चाभिधास्यामि तथैव शृणुतेति ॥

Colophon :

इति श्रीमद्भागवते महापुराणे सव्याख्याने द्वितीयस्कन्धे दशमोऽध्यायः ॥ द्वितीयस्कन्धः समाप्तः ॥

235

Sl. No : 17831 भागवतव्याख्या Ms. No : P. 780

Beginning :

आम्नायद्रुमशाखाग्रनिरतं द्विजसेवितम् ।
हरिपक्षाश्रयं वन्दे हृद्यवर्णमुखं द्विजम् ॥
शुकपक्षानुसारेण पुराणं तदर्थं व्रजन् ।
नश्वभ्रेण न पङ्केन न च क्लिश्यति कण्टकैः ॥

+ + जन्मादीत्याद्येन अत्र गायत्र्युपक्रमः सम्प्रतीयते । धीमहीति शब्दः वेदान्तरैरर्थतश्च गायत्र्युपक्रमत्वं च स्कान्दोक्तं यथा ॥

End :

फलिमिति इतरत्र राजसादिपुराणेषु संयमात्मशक्तिः स्वयं हेतुभूतात्मशक्तिः नवशक्तय इत्युक्ता उपलब्धिमात्रधाम्ने जाड्यप्रहितज्ञानात्मकतेजः स्वरूपाय स्वसुखमात्मानुसन्धानसुखं तेनानाकूलचेतास्तेन व्युदस्तान्यभाव निःस्वभगवद्व्यतिरिक्तपङ्गः, अपि समुच्चये, सुलभसमाधिकृतया साक्षात्कृतात्मस्वरूपोऽपि भगवद्भिरातुष्टचित्तः इत्यर्थः । तद्दीपं तत्त्वप्रकाशः ॥

Colophon :

इति हारीतकुलतिलकवाग्विजयसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन सुदर्शनसूरिणा विरचिते श्रीमद्भागवतमहापुराणव्याख्याने शुकपक्षीये द्वादशोऽध्यायः । शुकपक्षीयव्याख्यानं सम्पूर्णम् ॥

236

Sl. No : 17835 भागवतव्याख्या Ms. No : P· 260

Beginning :

कौण्डिन्यगोत्रसम्भूतं कल्याणगुणसागरम् ।
रामायणोपदेष्टारं श्रीगोपालमहं भजे ॥
निगमशिरसि गेयं नित्यकल्याणकायं
पुरुषविषयं श्रीचरित्रासहायम् ।
भवुकगुणनिकायं भावुकारामुपायं
परिविगलितहेयं बालकृष्णं भजेयम् ॥

End :

विभूयाश्चेति जगतो . . . . . तवो ये तवाङ्गद्भूताः अङ्गधृता इति पाठे कार्योपयोगिशक्तिधृता इत्यर्थः । एवं सर्वकारणधृतं तत्त्वर . . .

Colophon :

इति दशमस्य चत्वारिंशोऽध्यायः ॥

237

Sl. No : 17837 भागवतव्याख्या Ms. No : P. 2994/b

Beginning:

× × कमहं नौमि भगवन्तं कृपाम्बुधिम् ।
यस्यानुग्रहतस्सर्वे प्राप्नुवन्तीह वाञ्छितम् ॥
श्रीमद्भागवतशुकभावप्रकाशिका । (?)
श्रीवत्सान्वयसञ्जातसुन्दरार्येण लिख्यते ॥

End :

तस्य धाम लोकमेति प्राप्नोति तस्य लोकस्य कालानाकलितत्वामाह — दुस्तरेति । दुर्लभपुरुषार्थत्वमाह — ग्राममिति ॥

Colophon :

इति हरितकुलतिलकवाग्विजयसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन सूरिणा श्रीसुदर्शनसूरिणा विरचितश्रीभागवतमहापुराणव्याख्यानशुकपक्षानुसारिणा श्रीवात्स्यवरदान्वयजसूरिविलिखितेन श्रीशुकभावप्रकाशिकाव्याख्यानेन सहिते श्रीमद्भागवते दशमस्कन्धे सप्तनवतितमोऽध्यायः ॥

238

Sl. No : 17839 भागवतव्याख्या Ms. No : P. 1237/2

Beginning :

जयन्ति श्रीधरानन्दकृपापाङ्गलसद्दृशः ।
या नित्यमनुवर्तन्ते सम्पदोऽभिमता दृशः ॥

एवंभूतो × × × वंशे मुकुन्दक्रीडा वर्णिता । अतः स एव आविर्वंशो-वर्ण्यते । श्रीकृष्णभक्तिर्मुक्तौ हेतुर्नेतरदिति वक्तुं . . अनुवर्णितानि ।

End :

नारदरूपिणे योगीन्द्राय शुकाय तथात्मना शुकरूपेण तत्परं सत्यं श्रीनारायणाख्यं धी × × × यथोपक्रममुपसंहरन् गायत्र्याख्यपरब्रह्म विधेयमिति दर्शयति । तामेव देवतरूपेण प्रणमति द्वाभ्यां व्याख्यातवान् ॥

Colophon :

इति श्रीमद्भागवते महापुराणेऽष्टादशसाहस्रिकायां पारमहंस्यां संहितायां सव्याख्याने द्वादशस्कन्धे त्रयोदशोऽध्यायः ॥

239

Sl. No : 17841 भागवतव्याख्या Ms. No : P. 3185

Beginning:

शुक्लाम्बरधरं ॥ यस्य द्विरदवक्त्राद्याः ॥
प्रणष्टारं वसिष्ठस्य . . व्यासपुत्रं शुकं भजे ॥
. . . .
श्रीमदहोबिलदेशिकतनयः श्रीशैलगुरुधुरीणसुतः ।
वात्स्यो दशमस्कन्धं व्याकुरुते वीरराघवो दासः ॥ . . . .
शुकतात्पर्यरत्नावल्या व्याख्या सतां मुदे ॥

End :

तोकान् शिशून् उत्क्रोश्य प्रहाररोदननखक्षतादिभिः रावयित्वा याति गच्छति । हस्ताग्राह्ये रचयति निधिं पीठि × × × लूखलाद्यैश्छिद्रं ह्यन्तः निहीतु —

Colophon :

[इति शुकतात्पर्यरत्नावल्यां दशमस्कन्धदीपिकायां सप्तमोऽध्यायः]

240

Sl. No : 17852 भागवतव्याख्या Ms. No : P. 7438/1

Beginning :

अथातः पञ्चमस्कन्धव्याख्यानेकविशेषवान् ।
प्रियव्रतान्वयो यत्र सप्रपञ्चः सप्रपञ्चते ॥
तत्र तु प्रथमाध्याये ज्ञानिनो राज्यनिवृतिः ।
पुनश्च ज्ञाननिष्ठेति प्रियव्रतकथाद्भुता ॥

End :

द्वितीयस्कन्धे वैश्वानरं यान्तीत्यादिना उपगेयमौपनिषदश्रद्धाभक्तिसंवि-शुद्धा बुद्धिर्यस्य यथावत् श्रुत्वा समस्तानां सकलजीवनिकायानां आश्रयं वपुः ॥

Colophon :

इति श्रीभागवते महापुराणे पञ्चमस्कन्धे विंशतितमोऽध्यायः । समाप्तश्च पञ्चमस्कन्धः ॥

241

Sl. No : 17853 भागवतव्याख्या Ms. No :P . 9038/2

Beginnig :

सम्प्रदायविशुद्ध्यर्थं स्वीयनिर्बन्धयन्त्रितः ।
श्रुतिस्मृतिमतां व्याख्यां करिष्यामि यथामति ॥
श्रीमद्भागवतं पूर्वैः सारतः सन्निवेशितम् ।
मया तु तदुपस्पृष्टं उच्छिष्टमुपचीयते ॥

सन्मार्गं स × तां स्वतः प्रमाणभूतानां अप्रमाण्यकारणरहितानां वेदानां मार्गंब्रह्मपरत्वं दुर्घटं मन्यमानः पृच्छति भो ब्रह्मन्—

End :

अपामसोमममृता अभूमेत्यादि श्रुतिभिः कर्मफलस्यानित्यत्वप्रतिपादनात् असत्वं न घटते...गमयतीति । हे भगवन् ते तव भारती वेदलक्षणा—

Colophon :

— — —

242

Sl. No : 17857 भागवतसङ्ग्रहः Ms. No : P. 6493/4

Beginning :

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थो . . .सत्यं परं धीमहि ॥

सूतः—

पश्यन्त्यहोरूपमदभ्रचक्षुषः

सहस्रपादोरुभुजाननाद्भुतम् ।

सहस्रमूर्धाश्रवणाक्षिनासिकं

सहस्रमाल्याम्बरकुण्डलोल्लसत् ॥

तृतीयेऽध्याये नारदः—

ओंनमो भगवते तुभ्यं वासुदेवाय धीमहि ।

प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय च ॥

End :

उपचितनवशक्तिभिः स्व आत्म —

न्यपरचित स्थिरजङ्गमपालनाय ।

भगवति उपलब्धिमात्रधाम्ने

सुरऋषभाय नमस्सनातनाय ॥

Colophon :

इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां द्वादशस्कन्धे द्वादशोऽध्यायः । द्वादशस्कन्धः समाप्तः ॥

243

Sl. No : 17515 भागवतसारसङ्ग्रहः Ms. No : P. 5881

Beginning:

यद्भाव्यं तद्भवत्येव . . . . . क्वचत् ॥

जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्

तेने ब्रह्महृदाय आदिकवये मुह्यन्ति यं सूरयः ।

तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा

धाम्ना . . . . धीमहि ॥

End :

स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावो-

प्यजितरुचिरलीलाकृष्णसारस्तदीयम् ।

व्यतनुत कृपया यस्तत्त्वदीपं पुराणं

तमखिलवृजिनघ्नं व्याससूनुं नतोऽस्मि ॥

Colophon :

इति श्रीमद्भागवतसारसङ्ग्रहे नामरत्नावल्यां × × × ।

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे द्वादशोऽध्यायः ॥

244

Sl. No : 17860 भार्गवपुराणम् Ms. No: P. 223

यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् ।

विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥

श्रीशौनकादयः—

सर्वधर्मार्थतत्त्वज्ञ सर्वशास्त्रविशारद ।

तत्त्वार्थ- . . -श्रेष्ठ सूत द्वैपायनप्रिय ॥

End :

इत्येतदाख्यानमनुत्तमं शुभं

योगीश्वराणां महतां मनोहरम् ।

भक्त्यानतो यः शृणुयात्पठेद्वा

सौभाग्यवान् गच्छति तत्पदं परम् ॥

Colophon :

इति श्रीभार्गवपुराणे उत्तरखण्डे नरनारायणसंवादे महायोगिमाहात्म्ये चत्वारिंशोऽध्यायः ॥

245

Sl. No : 17871 मत्स्यपुराणम् Ms. No : C. 2730

Beginnig :

प्रचण्डताण्डवाटोपप्रक्षिप्तोक्षिप्तदिग्गजः ।

भवन्तु विघ्नभङ्गाय भवस्य भवतां भुजाः ॥

सूतमेकाग्रमासीनं पप्रच्छुर्दिव्यसंहिताम् ।।

सूत उवाच—

पुण्यं पवित्रमायुष्यं इदानीं श्रृणुत द्विजाः ।
मत्स्यं पुराणमखिलं यज्जगाद गदाधरः ॥
पुरा राजा मनुर्नाम चीर्णवान् परमं तपः ।
पुत्रं राज्ये समारोप्य क्षमावान् रविनन्दनः ।।

End :

पुराणमेतत्सकलं रहस्यं
श्रद्धान्वितः पुण्यमिदं श्रृणोति ।
कृत्वाश्वमेधावभृथफलं यत्
फलं समाप्नोति हरेः प्रसादात् ।।

+ + +

वैश्यो धनमवाप्नोति सुखं शूद्रश्च विन्दति ।
आयुष्मान् पुत्रवान् धन्यः लक्ष्मीवांश्चैव जायते ।।

Colophon:

इति श्री मत्स्यपुराणे सार्धचतुर्विंशत्सहस्रिकायां संहितायां ग्रन्थानुक्रमणिका नाम २४० अध्यायः ।।

246

Sl. No: 17872 **मनुवंशपुराणम्** Ms. No: P.944

Beginning

कदाचिन्नैमिशारण्ये शौनकादिमहर्षयः ।
दृष्ट्वा सूतमुखं प्राहुः द्वादशाब्दमहाध्वरे ।।
सूत शास्त्रसमोपेत खण्डकापालिकाभिधे ।
आख्याने वामदेवस्य संहितायां स्थिते मते ।।
श्रीमत्स्कान्दपुराणे च मनुवंशकथामहं ।
ब्रूहि कारुण्यतो नस्त्वं सर्वतन्त्रविशारद ।।

End :

शेषाद्वा जीवनार्थं च . . सिद्धिं गमिष्यथ ।
इत्यादिष्टां गुरोर्वाचं निशम्य प्रीतिपूर्वकम् ॥
तच्छासनक्रमाद्भूयो मनुवंशाधिनायकाः ।
तिरुव्यापारसंयुक्ता . . . दं मुदिताः सदा ॥

Colophon :

इति स्कान्दे खण्डकापालिकाख्याने महापुराणे मनुवंशकथनं नाम त्रयोदशो-ऽध्यायः ॥

247

Sl. No: 17879 मार्कण्डेयपुराणम् Ms No: C. 4034/1

Beginning :

यद्योगिभिर्भवभयार्तिविनाशयोग्यं
आसाद्य वन्दितमतीव विविक्तचित्तैः ।
तद्वः पुनातु हरिपादसरोजयुग्मं
आविर्भवक्रमविलङ्घितभूर्भुवःस्वः ॥

: phon

श्लोकाश्चात्र नवाशितिः एकादश समाहिता ।
कथिता मुनिना पूर्वं मार्कण्डेयेन धीमता ।
पुण्या पवित्रा सुश्राव्या दुश्राव्या धर्मसहिता ॥

Colophon :

इति मार्कण्डेयपुराणे महिमा । समाप्तोऽध्यायः ॥

248

Sl. No : 17883 मौसलपुराणम् Ms. No: P. 49

Beginning :

सूत ब्रूहि महाभाग सर्वतत्त्वविशारद ।
शम्भुना सहितो ब्रह्मा गृहीत्वा पद्मसम्भवः ॥
किं चकार तदा वक्ष्व श्रोतुं कौतूहलं महत् ॥

श्रीसूतः—

स गृहीत्वा सिद्धघुटिकां ससर्ज कमलोद्भवः ।
अव्यक्तं सृष्टवान् व्यक्तं महत्तस्मादजायत ॥

End :

विद्यार्थी लभते विद्यां यशःकामी लभेद्यशः ।
धनकामो लभेद्द्रव्यं स्त्रीकामो कन्निकां लभेत् ॥
धर्मकामो लभेद्धर्मं पुत्रार्थी लभते सुतम् ।
वानप्रस्थयतिर्वापि श्रुत्वा शिवपदं व्रजेत् ॥

Colophon :

इति श्री मौसलपुराणे सूर्यरहस्ये विभूतिरुद्राक्षिप्रशंसा नाम त्रयोदशोऽध्यायः ॥

249

Sl. No : 17885 याज्ञीयस्कान्दतन्त्रम् Ms. No: C.2118

Beginning :

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
सुरैरधिष्ठिते दिव्ये नैमिषे ऋषयः पुरा ।
सूतं सर्वरहस्यज्ञं इदं वचनमब्रुवन् ॥

End :

यज्ञेश सर्वदेवेश सृष्टिस्थित्यन्तकारण ।
स्तोतुं त्वां नैव शक्नोमि कृपया मां प्रपालय ॥
श्रुत्वा सर्वं त्वन्मुखात मोहो नष्टो मम प्रभो ।
राज्यपालनधर्मं च श्रोतुमिच्छामि मे वद ॥

Colophon:

इति श्री स्कान्दतन्त्रे यज्ञावतारमहाविष्णुप्रणीते संसाररहस्ये सात्विकसात्विके द्वादशोऽध्यायः ॥ द्वितीयखण्डः समाप्तः ॥

250

Sl. No : 17886 लक्ष्मिनारायणप्रणयकलहश्लोकः Ms. No : P· 9102/4

Beginning :

अङ्गुल्या कः कवाटं प्रहरति कुटिले माधवः किं वसन्तः
नो चक्री किं कुलालः न हि धरणिधरः किं द्विजिह्वः फणीन्द्रः ।
नाहं घोराहिमर्दी किमुत खगपतिः नो हरिः किं कपीन्द्रः
इत्येवं सत्यभामाप्रतिवचनजितः पातु वः पद्मनाभः ॥

End :

अङ्गीकृत्य मुदा तदा विटजनाभिज्ञा गृहं कान्तया
सार्धं मङ्गलमज्जनार्थमविशन् संसेव्यमानः सुरैः ।
सर्वाभीष्टफलप्रदाननिरतः सेवाजनानां मुहुः
पायाद्वः परमेष्ठिनार्चितपदः श्रीरामचन्द्रः स्वयम् ॥

Colophon :

इति लक्ष्मीनारायणप्रणयकलहसन्धानपुराणश्लोकाः ॥

251

Sl. No : 17889 लैङ्गपुराणम् Ms. No : B. 557

Beginning:

श्रीमत्कैलासमागम्य वसिष्ठो भगवान् मुनिः ।
तपश्चचार सत्कर्मनिरतो नियतेन्द्रियः ॥
दिव्यवर्षसहस्रं तु वायुभक्षोऽग्निमध्यगः ।
श्रीमत्पञ्चाक्षरं साक्षाच्चतुरिन्द्रियमध्यगम् ॥

End :

यत्प्रसादेन विज्ञानं यथावज्जायते नृणाम ।
तं वन्दे षण्मुखं साक्षात् ज्ञानशक्तिधरं वरम ॥
यस्य प्रसादलेशस्य लवलाभबलेन तु ।
सर्वसिद्धिरयस्तेन तं नमामि विनायकम् ॥

Colophon :

इति शिवपुराणे वासिष्ठे लैङ्गे दुष्कर्मकृच्छ्रूद्रस्य इन्द्रपदप्राप्तिमहिमानुवर्णनं नाम द्वादशोऽध्यायः ॥ इत्यार्षवासिष्ठलैङ्गपुराणम् ॥

252

Sl. No : 17890 लिङ्गपुराणम् Ms. No : B. 1223

Beginning :

नमो रुद्राय हरये ब्रह्मणे परमात्मने ।
प्रधानपुरुषेशाय सर्गस्थित्यन्तकारिणे ।।
नारदोऽभ्यर्च्य शैलेशे शङ्करं सङ्गमेश्वरे ।
हिरण्यगर्भे स्वर्लीने ह्यविमुक्ते महालये ।।

End :

कराभ्यां सुशुभाग्राभ्यां सूतं पस्पर्शवान्त्वचि ।।
स्वस्त्यस्तु सूत भद्रं ते महादेवे वृषवध्जे ।
श्रद्धा तवास्तु चास्माकं नमस्तस्मै शिवाय च ।।

Colophon :

इत्यादिमहापुराणे श्रीलैङ्गे उरिपभागे अष्टपञ्चाशच्छततमोऽध्याय: ।।

253

Sl. No : 17894 वामनपुराणम् Ms. No : C. 433

Beginning:

त्रैलोक्यराज्यमाच्छिद्य बलिरिन्द्राय यो ददौ ।
नमस्तस्मै सुरेशाय सदा वामनरूपिणे ।।
पुलस्त्यमृषिमासीनं आश्रमे वाग्विदांवरम् ।
नारद: परिपप्रच्छ पुराणं वामनाश्रयम् ।।

End :

त्रिसन्ध्यं च पठन् शृण्वन् सर्वपापप्रणाशनम् ।
असूयारहितं विप्र सर्वसम्पत्प्रदायकम् ।।

Colophon :

इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे वामनपुराणं समाप्तम् ।।

254

Sl. No : 17896 वायुपुराणम् Ms. No : G. 4082

Beginning:

उभयतटपुण्यतीर्था प्रक्षालितस × × × ।
× × × दा दुरितम् ॥
+ + + +
नैमिषे पुण्यनिलये नानाऋषिनिषेविते ।
शौनकः सत्रमासीनः सूतं प × × ॥
श्रुता दिव्या नदी ब्राह्मी तथा विष्णुनदी मया ।
तृतीया न मया क्वापि श्रुता रौद्री सरिद्वरा ॥

End:

इति निगदितमेतन्नर्मदायाश्चरित्रं
पवनगदितमग्र्यं शर्वचक्रादवाप्य ।
त्रिभुवनजनवन्द्यं यत्र चादौ मुनीनां
कुलातिपुरतः स श्रूतमुख्येन साधु ॥ (?)

इति श्रीवायूक्तचतुर्विंशतिसाहस्र्यां संहितायां उत्तरखंडे श्रीनर्मदामाहात्म्ये पुराणपरिसमाप्तिनामाध्यायः ॥

Colophon:

इति वायुपुराणं शिवापराद्धयं समाप्तम् ॥

255

Sl. No : 17899 वाराहपुराणम् Ms. No : A· 707

Beginning:

शङ्करः—
तत्परस्तान्महातीर्थं नृसिंहस्य पुरं महत् ।
तस्मिन् क्षेत्रे नृसिंहस्य शङ्करस्य कृपाकरः ॥
तत्र चास्ते जगन्नाथश्शङ्करः पश्चिमाननः ।
पूर्वं केचन पाषण्डाः मुण्डाः काषायवासिनः ॥

End :

एतत्पुण्यतमं पुत्र रहस्यं पापनाशनम् ।
कथितं भव गाङ्गेय सर्वशास्त्रविशारद ॥
इति श्री शैलराजमाहात्म्यमेतदाख्यानमुत्तमम् ।
यः शृणोति सदा भक्त्या सर्वमङ्गलमश्नुते ॥

Colophon :

इति श्रीवराहपुराणे भूवराहसंवादे तुङ्गभद्राप्रशंसायां श्रीशैलमहिमानाम एकविंशोऽध्यायः ॥

256

Sl. No : 17902 वायवीयसंहिता Ms. No : . 6339

Beginning:

नमश्शिवाय साम्बाय सगणाय ससूनवे ।
प्रधानपुरुषेशाय सर्गस्थित्यन्तहेतवे ॥
शक्तिरप्रतिमा यस्य ऐश्वर्यमपि सर्वगम् ।
स्वामित्वं च विभुत्वं च स्वभावं संप्रचक्षते ॥

End :

अथ ते पशुपाशमुमुक्षवः
प्रकृतया कृतपाशुपतव्रताः ।
अधिगताखिलबोधसमाधयः
परमनिर्वृतिमापुरुमापतिम् ॥

Colophon :

इति आदिमहापुराणे श्रीशैवे वायवीयसहितायां उपरिभागे त्रिंशोऽध्यायः ॥ ग्रन्थः सम्पूर्णः ॥

257

Sl. No : 17907 विश्वकर्मपुराणम् Ms. No : A. 599/1

Beginning :

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोकनगरारम्भमूलस्तम्भाय शम्भवे ॥

न भूमिः न च × न च वायवः ।
न नभो नात्मभूर्विष्णुः न रुद्रो न च तारकाः ॥
सर्वं निजनिरालम्बं विश्वकर्मात्मभूश्च कः ॥

End :

गर्भप्रश्च यथा माता पूर्णपुत्रं प्रजायते ।
सूर्यकन्यायुते युग्मं सर्ववातश्च सङ्क्रमम् ॥
इडापिङ्गळायां वा यत्र वायुः प्रवर्तते ॥
आदौ तत्पादमुत्पत्या योगश्चैवाप्यसिद्धये ॥

Colophon :

— — —

258

Sl. No : 17914 **विष्णुधर्मोत्तरम्** Ms. No : P. 1836/2

Beginnig :

सर्वज्ञानात्मसन्तुष्टं भगवत्प्रियवाहनम् ।
विनतातनयं शान्तं मरीचिः पर्यपृच्छत ॥

मरीचिः—

कीदृशा वैष्णवा धर्माः कथं तुष्यति केशवः ।
पूजया स्तुतिभिर्दानैः विष्णोर्शक्यं तु कीदृशम् ॥

End :

शुद्धं सनातनं शान्तं सम्प्राप्तो निर्वृतिं पराम् ।
× × टवालाय माधवाय महात्मने ॥

Colophon :

इति श्रीविष्णुधर्मोत्तरे महापुराणे सप्तविंशोऽध्यायः ॥

259

Sl. No : 17919 **विष्णुधर्मोत्तरसारसङ्ग्रहः** Ms. No : P. 892/6

Beginning :

दत्तं तप्तं हुतं चेष्टं यदधीतं च यत् श्रुतम् ।
जप्तं भक्तिमतां विष्णोः सफलं तत्प्रसादतः ॥

विष्णुधर्मोत्तरे श्रद्धा मूलमाहुर्महर्षयः ।
फलानि सुकृतान्यस्य मूलाभावे फलं कुतः ॥

End :

किं तीर्थैर्गोप्रदानैर्वा किं यज्ञैः किमुपोषितैः ।
अहन्यहनि गोविन्दं तन्मयत्वेन शृण्वताम् ॥
ये तु श्रवणकाले तु सर्वंनीचासनास्थिताः ।
सुसंहृष्टाः प्राञ्जलयो भवेयुर्द्विजसत्तमाः ॥

Colophon :

इति श्रीगारुडपुराणे विष्णुधर्मोत्तरे गरुडमरीचिसंवादे सप्तविंशोऽध्यायः । विष्णुधर्मोत्तरसारसङ्ग्रहः सम्पूर्णः ॥

260

Sl. No : 17921 | विष्णुपुराणम् | Ms. No : P. 836

Beginning :

पराशरं मुनिवरं कृतपौर्वाह्णिकक्रियम् ।
मैत्रेयः परिपप्रछ प्रणिपत्याभिवाद्य च ॥
त्वत्तो हि वेदाध्ययनमधीतमखिलं गुरो ।
धर्मशास्त्राणि सर्वाणि तथाऽङ्गानि यथाक्रमम् ॥

End :

इति विविधमजस्य यस्य रूपं
प्रकृतिपरात्ममयं सनातनस्य ।
प्रदिशतु भगवानशेषपुंसां
हरिरपजन्मजरादिकां समृद्धिम् ॥

Colophon :

इति श्रीविष्णुपुरणे षष्ठ अंशेऽष्टमोऽध्यायः ॥ श्रीविष्णुपुराणं समाप्तम् ॥

261

Sl. No : 17953 | विष्णुपुराणव्याख्या | Ms. No : C. 2302/2

Beginning :

श्रियः पतिं पूर्णगुणैकसारं
भक्तेष्टदं भक्तभवापहं प्रभुम् ।

अजादिसंसेवितपादपल्लवं
वन्दे मुकुन्दं मरुदंशवल्लभम् ॥

End :

सुबोधिनी त्वियं भूयात् आसुधाम्बुदिवाकरम् ।
मध्वपाब्जजीघ्रानां चितरञ्जनकारिणी ॥ (?)
नारायणद्विजेन्द्रस्य तनूजो दत्तनामकः ।
पूर्वविद्वत्कृता टीका वैलवीं निर्ममे यथा ॥

Colophon :

इति श्रीमद्विष्णुपुराणे पाराशर्यां संहितायां टीकायां अष्टमोऽध्यायः । समाप्तोऽयं षष्ठोंऽशः ॥

262

Sl. No : 17954 विष्णुपुराणव्याख्या Ms. No : A. 683/2b

Beginning:

प्रणिपत्य —

प्रणामः स म्पुटः सस्यात् हृदयेऽञ्जलिमर्पयेत् ।
प्रह्वाङ्गः सम्पुटं कुर्यात् सा प्रह्वाङ्गनमस्क्रिया ॥

सर्वैः करणैः नमः समग्रो भवति । समग्रं नमन् आप्तकारी भवति । आप्तकारी भगवन्तमाप्नोति । अयं मूर्ध्नां प्रणामः × चमस्तावत् श्रियै मानसे प्रोक्तः ॥

End :

पश्चिमे भागे शिखिवासाः वैडूर्यः कपिलः गन्धमादनः चारुविप्रादयः पर्वताः, उत्तरे भागे शङ्खकूपः ऋषभः हंसः नागः कलाञ्जनाद्याः । एते मेरोः केसरपर्वताः ॥ चतुर्दशसहस्राणीति—

Colophon :

५२६तमपुटे—

इति विष्णुपुराणव्याख्यायां नरहरीयाख्यायां द्वितीये अंशे प्रथमोऽध्यायः ॥

263

Sl. No : 17955 **विष्णुपुराणव्याख्या** Ms. No : A. 697/2b

Beginning:

अत्राध्याये सर्वस्य वाक्यरूपत्वात् तेषां च वाक्यानां अतिपेलवत्वात् तेषां च किमपि न लिखितमिति ज्ञेयम् ॥ कृतौ सन्तिष्ठतेऽयं जनकवंशः । अनेन समाप्यत इत्यर्थः ॥

End :

गत इत्यादि श्लोकद्वयं एकान्वयम् । तस्मिन् लुब्धके स्वर्गं गते सति भगवान् श्रीकृष्णः ब्रह्मभूतः इत्याद्युक्तविशेषणविशिष्टे आत्मनि स्वस्मिन् आत्मानं मनः संयोज्य त्रिविधां सात्विकराजसतामसरूपेण त्रिविधां गतिं अतीत्य मानुषं देहं तत्याज ॥

Colophon :

इति श्रीविष्णुपुराणव्याख्यायां नरहरीयाख्यायां पञ्चमेंऽशे सप्तत्रिंशोऽध्यायः ॥

264

Sl. No : 17957 **विष्णुपुराणव्याख्या** Ms. No : C. 2023/6

Beginning :

अंशद्वयेन सृष्ट्यादिद्विसप्तभुवनोक्तिभिः ।
अध्यारोप्य निषिद्धं तद्राजद्विजसदुक्तिभिः ॥
तृतीयेंऽशे मनुव्यासधर्माद्याः स्थितिहेतवः ।
वर्ण्यन्तेऽत्र निधेधाय कौरव्यः × तता यथा ॥

End :

निराकृतानां वर्जितानां तोयप्रदानादिभ्यो मायामोहेन बहिष्कृतानामिति ॥
तपसोऽपि रक्त × श्रेष्ठेत्याविष्कुर्वन् सुरेतरान् ।
तपस्यभिरतान् देवैः स्तुतो विष्णुरमूमुहत् ॥

Colophon

इति श्री रत्नगर्भभट्टाचार्यकृतायां वैष्णवाकूतचन्द्रिकायां तृतीये अंशे अष्टादशोऽध्यायः समाप्तः ॥

265

Sl. No : 17959 विष्णुपुराणव्याख्या Ms. No : P. 838

Beginning :

श्री विष्णुचित्तपदपङ्कजसङ्गमाय
चेतो मम स्पृहयते किमतः परेण ।
नो चेन्ममापि यतिशेखरभारतीनां
भावः कथं भवितुमर्हति वाग्विधेयः ॥

लोकहितार्थं श्रीविष्णुपुराणं प्रणेष्यन् प्रणिपातादिभिरुपसन्नाय सच्छिष्याय
...... पुराणाद्याख्येयमिति .....

End ।

प्रकृतिपुरुषयोः परस्मात् भेदस्तयोर्जगद्ब्रह्मसामानाधिकरण्यनिबन्धनं तद्रूपत्वं अशेषपुंसामिति निर्देशात अष्टानां परस्परभेदो भगवतः सिद्धप्रदेष्टत्ववचनेन स एव मोक्षप्रद इत्याद्युक्तमितीत्यनुसन्धेयम् ॥

Colophon :

इति श्रीविष्णुपुराणव्याख्याने षष्ठेऽशे अष्टमोऽध्यायः ॥

266

Sl. No : 17962 विष्णुपुराणव्याख्या Ms. No : P. 3008/2

Beginnig :

श्रीबिन्दुमाधवं देवं परमानन्दविग्रहम् ।
वाचं विश्वेश्वरं गङ्गां पराशरमुखान्मुनीन् ॥
श्रीमद्विष्णुपुराणस्य व्याख्या स्वल्पापि विस्तरा ।
प्राचामालोक्य तद्व्याख्या मयाऽध्येया विधीयते ॥

End :

किमेतदित्याह समं गम्यतां । शिविकावहाः किमेतद्विषमं गम्यते समं यथा तथा गम्यताम् इत्याह । पुनस्तथैव शिबिकां विलोक्य विषमं हसन् नृपः किमेतदित्याह-भवद्भिः गम्यतेऽन्यथा ॥ भूपतेः वदतः × ×

Colophon :

— — —

267

Sl. No : 17964 विष्णुपुराणव्याख्या Ms. No : P. 3457/2

Beginning :

उक्तास्तृतीये मन्वाद्या धर्माश्चैव प्रकीर्तिताः ।
तद्धर्मपालसदृशा मन्वंश्चसुर्ये निगद्यते ॥ (?)
उक्तमनुवर्णयत् मनुवंशं पृच्छति भगवन्निति ।

End :

व्यक्ताव्यक्तरूपः परः ईश्वरः आत्मा पुरुषः तन्मयः अपजन्मजरादिकां मोक्षलक्षणां प्रदिशत्विस्याशीर्वादः ॥

अङ्गैष्षड्भिरलङ्कृतो विजयते शब्दोयमाशाश्वते
विद्याष्षड्भिरिवाक्षरैरनुगता विद्योतते वैष्णवी ।
षड्भिः सम्भृतमंशकैर्विरचितं शास्त्रं सह श्रीधर
व्याख्यानं भुवि वेङ्कटेशविदुषा संसेव्यतां वैष्णवम् ॥

Colophon :

इति श्रीमच्छ्रीधरस्वामिविरचितायां आत्मप्रकाशटीकासहितायां श्रीमद्विष्णुपुराणे षष्ठ अंऽशे अष्टमोऽध्यायः ॥

268

Sl. No : 17971 विष्णुपुराणव्याख्या Ms. No : P. 2090

Beginning :

अथ भगवान् पराशरः श्रीमते मैत्रेयाय लोकहितार्थं श्रीविष्णुपुराणं प्रणेष्यन् प्रणिपातादिभिरुपसन्नाय सच्छिष्याय सदाचारवता तत्वनिष्ठेन पुरुषेण स्वधर्मानुष्ठानाविरुद्धे मनःप्रसादकरे समये पुराणं व्याख्येयमिति शास्त्रार्थदर्शनात् पुराणंप्रस्तावकं तत्प्रश्न निबध्नाति—पराशरमितिश्लोकेन ॥

End :

इति वापारे अत्र प्रकृतिपुरुषयोः परस्माद्भेदस्तयोर्जगद्ब्रह्मसामानाधिकरण्य निबन्धनं . . .वचनेन सहैव मोक्षप्रद इत्युक्तमित्यनुसन्धेयम् ॥

Colophon :

इति षष्ठे अंशेऽष्टमः ॥ इति श्रीविष्णुपुराणव्याख्यानं सम्पूर्णम् ॥

269

Sl. No: 17976 | विष्णुरहस्यम् | Ms. No: A. 199

Beginning :

यतो भूतानि जायन्ते येन जीवन्ति तान्युत ।
यो हन्ति मोक्षदस्तेषां तं विष्णुं प्रणमाम्यहम् ॥
नैमिषेऽनिमिषक्षेत्रे ऋषयः × × ।
दीक्षिता वैष्णवे यज्ञे सूतं पप्रच्छुरादरात् ॥
इमं विष्णुरहस्याख्यं इतिहासं हरिप्रियम् ।
लक्षसङ्ख्यामुवाचास्मै ब्रह्मणे स सुतं निजम् ॥

End :

श्रुत्वा विष्णुरहस्यानि शंसमानाश्च सूतजम् ।
प्रापुर्मुदं परां विष्णोर्दृढां भक्तिमावाप्नुवन् ॥
प्राप्नुवन्त्यखिलेष्टानि यतो ब्रह्मादयोऽखिलाः ।

Colophon :

इति श्रीविष्णुरहस्ये वासिष्ठे विष्णुमहिमवर्णनं नाम पञ्चपञ्चाशोऽध्यायः ॥

270

Sl. No : 17978 | विष्णुरहस्यम् | Ms. No : C. 1335

Beginning:

यतो भुतानि जायन्ते येन जीवन्ति तान्युत ।
यो हन्ति मोक्षदस्तेषां तं विष्णुं प्रणमाम्यहम् ॥
नैमिषेनिमिषक्षेत्रे ऋष: शौनकादयः ।
दिक्षिता वैष्णवे यज्ञे सूतं पप्रच्छुरादरात ।
ऋषय ऊचुः—

End :

इत्थं तु मुनयः सर्वे शौनकाद्या महौजसः ।
श्रुत्वा विष्णुरहस्यानि × × मानाश्च सूतजम् ॥
प्रापुर्मुदं पुनर्विष्णोर्दृढां भक्तिमवाप्नुवन् ।
प्राप्नुवन्त्यखिलेष्टानि यतो ब्रह्मादयोऽखिलाः ॥

Colophon:

इति श्रीविष्णुरहस्ये पञ्चपञ्चाशोऽध्यायः ॥

271

Sl. No: 17981 | वैराग्यतत्त्वम् | Ms. No: P. 50/15b

Beginning:

श्रीशिवः —

इत्यालोच्य ततस्सर्वे तस्मिन् चोरे च शृण्वति ।
वैराग्यसहितं तत्वं ऊचुः तद्बोधनाय ते ॥
स्वल्पामप्यापदं प्राप्य नीचाः परिभवन्ति हि ।
अप × × जलदजीवितं चञ्चलं स्मृतम् ॥

End:

इति स्तुतः तदा रामः प्रसन्नः प्राह नारदम् ।

नारद उवाच—

वरं न याचे रघुनाथयुष्म-
त्पादाब्जभक्तिः सततं ममास्तु ॥

Colophon:

— — —

272

Sl. No: 17982 | वैश्यपुराणम् | Ms. No: P. 4929

Beginning:

पूजितपादं श्रितमनसां त्वगोचराकारम् ।
सितजलरुहनिभनेत्रं सीतावामाङ्कमाश्रये रामम् ॥
अत्यन्तपुण्यनिलये नैमिशारण्यनामके ।
आरेभिरे महासत्रं मुनयो ब्रह्मवादिनः ॥
ददृशुस्तपसां राशिं सूतं पौराणिकोत्तमम् ॥
समासीनास्ततस्ते च पप्रच्छुः × ×

श्रोतव्यमेकमाद्यं यत् वैश्यानां वैशकीर्तनम् ।
कीदृग्वृत्ताः किमाचाराः प्रभवेयुः कलौ युगे ॥

End :

तत्कन्यकायाश्चरितं मनोरमं
पवित्रमत्यन्तशुभप्रदं नृणाम् ।
जीयाच्चिरं शाश्वतमादिवारं
प्रवर्धमानं शिवयोः कृपारसैः ॥

Colophon

इति स्कान्दे उत्तरखण्डे सनत्सुजातसंहितायां × × जोपाख्याने सनत्कुमारव्यासश्रुतऋषिसंवादे अनुक्रमणिकापुराणपूर्तिप्रशंसनं नाम चतुश्चत्वारिंशोऽध्यायः ॥

273

Sl. No : 17989 **शङ्करसंहिता** Ms. No : P. 2276

Beginning :

विघ्नेश्वरं विश्ववन्द्यं विमलज्ञानबोधकम् ।
उपदेशकाण्डपूर्त्यर्थमुमापुत्रं नमाम्यहम् ॥
अस्ति मेरोरुदग्भागे महान् कैलासपर्वतः ।
समि × × मांत्रैश्च भवतेति समीरितम् ॥

End :

तस्मादहरहर्नित्यं श्रोतव्यमभिवृद्धये ॥
आदावादिमकाण्डमिष्टफलदं त्वष्टोत्तरं यच्छतम्
गौरीशङ्करषण्मुखाङ्घ्रिकमलं ध्यात्वा पठन् भस्मधृक् ।
रुद्राक्षाभरणः पचैदितष्षट् काण्डम- (?)
प्यायुःकीर्तिमरोगतां रिपुजयं विद्यां च मुक्तिं लभेत् ॥
सूतात्मजस्य वचसेति मुनीन्द्रवर्याः
सन्तोषवार्धिलहरीपरिमग्नचित्ताः ।
सम्भाव्य सूतमपि गीर्भिरुपायनैश्च
तं सत्रयागमपि शङ्करसाद्विजाग्र्याः ॥

Colophon :

इति श्रीस्कान्दे महापुराणे शङ्करसंहितायां शिवरहस्यखण्डे चतुर्नवतितमो ऽध्यायः ॥

274

Sl. No : 18005 शिवकथामृतसारसङ्ग्रहः Ms. No : P. 3697

Beginnig :

अजगाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदन्तं भक्तानां एकदन्तमुपास्महे ॥
मङ्गलं दिशतु मे × × × × ।
मङ्गलं दिशतु मे महेश्वरी × × ॥
मङ्गलं दिशतु मे × × × × × ॥
आतनोच्छङ्करकथामृतसार × × ग्रहम् ।
स शङ्करविलासाख्यं श्रोतॄणां भोगमोक्षदम् ॥

End :

ध्यायन्ति योगिनो नित्यं हृदये × × × ।
× × × समासाद्य हि भवद्भिरुपेक्षितम् ॥
यस्तु सर्वजगत्साक्षी नित्यानन्दो निरञ्जनः ।
तमागतं स्वयं मूर्खैः हा भवद्भिरुपेक्षितम् ॥
एष ब्रह्म × × × × × ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यशङ्करारण्ययोगिवरेण्यपद्कमल × × ण विद्यारण्ययतिविरचिते भक्तचित . . . रोदये शिवकथामृतसारसङ्ग्रहे शङ्करविलासे अष्टाशीतितमोऽध्यायः ॥

275

Sl. No : 18008 शिवतत्त्वसुधानिधिः Ms. No : P. 3626/1

Beginning :

यं प्रणम्य सुरेन्द्राद्याः भवन्ति सुखशालिनः ।
सर्वविघ्नोपशान्त्यर्थं तं वन्दे शङ्करात्मजम् ॥

श्रीसूत: —

शिवं हरिं विधातारं . . . . ॥

नत्वा समस्तप्रत्यूह . . . . ॥

वक्ष्ये श्रुणुध्वं सर्वज्ञाः शिवतत्वसुधानिधिम् ॥

End :

अपुत्रो लभते पुत्रान् दरिद्रो लभते धनम् ।

ज्ञानं लब्ध्वा परां शान्तिं अचिरेणाधिगच्छति ॥

सर्वान् कामानवाप्नोति सत्यमेतन्न संशयः ॥

Colophon :

इति स्कान्दे महापुरणे सनत्कुमारसंहितायां शिवतत्वसुधानिधौ सकला-ध्यायसारमहिमा नाम विंशोऽध्यायः ॥

276

Sl. No : 18009 **शिवधर्मोत्तरम्** Ms. No: P. 4734

Beginning :

शिवमस्तु + + + + + -सुखीभवतु लोकः ।

ज्ञानशक्तिधरं शन्तं कुमारं × × म् ॥

देवास्ते × दनं × गस्त्यं परिपृच्छति ॥

भगवन् दर्शनात्तुभ्यं अन्त्यजस्यापि सद्गतिः ।

सप्तजन्मनि विप्रश्च सर्गात्स्रष्टः प्रजायते ॥

End :

श्रृणोति यच्च सततं शिवधर्मे नराधिप ॥

तस्य देशे भवेन्नित्यं सर्वेषां देहिनां शिवम् ।

श्लोकमेकं तदर्धं वा वाचयेद्धारयेत्ततः ॥

सर्वदा मोदते भक्त्या शिवलोके महीयते ॥

Colophon :

इति शिवमोंत्तरे शास्त्रे गोमातृलोकवर्णनं नाम द्वादशोऽध्यायः ॥

277

Sl. No: 18014 शिवरहस्यम् Ms. No: P. 4085

Beginning :

वेतण्डतुण्डमवतंसितचन्द्रखण्डं
तत्कुण्डलीशपरिवेष्टितबृंहितिचण्डम् ।
शुण्डावलीकलितदन्तकृतार्थकाण्डं
विघ्नादिषण्डभिदुरं प्रणमाम्यखण्डम् ॥

सूतः—

जैगीषव्यः तथाप्राह जिनषड्वैरिविक्रम ।
क्रौञ्चदारणमानम्य तत्पदं शरणं ययौ ॥

End :

गोभूहिरण्यकळधौतनगप्रभोरु-
दानैरनेकजननी यदि पुण्यभावस्यात् ।
तस्यायमीक्षणपथे भवति प्रकामं
अस्यांशलेशमहिमा गदितस्तवाद्य ॥

Colophon :

इति श्रीशिवरहस्ये दशमांशे शिवगौरीसंवादे शिवपूजाविधानकथनं नाम पञ्चाशोऽध्यायः ॥

278

Sl. No: 18020 शिवरहस्यम् Ms. No: A. 379

Beginning:

भवान्तकसभापतिप्रियसुतौ वक्त्रप्रभा
विभासितविभावरीरमणखण्डशुद्धोज्वलम् ।
सदामदसुगन्धद्विविधविघ्नषण्ढापहं
भजाम्यभयहेतवे शिवकथासुसंपत्तये ॥

सूत उवाच—

ततः स तारकाराति—

End :

अनर्गळं मङ्गलमस्तु नित्यं
यन्मङ्गलाया: पतिसुप्रसादत: ।
स्वस्ति प्रजाभ्यो द्विपदां चतुष्पदां
शिवस्सदा मेऽस्तु सदाशिवश्शिवोम् ।।

Colophon :

इति शिवरहस्ये द्वादशांशे चत्वारिंशोऽध्याय: । श्रीशिवरहस्यं समाप्तम् ।।

279

Sl. No : 18043 शैवपुराणम् Ms. No : P. 3318/1

Beginning :

शिवाय सोमाय × × ससूनवे ।
प्रधानपुरुषेशाय सर्गस्थित्यन्तहेतवे ।।
शक्तिरप्रतिमा यस्य ऐश्वर्यं . . .
× त्वं च विभुत्वं चान्यभावं सम्प्रचक्षते ।।
तमादौ विश्वकर्माणं शाश्वतं शिवमव्ययम् ।।

End :

सूते कृताशिषि गते मुनयस्सुवृत्ता:
यागे च पर्यवसिते महिते प्रयोगे ।
काले कलौ च विषये त्वयि षादस्नां
वाराणसीपरिसरे वसतिं प्रानुषि ।। (१)
अथ चरे पशुपाशमुमुक्षया—
न्वकृतया कृतपाशपतिव्रता ।
अधिकृत × × × बोधसमाधय:
वरमुनिहतिमाहुरनिन्दिता: ।। (२)

Colophon :

इति श्रीशैवे महापुराणे वायवीयसंहितायामुपरिभागे त्रिंशोऽध्याय: ।।

280

Sl. No : 18044 | शिवमहापुराणम् | **Ms. No : P. 3452/1**

Beginning:

आद्यन्तमङ्गलमजातसमानभाव-
माद्यन्तविश्वमजरामयमात्मदेवम् ।
पञ्चाननप्रबलपञ्चविनोदशीलं
सम्भावये मनसि शङ्करमम्बिकेशम् ॥
धर्मक्षेत्रे महातीर्थे गङ्गाकालिन्दिसङ्गमे ।
प्रयागे परमे पुण्ये ब्रह्मलोकस्य वर्त्मनि ॥
मुनयस्संशितात्मानस्सत्यव्रतपरायणाः ।
महौजसो महाभागा महासत्रं वितेनिरे ॥

End :

सर्वमुक्तं समासेन साध्यसाधनमुत्तमम् ।
व्यासेन धर्मः पुरा प्रोक्तं यत् श्रुतं मया पुरा ॥
भद्रमस्तु हि वोऽस्माकं शिवभक्तिव्रतं भवेत् ।
य इमं पठतेऽध्यायं यः शृणोति नरस्सदा ।
शिवज्ञानं स लभते शिवस्य कृपया बुधाः ॥

Colophon :

इति श्रीशैवमहापुराणे विद्यासारसंहितायां साध्यसाधनखण्डे शिवलिङ्गमहिमानुवर्णनं षोडशोऽध्यायः ॥ साध्यसाधनखण्डस्समाप्तः ॥

281

Sl. No : 18045 | श्रीशैलखण्डम् | **Ms. No : P. 5069**

Beginning:

अथ तद्वचनास्वादप्रमोदो . . . मानसः ।
सनत्कुमारः प्राहेति ब्रह्ममानसनन्दनः ॥
सनत्कुमार उवाच —
शृणु शक्तिमुनेः पौत्र त्रिणेत्रचरितं शुभम् ।
धन्यं यशस्यमायुष्यं पवित्रं श्रुतिम्मतम् ॥

End :

द्विविधं नियमात्सम्यक्कुर्वतामिष्टसिद्धिदम् ।
पञ्चप्रदक्षिणं पुण्यं पुण्यं रामप्रदक्षिणम् ॥
प्रसङ्गतः सभायातं विष्णोस्तस्य महात्मनः ।
रामस्य चरितं दिव्यमव्ययं विजयप्रदम् ॥

Colophon :

इति श्री स्कान्दे महापुराणे सनत्कुमारसंहितायां श्रीशैलखण्डे उत्तर भागे उमामहेश्वरसंवादे त्रिपुरविजयो नाम त्रिषष्टितमोऽध्यायः ॥

282

Sl. No : 18064 सह्याद्रिखण्डम् Ms. No: P. 4605/2

Beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्ययेत्सर्वविघ्नोपशान्तये ॥

श्रीदेव्युवाच–

देवदेवजगन्नाथ सर्वज्ञ परमेश्वर ।
कुटजाद्रेस्तु माहात्म्यं विस्तराद्वक्तुमर्हसि ॥

भैरवः—

शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
रहस्यं परमं गुह्यं त्वयि स्नेहान्मयोच्यते ॥

End :

इति गार्ग्यस्य वचनं श्रुत्वाहर्षसमन्वितः ।
जयाय कारयामास कृष्णं साम्बव्रतं तदा ॥
सुपर्णाख्यनदीतीरे काशीति प्रथिते स्थले ।
ततो मुनीन् समभ्यर्च्य भक्ष्यभोज्यादिभिस्तदा ।
क्रोडर्षि च समभ्यर्च्य ययौ द्वारवतीं पुरीम् ॥

Colophon :

इति श्री भैरवपुराणे सह्याद्रिखण्डे उत्तरभागे चत्वारिंशोऽध्यायः ॥

283

Sl. No: 18047 **सह्याद्रिखण्डः** Ms. No: B. 954

Beginning:

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १ ॥
ऋषय: ऊचुः—
महासेन महादेव नन्दनानन्तविक्रम ।
सर्वज्ञाननिधे सौम्य शिवाह्लादकरं प्रभो ॥ २ ॥

End:

इत्युक्त्वा भक्तिभावेन तीर्थं कुर्याद्यथाविधि ।
ते सर्वे पापनिर्मुक्ता अन्ते सायुज्यमाप्नुवन् ॥
इति ते कथितं विप्र देवीमाहात्म्यमुत्तमम ॥
यः पठेच्छ्रावयेद्भक्त्या सर्वान्कामानवाप्नुयात् ॥

Colophon:

इति श्री स्कान्दपुराणे सह्याद्रिखण्डे तुरजामाहात्म्ये शङ्करवसिष्ठसंवादे षट्त्रिंशोऽध्यायः ॥

जैसा देखा वैसा लिखा मम दोसो न विद्यते पठनार्थं गोसाई हीरा गिरि बाबा ॥ अध्याय- ३६ श्लकसंख्या १७१६ ॥

284

Sl. No: 18054 **सूतसंहिता** Ms. No: P. 2851

Beginning:

शुक्लाम्बरधरं + + शान्तये ॥
तामष्टादशधाऽऽलोक्य शंकरस्सूतसंहिताम् ।
अकरोच्छाङ्करं भाष्यं लोकानां हितकाम्यया ।
तत्र सूतसंहितायां प्रथमाध्याये शूद्रावतारः द्वितीये पाशुपतः ॥

End :

ये वेदवेदान्तधना महाजनाः

शिवाभिमानैकनिरस्तकिल्बिषाः ।

नमामि वाचा शिरसा धिया च

तानेह वेगस्य निवारकानहम् ॥

Colophon :

इति आदिमहापुराणे स्कान्दे सूतसंहितायां यज्ञवैभवखण्डे उपरिभागे सूतगीतासु उपनिषत्सु अष्टमोऽध्यायः ॥

285

Sl. No : 18051 सूतसंहिताव्याख्या Ms. No : P. 383/b

Beginning :

ऐश्वरं परमं रूपं आदिमध्यान्तवर्जितम् ।

अधारं सर्वभूतानां अनाधारमविक्रियम् ॥

अनन्तानन्त . . प्रणमाम्यहम् ॥

यद्यपि गतखण्डे ज्ञानस्य स्वरूपं . . . उपनिबध्नाति — ऐशमिति ॥

End :

हृदयकमलमध्ये गुहा । तस्यां निहितम् । तत्र विशेषतोऽपि व्यक्तमित्यर्थः . . परमव्योम . . ॥

Colophon :

उपनिषन्मार्गप्रवर्तकेन माधवाचार्येण विरचितायां सूतसंहितातात्पर्यदीपिकायां यज्ञवैभवखण्ड . . चत्वारिंशोऽध्यायः ॥

286

Sl. No : 18052 सूतसंहिताव्याख्या Ms. No : P. 423/2

Beginning :

प्रणमामि परं ब्रह्म यतो व्यावृत्तवृत्तयः ।

अविचारसहं वस्तु विषयीकुर्वते धियः ॥

श्रीमत्काशीविलासाख्यक्रियाशक्तीशसेविना ।
श्रीमत्त्र्यम्बकपादाब्जसेवानिष्णातचेतसा ॥
वेदशास्त्रप्रतिष्ठात्रा श्रीमन्माधवमन्त्रिणा ।
तात्पर्यदीपिका सूतसंहिताया विधीयते ॥

End :

उत्तस्यैनं वस्त्रमधि न तायुमित्यादौ दर्शनात् । तत्र वा नकार × × वः । अत्र वा सकारलोपः । जनास्तेषां पतये । नीचैरवे निभृतं नितरां चर शीलाय ॥

Colophon :

इति श्री सूतसहितातात्पर्यदीपिकायां मुक्तिखण्डे नवमोऽध्यायः ॥

287

Sl. No : 18068 सूतसंहिताव्याख्या Ms. No : A. 473/2

Beginning:

नमः श्रीशङ्करानन्दगुरुपादाम्बुजन्मने ।
सविभ्रमहामोहग्राहग्रासैककर्मणे ॥
श्रीमत्त्र्यम्बकपादाब्जं नत्वा माधवमन्त्रिणा ।
तात्पर्यदीपिका सूतसंहिताया विधीयते ॥

End :

यत्सम्यक् ज्ञानं तद्दातुं शीलं यस्याः सा तथोक्ता । गुहायां निहितामिति देहमध्यावस्थितं हृदयकमलमध्यं गुहा तस्यां निहितां तत्र विशेषतोऽभिव्यक्ता मित्यर्थः । श्रूयते हि – यो वेद निहितं गुहायां परमे व्योमन् इति ।

Colophon :

इति श्रीमत्काशीविलासक्रियाशक्तिपरमभक्तश्रीमत्त्र्यम्बकपादाब्जसेवापरायणेन उपनिषन्मार्गप्रवर्तकेन माधवाचार्येण विरचितायां श्रीमत्स्कान्दे महापुराणे सूतसंहितातात्पर्यदीपिकायां यज्ञवैभवखण्डस्य पूर्वभागे सप्तचत्वारिंशोऽध्यायः ॥

288

Sl. No : 18072 **सौरसंहिता** Ms. No : P. 348

Beginning :

नमः शिवाय सोमाय सगणाय ससूनवे ।
प्रधानपुरुषेशाय सर्गस्थित्यन्तहेतवे ॥
शक्तिरप्रतिमा यस्य ऐश्वर्यं चापि सर्वगम् ।
स्वामित्वं च विभुत्वं च स्वभावं सम्प्रचक्षते ॥

End :

इत्युक्त्वा भगवान् तस्य सर्वज्ञः साम्बमीश्वरम् ।
ध्यात्वा परमया भक्त्या पपात विवशो भृशम् ॥
वालखिल्या महात्मानं व्यसशिष्यं कृपाकरम् ।
यथार्थं पूजयामासुः सूतं सुमनसः प्रियात् ॥

Colophon :

इत्यादिमहापुराणे स्कान्दे शतसहस्रिकायां सौरसंहितायां याज्ञवल्क्यसूर्यसंवादे षोडशोऽध्यायः ॥ समाप्ता सौरसंहिता ॥

289

Sl. No : 18084 **सौरसंहिता** Ms. No: P. 5882

Beginning :

पुरा कैलासशिखरे पार्वत्या सह शङ्करः ।
विचचार महायोगी स्वरुपमनुचिन्तयन् ॥
नानाप्रसूनवितते नानावृक्षसमाकुले ।
नानावल्लीसमाकीर्णे सिद्धचारणसेविते ॥

End :

मारुतेर्विष्टरं कृत्वा पूजयेत्प्रत्यहं बुधः ।
यथाशक्ति द्विजान् भोज्य भक्ष्यव्यञ्जनसंयुतः ॥
ताम्बूलदानं सर्वेषां श्रोतॄणां परिकल्पयेत् ।
नत्वा नत्वा द्विजान् राजा शृणुयाद्विप्रवाक्यतः ॥

Colophon :

इति श्रीस्कान्दपुराणे उमासंहितायां रामायणमाहात्म्ये युद्धकाण्ड माहात्म्यं नाम द्वादशोऽध्यायः ॥ उमासंहिता सम्पूर्णमभवत् ॥

290

Sl. No : 18091 **स्कान्दपुराणम्** Ms. No : P. 10029

Beginning :

अगस्त्य उवाच—

पार्वतीहृदयानन्दं सर्व × ज्ञ भवत्पते ।
किञ्चित्प्रष्टुमनाः स्वामिन् तद्भवान्वक्तुमर्हति ॥
दक्षप्रजापतेः पुत्रः + + + + स्य परिग्रहः ॥

End :

यस्मिन्विश्वेश्वरस्तुष्टस्तच्छ्रवणे मतिः ।
× × स्थमहानिर्मलचेतसः ॥
सर्वेषां मङ्गलानां च महामङ्गलमुत्तमम् ।
गृहेऽपि लिखितं पूज्यं सर्वमङ्गलसिद्धये ॥

Colophon :

इति श्री स्कान्दपुराणे काशीखण्डे . . . . काशीयात्रप्रतिपादनं नाम शततमोऽध्यायः । काशीखण्डं समासम् ॥

291

Sl. No : 18104 **स्कान्दपुराणटीका** Ms. No : P. 4591/2

Beginning :

नवतितमाध्याये सर्वदा मोक्षदायकः । पार्वतीश्वरमाहात्म्यं वर्ण्यतेति मनोहरम् । पार्वतीश्वरोत्पत्तिं पृच्छति । प्राक् पूर्वं सतीमिति पाठे सतीं पतिव्रतां पूर्वजन्मनि नाम्नीमिति वा ।

End :

सच्चिदानन्दसन्दोहपरिपूर्णैकभानवे ।
भक्तैश्वोपान्तदेहाय कृष्णाय हरये नमः ॥

सकोशा च विकोशा च × टीका लिखित × ×
× भिलाष: स्यात्सा तेन परिगृह्यताम् ।

Colophon :

इति श्री रामानन्दकृतायां काशीखण्डटीकायां शततमोऽध्याय: । इतिश्रीमत्पर महंसपरिव्राजकाचार्यवर्यभगवत्पादशिष्य × वनशिष्येण चैतन्यावतारापरपर्यायेण रामानन्दकृतायां कशीखण्डटीकायां शततमोऽध्याय: ॥

292

Sl. No : 18108 हरिभक्तिसुधोदयः Ms: No : P. 2904

Beginning :

पितामहस्यापि पितामहाय प्रचेतसादेशफलप्रदाय ।
श्री भाष्यकारोत्तमदेशिकाय श्रीशैलपूर्णाय न × × × ।
× × यत्यरेखातनूभृतस × × न्यजस्रं मि × भि
× कार × काञ्चिदपि वानोपत × सिक्तजलै: ॥

End :

स इत्थं विष्णुगाथाभिर्नन्दयित्वा मुनीश्वरान् ।
शौनकादीन् नैमिशीयान् ब्रह्मसूनुस्तिरोदधे ॥
य इदं शृणायन्नित्यं हरिभक्तिसुधोदयम् ।
कथयेत्सर्वपापौघात् मुक्तो मोक्षं च गच्छति ॥

Colophon :

इति हरिभक्तिसुधोदये विंशोऽध्याय: ॥

293

Sl. No : 18110 अष्टावक्रोपाख्यानम् Ms. No: C. 2312/1

Beginning :

त्रिशकद्वादशांशस्य चतुर्विंशतिपर्वण: ।
यस्त्रिषष्टिशतारस्य वेदार्थे स पर: कवि: ॥
चतुर्विंशतिपर्वत्वात् स्वर्णाभिद्वादशप्रथि ।
तत्त्रिषष्टि शतारं वै चक्रं पातु सदागति ॥

End :

बन्दी—त्रयोदशीनिचिहक्ताप्रशस्ता त्रयोदशद्वीपवती मही च ।
एतावदुक्त्वा विरराम बन्दी ॥
श्लोकस्यार्धं व्याजहाराष्टावक्रः ।
अष्टावक्रः—
त्रयोदशाहानि ससार केशी ॥
त्रयोदशादीन्यतिछन्दांसि चाहुः ॥

Colophon :

इतिप्रश्नोत्तरं समाप्तम् ॥

294

Sl. No : 18111 सूतसंहिताव्याख्या Ms. No : P. 5707

Beginning :

शुक्लाम्बरधरं + शान्तये ॥
ब्रह्मा × × ण्डे आर्यक्षत्रियोपाख्यानमिदं चि × × ।
ब्रह्माणं नारदं चैव शौनकादीन् महाऋषीन् ।
नमस्कृत्य पुमान् लोके पुराणं श्रावयेत्सदा ॥
ऋषय ऊचु—
सूत सर्वपुराणज्ञ + + ब्रूहि कराश्चित्कथां +
सूत उवाच –
सर्वं वो × वलं मां तु पृच्छथ ।

End :

किमर्थमुग्रमनसः जातं सत्कुलमित्यपि ।
श्रद्दधानाय शिष्याय तव पुत्राय धीमते ।
मह्यं तद्वृत्तमखिलं विस्तराद्वक्तु (इयानेव ग्रन्थः)

Colophon :

इति ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे वर्णवैभवखण्डे रथोपसंहारो नाम चतुश्चत्वारिंशोऽध्यायः ॥

295

Sl. No : 18112 **कल्याणोत्सवकथा** Ms. No : P. 188/5

Beginning:

अथ वेद्यां स्थितो ब्रह्मा विश्वमायां स्मरारिणः ।
ददर्शोदकदानान्ते विभावसुपुरस्थितः ॥
महेश्वरीं काममयीं दृष्ट्वा तां तु पितामहः ।
अक्षरत्सहसा शुक्लं भग्नकुंभमिवोदकम् ॥

End :

ब्रह्मेन्द्रविष्णुसङ्काशाः अणिमाद्यैर्गुणैर्युता: ।
सूर्यकोटिप्रतीकाशाः तत्राजग्मुर्गणेश्वराः ॥
पातालचारिणश्चैव सर्वलोकनिवासिनः ॥

Colophon :

आदित्यपुराणे मानवीयसंहितायां अष्टपञ्चाशः अध्यायः ॥

296

Sl. No : 18113 **कामोपख्यानम्** Ms. No : C. 2512/5b

Beginning :

उत्तिष्ठ तामसं पश्य प्राप्ता मां तव भावतः ।
प्रसन्ना वरदां ब्रूहि वाञ्छितं किं ददामि ते ॥
श्रुत्वा स त्रिपुरावाक्यं उत्थाय प्राञ्जलिः स्थितः ।
हर्षगद्गदया स्तोतुं वाचा समुपचक्रमे । +
+ इति संस्तुत्य मदनः देवीं तां त्रिपुराम्बिकाम् ।
ननाम + + + + +
ददौ कामाय भूयस्तं प्राह तुष्टा महेश्वरी ।
सौभाग्यमुत्तमं लोके सर्वतोऽस्तु रमात्मजा ॥
त्वया दृष्टा जनाः सर्वे धैर्यमभ्युत्सृजन्तु वै ।

End :

एतन्महाधारणं वै त्रिपुरारूपमद्भुतम् ।
इत्युक्त्वान्तर्हिता देवी क्षणेन परमेश्वरी ॥

Colophon :

इति श्रीत्रिपुरारहस्ये इतिहासरत्ने कामोपाख्याने षड्विंशोऽध्यायः ॥

297

Sl. No : 18114 किरातार्जुनीयम् Ms. No : P. 3600/2

Beginnig :

ऋषयः —

कथं सूत महादेवः कैलासशिखरालयः ।
कैरातं रूपमास्थाय देव्या च समवेषया ॥
गणैः किरातैर्भूतैश्च पादचारी भवेद्वने ॥

End :

विधवा क्षत्रियो वाऽपि द्विजो विट् शूद्र एव वा ।
हृदि ध्यात्वा महेशानं ये शृण्वन्ति पठन्ति च ॥
ते × × × यः ॥

Colophon :

इति श्री पाद्मे पुराणे पञ्चपञ्चाशत्साहस्रिकायां संहितायां अष्टमूर्तिपर्वणि चत्वारिं × × ॥

यत्पादपद्मनम्राणां + संसारतारकम् ॥

298

Sl. No : 18116 कुचेलोपाख्यानव्याख्या Ms. No: C. 2952/b

Beginning :

कुचेलोपाख्यानव्याख्या कृष्णोदयफलविवरणैकश्लोकीव्याख्या कुसुममञ्जरी ।
श्रीनिवासकविप्रोक्तश्लोकस्य हृदयङ्गमाम् ।
व्यंग्यबालसुधीष्टीकां तनोति विदुषां मुदे ॥
श्रीनिवासकृतश्लोकस्य इन्द्रकृतस्तुतिपरत्वेन कृतेयं टीका । तथाहि —

299

Sl. No: 18118 **कुशलवोपाख्यानम्** Ms. No: P. 2320

Beginnig:

जनमेजय उवाच—

चित्रमुक्तं महाभाग यद्रामकुशयोर्भृशम् ।
तद्वक्तुमर्हसि त्वं हि श्रोतुं कौतूहलं हि मे ॥

जैमिनिः—

शृणु राजन् महाबाहो रामस्य चरितं महत् ।
विस्तरेण यथासर्वं वदतस्तन्निशामय ॥

End:

युयुत्सुरिदमव्यग्रः शृणुयाच्चेत् समाहितः ।
जय एव भवेत्तस्य शौर्यवृद्धिर्भविष्यति ॥
तस्माद्भीता भवन्त्येव शत्रवो युधि सर्वदा ।
सर्वत्र विजयीभूत्वा धीरः शूरो भवेद्भुवि ॥

Colophon:

इति श्रीजैमिनिभारते आश्वमेधिकपर्वणि कुशलवोपाख्याने द्वादशोऽध्यायः ॥

300

Sl. No: 18125 **गजेन्द्रोपाख्यानम्** Ms. No: P. 5567/1

Beginning:

अथगजेन्द्रमोक्ष—

तत्रापि जज्ञे भगवान् हरिण्यां हरिमेधसः ।
हरिरित्याहृतो येन गजेन्द्रो मोचितो ग्रहात् ॥

राजोवाच—' . . . . . .

बादरायण एतत्ते श्रोतुमिच्छामहे वयम ।
हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचत् ।

End :

श्रीशुकः —

इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमम् ।
हर्षयन् विबुधानीकं आरुरोह खगाधिपम् ।।
राजन्नुदितमेतत्ते कर्माद्यघविनाशनम् ।
गजेन्द्रमोक्षणं पुण्यं रैवतं त्वन्तरं शृणु ।।

Colophon :

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे गजेन्द्रमोक्षणं नाम चतुर्थो ऽध्यायः ॥

301

Sl. No : 17953 **विष्णुपुराणव्याख्या** **Ms. No : C. 4651/5**

Beginning :

शतानीक उवाच —

मया हि देवदेवस्य विष्णोरमिततेजसः ।
श्रुतास्सम्भूतयः सर्वाः गदतस्तत्र सुव्रत ॥
यदि प्रसन्नो भगवान् अनुग्राह्योऽस्मि वा यदि ।
तदहं श्रोतुमिच्छामि नृणां दुस्स्वप्ननाशनम् ॥

End :

सर्वरत्नमयो मेरुः सर्वाश्रयमयं नभः ।
सर्वतीर्थमयी गङ्गा सर्वदेवमयो हरिः ॥
गीता सहस्रनामैव स्तवराजो ह्यनुस्मृतिः ।
गजेन्द्रमोक्षणं चैव पञ्चरत्नानि भारते ॥

Colophon :

इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैय्यासिक्यां शान्ति पर्वणि भीष्मयुधिष्ठिरसंवादे गजेन्द्रमोक्षः समाप्तः ॥ इति गजेन्द्रमोक्षः समाप्तः ॥

302

Sl. No : 18130 गोपजकथा Ms. No : P. 4218/55

Beginnig :

सूत उवाच—

श्रुणुध्वं ऋषयः सर्वे व्रतानामुत्तमं व्रतम् ।
सर्वप्रापप्रशमनं सर्वकामफलप्रदम् ॥
मोक्षदं कुर्वतां भक्त्या नाम्ना गोपजसंज्ञितम् ।
अत्रैवोदाहरन्तीमं इतिहासं पुरातनम ॥

End ।

तथैवं कुरुते भक्त्या व्रतानां उत्तमं व्रतम् ।
इह भुक्त्वा तु विपुलान् भोगानन्ते हरिं व्रजेत् ॥
ये पठन्तीदमाख्यानं शृण्वन्ति श्रावयन्ति च ।
तत्र सम्पत्समृद्धिश्च मोक्षं यान्ति न संशयः ॥

Colophon :

इति श्री पद्मपुराणे विष्णुरहस्ये गोपजकथा सम्पूर्णा ॥

303

Sl. No : 18133 सह्याद्रिखण्डम् Ms. No: C. 3281/a

Beginning :

मार्ताण्ड इव यस्साक्षात् वेदवेदान्तपारगः ।
शान्तो दान्तस्तपस्वी यः अग्निहोत्रपरायणः ॥

End :

बभूव भूमौ परमेश्वरोऽसौ
चिदम्बरो नाम शिवोऽवतीर्णः ।
यस्य प्रभावो निगमैरगम्यः
यन्मायया मुह्यत एव लोकः ॥

Colophon :

— — —

304

Sl. No : 18135 तारकब्रह्मकथा Ms. No : C. 2013

Beginning:

वेदव्यासो × × पुराणार्थविदुत्तमम् ।
दृष्ट्वा पौराणिकं सूतं नैमिशारण्यवासिनः ॥
प्रत्युत्थानादि विध्युक्तपाद्यार्घ्याचमनादिकम् ।
विष्टरार्पणकल्याणवृत्तान्तैरभिपूज्य च ॥

End:

इत्युक्त्वामन्त्र्य तान् सर्वान् पूजयित्वा द्विजोत्तमः ।
प्रदक्षिणनमस्कारैः गन्धपुष्पाक्षतादिभिः ॥
असङ्ख्येयस्वर्णपुष्पैः वस्त्राभरणसञ्चयैः ।
प्रययुः स्वाश्रमं ते च स्वस्थचित्ता भवन्ति हि ॥

Colophon:

इति श्री ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे तारकब्रह्मकथासङ्ग्रहप्रतिपादने त्रिंशदुत्तरशततमोऽध्यायः ॥

305

Sl. No : 18136 तुलाधारचरितम् Ms. No : P. 1893/4

Beginning:

इतिहाससमुच्चये युधिष्ठिरः ।
शमस्य तपसो वापि किं नु श्रेष्ठतरं स्मृतम् ।
एतन्मे संशयं तात यथावद्वक्तुमर्हसि ॥
भीष्मः—
विविधा विधयः प्रोक्ताः धर्मस्येह महर्षिभिः ।
स्वं स्वं विज्ञानमाश्रित्य शमस्तेषां परायणम् ।
तुलाधारस्य संवादं जाबालेश्च महात्मनः ।

End :

य इदं शृणुयान्नित्यं पुण्यमाख्यानमुत्तमम् ।
यः पठेन् प्राञ्जलिर्भूत्वा स गच्छेत् परमां गतिम् ॥
शमः परं पावनमिन्द्रियाणां
शमः परं ब्रह्मनिविष्टबुद्धेः ।
शमस्तपः तीर्थफलं सुवृत्तं
शमेन गच्छन्ति पदं हि विष्णोः ॥

Colophon :

इति श्रीमहाभारते इतिहाससमुच्चये × त्रयोदशोऽध्यायः ॥

306

Sl. No : 18137 त्रिकुण्डलविकुण्डलोपाख्यानम् Ms. No : P. 1894/4

Beginning :

तुलयन्ते न तेनात्र यज्ञाः सर्वे सदक्षिणाः ।
× × × × चैव विशेषतः ॥
न चान्य × र्गदं कर्म न चान्यत् पापनाशनम् ।
न चान्यन्मोक्षदं कर्म माघस्नानसमं भुवि ॥
तत्रैवोदाहरिष्यामः इतिहासं पुरातनम् ।
आसीद्वैश्यः कुबेरा + नामनो हेमकुण्डलः ॥

End :

अश्वत्थमेकं पिचुमन्दमेकं
न्यग्रोधमेकं दशतिन्त्रिणीकम् ।
कपित्थबिल्वामलकत्रयं च
नवाम्रमृ × नरकं न याति ॥

Colophon :

इति आदिपुराणे(माघमाहात्म्ये) वसिष्ठ × × संवादे त्रिकुण्डलविकुण्ड
लोपाख्याने षड्विंशोऽध्यायः ॥

307

Sl. No: 18138 **दभ्रभक्तचरितम्** Ms. No: P.3600/3

Beginning :

परमेश्वरयोगीन्द्रं प्रणताभीष्टदायिनम् ।
समस्तविद्यानिलयं भजेऽहं करुणालयम् ॥

. . . .

यद्दभ्रभक्तचरितं जगति प्रसिद्धं
व्याचक्ष्व तच्छिवचरित्रविचित्ररूपम् ।

End :

ये पाठकं बहुधनैः बहुमानपूर्वं
भक्त्या विचित्रपटवाहनभूषणाद्यैः ।
आयुर्यशोधनसुताद्यखिलानिहेष्टान्
अन्ते च मुक्तिमपि यान्ति नरा वरान्ते ॥

Colophon :

इति ब्रह्माण्डपुराणे भक्तिप्रपञ्चसारे दभ्रभक्तचरित्रं नाम पञ्चचत्वारिंशोऽध्यायः ॥

308

Sl. No: 18139 **दुर्गाविजयः** Ms. No: C. 3502

Beginning :

अगस्त्यः —
कथं दुर्गेति वै नाम देवा जातमुमासुत ।
कथं काश्यां वसेद्वा सा समाचक्ष्वेति मामिह ॥
स्कन्दः —
कथयामि महाबुद्धे यथा कलशसम्भव ।
दुर्गा नाम भवेदेषा कथं सेव्या च साधकैः ॥

End :

काश्यां यस्यास्ति वै प्रेम तेन कृत्वा परं गुरुम् ।
श्रोतव्यमिदमध्यायं वज्रपञ्जरसंज्ञितम् ॥

Colophon :

इति श्री स्कान्दपुराणे काशीकाण्डे दुर्गाविजयो नाम द्विसप्ततितमो ऽध्यायः ॥

309

Sl. No : 18140 द्रौपदीस्वयंवराख्यानम् Ms. No : C. 3273/a

Beginning :

ततस्ते वन्याशनैर्धन्या धारितवसुधासुधाशनाकृतयः प्रावृषमिव बकबला-क्रान्तां पातालनगरीमिव प्रत्यहं वर्धमानबलिशाकामङ्गराज्यसीमामिव सूर्यतन-यानुकूलप्रविष्टां रविरथाक्षधुर्मिवैकचक्रां पुरीमाक्रम्य कस्यचिद्गृहमेधिनो गृह-मध्यमेत्य सुखमध्यवात्सुः ॥ २ ॥

भिक्षामटद्भिरथ तत्र पृथाकुमारै-
र्धं विभज्य पृथगर्पितमन्नराशेः ।
आकण्ठमभ्यवहरन्नखिलैः प्रतीकैः
पुत्रो बभूव नरुतः पुनरुत्पुपोष ॥

End :

निष्पतत्सुरकराञ्जलिमुक्ता-
त्पुष्पवर्षमभितः कुरुवीराम् ।
मन्दहास इति विक्रमलक्ष्म्याः
सन्दधे सकलचेतसि बुद्धिम ॥

Colophon :

— — —

310

Sl. No : 18142 धर्मपालचरितम् Ms. No : P. 1894/2

Beginnig :

वन्देऽहं वन्दनीयानां वन्द्यां वाचामधीश्वरम् ।
कामिताशेषकल्याणकलनाकल्पवल्लिकाम् ॥
श्रीमत्साम्बशिवादीनां कथाश्रवणलोलुपाः ।
नैमिशाख्ये महारण्ये नियतं संशितव्रताः ॥

End :

इत्येवं व्यासमुखतः श्रुतं हि मुनिपुङ्गवाः ।
इत्येतच्चरितं दिव्यं मङ्गलानां च मङ्गलम् ॥
पठतां शृण्वतां चापि आयुरारोग्यवर्धनम् ।
इत्येवं स मुनीनुक्त्वा नारदः स्वर्गमेयिवान् ॥

Colophon :

इति श्रीमद्ब्रह्माण्डपुराणे धर्मपालचरितं नाम एकसप्ततितमोऽध्यायः ॥

311

Sl. No : 18143 नलोपाख्यानम् Ms. No : P. 1605/2

Beginning:

अस्त्रहेतोर्गते पार्थे शक्रलोकं महात्मनि ।
युधिष्ठिरप्रभृतयः किमकुर्वत पाण्डवाः ॥

वैशम्पायनः—

अस्त्रहेतोर्गते पार्थे शक्रलौकं महात्मनि ।
न्यवसन् कृष्णया सार्धं काम्यके पुरुषर्षभाः ॥

End :

स हि श्रुत्वाक्ष . - .मुपन्यस्तं मया विभो ।
ब्रह्मर्षिः पुरुषव्याघ्र भविष्यति न संशयः ।।

Colophon :

इत्यारण्यके पर्वणि नळोपाख्याने अशीतितमोऽध्यायः ॥

312

Sl. No : 18144 नीलोपाख्यानम् Ms. No: B. 755

Beginning :

वैशम्पायनः—

स्यालोऽथ नन्दगोपस्य मिथिलेषु गवांपतिः ।
प्रवृद्धगोधनो दक्षः कुम्भको नाम नामतः ॥
नीळा नाम च कन्यासीत् रूपौदार्यगुणान्विता ।
तां वव्रुः सर्वभूपालाः भूयो भूयो विशां पते ॥

End :

क्रुष्णश्च नीलया सार्धं श्रीदाम्ना सह सङ्गतः ।
साकं च बलभद्रेण ययौ बृन्दावनं प्रति ॥
प्राप्य बृन्दावनं गोपाः रेमिरे सह केशवाः ॥

Colophon :

हरिवंशे षट्षष्टितमोऽध्यायः ॥

313

Sl. No : 18145 — पद्मावतीपरिणयाख्यानम् — Ms. No : C. 3279/a

Beginning :

श्रीमत्सुतो + + देशेष्वतिविख्याता रसैकवीरस्य ।
नारायणाभिधाना विलसति सहतीपुरी सुवीरस्य ॥

End :

तद्योग्यां तन्मनस्कां बहुकुशलयुतां त्वत्सुतां देहि तस्मै
नो चेत्सा तद्वियोगाद्भवति खलु तदा देहशेषा मृगाक्षी ॥

Colophon :

— — —

314

Sl. No : 18147 — परशुरामक्षेत्रोत्पत्तिः — Ms. No : C. 1975/2

Beginning:

ಪರಶುರಾಮ ದೇವರಿಂದ ಸೃಷ್ಟಿಯಾದ ಘಟ್ಟದ ಕೆಳಗಣ ದೇಶದ ಪದ್ಧತಿ ವಿವರ — ವೈವಸ್ವತ ಮನ್ವಂತರದಲ್ಲಿ ಇಪ್ಪತ್ತೇಳು ಸರತಿ ಚತುರ್ಯುಗ ಸಂದು ಇಪ್ಪತ್ತೆಂಟನೆಯ ಚತುರ್ಯುಗದಲ್ಲಿ ಕೃತ ಯುಗ ಸಂದು + + ಶ್ಲೋಕ —

पुरा तु भार्गवो रामः क्षत्रियान्तकरो विभुः ।
ईजे स हयमेधेन होतासीत्तत्र काश्यपः ॥

End :

ಉತ್ತರ ನಾಸಿಕಾ ತ್ರಿಯಂಬಕಾ ಎಂಬ ಸ್ಥಳದಾರಭ್ಯ ದಕ್ಷಿಣ ಕನ್ಯಾಕುಮಾರಿ ಪರಿಯಂತ ಯೋಜನ ೩೦೦ ಉದ್ದ ಅಗಲ ಘಟ್ಟದಿಂದ ಸಮುದ್ರಕ್ಕೆ ೩ ಯೋಜನ. ಈ ಪ್ರಕಾರ ಭೂಮಿಯನ್ನು ಸಮುದ್ರ ರಾಜ ಬಿಟ್ಟುಕೊಟ್ಟನು.

Colophon :

— — —

315

Sl. No : 18148 पार्वतीपरिणयाख्यानम् Ms. No : C. 3275/a

Beginning:

त्रिभुवनकान्ता हिमनगजाया कान्तार्थिनी तपस्तप्त्वा ।
हिमवत्यचले पार्श्वे तिष्ठति पर्णाशनानिलं पीत्वा ॥

End :

रङ्गं प्रविश्य गिरिजा कलनूपुराभ्यां
पद्भ्यां प्रगृह्य कनकोज्वलरत्नमालाम् ।
राज्ञो निरीक्ष्य परितः शनकैः पुरारेः
अंसेऽनुरक्तहृदया निदधेऽक्षमालाम् ॥

Colophon :

इति लिङ्गपुराणोक्तपार्वतीपरिणयाख्यानम् ॥

316

Sl. No : 18149 प्रह्लादचरितम् Ms. No: P. 9136/3

Beginning :

हिरण्यकहिरण्याक्षौ काश्यपेयौ महाबलौ ।
दितिपुत्रौ महावीर्यौ सर्व × × × ॥
× × पि × × × द्वारपालकौ ।
नाम्ना तौ जयविजयौ श्वेतद्वीपे हरिं गतौ ॥

End :

एतत् प्रह्लादचरितं ये × × ।
× × × × × :यास्यन्ति परमां गतिम् ॥
एतत्ते कथितं देवि नृसिंहं वैभवं हरेः ।
+ + + + + मम ॥

Colophon :

इति श्रीपद्मपुराणे उत्तरखण्डे उमामहेश्वर + + + त्वारिंशोऽध्यायः ॥

317

Sl. No: 18151 प्रियव्रतचरितम् Ms. No: P. 2666/3

Beginning:

प्रियव्रतस्य बर्हिष्मति आग्नीध्रेध्मजिह्वा यज्ञबाहुमहावीरहिरण्यरेतः घृतपृष्ठसवनमेधातिथी वीतिहोत्रकवय इति सर्वे अग्निना मानः। ऊर्जस्वती कन्या शुक्रपत्नीं। रविः महावीरः सवनः इति त्रयः ऊर्जरेतसः॥

End:

सुमतिः राष्ट्रभृतः सुदर्शनः आपरणः धूमकेतुरिति पञ्चपुत्राः।

ಸುಮತಿಗೆ ಬೃಹತ್ಸೇನೆಯಲ್ಲಿ ಗಯನೆಂಬ ರಾಯನು ಅವತಾರ ವಿಶೇಷನು ಪರಮ ಧಾರ್ಮಿಕ ಜಗದ್ವಿಖ್ಯಾತನು,

शतजित्प्रवरशतकं नैकान्तम्॥ (?)

Colophon:

— — —

318

Sl. No: 18153 भोजप्रबन्धः Ms. No: C. 4272/2

Beginning:

गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदः
हरेः पत्नीमीडे हरसहचरीमद्रितनयाम।
तुरीया कापि त्वं दुरधिगमनिस्सीममहिमा
महामाये विश्वं भ्रमयसि परब्रह्ममहिषी॥

अथ श्रीमतो ईश्वरस्य राज्ञो भोजस्य प्रबन्धो लिख्यते। आदौ धारायां राज्ये सिन्धुलसंज्ञो राजा चिरं प्रजाः पालितवान्। तस्य च वृद्धत्वे भोज इति पुत्रोऽभूत्॥

End:

भोजप्रबन्धराजेऽस्मिन् रत्नमन्दिरलेखिते।
कवीश्वरकृतानन्दोऽधिकारः सप्तमोऽभवत्॥

Colophon:

इति भोजराजप्रबन्धः समाप्तोऽभवत्॥

319

Sl. No : 18154 **मदालसोपाख्यानम्** Ms. No : P. 5779/27a

Beginning:

मदालसेति राजानी विदुषी ब्रह्मवादिनी ।
तस्या पतिः सुशर्मोऽयं राजा वै धीरसत्तमा ॥

End :

नित्योऽहं निर्विकल्पोऽहं निराकारोऽहमव्ययः ।
सच्चिदानन्दरूपोऽहं परिपूर्णोऽस्म्यहं सदा ॥

Colophon :

— — —

320

Sl. No : 18155 **मायाख्यानम्** Ms. No : C. 3280/a

Beginning :

अथ तत्रावसरे शिरोवेष्टनिक्षिप्तचन्द्रकः कर्णलम्बमानधत्तूरकुसुमः करकलित कनककटकः + + कश्चिन्मयावी सदसि प्रविश्य नरेन्द्रं नमस्कृत्य जगाद ।

End :

अर्जुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः ।
बीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः ॥

Colophon :

समाप्तमिदं मायाख्यनम् ॥

321

Sl. No : 18157 **मृकण्डुकथा** Ms No : P. 6243

Beginning :

वसिष्ठः—

मृकण्डुर्विधिवत्कृत्वा मातॄणामौर्ध्वदेहिकम् ।
उवास सुचिरं कालं काश्यामेव महामनाः ॥
अस्य पुत्रो महातेजा मार्कण्डेय इति श्रुतः ।
प्रसादादेव रुद्रस्य मरुद्वत्यामजात ॥

End :

अनेकमाघविहिता महात्मना
मृकण्डुपुत्रेण मृगार्पितात्मना ॥
अनेककल्पप्रलयान् समीक्ष्य तान्
समस्तलोकेषु सदा विहारिणा ॥

Colophon :

इति श्री पाद्मपुराणे उत्तरभागे माघमाहात्म्ये वसिष्ठदिलीपसंवादे अष्टादशोऽध्यायः ॥

322

Sl. No: 18158 मेघवाहनोपाख्यानम् Ms. No: B. 3469/1

Beginning :

युधिष्ठिर उवाच—
त्वयाऽऽपगेय नामानि श्रुतानीह जगत्पतेः ।
पितामहेशाय विभो नामान्याचक्ष्व शम्भवे ॥
बभ्रवे विश्वरूपाय महाभाग्यं च तत्त्वतः ॥

End :

सर्वदोषापहं पुण्यं पवित्रं च यशस्विनः ॥
यावन्त्यब्दसहस्राणि स्वर्गे वसति मानवः ॥

Colophon :

इति श्री महाभारते आनुशासनिके पर्वणि दानधर्मे मेघवाहनोपाख्याने अष्टादशोऽध्यायः ॥

323

Sl. No : 18160 मेघवाहनोपाख्यानव्याख्या Ms. No : P. 4371/2

Beginning :

अशुभानि परित्यज्य शुभान्याचरता यज्ञस्त्वं तज्जानन् स्वयमेव पृच्छति —त्वयेति । आपगेय गाङ्गेय पितामहस्यापि ईश्वराय अन्तर्यामिणे । सर्वत्र षष्ठ्यर्थे चतुर्थी—

End :

कृत्वा शरणीकृत्य रुद्राय—रुद्रे निदधिरे प्रतिष्ठापितवन्तः ॥
यावन्त्यस्य शरीरेषु रामे कूपाणि भारत ।
तावन्त्यब्दसहस्राणि स्वर्गे वसति मानवः ॥

Colophon :

इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे मेघवाहनोपाख्यान (व्याख्याने) अष्टादशोऽध्यायः ॥

324

Sl. No : 18162 **मैरावणचरितम्** Ms. No : B. 320

Beginning :

श्रीमद्रामायणयुद्धकाण्डस्थषण्णवतितमसर्गद्वितीयश्लोकादारभ्य प्रक्षिप्तकथा प्रारभ्यते—

तासां विलपितं श्रुत्वा स्मृत्वा चेन्द्रजितो वधम् ।
ज्ञात्वा भयं च संप्राप्तं विनिश्वस्य मुहुर्मुहुः ॥
रामप्रभावो दुर्ज्ञेयो लक्ष्मणस्यापि विक्रमः ।
अक्षयं वानरबलमित्यभूद्व्यसनातुरः ॥

End :

हनूमतो महत्कर्म श्रुत्वा कोलाहलं च तम् ।
स्वसाहसस्य सर्वस्य वैयर्थ्यं चिन्तयान्वितः ॥
स महद्भयमापन्नो नियतं राघवाद्रणे ।
तदा सो भृशमत्युग्रः प्रळयाग्निरिवाबभौ ॥
मैरावणचरितं संपूर्णम् ॥

Colophon :

इति श्रीमद्रामायणे युद्धकाण्डे मैरावणचरिते श्रीरामस्य रात्रिचरित मैरावणवृत्तान्ततद्वधादिश्रवणकथनं नाम चतुर्विंशस्सर्गः ॥

325

Sl. No: 18163 **मौक्तिकोपाख्यानम्** Ms. No: C. 4688/27

Beginning:

× दासौ मुनिशार्दूलः ननाम परमेश्वरम् ।
स्वामिन्कथय सर्वस्वं मम निर्माणकरणम् ॥
इति ब्रुवन्महायोगी करसंस्पर्शनं कृतः ।
शृणुध्वं मुनयस्सर्वे मम मानसि संभवः ॥
महानुभावं मौनीन्द्रं मौक्तिकं मुनिसत्तमम् ॥

End:

मौक्तिकं तं समालोक्य उमया सहितः शिवः ।
खेदं मा कुरु योगीन्द्र मायावी मुक्तकामिनी ॥
तव पत्नी त्वयापन्ना मुक्तो योगं समाप्यतः ।
मेरुशृङ्गं समासाद्य लंबाकयोगमाश्रितः ॥

Colophon:

इति ब्रह्माण्डपुराणे वर्णवैभवखण्डे ब्रह्मनारदसंवादे मौक्तिकोपाख्याने नवमोऽध्यायः ॥

326

Sl. No: 18167 **रुक्माङ्गदचरितम्** Ms. No: P. 3207/2

Beginnig:

मान्धाता —

पापेन्धनस्य देवर्षे शुष्कार्द्रस्य च भूरिशः ।
को वह्निर्दहते तस्य तद्भवान् वक्तुमर्हसि ॥

वसिष्ठः—

श्रूयतां नृपशार्दूल वह्निना येन निर्दहेत् ।

End:

रात्रौ येन विनोदेन वेदाभ्यासैः सुशोभनैः ॥

वसिष्ठवचनाद्राजा तत्रैवं विष्णुतत्परः ।
जगाम तत्परं ब्रह्म यत्र गत्वा न शोचति ॥

Colophon :

इति नारदीयपुराणे रुक्माङ्गदचरिते मान्धातामोक्षणं नाम चतुश्चत्वरिंशो ऽध्यायः ॥

327

Sl. No : 18170 नारदीयपुराणम् Ms. No: P.6360/1

Beginning :

मान्धाता —

पापेन्धनस्य घोरस्य शुष्कार्द्रस्य च भूरिशः ।
किं वह्निर्दहने शक्तः तं भवान् वक्तुमर्हसि ॥
नाज्ञातं त्रिषु लोकेषु चतुर्मखमुखा × व ।
विद्यते तव विप्रेन्द्र त्रिविधस्य सुनिश्चये ॥

End :

स पीत्वा विपुलच्छायं अपश्यच्छाकिनां वरम् ।
सालं नीलघनच्छायं पञ्चाशत्पुरुषोच्छ्रितम् ॥
तस्याधस्तात्समास्थाय उत्तरीयं प्रसार्य च ॥

Colophon :

इति श्रीरुक्माङ्गदचरित्रे त्रिंशोऽध्यायः ॥

328

Sl. No : 18174 नारदीयपुराणम् Ms. No : C. 221³/1

Beginnig :

सूत उवाच—

पान्तु वो जलदश्यामाः × घात कर्कशाः ।
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहवः ॥
सुरासुरशिरःश्रेणिनिषेव्यमणिरञ्जितम् ।
हरेः पादाम्बुजद्वंद्व + ए फलमस्तु वः ॥

End :

नाकं सुकृतिभिः पुण्यैर्नरकाः पापकर्मभिः ।
अष्टाद्यैः सागरा व्याप्ता विहगैश्च महीरुहः ।।
यस्मिंस्थास्यति पापैः षाम्पर्शाद्यास्यतेत्त्यधेः । (?)
विचार्य तद्यथास्थानं तस्य सौख्यप्रदं भवेत् ।।
तं चिन्त्यतां महाभागाः सम्भूय सुविमृश्य - - - -

Colophon :

इति श्री नारदीयपुराणे रुक्माङ्गदचरिते ब्राह्मणप्रसादो नाम एकोनचत्रिंशोऽध्यायः ।।

329

Sl. No : 18176 **ललितोपाख्यानम्** Ms. No : P. 4145

Beginning :

ओंकारमूर्तिमव्यक्तं अनन्तं सत्यचिद्घनम् ।
द्वादशान्तस्थितं श्रीमत् मीनाक्षीशशिवं भजे ।।
अस्तु वः श्रयसे नित्यं . . . . अनिशं भजे ।
अगस्त्यो नाम देवर्षिः वेदवेदाङ्गपारगः ।।
सर्वसिद्धान्तसारज्ञः ब्रह्मानन्दरसात्मकः ।

End :

तस्य देवी प्रसन्ना स्यात्सर्वसिद्धिं च दास्यति ।।

हयग्रीवः —

आख्यातमेतदवदातगुणं पठन्तः
संपत्प्रदायकमपाकृतसर्वदुःखम् ।
विज्ञानदीपिकलिकाललिताप्रसादान्
आसाद्य चेतसि वहन्ति परं प्रसादम् ।।

Colophon :

इति श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसंवादे ललितोपाख्याने मन्त्रराजप्रकाशकथनं नाम द्वात्रिंशोऽध्यायः । समाप्तश्चायतनखण्डः ।

330

Sl. No : 18178 **ललितोपाख्यानम्** **Ms. No: A.117/a**

Beginning :

ओंकारमूर्तिमव्यक्तं आनन्त्यं सत्यचिद्घनम् ।
द्वादशान्तस्थितं श्रीमत् मीनाक्षीशं शिवं भजे ॥
श्रीमत्सुन्दरमीशानं श्रीमत्सिद्धिविनायकम् ।
षण्मुखं स्कन्दमानन्दं ब्रह्माणं विष्णुमाश्रये ॥

End :

उभावपि समेतौ तौ युक्तौ सर्वैश्च सैनिकैः ।
प्रेषयामास युद्धाय भण्डदैत्यैः सहोदरौ ॥

Colophon :

('ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसंवादे' इत्यध्यायान्तेषु दृश्यते' ॥)

331

Sl. No : 18179 **ललितोपाख्यानम्** **Ms. No : A. 117/b**

Beginning:

तावुभौ परमक्रुद्धौ भण्डदैत्येन देशितौ ।
विषङ्गश्च विशुक्रश्च महोद्यममवापतुः ॥
कनिष्ठसहितं तत्र युवराजं महाबलम् ।
विशुक्रमवदद्राजसेनं त्रैलोक्यकम्पिनी ॥

End :

देवतानां च पूज्यत्वं अस्याः प्रोक्तं घटोद्भव ।
भण्डासुरवधायैषा प्रदुर्भूता चिदात्मिका ॥

Colophon :

— — —

332

Sl. No: 18179 शङ्करचरितम् Ms. No: P. 3387/1

Beginnig:

परितप्तपञ्चलोहस्रुति–
पानेनातिविस्मितान् शिष्यान् ।
परिहृत्य परमयोगी
परमैकान्तोऽतिसुखमगादखिलम् ॥
नेपालेश्वरमाकलय्य तदनु . . .

End :

परमामृतरसपूरैः
परमानन्दैकदापि पठनीयम् ॥
गुरुपादभजनसंभ्रमै-
समरससुखभरितमानसास्सरसाः ।
संसृतिमहासमुद्रं सन्तीर्या
× त × × ॥

Colophon :

इति श्री मार्कण्डेयसंहितायां शतखण्डात्मिकायां द्विसप्ततितमखण्डे सप्तम-
परिस्पन्दः ॥

333

Sl. No: 18180 शठकोपरामानुजचरितम् Ms. No: P. 10605

Beginning:

भृगुः —
मम नारद सर्वत्र देवदेवस्य × × × × ।
कथामृतरसेनैव पाययस्व महामते ॥
चातकोऽहं भवान्मेघः जीवनं हरिकीर्तनम् ।
प्रवर्षय महाभाग कलिकल्मषनाशनम् ॥

End :

इदं रहस्यं परमं विष्णुभक्तिप्रदं नृणाम् ।
विष्णोरनन्तवीर्यस्य चरित्रं महदद्भुतम् ॥
इत्युक्त्वा नारदस्तत्र वैष्णवाग्रेसरं भृगुम् ।
सन्तोष्य परमानन्दं आजगाम महत्तरम् ॥

Colophon :

इति ब्रह्माण्डपुराणे भृगुनारदसंवादे क्षेत्रकाण्डे ताम्रपर्णीमाहात्म्ये शठकोप रामानुजचरितं नाम सप्ततिशततमोऽध्यायः ॥

334

Sl. No : 18181 **शतमुखरावणवधोपाख्यानम्** **Ms. No : C. 3274/2a**

Beginning :

निकुम्भकुम्भौ समरे यमक्षयं
कनिष्ठपुत्रौ निहतौ सुजग्मतुः ।
निकुम्भजाया ह्यभवत्सगर्भा
महोदरस्तां युयुजे पितुर्गृहे ॥

End :

क्षमाकुमारि क्षणमीक्षय त्वं
यदृच्छया न्यस्यसि यत्र जन्तौ ।
स ईक्षणानां त्रयमष्टकं वा
सहस्रकं वा सहसा दधाति ॥
श्रीरामो जयतितरां सहनुमान् लक्ष्मणो जयति ॥

Colophon :

समाप्तमिदमाख्यानम् ॥

335

Sl. No : 18184 **शतरुद्रोपाख्यानम्** **Ms. No : C. 1127**

Beginnig :

धृतराष्ट्र उवाच—
तस्मिन्निशीथे द्रौणेन निहते पार्वतेन वै ।
मामकाः पाण्डवाश्चैव किमकुर्वन् ततः परम् ॥

सञ्जय उवाच—

तस्मिन्नतिरथे द्रोणे निहते पार्षतेन वै ।

कौरवेषु च भग्नेषु कुन्तीपुत्रो धनञ्जयः ॥

दृष्ट्वा सुमहदाश्चर्यमात्मनो विजयावहम् ।

End :

गच्छ युध्यस्व कौन्तेय न तवास्ति पराजयः ।

यस्य मन्त्री च गोप्ता च पार्श्वस्थो हि जनार्दनः ॥

सञ्जय उवाच—

एवमुक्त्वाऽर्जुनं संख्ये पराशरसुतस्तथा ।

जगाम भरतश्रेष्ठ यथागतमरिन्दम ॥

Colophon :

इति श्री महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां द्रोणपर्वणि शतरुद्रीयम् समाप्तम् ॥

336

Sl. No : 18185 शिवलीलामञ्जरी Ms. No : P. 3600/1

Beginning:

अगस्त्यः—

प्रज्ञावतां पुरोगामिन् अश्वानन मया श्रुतम् ।

जननं भण्डदैत्यस्य तेन लोकविमर्दनम् ॥ - - -

अश्वाननः—

मन्वादयः प्रजानाथाः मन्वाद्याश्च महाजनाः ॥

End :

स्वं स्वं स्थानं ययुः प्राप्तनवीननिजविग्रहाः ।

सर्वं विश्वं नवमिव प्ररूढानन्दनिर्भरम् ।

ललितापरमेशान्याः प्रादुर्भावेन चाभवत् ॥

Colophon ;

इति श्रीमाधवलीलामञ्जर्यां एकादशोऽध्यायः ॥

337

Sl· No : 18186 श्रियाळचरित्राख्यानम् Ms. No : C. 3277/a

Beginning :

क्कणाच्चरुवीणालसत्पाणिपद्मः
परब्रह्मनिष्ठस्त्रिश्लोकप्रचारः ।
रणद्युद्धभक्तिर्महानन्दयोगी
नटन् गानलोलः सदा राजतेऽसौ ॥

End :

इत्युक्त्वा देवदेवेशः पार्वतीप्राणवल्लभः ।
अन्तर्दधे श्रियाळाय वरं दत्त्वा यथेप्सितम् ॥

Colophon :

— — —

338

Sl. No : 18188 सीताविजयः Ms. No : P. 2844/2

Beginnig :

शतानन्दो महायोगी वसिष्ठं सत्यवादिनम् ।
अपृच्छद्रामचरितं सीताविजय संज्ञितम ॥

श्रीवसिष्ठः—

शतास्यो नाम दनुजः सीतया निहतः पुरा ।
वक्ष्यामि शृणु भद्रन्ते तदाख्यानं महामते ॥

End :

आमन्त्र्य शङ्करं गौरीं सुग्रीवसहितैस्तथा ।
तमा × कपिश्रेष्ठः सानुजः सपरिच्छदः ॥
पर्वतान् विविधान् देशान् नदीस्तीर्त्वा बहूदकाः ।
शोभनालङ्कृतं पुण्यं साकेतनगरं यथा ॥

Colophon :

इति वासिष्ठोत्तररामायणे सीताविजये विश्वरुपप्रदर्शनं नाम त्रयोदशो ऽध्यायः ॥

339

Sl. No: 18189 सुदामचरितम् Ms. No: C. 3282/a

Beginnig:

कृष्णस्यासीत्सखा कश्चित् ब्राह्मणो ब्रह्मवित्तमः ।
विरक्त इन्द्रियार्थेषु प्रशान्तात्मा जितेन्द्रियः ॥

End:

तस्यैव मे सौहृदसख्यमैत्री
दास्यं पुनर्जन्मनि जन्मनि स्यात् ।
महानुभावेन गुणालयेन
निषज्जतस्तत्पुरुषप्रसङ्गः ॥

Colophon:

समाप्तमिदं सुदामचरितम् ॥

340

Sl. No: 18193 सुब्रह्मण्योपाख्यानम् Ms. No: P. 1054b/1

Beginning:

तत्पुरस्तान्महाक्षेत्रं कौमारमिति विश्रुतम् ।
महापातकसंहारि धारावारिपरिष्कृतम् ॥
सर्वाभीष्टप्रदं नृणां दृष्टप्रत्ययकारणम् ।
क्षेत्राणामुत्तमं क्षेत्रं भूकैलासं विदुर्बुधाः॥

End:

श्रुत्वेदं पुण्यमाख्यानं कौमारक्षेत्रशंसनम् ।
यास्यन्ति भुक्त्वा भोगान् × परमां गतिम् ॥

Colophon:

इत्यादिपुराणे स्कान्दे सनत्कुमारसंहितायां सह्याद्रिखण्डे सप्तदशतमो ऽध्यायः ॥

341

Sl. No : 18194 सुभद्राहरणाख्यनम् Ms. No : C. 3276/a

Beginning :

विप्रः कश्चन जातुचित्त्वथ भुजात्युद्धृत्य चोरैर्हृताः
गावो मे निखिला हतोऽहिम विधिना वत्सोऽपि नो शिष्यते ।
राजन् राज्यमिदं विमुञ्च वसुधां शास्मीति सर्वांश्रमान्
किं वा हासयसीति रोषकटुवाक् द्वारं ययौ भूपतेः ॥

End :

आकर्ण्येदं जृम्भितानां यदूनां
पार्थोद्देशात्कोत्रसस्य जातेः ।
म्लानिं ... तुं माधवो माधवोऽभूत्
यत्रायत्ता कौरवी सा समृद्धिः ॥

Colophon :

समाप्तमिदं सुभद्राहरणाख्यानम् ॥

342

Sl. No : 18196 स्यमन्तकोपाख्यानम् Ms. No : P. 2868/7

Beginnig :

मासि भाद्रपदे शुक्ले शिवलोके प्रपूजिता ।
तस्यां स्नानं तथा दानं उपवासोऽर्चनं तथा ॥
क्रियमाणं शतगुणं प्रसादाद्दन्तिनो नृप ॥
चतुर्थ्यामनुषङ्गः । अस्यामेव चन्द्रदर्शनम् । दोषापवादः ।

पराशरः–

कन्यादित्ये चतुर्थ्यां तु शुक्ले चन्द्रस्य दर्शनम् ।
मिथ्याभिदूषणं कुर्यात् तस्मात्पश्येन्न तं तदा ॥

End :

यदा यदा पश्यसि कार्यमिच्छितं
नारी नरस्याथ करोति सद्व्रतम् ।
सिध्यन्ति कार्याणि मनेप्सितानि
किं दुर्लभं विघ्नहरे प्रसन्ने ॥

श्रावणस्य सिते पक्षे चतुर्थ्यामेकभुग्व्रती ।
व्रतं कुर्याद्गणेशस्य यावन्मासचतुष्टयम् ॥

Colophon

इति श्रीस्कान्दपुराणे स्यमन्तकोपाख्यानं सम्पूर्णम् ॥

343

Sl. No : 18197 स्यमन्तकोपाख्यानम् Ms. No : P. 6806/3

Beginning:

नन्दीश्वर उवाच—

शृणुष्वेकाग्रचित्तस्त्वं व्रतं गाणेश्वरं महत् ।
चतुर्थ्यां शुक्लपक्षे तु सदा कार्यं प्रयत्नतः ॥
सनत्कुमार योगीन्द्र यदिच्छेच्छुभमात्मनः ।
नारी वा पुरुषो वापि यः कुर्याद्विधिवद्व्रतम् ॥

End :

यदा यदा श्रेयसि कार्य उत्थितो
नारी नरश्चाथ करोति तद्व्रतम् ।
सिध्यन्ति कार्याणि तथेप्सितानि
किं दुर्लभं विघ्नहरे प्रसन्ने ॥

Colophon :

इति श्रीस्कान्दे पुराणे नन्दीश्वरसनत्कुमारसंवादे स्यमन्तकोपाख्यानं सम्पूर्णम् ॥

344

Sl. No : 18199 स्यमन्तकोपाख्यानम् Ms. No: P. 8499

Beginning :

सूत उवाच—

सूतं सर्वपुराणज्ञं नमस्कृत्य मुनीश्वराः ।
इत्यूचुर्नैमिशारण्ये विघ्नेशस्य कथां वद ॥

श्रीसूत उवाच—

इन्द्रज्योतिःपुरे राजा सर्वधर्मपरायणः ।
धर्मकान्त इति ख्यातः सर्वभूतनमस्कृतः ॥

End :

विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
कन्यार्थी लभते कन्यां सुखार्थी सुखमाप्नुयात ।।
तस्मात्सर्वप्रयत्नेन सर्वैरपि च तद्दिने ।
शृणुयाच्च कथां दिव्यां सर्वदोषापहारिणीम् ।।
ये शृण्वन्ति कथितं ये पठन्ति च मानवाः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ।।

Colophon :

इति स्कान्दपुराणे उत्तरखण्डे विघ्नेश्वरकथायां पार्वतीस्वर्णक्षान्त (?) संवादे स्यमन्तकोपाख्यानकथासु चन्द्रदर्शनापवादविनायकचतुर्थीव्रतकथाश्रवणं सम्पूर्णम् ।।

345

Sl. No : 18203 | स्यमन्तकोपाख्यानम् | Ms. No : C. 3032/24

Beginning :

अथ गणेशकथा स्यमन्तकोपाख्यानसहिता प्रारभ्यते । ऋषयः-
निर्विघ्नेन तु कार्याणि कथं सिध्यन्ति सूतज ।
अर्थसिद्धिः कथं नृणां पुत्रसौभाग्यसम्पदः ।।
दम्पत्योः कलहे चैव बन्धुभेदे तथा नृणाम् ।
उदासीनेषु लोकेषु कथं सुमुखता भवेत् ।।

End :

वैष्णवाद्यासु लीलासु पूर्वं पूज्यो गणाधिपः ।
कृषिप्रारम्भसमये, चण्डिकाद्या मातृगणाः परितुष्टा भवन्ति हि ।।
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सिध्यन्ति सर्वकार्याणि सिद्धिदस्य प्रसादतः ।।

Colophon :

इति भविष्योत्तरपुराणे स्यमन्तकोपाख्यानं समाप्तम् ।।

346

Sl. No : 18207 **हरदत्तचरित्रम्** Ms No : A. 280

Beginning :

पुरा कैलासशिखनरे सृष्टिसामर्थ्यमात्मभूः ।
लब्धुं च स्वात्मनोऽभीष्टं तस्थौ निर्विर्णमानसः ॥
एतस्मिन् समये दैवादभूदाकाशभारती ।
भूतलेऽस्ति महत् क्षेत्रं पावनं सह्यजातटे ॥

End :

श्रावयन्ति च शृण्वन्ति पठन्ति सततं नराः ।
विलिखन्ति शिवे भक्ता लेखयन्ति विशेषतः॥
विलिख्य पुस्तकं दद्युः पुराणपठकाय ते ।

Colophon :

इति भविष्योत्तरपुराणे हरदत्त चरित्रं द्वादशोऽध्यायः । श्रीहरदत्तोपाख्यानं समाप्तम् ।।

347

Sl. No : 18210 **हरिश्चन्द्रोपाख्यानम्** Ms. No: P. 3282

Beginning :

श्री सूतः—
यत्वाह लोककर्तारं उद्दिश्येशानमव्ययम् ।
कृतं सर्वगुणोपेतं अकार्ष मुनिपुङ्गव ॥
बहवो लोकपालाश्च ऋषयोऽध्यात्मविषमाः ।
राजर्षयस्तथा पुत्र क्रतुभिःशिवमव्ययम् ॥

End :

एतत्ते सर्वमाख्यातं यत्पृष्टोऽहं त्वया मुने ।
यत्ते हितं प्रवक्ष्यामि तत्पृच्छस्व महामुने ॥
तस्मात्पुण्यतरं × × महत्तरम् ।
तत्प्रभावो विशेषेण वर्णितुं न मया क्षमः ॥

Colophon :

इति श्री स्कान्दपुराणे तीर्थखण्डे हरिश्चन्द्रोपाख्याने पञ्चक्रोशमाहात्म्ये हरिश्चन्द्रोपाख्यानं समाप्तम् ॥

348

Sl. No : 18213 — हरिश्चन्द्रोपाख्यानम् — Ms. No : C. 2988

Beginning :

जनमेजय उवाच —

श्रूयते हि महात्मासौ सत्यवादी दृढव्रतः ।
हरिश्चन्द्रो महाराज पुराणपरि × यतो ॥
कथं स राजा धर्मात्मा विश्वामित्रेण धीमता ।
राज्यान्निरस्तः सौख्याच्च पत्न्या प्रियसुतेन वा ॥

End :

य इदं शृणुयान्नित्यं सत्यकामो जितेन्द्रियः ।
प्राप्य पुण्यकृतान् लोंकान् स्वर्गलोके महीयते ॥
य इदं श्रावयेद्विद्वान् पुण्यलोकस्य कीर्तनम् ।
स पुत्रपौत्रसहितः सर्वान् कामानवाप्नुयात् ॥

Colophon :

इति श्रीहरिश्चन्द्रोपाख्याने सप्तमोऽध्यायः ॥

349

Sl.No : 18215 — अञ्जनाद्रिक्षेत्रमाहात्म्यम् — Ms: No . P. 2354

Beginning :

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं × × व्यासं ततो × × ॥
श्रीनारदः—क × × चित्तानां पापा × × ।
× × × कर्मणा भ्राम्य × × × ॥
पचा × × वीस्तीर्णभूमौ सन्ति ह्यनेकशः ।

End :

सर्वाननिष्टानवधूयसत्क × ×
सपुत्रलाभी × × गणेशलोके वसति ।
निवारणाया × कथां सुसादरं तस्य दर्शनं
त्रयं हि लोकेषु सुदुस्तरं महत् ॥ (?)

Colophon

ओमिति ब्रह्माण्डपुराणे हनुमदाख्याने अञ्जनाद्राद्यादिमहाक्षेत्रमाहात्म्य-वर्णनं नाम त्रयोदशोऽध्यायः । श्रीकृष्णार्पणमस्तु ।।

350

Sl. No : 18216 अधर्मपिशुनक्षेत्रमाहात्म्यम् Ms. No : P. 2971/8

Beginning:

ताम्रपर्ण्युत्तरतटे षट्क्षेत्राणि महान्ति च ।
आख्यातानि मुनिश्रेष्ठाः सर्वाण्येतानि विस्तरात् ।
दक्षिणेऽपि तटे रम्ये विचित्राण्यद्भुतानि च ।
क्षेत्राणि तानि वक्ष्यामि त्रीणि पुण्यतमानि च ॥

End :

श्रुत्वा महात्मा धनदस्य सर्वं
राजा प्रपेदे परमं च हर्षम् ।
सम्पूज्य धातुश्च सुतं वरेण्यं
पुनश्च विष्णोश्चरितं महच्च ॥

Colophon :

इति ब्रह्माण्डपुराणे क्षेत्रकाण्डे अधर्मपिशुनक्षेत्रमाहात्म्यं नाम अष्टादशोऽध्यायः ॥

351

Sl. No : 18217 अध्यात्मरामायणमाहात्म्यम् Ms. No : C. 3012/1

Beginning :

नारायणं नमस्कृत्य + ततो जयमुदीरयेत् ॥

सूत उवाच —

कदाचिन्नारदो योगी परानुग्रहकांक्षया ।
पर्यटन् सकलान् लोकान् ब्रह्मलोकमुपागमत् ॥

End :

श्रुतिस्मृतिपुराणेतिहासागमशतानि च ।
अर्हन्ति नाल्पामध्यात्मरामायणकलामपि ॥
अध्यात्मरामचरितस्य मुनीश्वराय
माहात्म्यमेतदुदितं कमलासनेन ।
यः प्रश्रयात् पठति वा शृणुयात् स मर्त्यः
प्राप्नोति विष्णुपदवीं सुरपूज्यमानः ॥

Colophon :

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे ब्रह्माण्डपुराणे उत्तरकाण्डे कषष्टितमोऽध्यायः ॥

352

Sl. No : 18218 अनन्तपद्मनाभव्रतकथा **Ms. No : P. 9593/37**

Beginning:

श्री सूतः—
पुरा तु जाह्नवीतीरे धर्मो धर्मपराक्रमः ।
जरासन्धवधार्थाय राजसूयमुपाक्रमत् ॥
कृष्णेन सह धर्मोसौ भीमार्जुनसमन्वितः ।
यज्ञशालां प्रकुर्वीत नानालङ्कारशोभिताम् ॥

End :

सगरेण दिलीपेन भरतेन महात्मना ।
हरिश्चन्द्रेण महता जनकेनापि सुव्रत ॥
एतेनान्येन बहवो राज्यं भुक्त्वा दिवं गताः ।
एतच्छृण्वन्ति सततं वाच्यमानं द्विजोत्तमैः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे श्री कृष्णयुधिष्ठिरसंवादे श्रीमदनन्तकथाश्रवणं सम्पूर्णम् ॥

353

Sl.No : 18223 अनन्तशयनमाहात्म्यम् Ms: No . P. 4160/1

Beginning :

सुपुण्ये नैमिषारण्ये ऋषयः शौनकादयः ।
सत्रं समासत समास्वाहस्रं × तुष्टये ॥
प्रातस्सवनहोमान्ते कदाचिच्छौनकादयः ।
सत्कृतं सूतमासीनं पप्रच्छुरिदमुत्सुकाः ॥

End :

इति तन्नन्दयित्वा तु ते च सर्वे महर्षयः ।
मध्याह्नसवनायाशु प्रोद्धृतास्तेऽभवन् मुदा ॥

Colophon :

इति श्रीमद्ब्रह्माण्डपुराणे क्षेत्रकाण्डे श्रीमदनन्तशयनमाहात्म्ये एकादशोऽध्यायः ॥

354

Sl: No : I88224 अपक्कभानुवासरव्रतमाहात्म्यम् Ms: NO . P10074/4

Beginning :

एवंगुणविशेषणविशिष्टायां तिथौ श्रीसूर्यनारायणमुद्दिश्य सूर्यनारायणप्रीत्यर्थं अपक्कभानुवासरव्रतांगकथाश्रवणं करिष्ये ॥

ब्रह्मगर्भः- . . .

पुरा कृतयुगे राजन् लोमशो नाम वै मुनिः ।

End :

श्रुतमात्रेण सर्वेषां पापानामपनोदकम् ॥
भानु भानुवारे कथां × शृणुया × व्रती ।
पूजाश्रवणहीनं च व्रतं विकलमेव हि ॥
वेदगर्भेन चैत्युक्तो वज्रबाहुर्महामतिः ।
सम्यक्कृत्वा व्रतं सांगं संसिद्धि परमां ययौ ॥

Colophon :

इति श्री इतिहाससंग्रहे वेदगर्भवज्रबाहुसंवादे अपक्वभानुवासरव्रतकथाश्रवणं सम्पूर्णम् ॥

355

Sl. No: 18225 अमरनाथयात्रावर्णनम् Ms. No: C. 4584/4

Beginning:

श्रावं श्रावं महादेवमहिमानमनुत्तमम् ।
पुण्यं अनन्तनागस्य सूर्यक्षेत्रस्य वै तथा ॥
अधुना श्रोतुमिच्छामि यात्राममरनाथजाम् ।
वसलिङ्गस्य माहात्म्यं ज्ञत्वा मुच्येन्महाभायात् ॥

End:

इति गुह्यं मया ख्यातं फलं अमरनाथजम् ।
यतज्ज्ञत्वा मुच्यते जन्तुः महापापप्रणाशनः ॥
पुनक्ष × तक्षपि हयमेधादिकं लभेत् ।

Colophon:

इति श्री दक्षिणपार्श्वे पूजातीर्थसङ्गहे भैरवभैरवीसंवादे अमरनाथयात्रावर्णनं समाप्तम् ॥

356

Sl. No: 18226 अमासोमवारमाहात्म्यम् Ms. No: P. 10968/15

Beginning:

शरतल्पगतं भीष्ममुपागम्य युधिष्ठिरः ।
कृतप्रणामो धर्मात्मा हितं वचनमब्रवीत् ॥
युधिष्ठिरः—
हतेषु कुरुमुख्येषु भीमसेनेन कोपिना
तथापरेषु भूतेषु हतेषु युधि जिष्णुना ॥

End:

किं पुनर्ब्राह्मणो राजन् वैश्याद्याश्चैव जातयः ।
व्रतराजमिदं करोति × × ॥
नारी क्रियमाणं वा विलोकयति यदा × ।
निश्चयं विधूतपातवासनीयतं विष्णुपुरं निवासमेति ॥ (?)

Colophon :

इति श्रीमद्भविष्योत्तरपुराणे अमासोमवासरकथाश्रवणं सम्पूर्णम् ॥

357

Sl. No : 18227 **अयोध्यामाहात्म्यम्** Ms. No : P. 4920

Beginning :

रामं राजीवताम्राक्षं श्यामं कामारिवन्दितम् ।
कामं दा ।द्रं वन्दे श्रीमन्तं धीप्रबुद्धये ॥
ऋषयः —
सर्वे धर्मास्त्वया × × महात्मना ।
धरास्थितानि क्षेत्राणि असंख्यातानि भूतले ॥
सतीर्थानि सदैवानि + + + +
अयोध्यादिपुरीणां च सप्तानां जननं पुरा ॥

End :

जित्वा वैकुण्ठसदनं गमिष्यति नरोत्तमः ।
ऋषयः —
श्रुतानु × × × × × ।
श्रुता कथास्त्विदं तासु स्तोत्रं रामाभिवन्दकम् ।
श्रुत्वा कृतार्था विप्रेन्द्र × × × ॥

Colophon :

इति ब्रह्माण्डपुराणे भीष्मयुधिष्ठिरसंवादे श्रीरामनगराभिवन्दनस्तवं सम्पूर्णम् ॥

358

Sl. No : 18228 **अयोध्यामाहात्म्यम्** Ms. No: C. 342

Beginning :

वन्देऽहं रामचन्द्रस्य पादौ प्रणतरक्षकौ ।
सीतायाश्च पुनः पादौ सर्वसिद्धिविधानकौ ॥
रामं रामानुजं सीतां भरतं भरताग्रजम् ।

सुग्रीवं वायुसूनुं च प्रणमामि पुनः पुनः ॥
शृणु देवि सवत्से त्वं अयोध्या नगरं शुभम् ।
सर्वतीर्थाधिकं पुण्यं श्रुत्वा पापातिगो भवेत् ।

End :

मतिविपुलविधानैर्वर्णितं धर्ममर्थं
सकलमतिपरमभक्त्या क्षेत्रमाहात्म्यमेतत् ।
य इह नर उदारः श्रीमनाथः स सम्य
ग्व्रजति हरिनिवासं सर्वभोगांश्च भुक्त्वा ॥

Colophon :

इति श्री कोशलखण्डे गौरीशङ्करसंवादे अयोध्याक्षेत्रमाहात्म्यवर्णनो नामत्रिंशोऽध्यायः ॥

359

Sl. No : 18229 अरुणाचलमाहात्म्यम् **Ms. No : P. 4117**

Beginning :

ललाटे पुण्ड्रं + + अरुणगिरियोगी विजयते ॥
अथाहुर्मुनयस्सूतं नैमिशारण्यवासिनः ।
शौनकाद्या महात्मानो भूत्या रुद्राक्षधारिणः ॥
अरुणाचलमाहात्म्यं त्वत्तः शुश्रूषवो वयम् ।
तन्माहात्म्यं वदेत्युक्तः सूतः प्रोवाच तान् मुनीन् ॥

End :

ग्रामप्रदक्षिणं कृत्वा पूजयेद्ब्राह्मणोत्तमम् ।
यः करोति नरो भक्त्या स तु देवैस्समर्चितः ॥
शिवलोकमनुप्राप्य शिवेन सह मोदते ॥

Colophon :

इति शैवविद्यासारसंहितायामरुणाचलमाहात्म्ये सप्तत्रिंशोऽध्यायः ॥

360

Sl. No : 18320 अर्कपुष्करिणीमाहात्म्यम् Ms. No: B. 335/1

Beginning :

यद्भासा भाति विश्वं भुवि भजममलाभाविगो भानुरासी–
द्भानुर्यस्माद्यदङ्गं रविमुखरजसा स्वर्च्यते नित्यमेकम् ।
कावेरी यस्य पादं विमलयति सदा यद्दं काद्दशि काशी
ब्रह्माद्या यत्सभायां तदहमनुदिनं चार्कलिङ्गं नमामि ॥ १ ॥

End :

सुकृतमखसमाजैः यत्फलं दीक्षितानां
निरशनधृतजीवैः योगिभिः प्रार्थ्यते यत् ।
विविधभजनयोगैः यत्फलं भक्तिभाजां
भवति तदिह भानोः पुष्कराख्यानतश्च ॥ ७७ ॥

Colophon :

इति श्री पद्मपुराणे तृतीयविभागे पुष्करप्रकाशे अर्कपुष्करिणीमाहात्म्ये षोडशोऽध्यायः ॥

361

Sl. No : 18232 अवतारमाहात्म्यम् Ms. No : P. 1459

Beginning :

राजोवाच —
…दरायण एतत्ते श्रोतुमिच्छा महेवयम् ।
हरिर्यथा गजपतीं × × ग्रस्तममूमुचत् ॥
तत्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं महत् ।
यत्र यत्रोत्तमश्लोको भगवान् गीयते यतः ॥

End :

अमायां पौर्णमास्यां वा पठेद्यः सुसमाहितः ।
× × × स्य फलं प्राप्नोत्यसंशयः ॥
एतत्ते कथितं तात × × ।
× × × यदीच्छस्यव्ययं पदम् ॥

× × × भूभृतां वर ।
प्रणम्य तं गुरुं राजा × ×
× × × मतन्द्रितः ।
काले हरिपदं प्राप्य ययौ × ॥

Colophon :

इति श्री पद्मपुराणे उत्तरकाण्डे उमामहेश्वरसंवादे × × ष्टितमोऽध्यायः ॥

362

Sl. No : 18233 अविमुक्तक्षेत्रतत्त्वम् Ms. No : C. 1504

Beginning :

अंविमुक्तं महाक्षेत्रं पुरुषार्थैकसाधने ।
पराज्ञातादि × त्यादि मूलकं तत्त्वमुच्यते ॥ (?)
यद्यपि रामतापनीयेऽविमुक्तमेवैकं तारकोपदेशद्वारा तत्काले मुक्तिजनकम् ।
तथापि जाबालादौ तस्य वाराणसीमध्यप्रतिष्ठितत्वमप्ययुक्तमिति क्षेत्रद्वयम् ।

End :

हंसोमहेशक × मणायमनमोसि ।
किं मानव्योवयसि कन्दुकवत्यन्त ॥
कर्माणि भोक्तुमिह सन्ति पुराकृतानि । (?)
मुक्तषु तेषु हरहेत वकःप्रसादः ॥

Colophon :

इति श्री पायगुडोपाख्यबालकृष्णद्वितीयांबाभवानीविरचितमविमुक्ततत्त्वं परिपूर्णम् ॥

363

Sl. No : 18234 अष्टोत्तरशतदिव्यस्थानमाहात्म्यम् Ms. No : P. 7117/5

Beginnig :

अष्टोत्तरशतस्थानेष्वाविर्भूतं जगत्पतिम् ।
नमाम जगतामीशं नारायणमनन्यधीः ॥
श्रीवैकुण्ठे वासुदेवं प्रमोदे कर्षणाह्वयम् ।
प्रद्युम्नं च प्रमोदाख्ये सम्मोदे चानिरुद्धकम् ।।

End :

एतानि विष्णुस्थानानि पूजितानि महात्मभिः ।
अधिष्ठितानि देवेन तत्रासीनं जगत्पतिम् ॥
अवगाहानि तीर्थानि ज्ञातश्च भगवान् हरिः ।
सम्पादिता परा भक्तिः परमानन्ददायिनी ॥

Colophon :

इति नारदीये पुराणे × × × ॥

364

Sl. No : 18235 **अष्टोत्तरशतदिव्यस्थानवैभवम्** Ms. No : C. 461/52

Beginning:

अष्टोत्तरशतस्थानेष्वाविर्भूतं जगत्पतिम् ।
नमामि जगतामीशं नारायणमनन्यधीः ॥
श्रीवैकुण्ठे वासुदेवं मोदे सङ्कर्षणाह्वयम् ।
प्रद्युम्नं च प्रमोदाख्ये सम्मोदं चानिरुद्धकम् ॥

End :

अष्टोतरशतस्थानेष्वर्चितो भगवान् हरिः ।
पठतां च तथा भक्तिःपरमानन्ददायिनी ॥

Colophon :

इति श्रीब्रह्माडपुराणे अष्टोंत्तरशतस्वयंव्यक्तविवरणं नाम अष्टमोऽध्यायः॥

365

Sl. No : 18236 **अष्टोत्तरशतदिव्यस्थानवैभवम्** Ms. No : P. 10344/47

Beginning :

अष्टोत्तरशतस्थानेष्वाविर्भूतं जगत्पतिम् ।
नमामि जगतामीशं नारायणमहं निधिम् ॥
श्रीवैकुण्ठे वासुदेवं मोदे संकर्षणाह्वयम् ।
प्रद्युम्नं च प्रमोदाख्ये सम्मोदे चानिरुद्धकम् ॥

End :

श्री मुष्णं वेंकटाद्रिं च साधन्यामं च नैमिषम् ।
तोताद्रौ पुष्करं चैव नरनारायणाश्रमम् ।
अष्टेमे मूर्तयः सन्ति स्वयं व्यक्ता महीतले ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे अष्टोत्तरशतस्थानमाहात्म्यं नाम एकादशोऽध्यायः ॥

366

Sl. No : 18237 अष्टोत्तरशतशिवस्थलवैभवम् **Ms. No : P. 10344/46**

Beginning :

अष्टोत्तरशतं वक्ष्ये पुण्यस्थानं चिदम्बरम् ।
कैलासाद्रौ तु श्रीकण्ठं हिमवत्केदारनायकम् ॥
काशीपुरी विश्वनाथं श्रीशैले मल्लिकार्जुनम् ।
प्रयागे नीलकण्ठेशं गयायां रुद्रपादुकम् ॥

End :

तिरुणामलेश्वरं तेजर्लिंगं अरुणाचलेश्वरम् ।
कालहस्तीश्वरं वायुलिंगं नामाधिपूजितम् ॥
चिदम्बरेश्वरं देवं व्योमलिंगं प्रकीर्तितम् ॥
पञ्चतत्वात्मकं ज्ञेयं स्मरेत्पापविनाशनम् ॥

Colophon :

इति श्रीललितागमे ज्ञानपादे शिवलिंगप्रादुर्भावपटलिकायां संहितायां शिवस्थलनिर्णययोगो नाम एकविंशतिः पटलः ॥

367

Sl. No : 18328 अहोबलमाहात्म्यम् **Ms. No : SB. 355**

Beginning:

प्रणम्य परमात्मानं परमानन्दकारणम् ।
प्रवक्ष्यामि यथापूर्वं × हरियन सः ।
पुरा तु जाह्नवीतीरे मुनयस्सनकादयः ॥

End :

न नारसिंहादधिकश्च देवो न तीर्थमन्यद्भवनाशनीतः ।
न गारुडाद्रैरधिकश्च शैलौ न भक्तचिन्तारहितोऽस्ति योगी ॥
लोके द्वयं सारतमं वदन्ति विचार्यमाणे परमार्थ एव ।
विलोचनं पावनसुन्दराणामालोचनं वा गिरिगह्वरेषु ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे क्षेत्रखण्डे अहोबलमाहात्म्ये दशमोऽध्यायः॥

368

Sl. No : I8239 आदिपुरमाहात्म्यम् Ms: NO • P 3519

Beginning :

मरगतकलीवल्लभं वेदवेद्यं
चलदलवननाथं चन्द्रसूर्याग्निनेत्रम् ।
सकलदुरितसङ्घध्वंसनं सर्वदेशं
भवभयहरमीडे भक्तलोकैकपालम् ॥

End :

इतीदमुक्त्वा शिवधर्मयुक्तं
पुराणमग्र्यं पुरतः स्थितानाम् ।
विनीतवेषाः स्मरतं यथोक्तं
मया रहस्यं किल शैवमाद्यम् ॥
तेनैव मुक्तश्च मुनिप्रवीरः
स्वनाम चौचार्य तदा प्रणेमुः ।
मुदान्विताश्चैनमपूजयंस्त
कृताशिषः सूतमतिप्रहृष्टाः ।
हितार्थं नस्त्वदन्यः कः प्रवक्ता स्याज्जगत्त्रये ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे कौमारखण्डे कुमारनारदसंवादे क्षेत्रतीर्थे प्रशंसायां आदिपुरमाहात्म्ये पुराणस्वरुपमहिमा नाम षड्विंशोऽध्यायः ॥

369

Sl. No : 18240 आनन्दकाननमाहात्म्यम् Ms. No : P. 519

Beginning :

शिवप्रसादमन्त्रज्ञाः वैष्णवा निर्मलाशयाः ।
श्रीकण्ठमुखनिर्णितमुरारिगुणसत्कथाः ॥
त एकदा महात्मानः कैलासनिलयालयाः ।
तत्रागमदगस्त्येन ऋषिभिश्च षडाननः ॥
नमस्कृत्या महादेवं पितरं संशयापहम् ।

End :

आमन्त्र्य निर्गतास्सर्वे स्मरन्तःपदपङ्कजम् ।
ऋषयोऽपि महाभागा मुमुदुः परसम्मताः ॥

सूत उवाच—

कथितं वो द्विजश्रेष्ठा वेदव्यासमहात्मना ।
देवेभ्यो मुनिमुख्येभ्यश्चोक्तं प्रश्नानुसारतः ॥

Colophon :

इति श्रीवायुपुराणे लक्ष्मीसंहितायामानन्दकाननमाहात्म्ये एकोनत्रिंशो ऽध्यायः ॥

370

Sl. No : 18241 आनन्दकाननमाहात्म्यम् Ms. No : A. 212

Beginning :

शौनक उवाच—

सूत सूत महाप्राज्ञ दैवज्ञ वदतां वर ।
रहस्यं श्रोतुमिच्छामि श्रीमदानन्दकाननम् ॥
केचिदिच्छन्ति कल्याणं विष्णोरायतनं महत् ।
अपरे शैवमित्येतच्छिन्धि नः संशयं सताम् ॥

End :

आमन्त्र्य निर्गतास्सर्वे स्मरंतःपदपङ्कजम् ।
ऋषयोऽपि महाभागा मुमुदुः परसम्मताः ॥

सूत उवाच—

कथितं वो द्विजश्रेष्ठा वेदव्यासामलात्मना ।

देवेभ्यो मुनिमुख्येभ्यश्चोक्तं प्रश्नानुसारतः ॥

Colophon :

इति श्रीवायुपुराणे लक्ष्मीसंहितायामानन्दकाननमाहात्म्ये एकोनत्रिंशो ऽध्यायः ॥

371

Sl. No : 18244 इन्दुक्षेत्रमाहात्म्यम् Ms: NO · P 1565/4

Beginning :

× × × × कश्चिन्महामतिः ।

अन्तर्वल्मीकसंस्थ × कमण्डितः ॥

लाङ्गलेन द्विधा भूतो दृष्ट्वान्तं दुःखितो नृपः ।

प्रायश्चित्तं द्विजश्रेष्ठः पप्रच्छ स तपोधनान् ॥

End :

तद्दर्शनात्तद्भजना × यास्यन्ति सद्गतिम् ।

ऐहिकं वामुष्मिकं वा यद्यदात्ममनोगतम् ॥

× × × × द्गतिम् ॥

Colophon :

इति श्रीस्कान्दपुराणे इन्दुक्षेत्रमाहात्म्ये चतुर्थोऽध्यायः ॥

372

Sl. No : 18245 इषुपातरामक्षेत्रमाहात्म्यम् Ms· No: C. 1979 /3

Beginning :

ऋषयः—

सर्वज्ञोऽसि महाभाग वेत्सि त्वं सर्वसंहिताम् ।

चन्द्रतीर्थस्य महात्म्यं वद शौनक विस्तरात् ॥

शौनकः—

दक्षात् कन्याशतं जज्ञे सप्तविंशाधिकं पुरा ।

तासां मध्ये चन्द्रमसे सप्तविंशतिकन्यका ॥

End :

ततस्तीर्थजलैस्सर्वैरभिषेकं चकार ह ।
शच्याऽनुरक्तया सार्धं ययौ नाकं पुरन्दरः ॥
शौनकः—
इदमाख्यानकं सर्वं पुरन्दरजयावहम् ।
यः पठेत् शृणुयाद्वापि सम्पद्भिः न वियुज्यते ॥

Colophon :

इति श्री उत्तरसह्याद्रिखण्डे इषुपातरामक्षेत्रमाहात्म्ये दशमोऽध्यायः ॥

373

Sl. No : 18246 इषुपातरामक्षेत्रमाहात्म्यम् **Ms. No : C. 4672/1**

Beginnig :

सूत उवाच —
नैमिषेऽनिमिषक्षेत्रे ऋषयः सत्रमासत ।
शतसंवत्सरं दीर्घं नानापक्षिभिराकुलम् ॥
तत्रासन ऋषयस्सर्वे दिव्या भौमाश्च नित्यशः ।
इन्द्रादयो देवगणाः × × × ॥
शौनकं मुनिशार्दूलं × ययुस्तदा ॥
तानागतान् समालोक्य ऋषयः प्रश्रयान्विताः ।
उत्तस्थुः परमप्रीताः शौनकं चेदमब्रुवन् ॥
त्वं नः सुखयितुं कालमर्होऽसि पुरुषोत्तम ।
कथयामास विविधाः कथाः × × ॥
जामदग्न्यो मुनिवरः तपसा प्रज्वलन्निव ।
शृणुध्वं मुनयस्सर्वे × × × ॥
शौनक उवाच— तत्क्षेत्रस्य च माहात्म्यं श्रीरामचरितं तथा ॥

End :

एवं बहुति × प्रेरितो भृशम् ।
विशेषानुग्रहादेव मुक्तोऽस्मदिव × ॥

नरराक्षस समाश्रा × पायरः ।
अथा × षद्लि × दुरासद ॥

Colophon :

इति श्रीस्का × × × × ने षोडशोऽध्यायः ॥

374

Sl. No : 18248 ऊर्ध्वपुण्ड्रमाहात्म्यम् Ms. No : P. 743/8

Beginning :

ऊर्ध्वपुण्ड्रस्य माहात्म्यं वक्ष्यामि शुभदर्शन ।
धारणादेव मुच्यन्ते भवरो × × × ॥

End :

सुदर्शनेनाङ्कितबाहवस्तथा
धृतोर्ध्वपुण्ड्राङ्कितसर्वगात्राः ।
मालारविन्दाक्षधरा विशुद्धा
रक्षन्ति × × न् ॥

Colophon :

इति श्रीपाद्मे पुराणे उत्तरखण्डे उमामहेश्वरसंवादे ऊर्ध्वपुण्ड्रमाहात्म्ये ऊर्ध्वपुण्ड्रविधिस्त्रिशोऽध्यायः ॥

375

Sl.No : 18249 ऋषभयोगीश्वरप्रभावः Ms: No . P. 8725/3

ಸೂತಪೌರಾಣಿಕನು ಶೌನಕಾದಿ ಮುನಿಗಳಿಗೆ ನಿರೂಪಿಸುತ್ತಿದ್ದನು. ಕೇಳಿರೆ ಋಷಿಗಳಿರಾ ! ಶಿವನ ಸೃಷ್ಟಿಯು ಶಿವನ ಚರಿತ್ರೆ, ಶಿವನ ಮಹಿಮೆ, ಶಿವಭಕ್ತರ ಪ್ರಭಾವಂ ಆಶ್ಚರ್ಯಕರಂಗಳು ಸ್ವರ್ಗಮೋಕ್ಷಂಗಳಿಗೆ ಸಾಧನವಾದಂಥಾವು, ಅದರಲ್ಲಿ ಶಿವಭಕ್ತರ ಮಹಿಮೆಯನ್ನು ಇನ್ನು ಹೇಳಿನು, ಕೇಳಿ.

End :

ಪಾಪಪರಿಹಾರಕವಾದ ಪವಿತ್ರಮಾದ ವಿಚಿತ್ರಮಾದ ಆಖ್ಯಾನವನು ಆರು ಕೇಳುಸುವರೋ, ಆರು ಕೇಳುವರೊ, ಆರು ಬರೆವರೊ, ಅವರೆಲ್ಲ ಇಹದಲ್ಲಿ ಸಕಲ ಭೋಗಂಗಳನನುಭವಿಸಿ ಕಡಗೆ ಶಿವಸಾಲೋಕ್ಯವನೈದುವರೆಂದು ಸೂತಪೌರಾಣಿಕನು ಶೌನಕಾದಿ ಮುನಿಗಳಿಗೆ ನಿರೂಪಿಸಿದನು.

Colophon :

ಸ್ಕಂದಪುರಾಣೋಕ್ತವಾದ ಬ್ರಾಹ್ಮೋತ್ತರ ಖಂಡದಲ್ಲಿ ಭದ್ರಾಯುವಿಗೆ ಸಾಯುಜ್ಯವಾದಲ್ಲಿಗೆ ಅಧ್ಯಾಯ ೧೪ಕ್ಕಂ ಮಂಗಳ ಮಹಾ ಶ್ರೀ ಶ್ರೀ ಶ್ರೀ

376

Sl. No : 18250 — ऋषिपञ्चमीव्रतमाहात्म्यम् — Ms: NO . P 10048/15

Beginning :

श्वेताश्व उवाच—

उक्तः पूजाविधिः सूत केन चादौ प्रकाशितम् ।
व्रतस्य च फलं ब्रूहि श्रुत्वा पापात्प्रमुच्यते ॥

सूत उवाच—

यस्य श्रवणमात्रेण सर्वाधौघं विनश्यति ।
अत्रैवोदाहरन्तीमामितिहासं पुरातनम् ॥

End :

उक्तं व्रतप्रभावं च इतिहासोत्तमोत्तमम् ।
पृच्छते कथितं पुत्रप्राप्तिश्च शुभजन्मनः ॥
तव भार्याव्रतं भुक्ति विस्तीर्य कथितं मया ।
सुखीभव चिरं कालं अन्ते सुखमवाप्नुहि ॥

Colophon :

— — —

377

Sl. No : 18251 — ऋषिपञ्चमीव्रतमाहात्म्यम् — Ms No : P. 10697/17

Beginning :

शतानीकः—

श्रुतानि देवदेवेश व्रतानि सुबहून्यपि ।
इदानीं श्रोतुमिच्छामि व्रतं पापप्रणाशनम् ॥

ब्रह्मा—

शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
ऋषिपंचमीति विख्यातं सर्वपापहरं परम् ॥

End :

महापापं चोपपापं तस्य सा भवति ध्रुवम् ॥
येषामृषीणां च तपोधनानां
व्रतेन सांगेन मनुष्यलोके ।

निस्तीर्य पापं निखिलं च नार्यः—
लोके परस्मिन् सुखमाप्नुवन्ति ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे ऋषिपञ्चमीव्रतकथाश्रवणं सम्पूर्णम् ॥

378

Sl. No : 18254　ऋषिपञ्चमीव्रतमाहात्म्यम्　Ms. No: C. 4680/9

Beginning :

आ　×　मपि च राजेन्द्र पञ्चमी ऋषिसंज्ञिका ।
सम्प्रवक्ष्यामि तां श्रुत्वा नारी पापात् प्रमुच्यते ॥
युधिष्ठिर उवाच —
कीदृशी पञ्चमी कृष्ण कथं वै ऋषिसंज्ञिका ॥

End :

एषां ऋषिणां च तपोवनानां
व्रतेन साङ्गेन मनुष्यलोके ।
निस्तीर्य नार्यो निखिलं च पापं
लोके परस्मिन् उपशान्त्यकल्मषम् ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे कृष्णयुधिष्ठिरसंवादे ऋषिपञ्चमीव्रतकथा सम्पूर्णा ॥

379

Sl. No :18255　एकाम्रनाथमाहात्म्यम्　Ms. No :P3633

Beginning :

स्वकटजातमदाश्रित　+　+　विनायकमाश्रये ॥
पुरा केचित् महाभागाः मुनयः संश्रितव्रताः ।
नैमिशे परमे पुण्ये तपस्तेपुरसुदुष्करम् ॥
वसिष्ठः काश्यपः कण्वः पुलस्त्यः पुलहः क्रतुः ।

एते चान्ये च मुनयः द्विजेन्द्र × षाः ।
सर्वे पाशुपताः शुद्धाः भस्मोध्दूधूळितविग्रहाः ॥

End:

कामाक्षिकच × रेखायितां × भक्तानेक
मनोरथामरमणिः लोकैकरक्षाम × × ।
सेवा रमेशमुख्यदिविजन् × प्रभा प्राग्भाराञ्चित
चू × नूलवसतिः पायान् अपायान् शिवः ॥

Colophon:

इति श्रीमत्स्कान्दे पुराणे काञ्चीस्थानमाहात्म्ये श्रीमदेकाम्रनाथपुराण महिमानुवर्णनं नाम पञ्चाशोऽध्यायः ॥

380

Sl. No: 18256 एकादशीमहिमा **Ms No: P. 4179/3**

Beginning:

पार्वती —
देवदेव महाभाग सर्वशास्त्रार्थकोविद ।
एकादशीविधानं मां समग्रं वद मे प्रभो ।
श्रीशङ्करः —
शृणु देवि प्रवक्ष्यामि सर्वपापप्रणाशनम् ।
श्रवणात्सर्वपापघ्नं जन्मजन्मान्तरसञ्चितम् ॥

End:

तथैव व्यर्थतां याति योऽन्यधर्ममुपाश्रितः ।
तस्मात्सर्वप्रयत्नेन कुर्यादेकादशीं बुधः ॥
य इदं शृणुयाद्वापि श्रावयेद्वा समाहितः ।
कुलसप्तान समुद्धृत्य विष्णुलोके सदा वसेत् ॥

Colophon:

इति श्रीस्कान्दे उमामहेश्वरसंवादे एकादशीमहिमवर्णनं नाम चत्वारिंशतितमोऽध्यायः ॥

381

Sl. No: 18257 एकादशीमाहात्म्यम् Ms. No: P. 126/1

Beginning:

दृष्ण कृष्ण महीपाल भक्तोऽसि तव सर्वदा ।
ब्रूहि मे पुरुषाध्यक्ष वैष्णवानां परां गतिम् ॥
वैशाखे कृष्णपक्षे तु कापि एकादशी भवेत् ।
किंनामा को विधिस्तस्य एतत् विस्तरतो वद ॥

End:

व्रतमेतत्प्रकुर्वन्ति निष्पापाश्च भवन्ति ते ।
बहुपुण्यप्रदा चैव व्रतानामुत्तमं व्रतम् ॥

Colophon:

इति भविष्योत्तरपुराणे चैत्रकृष्णैकादशी समाप्ता ॥

382

Sl. No: 18261 ककुद्गिरिमाहात्म्यम् Ms. No: P. 4537/2

Beginning:

ऋषय: —

श्रीमानगस्त्य: सर्वज्ञ: संस्थितो दक्षिणा दिशि ।
किमुद्दिश्य कथं सूत संशयं देत्तुमर्हसि ॥

सूत:—

शृण्वन्तु ऋषय: सर्वे यदगस्त्यो महामुनि: ।
दक्षिणां दिशमापन्न: तज्जगद्धितकारणम् ॥

End:

ककुद्गिरिशैलस्य महामहत्वं
कणादवृत्त: कमनीयमूर्ते: ।
हरस्य कारुण्यकटाक्षभावं
श्रुत्वा त्वगस्त्य: परितुष्टिमाप ॥
इदं य: शृणुयान्नित्यं श्रावयेद्वा समाहित: ।
सर्वपापविनिर्मुक्तो रुद्रलोके महीयते ॥

Colophon :

इति श्री भविष्योत्तरपुराणे तीर्थकाण्डे ईश्वरागस्त्यसंवादे ककुद्गिरिमाहात्म्ये द्वितीयोऽध्यायः ॥

383

Sl. No : 18263 | कदम्बवनमाहात्म्यम् | Ms. No : P. 2318

Beginning:

मङ्गलं महदानन्ददायिने मुदितात्मने ।
पाषण्डषण्डतिमरमिहिरायास्तु मङ्गलम् ॥
तटाककाविवाहाय यःस्वयं पाण्ड्यमहीपतेः ।
काष्ठभारधरायास्तु ज्ञानरूपाय मङ्गलम् ॥
श्रीमत्कदम्बकान्तारभूषणं प्रणमाम्यहम् ।
गजाननमुमासूनुं शुण्डहस्तं शिवात्मजम् ॥

End :

अज्ञानयोगात् अपचारकर्म
यत्पूर्तमस्माभिरनुष्ठितं ते ।
तद्देव × सन्दयालो
पितेव पुत्रान् प्रति नो जुषस्व ॥
यदक्षरपरिभ्रष्टं मात्राहीनं तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव सुन्दरेश नमोऽस्तु ते ॥

Colophon :

— — —

384

Sl. No : 18264 | कदम्बवनमाहात्म्यम् | Ms No : P. 7462

Beginning :

गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥

इष्टसिद्धिप्रदं विघ्नराजं श्रीपादसेविना ।
श्रीमत्कदम्बकान्तारभूषणं प्रणमाम्यहम् ।

End :

दत्तवान् धनवस्त्रादीन् शैवानां ब्राह्मणादिनाम् ।
त्वं मे गुरु ब्राह्मणा × × रक्ष माम् ॥
धर्माणि नीपकान्तोर मीनाक्षीशस्य तुष्टये ।
इत्युक्त्वा पादयोस्तस्य प्रणनाम सुदुर्मदम् ॥

Colophon :

५० तमपत्रे—
(इति श्री स्कान्दे महापुराणे कदम्बवनमाहात्म्ये ब्रह्मेशमाहात्म्यकथनं नाम पञ्चदशोऽध्यायः ॥)

385

Sl. No : 18265 कन्याकृष्णामाहात्म्यम् Ms. No : C. 4657/2

Beginnig :

सूत उवाच—
अथ ते विबुधाः सर्वे मुनयश्च तपोधनाः ।
प्रारेभिरे विचाराय संभूय भृशमातुराः ॥

End :

कृष्णवेर्णीं समागत्य यथोक्तं तच्चकार ह ।
तेन निष्कृतिमापाशु गतिं च परमां शुभाम् ॥

Colophon :

इति श्रीविष्णुपुराणे उत्तरांशे कन्यामाहात्म्ये सूतशौनकसंवादे कन्यागत विधिनिरूपणं नाम षोडशोऽध्यायः ॥

386

Sl. No : 18266 कन्यागतमाहात्म्यम् Ms. No: C. 4687/5

Beginning :

श्री विष्णुपुराणेक्त कन्यागतमाहात्म्यम् ।
सूत उवाच—
अथातः संप्रवक्ष्यामि कन्यागतविधिं मुने ।

यस्य श्रवणमात्रेण गंगास्नानफलं लभेत् ।
माहात्म्यश्रवणादेव तीर्थस्नानफलं लभेत् ॥

End :

कर्तव्यं विष्णुतुष्ट्यर्थं ऋणत्रयविमुक्तये ।
वपनं चोपवासं च तीर्थश्राद्धं तथैव च ॥
कुर्याद्वै द्विजतृप्तिं च नानादानानि कारयेत् ।
विष्णुपूजां प्रकुर्वीत नरो नियमसंयुतः ॥

Colophon :

— — —

387

Sl. No : 18267 कमलाचलमाहात्म्यम् **Ms No : P. 744/2**

Beginning :

ऋषयः —
पुण्यानां पर्वतानां च माहात्म्य × ।
× × ष्टः कमलाचल ईरितः ॥
इति प्रोक्तं त्वया सूत तद्वदस्व महामते ।
क शैलः कीदृशस्तत्र को देवः कैरुपाश्रितः ॥

End :

स्त्रियो वा विष्णुभक्ताश्च तेऽपि यान्ति परां गतिम् ।
लेखयित्वा पुस्तकेषु दशाध्यायिनमुत्तमम् ॥
अर्चयित्वा नरो भक्त्या पुस्तकं ब्राह्म × ॥

Colophon :

(नवमाध्यायसमापनवाक्यं) इति भविष्योत्तरपुराणे कमलाचल माहात्म्ये नवमोऽध्यायः ॥

388

Sl. No : 18269 करवीरमाहात्म्यम् **Ms. No: C. 2213 /2**

Beginning :

नारायणं नमस्कृत्य नरं चैवनरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

वन्दे करीन्द्रवदनं सकलामरेन्द्र
वृन्दानतं सकलविघ्नविनाशदक्षम् ।
यन्नम्य वै विधिहरीश्वरचन्द्रमुख्याः
देवा लभन्ति सकलेप्सितवृन्दराशिम् ॥

End :

तस्माद्भर्तरिदं राज्यं त्वमेव कुरु धर्मतः ।
राज्ञामयं परो धर्मो यत्प्रजानां सुरक्षणम् ॥
अविमुक्ते परे चास्मिन् दक्षिणे सर्वकामदे ।
जीवन्नाथ मृतो वापि गतिमेष्यत्यसंशयम् ॥

Colophon :

इति श्री पाद्मे महापुराणे करवीरकाण्डे करवीरमाहात्म्ये नारदमार्कण्डेय संवादे द्विसप्ततितमोऽध्यायः ॥

389

Sl. No : 18271 कलशक्षेत्रमाहात्म्यम् Ms. No : P. 4470/1

Beginning:

तत्र पुत्र प्रवक्ष्यामि कलशं सुमनोहरम् ॥
मृत्योर्दूरतरं क्षेत्रं सर्वव्याधिहरं परम् ।
सर्वदुःखप्रशमनं सर्वदारिद्र्यनाशनम् ।
कलशं तन्महाक्षेत्रं भद्रातीरे मनोहरे ॥

End :

ईश्वरः —
भर्गो नाम ऋषिश्रेष्ठः शिवपूजाधुरन्धरः ।
वेधुर्भस्य लिङ्गस्य तल्लिङ्गं पूजितो भव ॥
एवं वरौ ददाम्यामि तुङ्गभद्रासमीपयोः ।
सु × × × × × × ॥

Colophon :

इति श्री स्कान्दपुराणे तुङ्गभद्रोत्तरभागे कलशेश्वरद्वारदेशे विघ्नराज महिमानुवर्णनं नाम पञ्चमोऽध्यायः ॥

390

Sl.No : 18272 कल्याणक्षेत्रमाहात्म्यम् Ms: No · P. 3484/8

वन्दे तं देवमिन्धानं वाञ्छितार्थप्रदायकम् ।
वल्लभा × ढवामाङ्कं वारणेन्द्राननं सदा ॥
कदाचिन्नैमिशारण्ये कलिदोषभयापहे ।
निवसन्तं मुनिश्रेष्ठं सूतं पौराणिकोत्तमम् ॥
ते सर्वे मुनयश्शान्ता सर्वे क्षेत्रनिवासिनः ।
नैमिशारण्यमतुलं प्रापुः परमया मुदा ॥

End :

इति सूतमुनेर्वक्त्रात् विचित्रार्थमनोहरम् ।
कल्याणक्षेत्रमाहात्म्यं आकर्ण्य श्रुतिसंमितम् ॥
सर्वेऽपि मुनयः प्राप्य परमं हर्षसागरम् ।
आनन्दविवशा भूत्वा मनसाभ्यर्च्य भक्तितः ।
आनन्दभरिता नित्यं आचरन्ति परं तपः ॥
सूतोऽपि चिरमत्रास्ते शिवध्यानपरायणः ॥

Colophon :

इती श्रीस्कान्देयपुराणे सौरसंहितायां कल्याणक्षेत्रबिल्ववनमाहात्म्यं कुबेरेश्वरनामनिर्वचनं नाम षष्ठोऽध्यायः ॥

391

Sl. No : 18275 कामाक्षीमाहात्म्यम् Ms. No : P. 2519

Beginning :

सुरथ उवाच —

मुनीश करुणासिन्धो वेदवेदान्तवित्तम ।
इदानीं श्रोतुमिच्छामि त्रिपीठस्य रहस्यकम् ॥

मार्कण्डेय उवाच—

श्रृणु वक्ष्ये नृपश्रेष्ठ × × × × ।

कामकोटिमहापीठ × तेषु चोत्तमाः ॥

End :

त्रिधा देवी द्विधा शम्भुः एको विष्णुरिति क्रमात् ।

षड्ब्रह्मा तत्र कामाक्षि तत्र लीलानुभावतः ॥

निर्गुणं सगुणे ध्या × × × ×

Colophon :

इति श्रीमार्कण्डेयपुराणे श्रीविद्याखण्डे कामाक्षीविलासे भूतवन्धप्रकाशो नाम त्रयोदशोऽध्यायः ॥

392

Sl. No : 18279 कार्तवीर्यार्जुनमाहात्म्यम् Ms. No : P. 6852/4

Beginning:

× × × × सचक्रवान् ।

तस्य स्मरणमात्रेण हृतं नष्टं च लभ्यते ।

यो हरिः लोकरक्षार्थं आसीचक्रं हरेर्भुवि ॥

तन्नमामि महावीर्यं अर्जुनं कृतवीर्यजम् ॥

End :

एते वै कीर्तिताः सर्वे ये चान्ये नानुकीर्तिताः ।

ते सन्तु नः सदा साम्बाः साह्वकालं सुखावहाः ॥

आज्ञया कार्तवीर्यस्य योगेन्द्रस्यामितद्युतेः ॥

Colophon :

इति श्रीओड्डामरेश्वरतन्त्रे उमामहेश्वरसंवादे कार्तवीर्यार्जुनकवचमाहात्म्यं नाम द्वितीयोऽध्यायः ॥

393

Sl. No : 18281 | कार्तिकमाहात्म्यम् | Ms No : P. 363/4

Beginning :

यस्यास्ते निजवक्षसि प्रियतमा + +
सो नः पातु जगन्निदानपरमः संरक्षकः श्रीपतिः ॥

ऋषयः ऊचुः—

सूत नः कथितं पुण्यं माहात्म्यं माधवस्य च ।
भूयोऽन्यत् श्रोतुमिच्छामः कार्तिकस्य च वैभवम् ॥

End :

कृत्वा कार्तिकधर्मांश्च मुनयो मोक्षकांक्षिणः ।
पूजयामासुरव्यग्राः सूतं पौराणिकोत्तमम् ॥
पुनर्विनयसंपन्नाः तेऽपृच्छन् तीर्थसंभवम् ॥

Colophon :

इति स्कान्दपुराणे प्रायश्चित्तकाण्डे ईशानसंहितायां कार्तिकमाहात्म्ये त्रिचत्वारिंशोऽध्यायः- ॥

394

Sl. No : 18282 | कार्तिकमाहात्म्यम् | Ms. No : P. 364/1

Beginning :

श्री ब्रह्मोवाच—

कार्तिकस्य च मासस्य माहात्म्यं वद मे प्रभो ।
कर्तव्यं किं फलं तस्य तत्सर्वं वद विस्तरात् ॥

श्री हंसः—

साधु पृष्टं त्वया ब्रह्मन्— . . . .

End :

अश्वमेधसहस्रेषु वाजपेयशतेषु च ।
यत्फलं समवाप्नोति तत्फलं वनभोजनात् ॥

Colophon :

इति श्रीपाञ्चरात्रागमे कार्तिकमाहात्म्ये पञ्चत्रिंशोऽध्यायः ॥

395

Sl. No : 18283 **कार्तिकमाहात्म्यम्** Ms. No: P. 2071/5

Beginning :

ब्रह्मोवाच—

कार्तिक × × × वद मे प्रभो ।
कथं च कार्तिके मासि स्नानदानादिकाः क्रिया: ॥
कर्तव्याः किं फलं तस्य तत्सर्वं वद विस्तरात् ।

End :

एवं परम्पराप्राप्तमासमाहात्म्यमुत्तमम् ।
शृणुयाच्छ्रावयेद्वापि स याति परमां गतिम् ॥

Colophon :

इति पाञ्चरात्रागमे भारद्वाजसंहितायां हंसब्रह्मसंवादे कार्तिकमाहात्म्ये पूजाविधिसमाप्तियोगो नाम चतुर्दशोऽध्याय: ॥

396

Sl. No : 18290 **कार्तिकमाहात्म्यम्** Ms. No : P. 9016/1

Beginning :

श्रीमदानन्दतीर्थानां हृत्पद्मे संस्थितं हरिम् ।
नत्वा वैष्णवधर्मेषु सारस्संगृह्यते मया ॥

सूत उवाच—

पुरा कलियुगस्यान्ते ब्रह्मलोकं गतो मुनिः ।
ददर्श लोकनाथेशं ध्यायन्तं वै जनार्दम् ॥
वैष्णवं ब्रूहि मे धर्मं सर्वज्ञोऽसि पितामह ।

End :

निहन्ति तामसीं यत्तत्तामसं तदुपेक्षितम् ।
वसवः पितरो ज्ञेयाः रुद्राः ज्ञेयाः पितामहाः ॥
प्रपितामहास्तथादित्याः इत्येषा वैदिकी श्रुतिः ॥

Colophon :

इति स्मृतिपुराणादिषु वैष्णवाहृतमारोद्धारे कार्तिकमाहात्म्ये सप्तविंशो ऽध्याय: ॥

397

Sl. No : 18297 **कार्तिकमाहात्म्यम्** Ms. No: C. 186

Beginning:

सम्यक्पृष्टं मुनिवर: कलिबुद्धिप्रभञ्जिता: ।
विचरन्ति नरा मूढा: नानामार्गोपसेवका: ॥
तेषामर्थे भास्करेण प्रोक्तं व्रतमनुत्तमम् ।
भास्कर उवाच — शृण्वन्नरो भवन्तोऽपि . .

End :

इत्येतत्सर्वमाख्यातं कार्तिकस्य व्रतं मम ।
यत्कृत्वा सर्वपापेभ्य: मुक्तो भवति तत्क्षणात् ॥
अत: परं किं वक्ष्यामि तद्ब्रूह्यात्रेय सत्वरम् ॥

Colophon :

इति श्रीसनत्कुमारसंहितायां कार्तिकमाहात्म्ये कार्तिकव्रतोद्यापनविधिर्नाम चतुर्विंशतितमोऽध्याय: ॥

398

Sl. No : 18308 **कावेरीप्रान्तक्षेत्रमाहात्म्यम्** Ms. No: P. 5012/3

Beginning :

रङ्गनाथस्य ईशान्ये कावेर्या: संगमे पुरा ।
सोमवर्म इति ख्यात: महापापी दिवं ययौ ॥
+ + + + + + + ।
सह्यजादक्षिणे तीरे गजारण्यपुरोदिशि ॥

End :

तेनारोपितमश्वत्थं सेवन्ते वर्गकांक्षिण: ।
तस्य मूले चिरं स्थित्वा चचार तप उत्तमम् ॥
याज्ञवल्क्यमुनिं प्राप्य तपसा सत्यसुव्रत: ।
अवाप योगसामर्थ्यात् अणिमादिगुणांस्तथा ॥

Colophon :

— — —

399

Sl. No : 18309 **कावेरीमाहात्म्यम्** Ms No : P. 1239/2

Beginning :

श्रीयुधिष्ठिर उवाच—

देवदेवारविन्दाक्ष भक्तानामभयङ्कर ।
तीर्थानामुत्तमं तीर्थं क्षेत्राणां च तथोत्तमम् ।।
अस्ति चेद्वद मर्त्यानां पापशान्तिकरं भुवि ।
ममेच्छा वर्तते स्नातुं वीरहत्यापनुत्तमे ।।

End :

य इदं पुण्यमाख्यानं यःशृणोतीह मानवः ।
सर्वपापविनिर्मुक्तो मुक्तिभाक् च न संशयः ।।
पुत्रकामी लभेत्पुत्रं धनकामी लभेद्धनम् ।
मोक्षकामी लभेन्मोक्षं लभत्येव न संशयः ।।

Colophon :

इति भविष्योत्तरपुराणे कावेरीमाहात्म्येऽशीतितमोऽध्यायः ।।

400

Sl.No : 18310 **कावेरीमाहात्म्यम्** Ms: No . P. 3657/5

Beginning :

अजोऽपि यः क्रियायोगात नारायण इति श्रुवः ।
त्रिगुणाय त्रिवेदाय नमस्तस्मै स्वयंभुवे ।।
सूतमेकान्तमासीनं नैमिशारण्यवासिनः ।
मुनयो दीर्घसत्रान्ते पप्रच्छुर्दिव्यसंहिताम् ।।

End :

कावेर्याश्चैव माहात्म्यं यः पठेद्द्विजसन्निधौ ।
दशाश्वमेधिकं पुण्यं लभते नात्र संशयः ।।
कावेर्याश्चैव महात्म्यं यः शृणोति दिवानिशम् ।
सोऽश्वमेधसहस्रस्य फलं प्राप्नोति पुष्कलम् ।।

Colophon :

इत्युमामहेश्वरसंवादे कावेरीमाहात्म्ये दशमोऽध्यायः ॥
यस्या मध्ये हरिः शेते यन्मूलं ब्रह्मणा श्रितम् ।
पार्श्वद्वयं शिवं जूष्टं तस्यै सह्यभुवे नमः ॥

401

Sl. No : 18311 | कावेरीमाहात्म्यम् | Ms. No : P. 3981

Beginning :

यस्यां मध्ये हरिः शेते यन्मूलं ब्रह्मणा श्रितम् ।
पार्श्वद्वयं शिवैर्जुष्टम् तस्यै सह्यभुवे नमः ॥
अजोऽपि यः क्रियायोगात् नारायण इति स्मृतः ।
त्रिगुणाय त्रिवेदाय नमस्तस्मै स्वयंभुवे ॥

End :

माहात्म्यं परमं पवित्रममलं सर्वाघसंहारकं
कावेर्याः परमेश्वरेण कथितं शैलेन्द्रपुत्र्यै परम् ।
भक्त्या यः पठति प्रसन्नहृदयः विद्वत्समाजे पुनः
शम्भोर्मृत्युरपैति यश्च शृणुयात् यो वा लिखेदद्दम् ॥

Colophon :

इति श्रीस्कन्दपुराणे उमामहेश्वरसंवादे कावेरिमाहात्म्यवर्णनं नाम द्विसप्ततितमोऽध्यायः ॥

402

Sl.No : 18312 | कावेरीमाहात्म्यम् | Ms. No . P. 4208

Beginning :

धर्मवर्माथ राजर्षिर्निचुलापुरवल्लभः ।
भूयः पप्रच्छ तं नत्वा दाल्भ्यं भागवतोत्तमम् ॥
भगवन् सर्वधर्मज्ञ केनोपायेन तत्पराः ।
भवन्ति पुत्रान् संप्राप्य सुखिनश्चिरजीविनः ॥

End :

चातुर्मास्ये द्वादशीषु शाकाहारं प्रकुर्वतः ।
नि × कस्य गुरुं विकृतिर्नैव विद्यते ॥
मदुद्याने म × मने मदङ्गपरिवर्तने ।
शाकाहारं प्रकुर्वाणो हृदि शल्यं तदर्पितम् ॥
+ कोमलैस्तुलसीपत्रैरभ्यर्च्य हरिमाप्तवान् ॥

Colophon :

इति श्रीमदाग्नेयपुराणे कावेरीमाहात्म्ये षड्विंशोऽध्यायः ॥

403

Sl. No : 18316 कावेरीमाहात्म्यम् Ms. No : P. 558 /2

Beginnig :

कावेरीं कनकां पुण्यां सुज्योतीं ब्रह्मकुण्डिकाम् ।
धात्रीं वलम्बुरीं नित्यं वन्दे स्कन्दवनं महत् ॥ १ ॥
+ + यस्या मध्ये हरिश्शेते यन्मूलं ब्रह्मणा श्रितम् ।
पार्श्वद्वयं शिवैर्जुष्टं तस्मै सह्यभुवे नमः ॥

End :

इह लोकेऽखिलान् भोगान् भुक्त्वा ते परमां गतिम् ।
जग्मुस्तेषां सन्ततिस्तु अभूच्चक्रस्थिराभवत् ॥
एतच्चरित्रममलं कलुषापहारि
ब्रह्मादिसह्यतनयाविषयामृताब्धि ।
एतत्पिबज्जनवरोऽद्य गदादिशून्यो
यात्येव जन्ममृतितो रहितोऽमृतत्वम् ॥

Colophon :

इति श्रीस्कान्दपुराणे कावेरीमाहात्म्ये पञ्चदशोऽध्यायः ॥

404

Sl. No : 18320 कावेरीस्नानमहिमा Ms. No: P. 4212/21

Beginning :

कर्कटस्थे दिनानाथे सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कर्तव्यं वर्जयित्वा महापागाः ॥

महानदीराह कात्यायनः —

विना गङ्गां विना गोदां कृष्णवेणीं सरस्वतीम् ।

End:

आषाढ्याः सितमारभ्य भाद्रकृष्णान्तमेव च ।

क्षौरमभ्यञ्जनं चैव स्त्रीसङ्गं दन्तधावनम् ॥

आचरेद्यदि मूढात्मा पितृद्रोहात् पतेदधः ॥

इति पद्मपुराणे उत्तरखण्डे × × ॥

Colophon:

— — —

405

Sl. No : 18320 काशीमाहात्म्यम् **Ms. No : P. 4212/20**

Beginning:

एतत्ते चरितं राजन् × स्य महात्मनः ।

कथितं नः पठेद्भक्त्या ब्रह्मलोकं स गच्छति ।

भानुः —

तीर्थानामुत्तमं तीर्थं क्षेत्राणां क्षेत्रमुत्तमम् ।

वाराणसीति नगरी प्रिया देवस्य सूनुः ॥ (?)

यत्र विश्वेश्वरो देवः सर्वेषामेव देहिनाम् ।

End:

गाणापत्यमवाप्नोति देवदेवस्य शूलिनः ।

एवमुक्तं पुराणानां क्रमाद्वा न च तत्फलम् ।

प्रोक्तं समासतो विप्राः सूर्यो यत्स्वयमब्रवीत् ।

यः पठेत्प्रथमाध्यायं महादेवस्य सन्निधौ ।

सर्वपापविनिर्मुक्तो वाजपेयफलं भवेत् ॥

Colophon:

— — —

406

Sl. No : 18323 काशीमाहात्म्यम् Ms. No : P. 10592/50

Beginning :

एकस्मिन् रक्षिते चिन्ता यत्र काश्यां प्रयत्नतः ।
त्रैलोक्यरक्षणात् पुण्यं यत्स्यात्तस्यान्न संशयः ॥ १ ॥
ये वसन्ति सदा काश्यां क्षेत्रसंन्यासकारितः ।
त एव रुद्रा मन्तव्याः जीवन्मुक्ताः न संशयः ॥ २ ॥

End :

यत् षोडशमहादानैः पुण्यं प्रोक्तं महर्षिभिः ।
तत् पुण्यं जायते पुंसां विश्वेशे पुष्पदानतः ॥ ११ ॥
वाजपेयसहस्रेण सम्यगिष्टेन यत् फलम् ।
सकृन्महार्हनैवेद्यैः विश्वेशे तच्छताधिकम् ॥ १२ ॥

Colophon :

— — —

407

Sl. No : 18325 काशीमाहात्म्यम् Ms. No : B. 708/1

Beginnig :

× × × × × मधारयेत् ।
इन्दीवरदलश्यामं चतुर्बाहुं स्वलङ्कृतम् ॥
पद्मनेत्रं पद्मबाहुं पद्माद्यायुधधारणम् ।
जलान्तरसमुद्भासिपीताम्बरसमावृतम् ॥

End :

फलं सम्पूर्णतां याति विश्वेशस्य प्रसादतः ।
पठनीयं पाठनीयं प्रभाते तु विशेषतः ॥
सर्वान्कामानवाप्नोति विश्वेशानुग्रहो भवेत् ।

Colophon :

हरिः ओं तत्सदिति श्री पद्मपुराणे पातालखण्डे काशीमाहात्म्ये व्यासंवर्त चरित्रवर्णनं नामऽपञ्चमोऽध्यायः । काशीमाहात्म्यं समाप्तम् ॥

408

Sl. No : 18326 | काशीमाहात्म्यम् | Ms. No : C. 3922a

Beginning :

ब्रह्मोवाच —

कदाचित्सुप्रसन्नोऽभूद्वेदधर्मो महामतिः ।
शिष्याय सुविनीताय वरदानमचिन्तयत् ॥

वेदधर्मोवाच—

दीपकागच्छ भद्रन्ते वरं वरय सुव्रत ।
त्वयाहं तोषितः सम्यक् सेवया चानयानघ ॥

End :

कपिल उवाच—

इति नारायणमुखात् श्रुत्वा तु कमलजोद्भवः ।
रणयन्महतीं गायन् जगाम किल काशिकाम् ॥

Colophon :

इति श्रीकाशीमाहात्म्ये षष्ठोऽध्यायः ॥

409

Sl. No : 18327 | काशीमाहात्म्यटीका | Ms. No : C. 3922b

Beginning :

शिवाय नमः । ब्रह्मोवाच । कदाचिदिति ॥ १ ॥
वृषो धर्मः । सर्वाः सिद्धयो मृदः मृत्तिकासमाः ॥ ३ ॥

End :

सत्ययुगादिष्वपि वैश्चिदेव कर्तुं शक्यन्ते । न सर्वैः । कृतान्यपि च कस्यचित्सिद्धिं प्रयच्छन्ति । + + + काशी सदाचारसम्पन्नैः सदाऽऽराध्येत्युक्तमिति बोध्यम् ॥

Colophon :

इति श्री काशीमाहात्म्यव्याख्याने सेतुबन्धाभिधे षष्ठोऽध्यायः समाप्तः ॥

410

Sl. No : 18328 **काशीमहिमार्थदर्पणम्** Ms. No: P. 1976/2

Beginning :

यं ब्रह्म वेदान्तविदो वदन्ति
परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा
तस्मै नमो विघ्नविनायकाय ॥ + +

ಆವುದಾನೊಂದು ಕಾಶಿಯ ಪಟ್ಟಣದಲ್ಲಿ ಇದ್ದಂಥಾದ್ದಾದರೂ : ಅಲ್ಲಿ ವಾಸವಂ ಮಾಡಿದರ್ಗೆ ಪುನರುತ್ಪತ್ತಿ ಇಲ್ಲವಾದ ಕಾರಣ ತಾನು ಭೂಮಿಯಲ್ಲಿ ಸ್ವರ್ಗದಲ್ಲಿ ಇದ್ದವರ್ಗೆ ಪುನರಾವೃತ್ತಿ ಉಂಟು.

End :

द्वादशात्मा सप्तहयः भास्करः + + ।
लोकसाक्षी तमोविट् . . . . .

Colophon :

ಇಂತಿ ಕನ್ನಡಭಾಷೆಯಿಂದಂ ವಿರಚಿಸಿದ ಸ್ಕಂದ ಪುರಾಣೋಕ್ತಮಾದ ಕಾಶೀಮಹಿಮಾರ್ಥ ದರ್ಪಣದಲ್ಲಿ ಗಣಂಗಳು ಶಿವಶರ್ಮಂಗೆ ಯಮ ಲೋಕ ಧರ್ಮಾಧರ್ಮಂಗಳಂ ಪೇಳ್ದದು ಎಂಟನೆ ಅಧ್ಯಾಯಕ್ಕಂ ಮಂಗಳ ಮಹಶ್ರೀ ॥

411

Sl. No : 18329 **काशीरहस्यम्** Ms. No: A. 308/1

Beginning :

ऋषय ऊचुः—
युगेषु लोकचरितं श्रुतमस्माभिरादितः ॥ १ ॥
पुनः कलियुगस्यात्र स्वरूपं वर्णयादितः ।
कलिनाधममित्रेण वञ्चिता अपि सज्जनाः ॥ २ ॥

End :

सर्वेषां मङ्गलानां च मङ्गलं परमं स्मृतम् ।
गृहेऽपि लिखितं पूज्यं सर्वमङ्गलसिद्धये ॥

Colophon :

इति श्रीब्रह्मवैवर्तपुराणे तृतीयभागे श्रीकाशीरहस्ये पञ्चविंशोऽध्यायः ॥

412

Sl. No : 18330 काशीरहस्यटीका Ms. NO : A. 308/2

Beginning :

महामायामहाकालसहायं यक्षयोरिव ।
लीलया पञ्चकृत्येशं हार्लेखं धाम मन्महे ॥ १ ॥
पञ्चकृत्यानि तु पञ्चविधं तत्कृत्यम् । (?)
सृष्टिस्थितिसंहारतिरोभावः तद्वदनुग्रहणकरणम् ।

End :

सहस्रपञ्चकं चैव त्रिशतोत्तरमेव च ।
सङ्ख्या काशीरहस्य सटीकस्य समीरिता ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशिवानन्दसरस्वतीपूज्यपादशिष्येण विद्यानन्दसरस्वत्या विरचिते काशीरहस्यव्याख्याने सेतुबन्धाभिधे षड्विंशोऽध्यायः ॥ श्रं काशीरहस्यव्याख्या समाप्ता ॥

413

Sl. No : 18331 कुम्भघोणमाहात्म्यम् Ms. No : P. 79/6

Beginning :

वैशम्पायनः—
श्रुत्वैतद्रङ्गनाथस्य वैभवं भाग्यवर्धनम् ।
विसयानं महाप्राज्ञं भसो × × ।
अथातः सम्प्रवक्ष्यामि रङ्गनाथस्य वैभवम् ।
यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥

End :

अवाप तत्र कृपया तपसा च शुभव्रतः ।
शृण्वतां वदतां चेदं एतद्भागं भवेत्कृतम ॥

Colophon :

इति हरिवंशे शेषधर्मे चन्द्रपुष्करिणीप्रशंसायां कुम्भघोणमाहात्म्यकथनं नाम चतुश्चत्वारिंशोऽध्यायः ॥

414

Sl. No : 18332 कुम्भघोणमाहात्म्यम् Ms. No: P. 79/7

Beginning :

एतत्कल्याणराजीवनळिने मध्यमन्दिरे ।
कुम्भघोगे शयानस्य शार्ङ्गपाणेः प्रशासनम् ॥
श्रीनारदः—
जम्बूद्वीपे विशेषेण वर्षे भारतसंज्ञिके ।
तीरे सह्यभुवो नद्याः कुम्भघोगसमाह्वयम् ॥
क्षेत्रं क्षेमकरं पुंसामपवर्गमहापथम् ।

End :

इति स्तुतो भानुमता सुदर्शनो
हतप्रभेणोवथात्म वैमतः । (?)
शशाम यामातिशयेन धाम्ना
सहस्रभानौ कृपया प्रसन्नः ॥

Colophon :

इति भविष्यत्पुराणे कुम्भघोणमाहात्म्ये चतुश्शततमोऽध्यायः ॥

415

Sl. No : 18333 कुम्भघोणमाहात्म्यम् Ms. No : C. 1904

Beginning :

भगवन् पद्मसंभूत परमज्योतिरुद्भव ।
परावरजगत्सृष्टिस्थितिसंहारकारग ॥
वर्णितं भवता सर्वं पुण्यक्षेत्रकदम्बकम् ।
जम्बूद्वीषे विशेषेण वर्षे भारतसंज्ञिके ।
तीरे सिन्धुभुवो नद्याः कुम्भघोणसमाह्वयम् ॥

End :

इत्येवमेतत्किल कुम्भघोण
क्षेत्रस्य माहात्म्यमुदाहृतं च ॥

श्रुत्वा मुनीन्द्रा अपि तत्समीपे
व्रजन्ति तत्रैव समाचरन्तः ।
यत्रास्या × × × ×
× × × × प्रयान्ति ।
किं भूय एव ष्टतादरस्त्वं (?)
यच्छ्रोतुमिच्छस्यपि तच्छृणुष्व ॥

Colophon :

इति भविष्योत्तरपुराणे कुम्भघोणमाहात्म्ये मध्यमखण्डे ब्रह्मनारदसंवादे द्वादशोऽध्यायः ॥

416

Sl. No : 18334 **कुमारक्षेत्रमाहात्म्यम्** Ms. No : P. 4700/2

Beginning :

श्री × वाच--
नःपुरस्तान्महाक्षेत्रं कुमारमिति विश्रुतम् ।
महापातकसंहारि धारावारिपरिष्कृतम् ॥
सर्वाभीष्टप्रदं नृणां × त्ययकारकम् ।
× × × भूकैलासं विदुर्बुधाः ॥

End :

इतीदं कथितं विप्राः क्षेत्रस्यास्य च वैभवम् ।
महापापहरं पुण्यं श्रवणात्कष्टनाशनम् ॥
सर्वदारिद्र्यशमनं सर्वस × धायकम् ।
श्रुत्वेदं पुण्यमाख्यानं कुमारक्षेत्रसंज्ञकम् ॥
भुक्त्वा भोगानिहामुत्र परमां लभते गतिम् ।

Colophon :

इत्यादिमहापुराणे श्रीस्कान्दे सनत्कुमारसंहितायां सह्याद्रिखण्डे कुमारक्षेत्र-माहात्म्ये सप्तदशोत्तरशततमोऽध्यायः ॥

417

Sl. No: 18336 **कुरङ्गक्षेत्रमाहात्म्यम्** Ms. No: P. 2977

Beginning:

श्रीमत्सुन्दरमीशानं श्रीमत्सिद्धिविनायकम् ।
षण्मुखं स्कन्दमानन्दं विष्णुं ब्रह्माणमाश्रये ॥
वेदव्यासः—
तदिदं जगदुत्पत्तिस्थितिसंहारकारणम् ।
शासनं शाश्वतं विष्णोः श्रीकुरङ्गनिवासिनम् ॥

End:

यः पठेत् शृणुयान्नित्यं श्रावयेच्छुद्धमानसः ।
स सर्वकिल्बिषैर्मुक्तः पूर्णकामः समृद्धिमान् ॥
विमुक्तो योगयुक्तः सन् साक्षात्कृत्य सनातनम् ।
तत् सूरिसेव्यं परमं वैष्णवं पदमाप्नुयात् ॥

Colophon:

इति ब्रह्माण्डपुराणे श्रीकुरङ्गमाहात्म्ये गङ्गानारदसंवादे षष्ठोऽध्यायः ॥

418

Sl. No: 18337 **कुरुकामाहात्म्यम्** Ms. No: P. 2971/10

Beginning:

पराशर्यं मुनिश्रेष्ठं आसीनं गन्धमादने ।
समाजे मुनिवर्याणां शुको वचनमब्रवीत् ॥
श्रीमद्वेदान्तसारार्थविवेचनविशारद ।
त्वं सर्वज्ञतमस्तात साक्षान्नारायणो गुरुः ।
मेरौ मुनिसमाजे तु ज्ञातव्यान्यखिलान्यपि ।

End:

श्रुतिसुखमुपगीतं सूतपुत्रस्य वाक्यं
मधुरमतिरहस्यं नैमिशीया मुनिन्द्राः ।
मुनिवरमुपकारैः सम्यगाकर्ण्य हृष्टाः
तदनु मधुरवाग्भिः पूजयन्ति स्म पूज्यम् ॥

Colophon :

इति ब्रह्माण्डपुराणे द्वादशसाहस्रिकायां संहितायां क्षेत्रखण्डे कुरुका माहात्म्यं वृकराजमोक्षणं नाम चतुर्दशोऽध्यायः ॥

419

Sl. No : 18339 **कुरुक्षेत्रमाहात्म्यम्** Ms. No : C. 4436

Beginning:

नत्वा विश्वेश्वरं साम्बं कृत्वा च गुरुवन्दनम् ।
कुरुक्षेत्रायतीर्थानां क्रमः सम्बध्यते मया ॥

अथ थानेश्वरनगरात् ईशान्यां क्रोशद्वयोपरि रत्नकं गत्वा तत्र रत्नका दुत्तरस्य शरक्षेपो . . . .

End :

अत्र सर्वपापक्षयपूर्वकब्रह्मलोकफलं स्नाने तर्पणे पितृणामक्षया तृप्तिः अनन्त फलभाक्तृप्ता श्राद्धे युगत्रयावद्वित्रकालं पितृतृप्तिः श्राद्धकर्तृदुर्लभफलावाप्तिश्च ।

Colophon :

इति कुरुक्षेत्रप्रकर्म समाप्तम् ॥

420

Sl. No :18340 **कूर्मजयन्तीव्रतमाहात्म्यम्** Ms. No :P. 9993/12

Beginning :

ब्रह्मणः सदने पूर्वं कथितं कीर्तिवर्धनम् ।
सर्वपापप्रशमनं नारदाय महात्मने ॥
नारदः पर्यपटन् दैवात् मायतो ब्रह्मणः पदम् ।
ब्रह्माणं मुनिवृन्दैश्च सेव्यमानं सुरोत्तमैः ॥

End :

सवस्त्रप्रतिमां कुम्भं प्रदद्याद्ब्राह्मणाय च ।
तत्तो दृष्टम × × × × ॥
इतीदं कथितं वत्स व्रतं निर्वाणदायकम् ।
यत् श्रुत्वा मुच्यते सद्यः पापैः सोऽपि न संशयः ॥

Colophon :

इति श्रीब्रह्माण्डपुराणोक्त कूर्मजय × × × ॥

421

Sl. No : 18341 कृत्तिकामाहात्म्यम् Ms No : P. 2632/2

Beginning :

सूतः—

पुरा कलियुगस्यान्ते ब्रह्मलोकं गतो मुनिः ।
पितामहं महाप्राज्ञं सर्वलोकहिते रतम ॥
स्तूयमानं सुरगणैः ध्यायमानं सुरासुरैः ।
ददर्श लोकनाथेशः ध्यायमानं जनार्दनम् ॥

End :

पुराणमन्यथा कृत्वा मल्लिंगं यान्ति रौरवम् ।
इदं कार्तिकमाहात्म्यं पठेद्वा शृणुयान्नरः ।
सर्वेऽपि श्रवणाद्यान्ति तद्विष्णोः परमं परम् ॥

Colophon :

इति श्रीमत्स्कान्दे पुराणे कृत्तिकामाहात्म्ये सारोक्तसौरगे द्वादशोऽध्यायः ॥

422

Sl. No : 18 42 कृत्तिकामाहात्म्यम् Ms. No: P. 4158

Beginning :

विशुद्धविज्ञानघनस्वरूपं
× × नवद्धदीक्षम ।
दयानिधिं देहभृतां शरण्यं
देवं हयग्रीवमहं प्रपद्ये ॥
श्रियः पतिमथामन्त्र्य गते देवर्षिसत्तमे ।
हर्षोत्फुल्लाननोऽभ्येत्य वासुदेवं तदाब्रवीत् ॥

End :

दीक्षारण्ये दीपदानात् काञ्च्यां मुक्ताफलैर्भवेत् ।
हस्तिशैले विद्रुमस्य दानाद्यत्फलमाप्नुयात् ॥

शोणाचले गन्धदानात्कर्पूराणां च लेपनात् ।
यत्फलं प्राप्यते मर्त्यो एतत् श्रुत्वा तदाप्नुयान् ॥
ये मानवाः कार्तिकमासि भक्त्या
स्नानं च दीपान् हरिपूजनं च ।
दानं व्रतं ब्राह्मणभोजनादि
कुर्वन्ति ते स्वर्गकुटुम्बिनः स्युः ॥

Colophon :

इति श्रीपाद्मे पुराणे कृत्तिकामाहात्म्ये त्रिंशोऽध्यायः ॥

423

Sl. No : 18343 **कृष्णक्षेत्रमाहात्म्यम्** Ms. No : P. 40

Beginning :

उत्पालुवर्तके दिव्ये विमाने पुष्करेक्षणम् ।
शौरिराजमहं वन्दे सदा सर्वाङ्गसुन्दरम् ॥
सू × × × ना महर्षयः ।
ऊचुः × × कीर्तिताः ॥

End :

अष्टाक्षरस्य देशास्तु नातः पूर्वमुदीरिताः ।
अस्य मन्त्रस्य को देशः × मन्त्रसिद्धिदम् ॥
अष्टाक्षरफलं लभ्यं क्षेत्रं तत्रैव ना × × तम् ।
कृष्णक्षेत्रस्य माहात्म्यमेतत × × ॥
श्रोतुं वाञ्छा वर्तते वा किमन्यत्
भूयस्तच्चदुच्यतां तां तापसे × ×
(इत्येतदन्त एवायां ग्रन्थः अतः परं ग्रन्थसमाप्तिवाक्यं तु दृश्यते ।)

Colophon :

इति पाद्मे पुराणे पञ्चमे खण्डे मन्त्रसिद्धिप्रदेशकथने श्रीकृष्णक्षेत्रमाहात्म्ये एकादशतमोऽध्यायः । श्रीकृष्णक्षेत्रमाहात्म्यं संपूर्णम् ॥

424

Sl. No : 18344 कृष्णजयन्तीमाहात्म्यम् Ms No : P. 10544/2

Beginning :

नमो विष्णुपदांभोजनवभक्तिपुधोदयान् ।
कथयामि कथां दिव्यां महादुरितहारिणीम् ।।
अस्ति तावत्समस्तस्य कलिदोषस्य भेषजम् ।
महायोगीश्वरश्रेष्ठैः शुकाद्यैरनुभाषितम् ।।

End :

धृत्वा कृष्णाङ्गनिर्माल्यं रात्रिशेषं समाप्य च ।
प्रातः स्वामिगृहं गत्वा भुक्त्वा च तदनुज्ञया ।।
समाप्तव्रतचर्योऽहमुत्तीर्णो भवसागरात ।
एवं पुरातनभवे यथावृत्तमुदाहृतम् ।।
अवाच्यमेतदन्येषां गुरुत्वममयतः ।। (?)
सर्वपापविनिर्मुक्तो विष्णोः पदमवाप्नुयात् ।
पादोदकेन देवस्य भक्त्या युक्ताः समन्विताः ।।
शुद्ध्यन्ते नात्र सन्देहो तस्य शङ्खोदकैरिव ।
यं संप्राप्य सुरैर्देवैः प्रक्षया × × ।।

Colophon :

इति श्रीब्रह्माण्डपुराणे प्रथमकाण्डे कृष्णजयन्तीमाहात्म्ये चतुर्दशोऽध्यायः ।।

425

Sl. No : 18346 कृष्णमाहात्म्यम् Ms No : C. 1911

Beginning :

ऋषय ऊचुः—

त्यक्ष्यामो भगवान् पृष्टः तस्यार्थे चातिदुस्त्यजान् ।
सङ्गदोषादन्नदोषान्निर्वीयान् भ्रष्टबीजकान् ।।

तदेवं कलिदोषेभ्यो भीताः स्वमिन् समुद्यताः ।
वयं महापथं गन्तुं किञ्च नः शरणं वद ॥

End :

पुत्रार्थी लभते पुत्रं धनार्थी धनमाप्नुयात् ।
विद्यार्थी लभते विद्यां जयार्थी लभते जयम् ॥
ज्ञानार्थी लभते ज्ञानं मोक्षार्थी मोक्षमाप्नुयात् ।
य इदं पठते नित्यं शृणोति श्रावयेत्तथा ।
सर्वान् कामानवाप्नोति विष्णोः पदमवाप्नुयात् ॥

Colophon :

इति श्रीस्कन्दपुराणे कृष्णामाहात्म्ये सागरसंगमकथाविवर्णनं नाम षष्टितमो ऽध्यायः ॥

426

Sl. No : 18348 केदारव्रतमाहात्म्यम् **Ms. No : P. 10236/10**

Beginning :

ऋषय ऊचुः—
सूत सर्वार्थतत्त्वज्ञ सर्वधर्मविशारद ।
इदानीं श्रोतुमिच्छामः केदारेशव्रतं शुभम् ॥
सूत उवाच —
शृणुध्वं ऋषयस्सर्वे सर्वसम्पत्करं शुभम् ।
धर्मपुत्राय कथितं श्रीकृष्णेन महात्मना ॥

End :

पुण्यवत्यपि तं प्राह मत्सुतः कथमागतः ।
सराज्यो वाप्यराज्यो वा कथयस्व तमागतम् ॥
द्वारपालस्तदा प्राह भ्रष्टराज्य इहागतः ।
इति तेनोक्तमाकर्ण्य खेदं प्राप्ता जगाद ह ॥

427

Sl. No : 18349 केरळमाहात्म्यम् Ms. No: B. 1059

Beginning :

कृतादौ सोमवंशे च जातः कश्चिन्महीपतिः ।
नर्मदायास्तटे सोऽपि कृतवीर्याभिधः पुरा ॥
अवन्त्याद्येषु देशेषु राजाऽभूद्दक्षिणे पथि ।
तस्य पत्नी कुमारी च पातिव्रत्यमहोत्सवा ॥

End :

सूतं महात्मानमिदं बभाषिरे
सम्पूज्य पीठे सहसैव दक्षिणाम् ।
दद्युश्च सर्वे मुनयो नृपोत्तमाः
पुष्पैश्च वस्त्रैरनिशं सुपूज्यते ॥

Colophon :

इत्यार्षे श्रीमत्परशुरामायणे अगस्त्यसंहितायां भूगोळे पुराणे केराळमाहात्म्ये गर्गयुधिष्ठिरसंवादे सप्तशततमोऽध्यायः ॥

428

Sl. No : 18350 कोहळगालवक्षेत्रमाहात्म्यम् Ms. No : B. 957

Beginning :

ऋषयः—

यदुक्तं भवता पूर्वं गजारण्यप्रशंसनम् ।
पुळिनेश्वरलिङ्गस्य माहात्म्यं पापनाशनम् ॥
पुरा तु गालवो नाम मुनिर्ब्रह्मपरायणः ।
कोहळश्च महाभागः मतङ्गस्य तनूभवः ॥

End :

इति सूतवचः श्रुत्वा मुनयः शौनकादयः ।
हर्षेण पूजयामासुः सूतं पौराणिकोत्तमम् ॥

Colophon :

इति स्कान्दपुराणे क्षेत्रखण्डे स्कन्दनन्दीशसंवादे काहलगालवक्षेत्रमाहात्म्य निरूपणं नाम पञ्चाशीतितमोऽध्यायः ॥

429

Sl. No : 18351 | कैशिकपुराणम् | Ms. No : P. 637/1

Beginning :

शुक्लाम्बरधरं + + शान्तये ।
यो नित्यम + + प्रपद्ये ॥
श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
महावराहदंष्ट्राग्रमल्लीकोशमधुव्रतम् ।
प्रलयोदन्वदुत्तीर्णं प्रपद्येऽहं वसुन्धराम् ॥

End :

कृत्वा तु विपुलं कर्म स ब्रह्मत्वमुपागतः ।
एतद्गीतफलं देवि कथितं तु समासतः ॥
यस्तु गायतु शुश्रोणि कौमुदद्वादशीदिने ।
सर्वसङ्गान् परित्यज्य मम लोकं स गच्छति ॥

Colophon :

इति श्रीवराहपुराणे वराहभूमिसंवादे चण्डालगीतवैभवो नाम चत्वारिंशोऽध्यायः ॥

430

Sl. No : 18356 | कृष्णजयन्तीमाहात्म्यम् | Ms No : P. 2515/3

Beginning :

श्रीभगवानुवाच —

जागरे तु विशालाक्षि जानतो वाप्यजानतः ।
यो मे प्रगायते गीतं मम भक्त्या व्यवस्थितः ॥

स्वस्त्यस्तु सन्मङ्गलानि सन्तु श्लोकैकश्रवणपठनतावन्मात्रेण वक्तुश्च श्रोतॄणां सकलविधधर्मार्थप्रदे श्रीमति वराहपुराणे अद्य कथाप्रारम्भे सति पूर्वकथा वृत्तान्तः । सङ्गतिः ।।

End :

आख्यानानां महाख्यानं तपसां च महत्तपः ।
धर्माणां परमो धर्मः क्रियाणां च महत्क्रिया ।
मा पठेच्छास्त्रमूढानामेतन्मध्ये कदाचन ।
य इच्छेत् परमां सिद्धिं मम लोकं स गच्छति ।।

Colophon :

इति श्रीमद्वराहपुराणे श्रीवराहभूमिसंवादे सप्तमोऽध्यायः ॥

431

Sl.No : 18360 **कैशिकमाहात्म्यव्याख्या** **Ms: No . P. 2138/3**

Beginning :

ಶ್ರಿಯಃಪತಿಯಾಗಿ ಅವಾಪ್ತ ಸಮಸ್ತ ಕಾಮನಾಗಿ ಅಖಿಲ ಹೇಯಪ್ರತ್ಯನೀಕನಾಗಿ ಇದ್ದಂಥ ಸರ್ವೇಶ್ವರನು ವೈಕುಂಠೇ .... ತ್ತಮಃ ಎಂಬ ಶ್ರೀ ವೈಕುಂಠ ಲೋಕದಲ್ಲಿ ಶ್ರೀ ಭೂಮಿ ನೀಳಾ ಸಮೇತನಾಗಿ ನಿತ್ಯ ಮುಕ್ತಾನುರೂಪ್ಯನಾಗಿದ್ದಂಥ ಸರ್ವೇಶ್ವರನು — × × ×

End :

ಬಾರೈ ಭೂಮಿದೇವಿಯೇ ಈ ಗೀತಫಲವನ್ನು ವಿಸ್ತಾರವಾಗಿ ಹೇಳಲ್ಪಟ್ಟಿತು. ಈ ಗೀತಫಲವನ್ನು ಯಾವನೊಬ್ಬನು ಕಾರ್ತಿಕ ಶುದ್ಧ ದ್ವಾದಶಿಯಲ್ಲಿ ...... ಯವರ ಮುಂದೆ ಹೇಳುತ್ತಲಿದ್ದಾನೊ ಅವನೀಗಲೇ ಸರ್ವ ಸಂಗವನ್ನು ಬಿಟ್ಟು ನನ್ನ ಲೋಕಕ್ಕೆ ಬರುವನು. .... ಎಂಬಲ್ಲಿಗೆ ಅಧ್ಯಾಯಾರ್ಥಂ.

Colophon :

इति श्रीवराहपुराणे चतुर्विंशोऽध्यायः ।।

लाभस्तेषां जयस्तेषां . . . . . पराभवः ।
येषां इन्दीवर . . . . . जनार्दनः ।।
स्वस्ति प्रजाभ्यः . . . . . भवन्तु ।
कावेरी . . . . . श्रीश्च वर्धताम् ।।

432

Sl. No: 18362 कैशिकमाहात्म्यव्याख्या **Ms. No: B. 399/2**

Beginning:

ಟೀಕು—ಆದಿವರಾಹನ ಕೋರದಾಡೆಗಳ ಅಗ್ರಗಳೆಂಬ ಮಲ್ಲಿಗೆಮೊಗ್ಗು ಗಳಿಗೆ ಭ್ರಮರದಂತಿರುವ ಪ್ರಳಯಕಾಲದಲ್ಲಿ ಸಾಗರದಿಂದ ಉದ್ಧೃತವಾದ ಭೂಮಿಯನ್ನು ನಾನು ನಮಸ್ಕರಿಸುತ್ತೇನೆ, ಆಶ್ರಯಿಸುತ್ತೇನೆ ॥ ೧ ॥

End:

ಎಲೈ ಭೂಮಿಯೆ, ಯಾವ ಮನುಷ್ಯನಾದರೂ ಕಾರ್ತಿಕ ಶುದ್ಧ ದ್ವಾದಶೀ ದಿವಸದಲ್ಲಿ ನನ್ನನ್ನು ಗಾನ ಮಾಡುತ್ತಾನೊ, ಆ ಮನುಷ್ಯನು ಸರ್ವ ಸಂಗ ಗಳನ್ನು ಪರಿತ್ಯಾಗಮಾಡಿ ನನ್ನ ಲೋಕ—ವೈಕುಂಠವನ್ನು ಹೊಂದುತ್ತಾನೆ,

Colophon:

इति वराह पुराणे क्षेत्रखण्डे आदिवराह भूदेवी संवादे × ×

433

Sl. No: 18364 खादिरमाहात्म्यम् **Ms. No: P. 1757/1**

Beginning:

× × × न धराश्रये ।
न्यायशास्त्रार्थकुशला मीमांसापारदृष्टयः ॥
शब्दशास्त्रप्रवीणाश्च स्वकर्मनिरताः सदा ।
यज्ञैर्दानैर्जपैर्होमैर्विष्णुप्रीतिकरं मुने ॥
यत्र भागवतश्रेष्ठावन्तः पादाम्बुजद्वयात् ।
× × × राधनोत्सुकाः ।
तत्र ते × × संप्रामेष्वनि . . तेने ॥

End:

यद्यद्ददाति तीर्थेऽस्मिन् तत्तदानन्त्यमुच्यते ।
भूमिदानं प्रशस्तं स्यादस्मिन् क्षेत्र विशेषतः ॥
श्रुतिनिचयवर्यो व्यास आगत्य यस्मिन्
× × वारि तस्य प्रमोदात ।

स्रवति च तदिदानीं क्षेत्रमुक्तं सुरर्षे
वरणपतिनिवासं पावनं लोकपूज्यम् ॥

Colophon :

इति ब्रह्माण्डपुराणे × × खादिरमाहात्म्ये गाङ्गातीर्थकथनं नाम षष्ठोऽध्याय: ॥

434

Sl.No : 18368 गजारण्यमहिमा Ms. No : P. 6487/1

Beginning :

गजारण्यं पुण्यतमं मध्ये सोमार्कशैलयो: ।
वैद्यनाथादिभिस्तत्र मूर्तिभि: दीप्यते शिव: ॥
पुत्रकामोऽर्थकामो वा राज्यकामोऽथवा नर: ।
गजारण्येश्वरे सर्वान् कामानाप्नोत्यसंशयम् ॥

End :

सेवकानां स्वभक्तानां मुक्तिदो नात्र संशय: ॥
गजारण्यस्य माहात्म्यं य: पठेच्छृणुयादपि ।
सर्वान्कामानवाप्नोति स्वर्गलोके सुखी भवेत् ॥

Colophon :

इति श्री उमामहेश्वरसंवादे कावेरीमाहात्म्ये गजारण्यमहिमानुवर्णनं नाम एकषष्टितमोऽध्याय: ॥

435

Sl. No : 18371 गणेशमाहात्म्यम् Ms. No : P. 1761/6

Beginnig :

स्कन्द उवाच —
शिवशम्भो महेशान सर्वदा सर्वदायक ।
अख्यानानि सुपुण्यानि श्रुतानि त्वन्मुखाम्बुजात् ।
अतस्त्वं कृपाया ब्रूहि गणेशचरितं मम ॥

End :

मुच्यन्ते पितरस्तस्य श्रृणुयाच्छ्रावयेदिदम् ।
अयं गोप्यतमः स्कन्दमहीपालैर्मयेरितः ।।

श्री व्यासः—

शिवेन गदितो विप्राः सर्वः स्कन्दाय पृच्छते ।
वैनायकोऽयं महिमा स भवद्यो निवेदितः ।।

Colophon :

इति स्कान्दपुराणे विनायकमाहात्म्ये शिवस्कन्दसंवादे गणेशावतारवर्णनं नाम चतुर्दशोऽध्यायः ।।

436

Sl. No : 18375 गयामाहात्म्यम् **Ms. No : P. 3971**

Beginning :

सनकाद्यैर्मुनिगणैर्देवर्षिः स च नारदः ।
सनत्कुमारं पप्रच्छ प्रणम्य विधिपूर्वकम् ।।

नारद उवाच—

सनत्कुमार मे ब्रूहि तीर्थं तीर्थोत्तमोत्तमम् ।
तारकं सर्वभूतानां पठतां श्रृण्वतां तथा ।।

End :

सनत्कुमार उवाच—

वक्ष्ये तीर्थं परं ब्रह्मण्यं श्राद्धादौ सर्वतारकम् ।
गयातीर्थं सर्वदेशे तीर्थेभ्योऽप्यधिकं बहु ।।

सूत उवाच—

सनत्कुमारो मुनिपुङ्गवाय
दिव्यां कथां तत्र निवेद्य भक्त्या ।
स्वमाश्रमं रम्यधनैरुपेतम्
विसृज्य संगीतगुरुं जगाम ।।

Colophon :

इति श्रीवायुपुराणे श्वेतवराहकल्पे गयामाहात्म्ये अष्टमोऽध्यायः ।।

437

Sl. No : 18380 गरलपुरमाहात्म्यम् Ms. No: P. 376/6

Beginning :

पारशर्यं परमपुरुषं विश्ववेवैकयोनिं
विद्याधारं विमलमनिदं वेदवेदान्तवेद्यम् ।
शश्वच्छान्तं शमितविषयं शुद्धबुद्धिं विशालं
वेदव्यासं विमलयशसं सर्वदाहं नमामि ॥
नाचाम्बिका + नञ्जुण्डलिंगवपुषं गिरिजाधिनाथम् ॥
मुनयः शौनकाद्यास्तु नैमिशारण्य वासिनः ।

End :

लिखितं पुस्तकं वापि पूजयन्ननुमोदयन् ।
स सर्वांमीष्टमाप्नोति परे मुक्तिमपि व्रजेत् ॥
इत्युक्तमेतद्विषकन्धरेण
सम्यग्भवान्यै भवतां मया च ।
तस्माद्भन्तो निवसन्तु तत्र
श्रीभूमिकैलासपुरे सुखेन ॥

Colophon :

इति श्री स्कन्दपुराणे गरलपुरमाहात्म्ये द्वादशोऽध्यायः ॥

438

Sl. No : 18381 गरळपुरमाहात्म्यम् Ms. No : P. 1941

Beginning :

मुनयः शौनकाद्यास्तु नैमिशारण्यवासिनः ।
सत्रमारेमिरे कर्तुं तत्र द्वादशवार्षिकम् ॥
ततः समाययौ सूतः श्रुत्वा पौराणिकोत्तमः ।
ऋषयोभ्यागमन् सर्वे जटावल्कलधारिणम् ॥

End :

इत्युक्तमेतद्विषकन्धरेण
सम्यग्भवान्यै भवतां मया च ।
तस्माद्भवन्तो निवसन्तु तत्र
श्रीभूमिकैलासपुरीं सुखेन ॥

Colophon :

इति स्कान्दपुराणे गरळपुरीमाहात्म्ये द्वादशोऽध्यायः ॥

439

Sl. No : 18386 गरळपुरीमाहात्म्यम् **Ms. No: P. 1045/1**

Beginning :

ಮಂಗಳವ ನಮಗೀವು ಬಂಧುತ
ರಂಗಿಣೀಧರ ವೃಷಭರಾಜ ತು
ರಂಗಚಿತ ಸಾರಂಗ ದಾನವ ಸರ್ವಮಂಗಳೆಯಾ
ತುಂಗ ಕುಚಗಳ ಕುಂಕುಮಾಂಕಿತ
ಮಂಗಳಾಂಗ ಮಹೋತಪರಶುಕ
ರಂಗ ವರದಾಭಯ ಶರಾಬ್ಜ ಸುಮೇರುಕೋದಂಡಾ ॥

End :

ಈ ಪ್ರಕಾರಮಾಗಿ ನೀಲಕಂಠನಿಂದ ಭವಾನಿಯಂ ಕುರಿತು ನಿರೂಪಿಸಲ್ಪಟ್ಟಿದನೇ ನಿಮಗೆ ನನ್ನಿಂದ ಹೇಳಲ್ಪಟ್ಟಿತು, ಆದುಕಾರಣ ಶ್ರೀಭೂಕೈಲಾಸಪುರದಲ್ಲಿ ಸುಖದಿಂದ ವಾಸಮಾಡುವುದು. ಸೂತಪೌರಾಣಿಕನು ಶೌನಕಾದಿಗಳುಂ ಕುರಿತು ಗರಳಪುರ ಮಹಿಮೆಯುಂ ಪೇಳಿದನು.

Colophon :

ಇಂತು ಮಹೀಶೂರ ಸೇನಾಪತಿ ಕಳಲೆಯ ದೊಡ್ಡ ವಸುಧಾಧಿಪತಿ ಸುರಸುಜನನುತ ವೀರಧರಣೀಶ ತನುಭವ ನಂಜ ನರಪತಿ ರಚಿತಮಾದ ಸ್ಕಂದ ಪುರಾಣೋಕ್ತ ಗರಳಪುರ ಮಹಿಮಾದರ್ಶವೆಂಬೀ ಕರ್ನಾಟಕ ಭಾಷಾಕೃತ ಟೀಕಿನಲ್ಲಿ ಹನ್ನೆರಡನೆಯ ಅಧ್ಯಾಯವು,

440

Sl. No : 18389 गायत्रीमाहात्म्यम् **Ms. No : P. 10317/6**

Beginnig :

नमस्कृत्य भगवान् याज्ञवल्क्यः स्वयम्भुं परिपृच्छति त्वं ब्रूहि ब्रह्मन् गायत्र्या उत्पत्तिं श्रोतुमिच्छामि । ब्रह्मज्ञानोत्पत्तिं प्रकृतिं परिपृच्छामि ।

ब्रह्मोवाच—

प्राणिनव्याहृतयः प्रवर्तन्ते । तमसस्तु परं ज्योतिः ॥

End :

इत्यादिरूपेण सत्यज्ञानादिलक्षणम् नोस्माकं बहुधाभ्यस्तु भेदभिन्न दशां तथा । प्रबोदया × प्रार्थनैव विशिष्यते । यो देवःसवितास्माकं धियो धर्मादिगोचराः प्रेरयिष्येव × मुपास्महे ॥ (?)

Colophon :

— — —

441

Sl. No : 18390 गायत्रीयन्त्रमाहात्म्यम् Ms. No : C. 3410/7

Beginning :

कैलासशिखरासीनं शिवं पप्रच्छ पार्वती ।
गायत्र्याः सुमहच्चक्रं मम ब्रूहि महेश्वर ॥

End :

श्रीहरिं पूजये × माचक्रराजस्तवं पठेत् ।
सर्वसिद्धिमवाप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति श्रीरुद्रयामले शतसहस्रकोटिग्रन्थे उमामहेश्वरसंवादे गायत्रीयन्त्र माहात्म्यं सम्पूर्णम् ॥

442

Sl. No : 18392 गुरुशिष्यमहिमा Ms. No : C. 823/3

Beginning :

सर्वभूतान्तरस्थाय नित्यतृप्तचिदात्मने ।
प्रत्यक्चैतन्यरूपाय मह्यमेव नमो नमः ॥
निषेकादीनि कर्माणि यः करोति यथाविधि ।
सम्भावयति चान्येन स विप्रो गुरुरुच्यते ॥

End :

भक्तिहीनं दुरात्मानं शठं भोगरतं तथा ।
अक्षमं पिशुनं क्रूरं शिष्यमशं परित्यजेत् ॥

Colophon :

इति गुरुशिष्यमहिमाविधिः ॥

443

Sl. No : 18393 | गोकर्णक्षेत्रमाहात्म्यम् | Ms. No: P. 8725/1

Beginning:

श्रीव × दंराम्बरगण्डशतुंचक्रमकरमत्स्यशरभ × गण्डभेरुण्डधरणीधृत × अंकुाशकुठारसिंहमोद + शुभमस्तु व्रतगुड ॥ (?)

मौलौ मौक्तिकसन्निभां × जटापरिनिभां कण्ठेशहारविहारिणीं ज × × × टे पुटप्रसूनप्रभाम् ।

भूमौ पातितपुष्पवृष्टिसद्धर × × रङ्गिभाशाम्भा × × शुभदा भवन्तु नटतो गङ्गापयोबिन्दवः ॥ (?)

ಈ ಪ್ರಕಾರವಾಗಿ ನಾಟ್ಯವನ್ನು ಆಡುತ್ತಾ ಇದ್ದಂಥ ಪರಮೇಶ್ವರ ಜಟಾ ಮಕುಟದಲ್ಲಿ ಇರ್ದ್ದ ಗಂಗಾದೇವಿಯ ಉದಕ ಬಿಂದುಗಳು ನಿಮಗೆ ಮಂಗಳವಂ ಕೊಟ್ಟು ರಕ್ಷಿಸಲಿ.

End:

ಪರಮೇಶ್ವರನಿಗೆ ಆವಾಸ ಸ್ಥಾನವಾದ ಗೋಕರ್ಣ ಕ್ಷೇತ್ರದಿಂದ ಮಿಥಿಲಾ ಪಟ್ಟಣಕ್ಕೆ ಬರುತ್ತಾ ದಾರಿಯಲ್ಲಿ ಬಂದಾ × × × × ರ್ಯಮಂ ಕಂಡು ಕೃತಾರ್ಥನಾದನಂದು ಗೌತಮ ಮಹಾ ಮುನಿಯು ಕಲ್ಮಾಷಪಾದ ರಾಯಂಗೆ ನಿರೂಪಿಸಿದ ವೃತ್ತಾಂತವನು ಸೂತ ಪೌರಾಣಿಕನು ಶೌನಕಾದಿ ಮುನಿಗಳಿಗೆ ನಿರೂಪಿಸಿದನು.

Colophon:

ಸ್ಕಂದ ಪುರಾಣೋಕ್ತವಾದ ಬ್ರಹ್ಮೋತ್ತರ ಖಂಡದಲ್ಲಿ ಶಿವರಾತ್ರಿಯ ಮಹಿಮೆಯಲ್ಲಿ ಗೋಕರ್ಣ ಕ್ಷೇತ್ರ ಮಾಹಾತ್ಮ್ಯೆಯಂ ಪೇಳ್ದರಿಗೆ ಅಧ್ಯಾಯ ೩ ಕ್ಕಂ ಮಂಗಳ ಮಹಾ ಶ್ರೀ ॥

444

Sl. No : 18396 | गोमाचलक्षेत्रमाहात्म्यम् | Ms. No : C. 4593/4

Beginning:

सूत उवाच—

अव तत्रैव स्कन्देन पुनः प्रश्नं करोति च ।
मां गिरीश महादेव तस्य माहात्म्यमुत्तमम् ॥

श्रीईश्वर उवाच —

शृणु पुत्र प्रवक्ष्यामि इतिहासं पुरातनम् ।
मांगीशो पर्वतो नाम पूर्वदेश × ह्येत्रयोः ॥

End :

इतिहासं नवं चैव तवाग्रे कथितं मया ।
महापुण्यकरं श्रेष्ठं कथा सर्वत्र दुर्लभा ॥
पदमात्रं पठन्तश्च शृण्वन्तश्च कथोत्तमम् ।
महापुण्यं भवेत्तस्य महारुद्रप्रसादतः ॥

Colophon :

इति श्रीस्कन्दपुराणे सह्याद्रिखण्डे गोमाचलक्षेत्रमाहात्म्यंकथनं नाम अशीति तमोऽध्यायः ॥

445

Sl. No : 18397 — घनगिरिमाहात्म्यम् — Ms No : C. 2196

Beginning :

ऋषयः ऊचुः—

सूत सर्वार्थतत्त्वज्ञ सर्वशास्त्रविशारद ।
प्रशस्तानि च तीर्थानि त्वयोक्तानि महामते ॥
विष्णुक्षेत्राणि सर्वाणि श्रुतान्यस्माभिरञ्जसा ।
घनाचलस्य माहात्म्यं त्वया प्रोक्तं कथान्तरे ॥

End :

पृथक् पृथुथक्तदा नेमुग्नुज्ञाता महात्मनः ।
जग्मुस्ते व्योममार्गेण हृष्टात्मा शुभवर्त्मना ॥
यथास्थानं गताः सर्वे ऋषयः शौनकादयः ।
आनन्दाम्बोनिधौ मग्ना जीवन्मुक्ता बभूविरे ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे घनाचलमाहात्म्ये दशमोऽध्यायः ॥

446

Sl. No : 18398 चम्पकारण्यमाहात्म्यम् Ms. No : P. 38254/3

Beginning :

श्री शौनकः—

सूत सर्वज्ञ भगवन् पुराणार्थविशारद ।
त्वया खलु पुराणानि सेतिहासानि कृत्स्नशः ॥
पठितानि मुनीनां च सन्निधौ बहुधा मुने ॥

End :

इत्येवं सकलानृषीन् प्रतिवदन् सूतः कृतार्थान् पुरा
तस्मिन्नैमिश एव वृत्तपठनैः अन्यैः पुराणैर्हरेः ।
श्रीमच्चम्पकसार्वभौमचरितं सर्वं तदाद्यन्ततः
तेभ्योऽवाप्य मुनिः स्वसन्नुतिमितः स्वस्थश्चिराद्वर्तते ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे विष्णुक्षेत्रखण्डे उत्तरभागे चम्पकारण्यमाहात्म्ये अष्टषष्टितमोऽध्यायः ॥

447

Sl. No : 18399 चातुर्मास्यमाहात्म्यम् Ms. No : C. 4104

Beginning :

देव देव महाभाग व्रतानि सुबहून्यपि ।
श्रुतानि त्वन्मुखाद्ब्रह्मन्न तृप्तिमधिगच्छति ।
अधुना श्रोतुमिच्छामि चातुर्मास्यव्रतं शुभम् ॥

End :

महेश्वरो वा मधुकैटभारिर्हृद्याश्रितो ज्ञानमयो द्वितीयः ।
अभेदबुद्ध्या परमार्तिहन्ता रिपुः स एवातिप्रियो भवेत्ततः ॥

Colophon :

इति श्रीस्कान्दपुराणे ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये तारकासुरवधो नामद्वात्रिंशोऽध्यायः ॥

448

Sl. No : 18400 **चामराजेश्वरमाहात्म्यम्** Ms No : P. 4850/1

Beginning :

श्रीमच्चामक्षमानाथनायको लोकनायकः ।
अकम्पसम्पदं दद्यात् केम्पनाम्बाम्बिकापतिः ॥
+ + + + + + +
मुनयःशौनकाद्यास्तु नैमिशारण्यवासिनः ।
सत्रमारेभिरे कर्तुं तत्र द्वादशवार्षिकम् ॥
श्रीमद्वरपुरक्षेत्रे प्रीतिर्या परमेशितुः ।
पार्वतीं प्रति शर्वेण प्रोक्ता कैलासकानने ॥
भविष्यचरितं श्रोतुं परं कौतूहलं हि नः ।

End :

अश्वमेधादियागानां आप्नुवन्ति फलानि ते ।
चामेश्वरे महालिङ्गे पूजिते नमिते स्मृते ॥

Colophon :

इति श्री स्कान्दे श्रीकण्ठेश्वरस्य भविष्यत्कथायां श्री चामराजेश्वरमाहात्म्ये श्री चामराजेश्वरपूजाविस्तारवर्णनं नाम अष्टादशोऽध्यायः ॥

449

Sl. No : 18401 **चित्रकूटमाहात्म्यम्** Ms. No: P. 360/2

Beginning :

जैमिनिः—

भगवन् मुनिशार्दूल वेदवेदान्तपारग ।
परापरविवेकज्ञ धर्माधर्मप्रदायक ॥
ऋग्यजुस्सामवेदानां अथर्वाङ्गिरसामपि ।
सेतिहासपुराणानां उत्पत्तिर्भवतो मुने ॥

End :

प्रोक्तां कथामनर्गलमहापुण्यास्पदां जैमिनिः
श्रुत्वानन्दसुधासमुद्रलहरीमग्नः कृतार्थः सुधीः ॥

नत्वा व्यासमुनिं पराशरसुतं प्राचीनवागाश्रयं
तत्वार्थज्ञमुदारकिर्तिमकरोद्धर्मे मतिः शाश्वते ॥

Colophon :

इति भविष्यत्पुराणे चित्रकूटमाहात्म्ये व्यासजैमिनिसंवादे प्रश्नानुपूर्वपुण्डरी कपुरवर्णन + वर्णनं नाम द्वादशोध्यायः ॥

450

Sl. No : 18402 चुञ्चनसेतुमाहात्म्यम् Ms. No : B. 335/2

Beginning :

नमः कोदण्डहस्ताय चुञ्चसेतुनिवासिने ।
तृणबिन्द्वाननाम्भोजरवये राक्षसारये ॥ १ ॥
यस्य प्रसादमात्रेण कपिरप्यञ्जनासुतः ।
इन्द्रादिभिश्च वन्द्योऽभूत तं रामं अनिशं भजे ॥२ ॥

End :

इदं रहस्यं मम तात नः श्रुतं
समस्तपापाटविदावभूतम् ।
पुत्रादिसम्पत्प्रदमिष्टदं सदा
रामस्य सायुज्यफलप्रदं सताम् ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे नारदबृहद्रथसंवादे तृणबिन्द्वाश्रमाख्यचुञ्चसेतुक्षेत्र कथनं नामसप्तदशोऽध्यायः ॥

451

Sl. No : 18404 चुञ्चनसेतुमाहात्म्यम् Ms. No: C. 2011/2

Beginning :

ಒಂದಲೂ ಮಾವಿಸತಕ್ಯವನಾ × ಅಂಥಾ ಶ್ರೀರಾಮುನನ್ನು ನಾನು ನಿರಂತರವೂ ಭಜಿಸುವೆನು ॥ ೩ ॥

ಪೂರ್ವದಲ್ಲಿ ಸೂತಮುನಿಯು ನಾರದ ಬೃಹದ್ರಥರ ಸಂವಾದವಾನಿಸುವ ಬ್ರಹ್ಮಾಂಡ ಪುರಾ × × ವಾದ ಚುಂಚನಕಟ್ಟೆ ಸ್ಥಳಪುರಾಣವನ್ನು ಶೌನಕಾದಿ ಗಳಿಗೆ ವಿಸ್ತರಿಸಿ ಹೇಳಿದನು.

End :

ಈ ಮಹಿಮೆಯಂ ನಿತ್ಯವೂ ಕೇಳುವವಂಗೆ ಶ್ರೀ ರಾಮ ಸಾಯುಜ್ಯ ಫಲವನ್ನು ಕೊಡುವುದೆಂದು × × ನಾರದನು ಬೃಹದ್ರಥಂಗೆ ಹೇಳಿದನೆಂದು ಸೂತಪುರಾಣಿಕನು ಶೌನಕಾದಿಗಳಿಗೆ ವಿಸ್ತರಿಸಿ ಹೇಳಿದನೆಂದು ಅಧ್ಯಾಯಾರ್ಥವು.

Colophon :

ಇತಿ ಬ್ರಹ್ಮಾಂಡಪುರಾಣೇ ಶ್ರೀ ರಾಮಕ್ಷೇತ್ರವೆಂಬ ಚಂಪಕಟ್ಟೆಸ್ಥಳ ಮಾಹಾತ್ಮ್ಯವೆಂಬ ಹದಿನೇಳನೆಯ ಅಧ್ಯಾಯಾರ್ಥ ನಿರೂಪಣಕ್ಕೆ ಮಂಗಳ ಮಹಾ ಶ್ರೀ.

452

Sl. No : 18405 चोरनाडुक्षेत्रमाहात्म्यम् Ms No : P. 2971/7

Beginning :

सनकः—

शयनं कमलापन्या श्रिया भूम्या सहाच्युतम् ।
पूजयामास धर्मज्ञः वसंस्तत्र जनाधिप ॥
एवं संवसतस्तस्य पुत्रा पौत्राश्च जज्ञिरे ।
स्नुषाश्च प्रस्नुषाश्चैव पुत्रिकाश्चापरास्तथा ॥

End :

इति मुनिवरवाक्यं श्रेष्ठमाकर्ण्य भूपः
तटभुवि शुभनद्यां दक्षिणायां महात्मा ।
अमलममरपूज्यं श्रीपतिक्षेत्रसारं
विधिमुखसुरपूज्यं श्रोतुमेवोत्सुकोऽभूत् ॥

Colophon :

इति ब्रह्माण्डपुराणे क्षेत्रकाण्डे चोरनाडुप्रशंसने नाम पञ्चदशोऽध्यायः ॥

453

Sl. No : 18406 छायापुरुषमाहात्म्यम् Ms. No : C. 4686/52

Beginning :

आत्मा देहं महाकायं यः पश्यति खगोचरे ।
उद्धरेत्सप्त गोत्राणि कुलमेकोत्तरं शतम् ॥

पित्रोरुभयपक्षस्थ पत्नीपक्षं तथैव च ।
गुरुरेककुलं देवि सप्तगोत्राणि मानवाः ॥

End :

भोक्तुश्च दक्षिणे बाहौ विनाशो मृत्युमादिशेत् ।
अचिरान्मासमरणं विना जङ्घैर्दिनैरपि ॥
अष्टमीस्कन्धदेशे च छाया नाशेन तत्क्षणात् ॥

Colophon :

इति श्रीशङ्करसंहितायां उमामहेश्वरसंवादे छायापुरुषमाहात्म्यं द्वितीयः ॥
लक्ष्यं लक्षण + + ज्वाला द्रुल्य ॥ (?)

454

Sl. No : 18407 जनार्दनक्षेत्रमाहात्म्यम् **Ms. No : P. 4239/1**

Beginning :

हेरंबं वीतदोषैर्विरचितपदयुगं विश्वविख्यातवीर्यं
+ वा चित्तारविन्दप्रथममैनुशिवामम्बिकामद्रिकन्याम् ।
ब्रह्माद्यैरादितेयैः सकलमुनिवरैः कश्यपागस्त्यमुख्यैः
नित्यं संसेविताङ्घ्रिद्वितयसरसिजं वाग्वत्तुत्येद्भजेहम् ॥ (?)

End :

एवं वदन्तं भूपालं दृष्ट्वा वेदनिधिःस्वयम् ।
समर्चितः प्रसन्नात्मा संप्रापद्भवनं निजम् ॥
श्रीसूतः—
एवमुक्तं मयाऽगस्त्य स्कन्देन समुदीरितम् ।
जनार्दनस्य माहात्म्यं शृण्वतां प्रीतिवर्धनम् ॥

Colophon :

इति स्कान्दे पुराणे उत्तरखण्डे उमामहेश्वरसंवादे इन्द्रप्रस्थपुरप्रशंसायां जनार्दनाविर्भावकथनं नाम अष्टादशोऽध्यायः ॥

455

Sl. No : 18410 **जयन्तीपुरमाहात्म्यम्** Ms. No: C. 3703

Beginning :

नैमिशे नैमिशक्षेत्रे तपोधनसमृद्धिदे ।
हृसमृद्धे सरित्पुष्पकुशादिरभिरञ्जिते ॥
सत्रमारब्धवांस्तत्र शौनको भगवान् ऋषिः ।
ततः जग्मुर्महात्मानो मुनयः क्षीणकल्मषाः ॥
ते सर्वेऽपि मुनीन्द्रास्ते शौनकान्तिकमागताः ।
ऋषिभिः प्रार्थितो देवः सर्वेषां सर्वकामदः ।
सिन्धुतीरे जयन्त्याख्ये गन्धमादनपर्वते ॥
सान्निध्यं कुरुतेऽद्यापि शक्तिद्वयसमन्वितः ।
इति त्वत्तः श्रुतं पूर्वं षण्मुखस्य महेशितुः ॥
सिन्धुतीरं कथं विद्वान् जयन्त्याख्यं कथञ्च तत् ।

End :

त्रिस्वतल्लैर्मुनिवरैः श्रीमत्पादाब्जसेवकैः ।
सेवितं गणनाथैश्च महासेनं मुनीश्वराः ॥
प्रतिवर्षं निषेव्यैव कृतकृत्यो भविष्यति ॥

Colophon :

इति श्रीस्कान्दे पुराणे उपरिभागे क्षाःदैभवखण्डे व्यासशुकसंवादे श्रीजयन्तीपुरमाहात्म्ये अष्टादशोऽध्यायः ॥

456

Sl. No : 18411 **ज्येष्ठाष्टमीव्रतमाहात्म्यम्** Ms. No : P. 4681/52

Beginnig :

पार्वती उवाच—
कैलासशिखरे रम्ये समासीनं महाप्रभुम् ।
नमस्कृत्य प्रसन्नाख्यं पतिम् पप्रच्छ पार्वती ॥
देवदेव जगन्नाथ जगदानन्दकारक ।
अहं त्वां प्रष्टुमिच्छामि लोकानां हितकारकम् ॥

End:

प्रति वर्षेऽपि चैवेह सद्यो वा वित्तसारतः ।
भुक्तोऽहं सकलान् भेगान् यथाभीष्टमनोहरान् ॥
पतिपुत्रसुताश्चैव यास्यन्ति परमां गतिम् ।

Colophon:

इति श्री भविष्योत्तरपुराणे ज्येष्ठादेवीव्रतं संपूर्णम् ॥

457

Sl. No: 18412 ज्ञानमण्टपमाहात्म्यम् **Ms. No: B. 2136**

Beginning:

वन्दे वदान्यं वागीशं कल्याणगुणवारिधिम् ।
वागर्थसिद्धये नित्यं गुरुं ब्रह्म समाश्रितम् ॥
कदाचिन्मुनयस्सर्वे कौतूहलसमन्विताः ।
नैमिशाख्ये महापुण्ये ह्याश्रमे ददृशुर्मुनिम् ॥
समासीनं महाभागं × व्यासं तमब्रुवन् ।
वाक्यं × ऋषयः क्षीणकल्मषाः ।
श्रृणु वक्ष्यामि भो विप्र पुण्यक्षेत्रमनुत्तमम् ॥
यस्य श्रवणमात्रेण विमुक्तिः पापिनामपि ।
माहात्म्यं तस्य वक्ष्यामि श्रोतृणां धर्मवर्धनम् ॥

End:

× × भक्त्या परमं पदं यत् ।
श्रीरामचन्द्रः × सा सरयुस्त्वयोध्या
पुरं तटे या तुळसीदलैर्जनाः ।
अर्चय × × र्गितम् ॥
अप्रमेयपदनीरजद्वयं × प × ×त्नमनी (?)

Colophon:

[इति ब्रह्माण्डपुराणे क्षेत्रमाहात्म्यखण्डेशिवनारदसंवादे श्रीमद्ज्ञानमंटप माहात्म्ये लम्बकर्णमोक्षो नाम दशमोऽध्यायः] (ग्रन्थान्ते समापनवाक्यं यथा)— श्रीमद्ज्ञानमण्टपमाहात्म्येद्वादशोऽध्यायः ॥

458

Sl.No : 18416 ताम्रपर्णीमाहात्म्यम् Ms. No : P. 1397/2

Beginning :

वकुलालङ्कृतं श्रीमत् शठकोपपदद्वयम् ।
अस्मत्कुलधनं भोग्यं अस्तु मे मूर्ध्नि भूषणम् ॥ + +

भृगुः —

मम नारद सर्वज्ञ देवदेवस्य शार्ङ्गिणः ।
कथामृतरसेनैव पाययस्व महामते ॥

End :

इत्युक्त्वा नारदस्तत्र वैष्णवाग्रेसरं विभुम् ।
सन्तोष्य शान्तं ब्रह्मा वै आजगाम महत्सरम् ॥

Colophon :

इति ब्रह्माण्डपुराणे भृगुनारदसंवादे क्षेत्रखण्डे ताम्रपर्णीमाहात्म्ये शठकोपावतारो नाम एकसप्ततिशततमोऽध्यायः ॥

459

Sl. No : 18417 ताम्रपर्णीमाहात्म्यम् Ms. No : P. 2340

Beginning :

अखण्डपरमानन्दपरिपूर्णात्ममूर्तये ।
निर्गुणाय गुणाविष्टकर्मणे ब्रह्मणे नमः ॥ + +
जायते नैमिशाभिख्या विख्याता जगती तले ।
पापानामूषरक्षेत्रं पुण्यानामुद्भवस्थलम् ॥

End :

इत्थं महाराज कथा मयोक्ता
महामुनेर्वा मलयात्मजायाः ।
प्रपठ्यते भक्तिवेनम्रबुद्ध्या
न तत्र तावत्रयमीतिबाधाः ॥

Colophon :

इति श्रीब्रह्मपुराणे ताम्रपर्णीमाहात्म्ये एकचत्वारिंशोऽध्यायः ॥

460

Sl. No : 18419 ताम्रातटक्षेत्रमाहात्म्यम् **Ms. No : P. 2971/1**

Beginning :

नैमिशारण्यनिलये क्षेत्रे बहुगुणान्विते ।
सत्रं कर्तुं समायाताः ऋषयो ब्रह्मवादिनः ॥
भरद्वाजो गौतमश्च कण्वः कात्यायनोऽसितः ।
अङ्गिरा जमदग्निश्च वसिष्ठोऽत्रिः पराशरः ॥
नारदः पर्वतश्चैव शौनकः शुनकः शुचिः ।

End :

इति मुनिकथितं तत्क्षेत्रमाहात्म्यमेवं
तटभूवि शुभनद्याः तिन्त्रिणीवृक्षमूले ।
स्थितमनघमपत्रं ज्ञानमुद्रां दधानं
हरिमपि मुनिमुख्याः प्रीतियुक्ताः बभूवुः ॥

Colophon :

इति ब्रह्माण्डपुराणे क्षेत्रमाहात्म्यकाण्डे ताम्रातटक्षेत्रमाहात्म्यं नाम प्रथमोऽध्यायः ॥

461

Sl. No : 18422 तीर्थतुलस्यादिमाहात्म्यम् **Ms. No : P. 9545/12**

Beginnig :

श्वानमूत्रेण तत्तुल्यं इति वैवस्वतो मनुः ।
स्नानतो वरुणश्शक्तिः जिह्वातोऽग्निःश्रियः हरेत् ॥
भुञ्जतो मृत्युरायुष्यं तस्मान्मौनं त्रिषु स्मृतम् ॥

End :

यद्गृहे तुलसी नास्ति सालग्रामशिलार्चनम् ।
स्मशानसदृशं विद्यात् तद्गृहे नास्ति शोभनम् ॥

Colophon :

— — —

462

Sl. No : 18423 | तुङ्गभद्रामाहात्म्यम् | Ms. No: P. 1124/3

Beginning :

मुनिवर × × × द्र परेश्वरे ।
कथितो भवता सर्गो विस्वरेण महेश्वर ॥
नानाविधसुराणाञ्च नराणाञ्च विशेषतः ।
मुनीनामखिलानाञ्च पितृणां मरुतां तथा ॥

End :

श्रीमहेश्वरः —
पुत्र तत्वेन वक्ष्यामि भृगुतीर्थमनुत्तमम् ।
तुङ्गायाः पश्चिमे कूले कर्मनिर्मूलकारणम् ॥
+ + + +
पुरतस्तस्य देवोऽपि प्रह्लादस्य महात्मनः ।
प्रादुरासीन्महादेवस्त्वमाकर्णय पुत्रक ॥

Colophon :

[इति श्रीस्कान्दे तुङ्गभद्राखण्डे प्रथमोऽध्यायः]

463

Sl. No : 18424 | तुङ्गभद्रामाहात्म्यम् | Ms. No : A. 703

Beginning :

कदाचिदागतं सूतं नैमिशे रोमहर्षणम ।
शौनकाद्या महर्षयः पप्रच्छुस्ते महर्षयः ॥
सूत बुद्धिमतां श्रेष्ठ पुराणार्थविशारद ।
स्कन्दशङ्करसंवादं विशेषेण वदस्व नः ॥
कैलासशिखरासीनं सर्वज्ञं पार्वतीप्रियम ।
श्रौतकर्म तथा धर्मानुवाच शिखिवाहनः ॥

Colophon :

वासुदेवं च मां चैव भिन्नं पश्यन्ति ये नाराः ।
न तैः पूजितवानस्मि क्रकचैर्दारितोऽस्म्यहम् ॥

तेषां भेदविनाशाय दृष्टो हरिहरस्स्वयम् ।
तं दृष्ट्वा देवदेवेशं न याति यममन्दिरम् ॥

End :

इति श्रीवराहपुराणे भूवराहसंवादे तुङ्गभद्राप्रशंसायां गुहारण्यहरिहरमहिमा नाम अष्टादशोऽध्यायः ॥

464

Sl. No : 18425 **तुङ्गभद्रामाहात्म्यम्** **Ms. No : B. 561**

Beginning :

अथातः संप्रवक्ष्यामि तुङ्गामाहात्म्यमुत्तमम् ।
शृणु कौन्तेय सहजैः कृष्णया मुनिभिः सह ॥
मुनिरास्ते महाप्राज्ञ माण्डव्ययतिभिः कृतः ।
तुङ्गातीरे तस्य वनं नाना कुञ्जसमन्वितम् ॥

End :

अवसत्तत्र धर्मात्मा पूर्वतीरे शतं समाः ।
सकाशात् ब्रह्मणो विश्वाधरं विष्णुपदं ययौ ॥
इतिहासमिदं पुण्यं शृणोति श्रावयेन्नरः ।
श्रद्धया च नृपश्रेष्ठ पूर्णमेव फलं लभेत् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे तुङ्गभद्रामाहात्म्ये माण्डव्याश्रमवर्णनं संपूर्णम् ॥

465

Sl. No : 18427 **तुलसीमाहात्म्यम्** **Ms. No : P. 503**

Beginning :

श्रीसूतः —

पुरा कदाचिद्वृत्रारिः प्रणिपत्य बृहस्पतिम् ।
व्यजिज्ञपन्महाभागं सर्वज्ञं वशिनां वरम् ॥
भगवन् प्राणिनः सर्वे त्रैलोक्ये शासिते मया ॥

दुर्वृत्ता दुःस्वसंपन्ना सदाचारविवर्जिताः ।
सान्निध्यं कुर्वते तत्र देवा नारायणादयः ।
तुलसीकाष्ठ माहात्म्य श्रवणात्पठनादपि ॥

End :

इदानीं तुलसीदेवी गृहीत्वा साधि वतम् ।
ददातु मे फलाक्षय्यं व्रतस्यास्य यथेप्सितम् ॥

Colophon :

इति श्रीतुलसीमाहात्म्ये तुलस्युद्यापनं नाम विंशोऽध्यायः ॥

466

Sl. No : 18428 		तुलसीमाहात्म्यम् 		Ms. No : P. 659/

Beginning :

श्रीसूतः—

पुरा कदाचिद्वृत्रारिः प्रणिपत्य बृहस्पतिम् ।
व्यजिज्ञपन्महाभागं सर्वज्ञं वशिनां वरम् ॥
भगवन् प्राणिनः सर्वे × × × ।
× × × केनोपायेन सुव्रतः ॥

End :

पठन् लिखन् पाठयंश्च जपन्नालापयन्नपि ।
प्राप्नुयात्परमां भक्ति वासुदेवे सनातने ॥

Colophon :

इति ब्रह्माण्डपुराणे श्रीतुलसीमाहात्म्ये मंगलात्मकस्तवो नाम द्वादशो ऽध्यायः ॥

467

Sl.No : 18436 		तुलाकार्मुकिमङ्गलक्षेत्रमाहात्म्यम् 		Ms. No : P. 2971/5

Beginning :

पूज्यमानो नृपेणाथ देवर्षिः सनकस्तदा ।
पुनरन्यद्धरेः क्षेत्रमाहात्म्यमवदद्द्विजः ॥

सनकः—

शृणु राजन् प्रवक्ष्यामि हरेः देवकथां शुभाम् ।
यः शृणोति कथामिमां तस्यायुः श्रीश्च वर्धते ॥

End:

तदश्विनोस्तीर्थवरस्य मुख्यं
श्रुत्वा द्विजाः राजवराग्रगण्याः ।
संपूज्य धातुः सतमप्रमेयं
पप्रच्छ भूयोऽपि हरेश्च देवम् ॥

Colophon:

इति ब्रह्माण्डपुराणे देवकाण्डे तुलाकावेरिकिमङ्गलक्षेत्रमाहात्म्ये अश्वितीर्थ प्रशंसनं नाम त्रयोदशोऽध्यायः ॥

468

Sl. No: 18438 — तुलाकावेरीमाहात्म्यम् — Ms. No: P. 246

Beginning:

देववर्मा —

नानाविधास्तथा देशाः नानाधर्मसमन्विताः ।
नानाजातिसमायुक्ताः नानाचारसमन्विताः ॥
मुनेऽद्य भवताप्युक्ता विस्तरेण श्रुता मया ।
भवन्मुखाम्बुजोत्पन्नपुण्याख्यानकथाऽद्य या ॥

End:

वरमिदमितिहासं सह्यजायाश्च चित्रं
लिखति पठति यो वै ब्राह्मणानां समाजे ।
स इह विपुलभोगान् पुत्रपौत्रादियुक्तान्
अनुभवन्ननुभूय प्राप्नुयात्सोऽपि मुक्तिम् ॥

Colophon:

इति श्री ब्रह्मकैवर्ते महापुराणे तुलाकावेरीमाहात्म्ये अष्टत्रिंशोऽध्यायः ॥

469

Sl. No : 18439 तुलाकावेरीमाहात्म्यम् Ms. No : P. 253

Beginning :

सूतमेकान्तमासीनं नैमिशारण्यवासिनः ।
मुनयो दीर्घसत्रान्ते व्यासशिष्यं तपोनिधिम् ॥
भस्मोद्धूलितसर्वाङ्गं जटामण्डलमण्डितम् ॥

End :

माहात्म्यं परमं विचित्रममलं सर्वाघसंहारकं
कावेर्याः परमादरेण कथितं शैलेन्द्रपुत्र्यै परम् ।
भक्त्या यः पठति प्रसन्नहृदयः विद्वत्समाजे पुनः
शम्भोः स्थानमुपैति यस्य शृणुयाद्यो वा लिखेदीप्सितम् ॥

Colophon :

इत्युमामहेश्वरसंवादे श्रीकावेरीमाहात्म्ये तुलास्नानमहिमवर्णनं नाम द्विसप्ततितमोऽध्यायः ॥

470

Sl. No : 18442 तुलाकावेरीमाहात्म्यम् Ms. No : P. 1639/1

Beginning :

देवशर्मा—

भगवन् त्वत्प्रसादेन गतोऽहं कृतकृत्यताम् ।
× × जाता मम ज्ञानवतां वर ॥
श्रोतव्यमस्ति किञ्चिन्मे श्रुतं सर्वमशेषतः ॥

End :

माहात्म्यं परमं पवित्रमतुलं सर्वाघसंहारकं
कावेर्याः परमेश्वरेण कथितं शैलेन्द्रपुत्र्यै नृप ।
भक्त्या यः पठति प्रसन्नहृदयो विद्वत्समाजे पुरा
शम्भोर्मुक्तिमुपैति यश्च शृणुयाद्यस्तल्लिखेदिष्टदम् ॥

Colophon :

इति श्रीब्रह्मकैवर्ते महापुराणे तीर्थप्रशंसे तुलाकावेरीमाहात्म्ये अनवद्या नाथशर्मगाणपत्यप्राप्तिर्नाम एकचत्वारिंशोऽध्यायः । इति श्रीब्रह्मकैवर्ते पुराणे तुलाकावेरीमहिम समाप्तम् ॥

471

Sl. No: 18444 | तुलाकावेरीमाहात्म्यम् | Ms. No: P. 1672/1

Beginning:

धर्मवर्माह्वयो राजा निचुळापुरवल्लभः ।
भूयः पप्रच्छ तं नत्वा दाल्भ्यं भागवतोत्तमम् ॥
भगवन् प्राणिनः सर्वे केनोपायेन संपदा ।
भवन्ति पुत्रान् संप्राप्य सुखिनः चिरजीविनः ॥

Colophon:

पाविताश्च वयं श्रीमत्कावेरीपुण्यसंगात् ।
कृतार्थाश्च महाबाहो तपो नः किमतः परम् ॥
इति प्रसन्नाननीरजा मुदा
ते शौनकाद्या मुनयो मुमुक्षवः ।
हरेः चरित्रश्रवणोत्सुकास्तदा
गन्धाक्षताद्यैः पुनरप्यपूजयन् ॥

Colophon:

इत्याग्नेयपुराणे तुलाकावेरीमाहात्म्ये अगस्त्यहारीतसंवादे कावेरीकल्याण कथने कावेरीसमुद्रसङ्गममहिमानुवर्णनं नाम एकत्रिंशोऽध्यायः ॥

472

Sl. No: 18452 | तुलाकावेरीमाहात्म्यम् | Ms. No: P. 9977/2

Beginning:

देवशर्मा—

नानाविधांस्तथा देशान्नानाजातिसमन्वितान् ।
नानाचारसमायुक्तान्नानाधर्मसमन्वितान् ॥
मुनेयन्दं भवता प्रोक्तान् शृण्वन् सुबहूनापि । (?)
देशे देशे विचित्राणि तीर्थानि सरितामपि ॥
माहात्म्यं भवता प्रोक्तं विस्तरेण श्रुतं मया ।

End:

यत्र कुत्र तुलामासे स्नात्वा निर्मलमानसः ।
पठेत्कावेरीमाहात्म्यं स मुक्तः सर्वपातकैः ॥

प्रीयन्ते पितरस्तस्य प्रीयन्ते दैवतानि च ।
प्रीयन्ते सर्वभूतानि प्रीयते जगतीपतिः ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे कावेरीमाहात्म्ये कावेर्याविक्रयनिरूपणं नाम अष्टविंशो ऽध्यायः ॥

473

Sl. No : 18454 तृचमन्त्रमाहात्म्यम् Ms. No : P. 9798/5

Beginning :

भक्त्या कृष्णं नमस्कृत्य अर्जुनः परिपृच्छति ।
तृचमन्त्रस्य माहात्म्यं श्रोतुमिच्छाम्यहं प्रभो ॥
श्री कृष्ण उवाच—
अर्जुनस्य हितार्थाय कृष्णो वचनमब्रवीत् ।
उद्यन्नद्येति मन्त्रोऽयं सौरं पापप्रणाशनम् ॥

End :

ध्यानम्—
सशङ्खचक्रं । घृणिः सूर्य आदित्यो एवं मन्त्रेण यथाशक्ति जपं जपित्वा पञ्चोपचारपुजानन्तरं जपं कुर्यात् ॥

Colophon :

— — —

474

Sl. No : 18455 तोताद्रिमाहात्म्यम् Ms. No: SP. 311/1

Beginning :

ऋषय ऊचुः—
सूत सर्वज्ञ सद्भक्त पुराणार्थविचक्षण ।
अष्टादशपुराणेषु ब्रह्माण्डं नाम स × ॥
पूर्वं त्वया सुकथितं सम्यक् सर्वं श्रुतं हि तत् ।
ब्रह्मक्षेत्राणि सर्वाणि त्वयोक्तानि श्रुतानि च ॥

End :

एवमेतत्पुरावृत्तं आख्यानं भद्रमस्तु वः ।
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।
येषामिन्दीवरश्यामो हृदये सुप्रतिष्ठितः ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे क्षेत्रवैभवखण्डे श्रीमत्तोताद्रिमाहात्म्ये द्वादशोऽध्यायः ॥

475

Sl. No : 18456 तोताद्रिमाहात्म्यम् **Ms. No : P. 311/2**

Beginning :

हरः—

श्रृणु भद्रे महाश्चर्यं कथां कथयतो मम ।
यः शृणोति कथां लोके सर्वपापैः प्रमुच्यते ।
तोताद्रिनाथकथनात् स्नानात्पङ्के रुहे प्रिये ॥
पुरा कश्चिद्द्विजश्यतिः तस्य क्षेत्रस्य वैभवात् ।
स्नानात्पानाद्दर्शनाच्च विष्णोश्चैव विशेषतः ॥
\+ \+ \+ \+ \+

इति स्कन्दपुराणे तीर्थवैभवखण्डे तोताद्रिमहिमा नाम एकोनाशीतितमोऽध्यायः ॥

End :

अपराधमकुर्वत्सु जनेष्वपि विशेषतः ।
हितं कुर्वन्ति विद्वांसः इति लोकेषु विश्रुतम् ॥
× × स्तु नरकेषु निपात्यते ।
तस्मात्त्वमपि शा × × ॥

Colophon :

— — —

476

Sl. No : 18458 त्रिकूटाचलमाहात्म्यम् **Ms. No : P. 3601/1**

Beginning :

वन्दे देवं विघ्नराजं त्रिणेत्रं
देवेन्द्राद्यैर्निर्जरैस्सेव्यमानम् ।
विघ्नाद्रीणां खण्डनं देवदेवं
सो नः पायात्सर्वदा शंभुरत्र ॥
पुरा मुनीश्वराः केचित् नैमिशारण्यवासिनः ॥

End :

त्रिकूटाचलनाथं तं पूजयित्वा चिरं द्विजाः ।
गतपापा गतक्लेशाः शौनकाद्या महर्षयः ॥
पूर्ववन्नैमिशारण्यं गत्वा सत्रं वितेनिरे ॥

Colophon :

इति श्रीमत्स्कान्दे पुराणे उपरिभागे स्थानवैभवखण्डे त्रिकूटाचलमाहात्म्ये फलश्रुतिप्रशंसा नाम सप्तदशोऽध्यायः ॥

477

Sl. No : 18459 त्रिपुण्ड्रधारणमाहात्म्यम् **Ms. No : P. 8725/5**

Beginning :

ಅನಂತರದಲ್ಲಿ ಸೂತ ಪೌರಾಣಿಕನು ಶೌನಕಾದಿ ಮಹಾಮುನಿಗಳಿಗೆ ಮತ್ತಿಂತೆಂದನು, ಕೇಳಿರೈ ಋಷಿಗಳಿರ! ಈ ಪ್ರಕಾರದಲ್ಲಿ ವಾಮದೇವನು ಬ್ರಹ್ಮ ರಾಕ್ಷಸನಿಂದ ಪ್ರಾರ್ಥಿಸಲ್ಪಟ್ಟವನಾಗಿ ಆತನಿಗೆ ವಿಭೂತಿ ಧಾರಣ ಮಹಿಮೆಯಂ ಇಂತೆಂದು ನಿರೂಪಿಸಿದನು,

End :

ಈ ಕಥೆಯುನ್ನು ತ್ರಿಸಂಧ್ಯಾ ಕಾಲದಲ್ಲಿಯೂ ಆರು ಕೇಳುವರೊ, ಆರು ಹೇಳುವರೊ, ಅವರು ಕೃತಾರ್ಥರಾಗುವರು. ಆದುಕಾರಣ ನೀವು ತಾರಕವಾದ ಶಿವನ ಮಹಿಮೆಯಂ ಕೊಂಡಾಡುತ್ತಿರಿ. ಶಿವನ ಪಾದಕಮಲಂಗಳಿಗೆ × ಗರ್ಭದಲ್ಲಿ ಜನಿಸಬೇಡಾಯೆಂದು ಸೂತಪೌರಾಣಿಕನು ಶೌನಕಾದಿ ಮುನಿಗಳಿಗೆ ನಿರೂಪಿಸಿದನು.

Colophon :

ಸ್ಕಂದ ಪುರಾಣೋಕ್ತವಾದ ಬ್ರಾಹ್ಮೋತ್ತರ ಖಂಡದಲ್ಲಿ ತ್ರಿಪುಂಡ್ರ ಧಾರಣ ಮಹಿಮೆಯಂ ಪೇಳ್ದಲ್ಲಿಗೆ ಅಧ್ಯಾಯ ೧೬ಕ್ಕಂ ಮಂಗಳ ಮಹಾಶ್ರೀ,

478

Sl. No : 18460 त्रिमकूटमाहात्म्यम् Ms. No : P. 262/1

Beginning :

ऋषयः—

कावेर्याः कपिलायाश्च सङ्गमे सूत यत्स्थलम् ।
तद्वदस्व महाभाग स्नानात्पानाच्च दर्शनात् ॥

श्रीसूतः—

कवेरकन्याकपिलोदबिन्दून्
स्पृशन्ति पश्यन्ति पिबन्ति ये नराः ।
ते मर्त्यलोके न पिबन्ति मातु–
स्तन्यं पिबेयु × तामृतम् ॥

End :

× × × × सायुज्यमाप्नुयात् ॥

Colophon :

इति स्कान्दे पुराणे × हात्म्ये त्रिमकूट × × ॥

479

Sl No : 18461 दक्षिणद्वारकामाहात्म्यम् Ms No : P. 3854/4

Beginning :

व्यास वसिष्ठनप्तारं ॥ व्यासाय विष्णु ॥ अविकाराय ।
अचतुर्भुजा ॥ पाराशर्य परमपुरुषं ॥
अष्टादशात्मक ॥ × पङ्कजं भजे ॥

जनमेजयः—

वेदार्थाः कथितास्सर्वे मह्यं करुणया त्वया ।
भारते हरिवंशे च वैशंपायन विस्तरात् ॥
अन्यच्च पुण्यचरितमाख्यातं भक्तवत्सल ।
भूयश्चेतरदिच्छामि श्रोतुं त्वत्सूक्तिमण्डलम् ॥

End :

कृष्णस्य प्रगुणकथां समाहितात्मा
श्रद्धावान् शुचिरनसूयुरार्जवान् सः ।
संलब्धवान् जगति समस्तपूज्यमानः
तद्विष्णोः पदमुपयाति यः शृणोति ॥

Colophon :

इति हरिवंशशेषे दक्षिणद्वारकामाहात्म्ये त्रिषष्टितमोऽध्यायः ॥

480

Sl. No : 18462 दक्षिणशेषाद्रिमाहात्म्यम् Ms. No : P. 4854

Beginning :

शुक्लम्बरधरं + + शान्तये ।
व्यासं + + वासिष्ठाय नमोनमः ॥
भगवन् सूत सर्वज्ञ वेदव्यासकृपानिधे ।
वेङ्कटाद्रेस्तु सोत्कृष्टो दक्षिणोरगशैलराट् ॥
इति प्रोक्तं त्वया सूत तन्नो ब्रूहि गुणार्णव ॥

End ;

विमाने दूरतः दृष्ट्वा दक्षिणोरगशैलतः ।
स्त्रीणामंपञ्चवृत्या तु पुनर्जन्म न विद्यते ॥ (?)
स याति ब्रह्मभवनं कुलत्रितयसंयुतः ।
गावो वा ब्राह्मणो वापि यो वा को वापि भूपते ॥
क्षणार्धमपि चाब्जायां तिष्ठन्नाकं नयन्त्यमाम् ॥ (?)

Colophon :

इति श्रीमद्वराहपुराणे उत्तरखण्डे दक्षिणशेषाद्रिमाहात्म्ये पञ्चमोऽध्यायः ॥

481

Sl. No : 18463 दक्षिणामूर्तिमाहात्म्यम् Ms. No : P. 720/4

Beginning :

जैमिनिरुवाच —

भगवन् योगिनां श्रेष्ठ सर्वशास्त्रविशारद ।
उक्ताः पूर्वं त्वया शक्तिमन्त्राः कोटिगुणाधिकाः ॥
तत्रापि दक्षिणामूर्तेः श्रोतुमिच्छाम्यनुत्तमम् ।
तस्य मन्त्रस्य माहात्म्यं वर्णितुं केन शक्यते ॥

End :

दक्षिणामूर्तिमाहात्म्यं यस्य गेहे पठिष्यते ।
तस्याविद्यां महालक्ष्मीश्चञ्चलापि × वेत् ॥

Colophon :

— — —

482

Sl. No : 18464 दक्षिणामूर्तिवीणामहिमा Ms. No : C. 250/4

Beginning :

नारदं च मुनिश्रेष्ठं सर्वलोकहितं सुतम् ।
ब्रह्मा प्रोवाच तनयं काकपक्षशिखान्वितम् ॥
गुर्वन्तेवासिनं नित्यं सान्निध्यं च करोति यः ।
नारदं च मुनिश्रेष्ठं सर्वलोकहितं प्रियम् ॥

End :

चतुष्षष्टिकलाःविद्याः येनोपायेन लभ्यते ।
उपायं तु वदामीति वीणां स्पृष्ट्वा ददौ गुरुः ॥
पठतां शीघ्रफलदं तद्ब × × × × ।

Colophon :

— — —

483

Sl. No : 18465 **देवपुरीमाहात्म्यम्** Ms. No: A. 614/3

Beginning :

गोपालं जगतामीशं गोधनैः परिवारितम् ।
गोपिकारमणं वन्दे कोटिसूर्यसमप्रभम् ॥
कदाचिन्मुनयस्सर्वे कौतूहलसमन्विताः ।
नैमिशारण्ये महापुण्ये चाश्रमे ददृशुर्मुनिम् ॥

End :

इदं समस्तपापघ्नं माहात्म्यं मोक्षदं शुभम् ।
साक्षात्परमहंसानां कथितं वस्सुखावहम् ॥
हरिरेव समस्तलोकनाथो
हरिरेवार्तजनैकबन्धुः ।
हरिरेव परायणो नराणां
हरिरेवाप्रतिनामधेयः ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे शिवनारदसंवादे देवक्षेत्रमाहात्म्ये एकादशोऽध्यायः ॥

484

Sl. No : 18466 **देवीमाहात्म्यम्** Ms. No : B. 2467/a

Beginning :

भगवन् अवतारा मे चण्डिकायस्त × दिताः ।
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥
मातुलुङ्गगदाखेटं पाणी पात्रं च बिभ्रती ।
वागलिङ्गं च यानं च बिभ्रती नृपमूर्धनि ॥

मार्कण्डेय उवाच—

सावर्णिस्सूर्यतनयो मनुस्ते कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तरात् गदतो मम ॥

महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥

End :

ताभ्यां शुम्भाय चाख्याता सातीव सुमनोहरा ।
काप्यास्ते श्रीमहाराज भासयन्ति हिमाचलम् ।
नैव तादृक् कचिद्रूपं दृष्टं केनचिदुत्तमम् ।
ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥

Colophon :

इति श्रीमार्कण्डेयपुराणे सावर्णिकंमन्वन्तरे देवीमाहात्म्ये शक्रादिकृत देव्याः स्तुतिमहिषासुरवधः चतुर्थोऽध्यायः ॥

485

Sl. No : 18470 | देवीमाहात्म्यम् | Ms. No : P. 4388

Beginning :

मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेलानिर्मित × लोचनवधे हे चण्डमुण्डार्दिनि ।
निःशेषीकृतरक्तबीजदनुजे नित्यें निशुम्भापहे
शुम्भध्वंसिनि नाशयाशु दुरितं दुर्गे नमस्तेऽम्बिके ॥

End :

संप्रयच्छामि संसिद्धो तव ज्ञानं भविष्यति ।
मार्कण्डेयः —
इति दत्त्वा तयोर्देवी यथाभिलाषितं वरम् ।
बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥

Colophon :

इति श्रीदेवीमाहात्म्ये सुरथवैश्यवरप्रदानं नाम त्रयोदशोऽध्यायः ॥

486

Sl. No : 18487 **देवीमाहात्म्यम्** Ms. No: C. 2416/1

Beginning :

मार्कण्डेय उवाच—

सावर्णिः सूर्यतनयः यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥
महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥

End :

इति दत्त्वा तयोर्देवी यथाभिलषितं वरम् ।
बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥

Colophon :

इति मर्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्यं समाप्तम् ॥

487

Sl. No : 18495 **देवीमाहात्म्यव्याख्या** Ms. No : P. 2467 b

Beginning :

मार्कण्डेयेन क्रोष्टकिं भागुरिं प्रति उक्तं स्तोत्रं जैमिनिप्रतिपक्षरू × मुनिपुत्रैरुक्तं मार्कण्डेयपुराणे । तद्यथामति व्याचक्ष्य × दौ व्याख्या × म्मनुस्तोत्रे स्तूयमानदेवतास्वरूपं प्राधानिकरहस्याख्ये ग्रन्थवि × उक्तं विविच्य × श्यते—अत्रैतेषामिति निर्धारणे षष्ठी ।

End :

ततोऽम्बिकामिति ॥ परमुत्कृष्टम् ॥ ताभ्यामिति ॥ शुम्भायेति क्रियायोगे × र्थी । कापि अनिर्वाच्या ॥

Colophon :

— — —

488

Sl. No : 18496 देवीमाहात्म्यव्याख्या Ms. No : P. 5144/2

Beginning :

यः सावर्णिकः सो मनुः कथ्यते । तदुत्पत्तिं निशामय जानीहि इत्यर्थः । निशामयेति शम आलोचनस्तस्य चौरादिकस्य रूपं शमोदर्शन इति दर्शनेतरविषय एव सानुबन्धसंज्ञाविधानाद्यस्वभावः । तदुच्यत इति वाच्य वाचक भेदाभिप्रायेण विस्तरात्प्रपञ्चतः वदतः कथयनः ।।

End :

इतीति वाक्यशेषः सावर्णः भविता मनुरितिदेव्या इत्यपादाने पञ्चमि सूर्या जन्म समासाद्य सावर्णिर्भविता मनुरिति वाक्यशेषः । स च मनुः अष्टमो मन्वन्तराधिपो भविष्यतीत्यर्थः। सावर्णिर्भविता मनुरिति पुनरावृत्तिः समाप्तिं द्योतयति ॥

Colophon :

इति श्री चतुर्भुजविरचितायां देवीमाहात्म्यटीकायां त्रयोदशोऽध्यायः । देवीमाहात्म्यतात्पर्यटीका सुबोधिनी समाप्ता ।।

489

Sl. No : 18497 द्रविडश्रुतिमाहात्म्यम् Ms. No : P. 2149/2

Beginning :

पाञ्चरात्रे ईश्वरसंहितायां —

यत्तु द्रमिडवेदार्थ ज्ञान × पुरुषस्स्मृतः ।
दानफलं च संयो × षाञ्च मुमुक्षुभिः ॥

End :

विष्णुधर्मे —

यस्तु सामान्यभावेन द्रमिडाम्नायपारगम् ।
उज्झते कल्पकोटीश्च रौरवं नरकं व्रजेत् ॥

Colophon :

— — —

490

Sl. No : 18498 **द्रमिडाचार्यमाहात्म्यम्** Ms. No : P. 10605/8

Beginning :

श्रीमद्देशिकद्रमिडवेदगुरोः प्रसादा-
लब्धं विचिन्त्य परसादुपदिश्य मार्गम् ।
पश्चात्तनार्थमुपदेशमिदं ब्रवीमि
वृत्ते वसन्ततिलके विनिवेश्य सौम्ये ॥

End :

अन्यस्य भक्तनिवहस्य निबन्धनानां
एतत्कृतादिमनिबन्धनमाविरासीत् ।
तत्सारसंग्रहतयापि च मङ्गलाना-
मापादनात् प्रणववन्निखिलागमानाम् ॥
श्रीमद्गनाथतदुपज्ञनिबन्धनाख्या
का वा प्रबन्ध × × × ॥

Colophon :

— — —

491

Sl. No : 18499 **द्वादशार्णमाहात्म्यम्** Ms. No: C. 68752/11

Beginning :

अथ वक्ष्यामि माहात्म्यं द्वादशार्णस्य पार्थिव ।
यस्योच्चारणमात्रेण द्वादशाब्दफलं लभेत् ।
नमो भगवते नित्यं वासुदेवाय शार्ङ्गिणे ।
प्रणवेन समायुक्तं द्वादशार्णमनुं जपेत् ॥

End :

द्वादश्यां पूजयेद्विष्णुं कोमलैस्तुलसीदलैः ॥
विष्णुतुल्यवपुः श्रीमान् मोदते परमे पथि ।
द्वादशार्णमनोरेवं विधानं प्रोच्य × ॥

Colophon :

— — —

492

Sl. No : 18500 द्वारकामाहात्म्यम् Ms. No : P. 743/7

Beginning :

स्कान्दपुराणे पूर्वखण्डे शौनक उवाच—

कथं सूत युगेष्वस्मिन् काद्रवे कलिसंज्ञके ॥

बहुपाषण्डसङ्कीर्णे प्राप्स्यामो मधुसूदन ॥

End :

एतन्माहात्म्यमतुलं विष्णुपादोदकस्य च ।

यश्शृणोति नरो भक्त्या सर्वपापैः प्रमुच्यते ॥

Colophon :

इति स्कान्दपुराणे प्रह्लादप्रोक्तसंहितायां द्वारकामाहात्म्ये श्री विष्णुपादोदक माहात्म्यं नाम द्वादशोऽध्यायः ॥

493

Sl. No : 18501 धनुर्मासमाहात्म्यम् Ms. No : P. 7880

Beginnig :

भविष्योत्तरपुराणे उत्तरभागे युद्धकाण्डप्रस्तावे रावणसंहारानन्तरं श्रीरामः—

धनुर्वर त्वयेदानीं हतारिरभवं मृधे ।

शान्तं तमसि हत्वारीन् जयो येन त्वयार्जितः ॥

किं ददामि वरं तुभ्यं कोट्यो रत्नानि चार्पये ।

दण्डं हिरण्मयं मौर्वीं रत्नस्रगवलम्बिताम् ॥

End :

श्रवणे लुब्धमनसां दशाध्यायान् वदाद्य नः ।

इत्युक्तो मुनिभिः सूतः श्लाघ्यमानो महात्मभिः ॥

श्रीरामेणोदितां साक्षात् दशाध्यायकथां शुभाम् ।

वक्तुमारब्धवांस्तत्र तथा ध्यानपरोऽभवत् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे उत्तरभागे षोडशोऽध्यायः । धनुर्मासमाहात्म्यं संपूर्णम् ॥

494

Sl. No: 18503 धनुर्मासमाहात्म्यम् Ms. No: P. 9146/1

Beginning:

श्रीशौनकः —

सूत सूत महाभाग सर्वशास्त्रविशारद ।
पुराणमखिलं वेत्सि पारशर्यप्रसादतः ॥
सर्वेषामपि मासानां माहात्म्यं त्वन्मुखात् श्रुतम् ।
पृच्छाम्यहं महाभाग धनुर्माहात्म्यमुत्तमम् ॥

End:

हस्तमालम्ब्य हस्तेन तानृषीनिदमब्रवीत् ॥

षण्मुख उवाच—

धनुर्मासे हरेः प्रोक्तः उषःकालार्चना ध्रुवम् ॥
ददात्यभीष्टमत्यर्थं सत्यमेव ब्रवीमि वः ।
उषःकाले धनुर्मासे स्नात्वा सम्यग्जनार्दनम् ॥

Colophon:

इति स्कान्दे धनुर्मासमाहात्म्ये व्यतीपातमाहात्म्यप्रशंसनं नाम पञ्चमो ऽध्यायः ॥

495

Sl. No: 18504 धनुर्मासमाहात्म्यम् Ms. No C: . 115

Beginnig:

ऋषय ऊचुः—

सूत सूत महाभाग सर्वशास्त्रविशारद ।
धनुर्मासस्य माहात्म्यं को वा वर्णयितुं क्षमः ॥
दुःखदारिद्र्यपापघ्नं सर्वयज्ञफलप्रदम् ।
श्रुत्वैव दिव्यमाख्यानं सर्वत्र विजयी भवेत् ॥

इति श्रीमदाग्नेयपुराणे धनुर्मासमाहात्म्ये त्रिंशोऽध्यायः ॥

496

Sl.No : 18505 धनुर्मासमाहात्म्यम् Ms. No : C. 1013

Beginning :

शौनक उवाच—

सूत सूत महाभाग सर्वशास्त्रविशारद ।
पुराणमखिलं वेत्थ पराशर्यप्रसादतः ॥
सर्वेषामपि मासानां महात्म्यं त्वन्मुखात् श्रुतम् ।
अधुनेह महाभाग धनुर्माहात्म्यमुत्तमम् ॥

End :

ब्रह्मणा वेदघोषैश्च ह्याशिषोऽस्य वितेनिरे ।
ये श्रृण्वन्तीयमध्यायमायुः किर्तिं यशोञ्जसा ॥
आप्नुवन्ति न सन्देहः पुत्रपौत्रसमन्विताः ।
इह भुक्त्वा महाभोगानन्ते वैकुण्ठमन्दिरम् ॥

Colophon :

इति श्री सनत्कुमारसंहितायां शैवागमे धनुर्मासमाहात्म्ये दशमोऽध्यायः ।
धनुर्मासमाहात्म्यं सम्पूर्णम् ॥

497

Sl. No : 18506 धनुर्मासमाहात्म्यम् Ms. No : C. 4601/1

Beginning :

धनुर्मासे हरेः पूजा कथं कार्या द्विजोत्तमैः ।
एतद्विस्तरशो ब्रूहि मयि चेदस्ति ते दया ॥

श्रीहंसः—

चापस्थे च यदा भानौ सर्वकामान्विहाय च ।
सूर्योदये समाप्याथ नित्यकर्म यथाविधि ॥

End :

य इत्थं कारयेद्विद्वान् वेदवोङ्गपारगः ।
हरिभक्तिसमायुक्तः विष्णुलोके महीयते ॥

498

Sl. No : 18508 नरसिंहजयन्तीमाहात्म्यम् Ms. No : P. 9993/16

Beginning :

श्री नारद उवाच—

राधे शुक्लचतुर्दश्यां सायंकाल उदाहृते ।
स्वातिशुक्ते मन्दवारे प्रादुरासीन्नृकेसरी ।।
तस्यां यश्चोपवासं तु यश्च पूजार्चनां निशि ।
कुरुते मुनिशार्दूल तेषां पुण्यं वदामि वः ।

End :

तस्मात्सर्वप्रयत्नेन मानवो बुद्धिमान्यदि ।
नारसिंहजयन्त्याख्यव्रतं सम्यक् समाचरेत् ॥
इतीदं कथितं पुण्यं आयुरारोग्यवर्धनम् ।
शृणुयाच्छ्रावयेद्वापि स पुमानघहारकः ।।

Colophon :

इति श्रीनारदियपुराणे नारसिंहजयन्तीव्रतकथा सम्पूर्णा ॥

Extra information —

ग्रन्थान्ते दृश्यते —

घण्टासप्तकमण्डितं त्वमसि च श्रीरामदोर्मण्डनं
चण्डारिव्रजदण्डनेन विभुना श्रीरामचन्द्रेण च ।
प्रीत्या स्थापितमत्युपर्यथ धनुर्गत्वा धनुष्पाणये
तुभ्यं राघवनन्दनाय धनुषः पूजां स्वयं स्वीकुरु ॥
रामाय सीतापतये नमो मुक्तिप्रदायिने ।
नमस्ते रघुवंशाय सीतायाः पतये नमः ॥

पाञ्चरात्रोक्तधनुर्मासमाहात्म्यग्रन्थसंख्या —

११	३६	१४१
३३	११	
११	१८	

499

Sl. No : 18509 **नृसिंहजयन्तीव्रतमाहात्म्यम्** Ms. No : P. 10048/29

Beginning :

व्रतस्यास्य प्रभावं ते शृणु वक्ष्ये महामते ।
स्नायात्पूर्वदिने युक्तः दन्तधानवपूर्वकम् ॥
ब्रह्मचारी हरिं ध्यायन् दश × त हरिमन्दिरे ।
प्रातरुत्थाय नियतः कुर्वीत स्वोचिताः क्रियाः ॥

End :

पठन्ति ये तथा भक्त्या प्रयताः प्रतिवासरम् ।
तेषां तत्कालपापानां × श्छिंत न संशयः ॥
व्रतं लक्ष्मीनृसिंहस्य ये कुर्वन्ति नरोत्तमाः ।
ते पुत्रपौत्रसहिता मोदन्ते स्थिरसंपदः ।
सनत्कुमारो भगवान् कैवल्यं × × ॥

Colophon :

भविष्योत्तरपुराणे नृसिंहजयन्तीव्रतकथा सम्पूर्णा ॥

500

Sl. No : 18512 **नारायणगिरिमाहात्म्यम्** Ms. No: C. 3897//18

Beginning :

श्रीजनक उवाच—
श्रुतं भवन्मुखात्सर्वं नारायणगिरेरिदम् ।
माहात्म्यं धर्मकामार्थमोक्षैकफलसाधनम् ॥
तद्वद्वद दयासिन्धो सर्वज्ञानोत्तमोत्तम ।
अनायासेन मर्त्यानां केन रक्षा भवेदिह ॥

End :

सर्वशत्रुक्षयकरं सर्वाभीष्टफलप्रदम् ।
सकृन्त्यासेन मन्त्रेण कालमृत्युनिवारणम् ॥
शृणु गुह्यतमं राजन् ज्वरापत्सु निवारणम् ॥

Colophon :

— — —

501

Sl.No : 18515 पञ्चक्रोशमाहात्म्यम् Ms. No : A. 309

Beginning :

शृणु वक्ष्ये विधिं सम्यक् पञ्चक्रोशप्रदक्षिणम् ।
यत्प्रदक्षिणमात्रेण नश्यत्यघकुलं क्षणात् ॥
उपवासः प्रयत्नेन कार्यं मुण्डनपूर्वकम् ।
पञ्चगव्यं ततो ग्राह्यं स्नात्वा ज्ञानेशसन्निधौ ॥

End :

ईश्वर उवाच—
पञ्चक्रोशस्य यात्राया माहात्म्यं सुरदुर्लभम् ।
प्रकाश्यं न हि सर्वत्र रहस्यं ह्येतदुत्तमम् ।
शृण्वतां पठतां चैव प्रदक्षिणफलप्रदम् ॥

Colophon :

इति श्री अग्निपुराणे काशीमाहात्म्ये पञ्चक्रोशयात्राविषये उमामहेश्वरसंवादे तृतीयोऽध्यायः ॥

502

Sl. No : 18516 पञ्चक्रोशमाहात्म्यम् Ms. No: C. 1541

Beginning :

तस्मान्मोहकथा दूरे स्थितेति प्रतिभाति नः ।
एक एव शरण्यस्त्वं शरणागतवत्सल ॥
श्रीकपिञ्जल उवाच —
मोक्षस्य बीजं परमस्य चैकं
प्रियः परेशो भगवान् कथञ्चित् ।
हरिः प्रियस्स्याद्धृदि वा हरो हि
तथा यथा विषया मोहरूपाः ॥

अथापि मुक्तो भविता यदि त्वां
भक्तस्त्वभीक्ष्णं सकलैश्च चारैः ।
पूर्वोदितादप्यतिदुश्शकोऽयं
विमोहनार्थैरखिलैश्च शास्त्रैः ॥

Colophon :

इति ब्रह्मवैवर्ते पञ्चक्रोशयात्रायां पञ्चमोऽध्यायः ॥

503

Sl. No : 18518 | पञ्चनदीमाहात्म्यम् | Ms. No : P. 4680

Beginning :

श्रीगुरुं गणपं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वर्णीं वन्दे विभूतये ॥
सर्वज्ञमज्ञानतमःप्रदीपं
सत्यात्मकं संश्रितकल्पवृक्षम् ।
कारुण्यलक्ष्मीं कमनीयमूर्तिं
श्री शङ्कराचार्यगुरुं नमामि ॥

End :

इति दक्षिणकैलासः श्रीनन्दीशगिरिः पुरा ।
मयैतत्कथितं कृत्स्नं समासेन तपोधन ॥
श्रुत्वा सर्वं सूतपुत्रात्मुनीन्द्रा
नन्दि × × × ।
गन्तुं सर्वे सर्वमिष्टार्थसिध्यै
× × × रोमाञ्चिताङ्गाः ॥

Colophon :

इति आदिमहापुराणे ब्रह्माण्डे शतसहस्रसंहितायां उत्तरभागे सूतसंवादो नाम × × तमोऽध्यायः ॥

504

Sl. No : 18519 नासिकमाहात्म्यम् Ms. No : C. 1984

Beginning :

× × × × ×

सुन्दरराजदुर्लभतरां संप्राप्तवान् रावणः।
तां त्वद्दर्शनमात्रतस्तदनुजो लेभे चिरस्थायिनीं
ब्रूहि त्वं रघुनाथ कोऽस्ति भवता दाता समः क्ष्मातले ॥

End :

एषा रामकथा यथामति मया प्रोक्ता भवत्सन्निधौ
नित्यं ये तु पठन्ति पञ्चवटिकामध्ये नृणां सन्निधौ ।
तेषां मुक्तिफलं करस्थितमिति ज्ञेयं बुधैर्निश्चयात्
श्रीरामस्य दयानिधेर्यदि कृपा जायेत किं दुर्लभम् ॥

Colophon :

इति श्रीपद्मपुराणे नासिकमाहात्म्ये श्रीपञ्चवटीमहिमा निरूपणं नाम एकोनविंशोऽध्यायः ॥

505

Sl. No : 18521 पञ्चाक्षरीमाहात्म्यम् Ms. No : P. 4491/1

Beginnig :

मौलौ मौक्तिकसन्निभाः पटुजटामल्लीषु मल्लीनिभाः
कण्ठे हारविहारिणोऽञ्जलिपुटे फुल्लप्रसूनप्रभाः ।
भूमौ पालितपुष्पवृष्टिसदृशास्तारानिभाभ्यां ×
शम्भोर्वः शुभदा भवन्तु नटतो गङ्गापयोबिन्दवः ॥

ಈ ಪ್ರಕಾರವಾಗಿ × ನೈಮಿಶಾರಣ್ಯವಾಸಿಗಳಾಗಿ ಶಿವಭಕ್ತಿಯುಳ್ಳಂಥಾ ಶೌನಕಾದಿಮುನಿಗಳು ಸೂತಪೌರಾಣಿಕನಂ ಕೇಳುತ್ತಿದ್ದಾರು — ಶಿವಮಹಿಮೆಯನು ಶಿವಮಂತ್ರಗಳ ಮಹಿಮೆಯನು ವಿಸ್ತಾರವಾಗಿ ...... ಮಂತ್ರರಾಜನಾದ ಪಂಚಾಕ್ಷರಿಯ ಜಪದಿಂದಲೇ ಸಮಸ್ತ ಮುನಿಗಳು ಮುಕ್ತಿಯಂ ಪಡೆವರು.

End :

ರಾಮಭದ್ರನು ಹರಿಶ್ಚಂದ್ರನು ನಳಚಕ್ರವರ್ತಿ ಮೊದಲಾದ ರಾಯರು ಗಳಿಂದಲೂ ಜಪಿಸಲ್ಪಟ್ಟಂಥಾ ಪರಶಿವ ತತ್ವ ಪ್ರತಿಪಾದಕವಾದ ಕಾರಣ ನಮಃ ಶ್ಶಿವಾಯ ಎಂಬ ಈ ಶಿವಪಂಚಾಕ್ಷರೀ ಮಂತ್ರವನು ನೀವು ಆವಾಗಲೂ ಜಪಿಸಿ ಎಂದು ಸೂತ ಪೌರಾಣಿಕನು ಶೌನಕಾದಿ ಮುನಿಗಳಿಗೆ ನಿರೂಪಿಸಿದನು.

Colophon :

ಇದು ಶ್ರೀಮದ್ರಾಜಾಧಿರಾಜ × ಚಾಮರಾಜ ಪೊಡೆಯರಯ್ಯನವರು ಕರ್ಣಾಟ ಭಾಷೆಯಿಂದ ವಿರಚಿಸಿದಂಥಾ ಸ್ಕಂದಪುರಾಣೋಕ್ತವಾದ ಬ್ರಾಹ್ಮೋತ್ತರ ಖಂಡದಲ್ಲಿ ಪಂಚಾಕ್ಷರೀ ಮಹಿಮೆಯಂ ಪೇಳ್ದಲ್ಲಿಗೆ ಅಧ್ಯಾಯ ೧೦೦ ಕ್ಕಂ ಮಂಗಳ ಮಹಾಶ್ರೀ ॥

506

Sl. No : 18522 पम्पामाहात्म्यम् **Ms. No : B. 1155/1**

Beginning :

ऋषय ऊचुः —

सूत सूत महाप्राज्ञ सत्यज्ञानवतां वर ।
त्वद्वाक्यामृतनिष्यन्दैः सर्वे सञ्जीविता वयम् ॥
नानाविधानि देवस्य विरूपाक्षस्य शृण्वताम् ।
चरितानि त्वदुक्तानि चरितार्थमतिर्हि नः ॥

End :

पीठं यस्या धरित्री जलधरकलशं लिङ्गमाकाशमूर्तिः
नक्षत्रं पुष्पमाला ग्रहगणकुसुमैर्नेत्रचन्द्रार्कवह्निः ।
कुक्षौ सप्तसमुद्रा भुजगिरिशिखरं सप्तपातालपादं
वेदं वक्त्रं षडङ्गं दश दिश वसनं दिव्यलिङ्गं नमामि ॥

Colophon :

पम्पामाहात्म्यं संपूर्णम् ॥

507

Sl. No : 18524 पलाशवनमाहात्म्यम् Ms. No: P. 79/2

Beginning :

× मालोके कावेरी सरितां वरा ।
अव्यात्कावेरितीर्थेषु स्नानं कुर्वन्ति ये नरा ॥
सर्वपापविनिर्मुक्ताः प्रयान्ति परमं पदम् ।
कावेरीतोयममलं शीतलं स्वादु पावनम् ॥

End :

अगस्त्योऽपि मुनिश्रेष्ठ पर्णशालामुभावपि ॥
सूतेन कथितं सर्वं नै × × ॥
× × ऋषयो ब्रह्मवादिनम् ।
स्वं स्वलायमवाप्य मुभि × ।
शृण्वतां सर्वपापघ्नं आयुरारो × ॥

Colophon :

× लाशवनमाहात्म्ये श्वेतकूटाकवैभवं नाम सप्तदशोऽध्यायः ॥

508

Sl. No : 18525 पश्चिमरङ्गमाहात्म्यम् Ms. No : P. 5635/114

Beginning :

× बोधायनक्षेत्रम् । कुशतीर्थम् × पश्चिमे भागे आर्द्रेषेण ऋषिक्षेत्रम् । मोक्षतीर्थ(केरे) अम्बरि । भृगुक्षेत्रं अश्विदतीर्थम् ॥: पश्चिम वाहिनी पार्वतीक्षेत्रम् ॥

End :

तस्मादेतेषु तीर्थेषु तुलाराशिं गते रवौ ।
ध्याय × × × ॥
तत्रैवाराध्य रङ्गेशं नैवेद्यं च निवेदयेत् ॥
ब्राह्मणान् भोजयित्वाऽथ स्वयं भुङ्क्ते च यो द्विजः ।
स वै देहावासने तु विष्णुसायुज्यमाप्नुयात् ॥

509

Sl. No : 18529 पाण्डुरङ्गमाहात्म्यम् **Ms. No : C. 1341**

Beginning :

स्कन्द:—

माहात्म्यं कथितं सम्यक् नदीनामुत्तमोत्तमम् ।
गङ्गादीनां मुनिश्रेष्ठाः किमन्यच्छ्रोतुमिच्छति ॥

ऋषयः ऊचुः—

सर्वोत्तममं यदि क्षेत्रं तीर्थं त्वेकत्र विद्यते ।
उत्कृष्टं दैवतं चापि तन्नो वद महामते ॥

End :

स्नात्वा तीर्थे महापुण्ये दृष्ट्वा देवं सनातनम् ।
दक्षिणद्वारमाश्रित्य तिष्ठत्यद्यापि नारदः ॥
रामप्रेरणया रामं नत्वा रामस्य तुष्टये ।
रामस्वरूपभूतं हि लिखितं माहात्म्यमुत्तमम् ॥

Colophon :

इति श्री स्कान्दपुराणे उत्तरसंहितायां पाण्डुरङ्गमाहात्म्ये शङ्करनारदसंवादे द्वादशोऽध्यायः ॥

510

Sl. No : 18532 पिनाकिनीमाहात्म्यम् **Ms. No : P. 4001/22**

Beginning :

निमिर्नाम महाराजो गोदावर्याः तटे शुभे ।
पप्रच्छ मुनिशार्दुलं वसिष्ठं ब्रह्मनन्दनम् ॥
वद मे कृपया ब्रह्मन् विस्तरान्मुनिपुङ्गव ।

End :

वापीषु संस्मरेन्नित्यं महात्मानं गदाधरम् ॥
क्षुद्रापगासु राजेन्द्र चक्रपाणिं महाभुजम् ।

एवमादीतरा मूर्तिः तीर्थस्नानफलेप्सुभिः ।
स्मर्तव्याः सततं राजन् नात्र कार्या विचारणा ॥

Colophon :

इति श्रीपिनाकीनीमाहात्म्ये निमिवसिष्ठसंवादे षट्त्रिंशोऽध्यायः ॥

511

Sl. No : 18535 पुरुषोत्तममाहात्म्यम् Ms. No: P. 10232

Beginning :

मुनयः ऊचुः —
भगवन् सर्वशास्त्रज्ञ सर्वतीर्थमहात्म्यवित् ।
कथितं यत्त्वयापूर्वं प्रस्तुतो तीर्थकीर्तने ॥
पुरुषोत्तमाख्यं सुमहत्क्षेत्रं परमपावनम् ।

End :

धन्यं यशस्यमायुष्यं पुण्यं सन्तानवर्धनम् ।
स्वर्गप्रतिष्ठागतिहंस सर्वपापापनोदनम् ॥
एतद्रहस्यमाख्यातं पुराणेषु सुगोपितम् ।
वै × × × ।
नास्तिका × भिकनिरयपरदोषोपदर्शनम् ॥

Colophon :

इति स्कन्दपुराणे जैमिनिऋषिसंवादे पुरुषोत्तम × यः । पुरुषोत्तम माहात्म्यं सम्पूर्णम् ॥

512

Sl. No : 18536 पुलिनालयक्षेत्रमाहात्म्यम् Ms No : P. 2971/4

Beginning :

स तु विश्वसखे भूयः श्रोतुकामो हरेः कथाम् ।
मुनीन्द्रास्तमुवाचेदं सनकं यमिनां वरम् ॥

राजा—
अत्यद्भुतमिदं ब्रह्मन् श्रीपतेः क्षेत्रवैभवम् ।
शृण्वतो मम विप्रेन्द्र न तृप्तिरुपजायते ॥

End :

देवर्षिणोक्तं वचनं निशम्य
राजा तदा हृष्टमना बभूव ।
पुनश्च विष्णोश्चरितं महार्थं
श्रोतुं विधेः सूनुमपूजयत् सः ॥

Colophon :

इति ब्रह्माण्डपुराणे क्षेत्रकाण्डे पुलिनालयक्षेत्रमाहात्म्यं नाम दशमोऽध्यायः ॥

513

Sl. No : 18537 प्रयागमाहात्म्यम् **Ms. No : P. 743/2**

Beginning :

कदाचिन्नैमिशारण्ये सूतं परमकोविदम् ।
कोविदास्सर्वधर्मेषु सर्वयज्ञेषु कोविदाः ॥
श्रुतिस्मृतिपुराणज्ञाः सदाचारपरायणाः ।
अनूचानाः सदस्याश्च सर्वदा धर्मवादिनः ॥

End :

इदं प्रयागमाहात्म्यं शृणुयाद्यस्सकृन्नरः ।
सर्वपापाविनिर्मुक्तो याति तद्वैष्णवं पदम् ॥

Colophon :

इति श्रीपद्मपुराणे पाताळखण्डे शेषशनत्कुमारसंवादे प्रयागमाहात्म्ये
× वणादिपुराणश्रवणविधिर्नाम एकसप्ततितमोऽध्यायः ॥

514

l. No : 18539 प्रयागमाहात्म्यम् **Ms. No: C. 123/1**

Beginning :

सूत उवाच—

कदाचिन्नैमिषारण्ये सूतं परमकोविदम् ।
कोविदाः सर्वधर्मेषु सर्वयज्ञेषु कोविदाः ॥
श्रुतिस्मृतिपुराणज्ञाः सदाचारपरायणाः ।
अनूचानाः सदस्याश्च सर्वदा धर्मवादिनः ॥

End :

प्रयागे चेत् घटेदेतत् उद्यापनमनुत्तमम् ।
तथान्यतः कोटिगुणं माधवः कुरुते स्वयम् ॥
एवमुद्यापनविधिः शौनकाद्या महर्षयः ।
कथितो भवतां प्रित्यै किमन्यच्छ्रोतुमिच्छसि ॥

Colophon :

इति पद्मपुराणे पातालखण्डे प्रयागमहात्म्ये सोद्यापनविधिनिरूपणं नाम द्विपञ्चाशत्तमोऽध्यायः ॥ इति श्रीप्रयागमाहात्म्ये पूर्वार्धः समाप्तः ॥

515

Sl. No : 18541 **प्रयागमाहात्म्यम्** **Ms. No : C. 172**

Beginning :

सूत उवाच—
श्रीमन्माधवदेवेशं शङ्खचक्रगदाधरम ।
जगदानन्दमव्यक्तम् वेदवेद्यतमं विभुम् ॥
तत्पदाम्बुजकारुण्यात् तत्पदाम्बुजसेवनात् ।
कृपया संप्रवक्ष्यामि प्रयागस्य यशोऽमलम् ॥

End :

विष्णुभक्तिविहीनेभ्यो गोपनीयमिदं शुभम् ।
न वक्तव्यं न वक्तव्यं न वक्तव्यं कदाचन ॥
दुर्ज्ञानिदुष्टबुद्धीनां विमुखानां मधुद्विषः ।
श्रोतव्यं कीर्तितव्यं च विष्णुभक्तेषु वैष्णवैः ॥

Colophon :

इति ब्रह्मपुराणे नारदयुधिष्ठिरसंवादे प्रयागमाहात्म्ये द्वादशोऽध्यायः ॥

516

Sl. No : 18544 **फुल्लारण्यमाहात्म्यम्** **Ms. No : P. 3923/2**

Beginning :

श्रीमानादिजगत्प्रभुः श्रुतिशिरोमृग्यत्रिपाद्वैभवः
श्रीवैकुण्ठनिकेतनादिह समागत्य भिया सादरम् ।

फुल्लारण्यमुपेत्य पुष्पितमिदं फुल्लर्षिमानन्दयन्
सल्लापेन चिरं निवासमकरोत् यो नस्स पायाद्धरिः ॥
ऋषयो नैमिशारण्ये + सूतं पप्रच्छुरादरात् ।
+ + सूतः प्रोवाच धर्मवित् ।
फुल्लारण्यमिति ख्यातं तीरे नदनदीपतेः ।
उदयेद्दक्षिणस्याथ तीरमाश्रित्य चोत्तरम् ॥

End :

य इदं पुण्यमाख्यानं सर्वसम्पत्प्रदायकम् ।
आयुष्यमारोग्यकरं पुत्रपौत्राभिवृद्धिदम ॥
पठन्ति दिव्यचापस्य सन्निधौ सतंत हरेः ।
शृण्वन्त्यपि च ये भक्त्या सर्वान् कामानवाप्नुयुः ॥

Colophon :

इत्याग्नेयपुराणे भुवनकोशवर्धने फुल्लारण्यमाहात्म्ये षट्सप्ततितमोऽध्यायः ॥

517

Sl. No : 18545 **बदरिकाश्रममाहात्म्यम्** Ms. No : P. 79/5

Beginning :

वन्दे श्री नारसिंहं गरुडसुरमुनिक्रोडकेदारगङ्गा
मार्कण्डेयाग्नितीर्थद्रविणदभगवत्पाददुर्गागणेशान् ।
× ध्रुव श्री नरनगबदरीनारायणाख्यं
ब्रह्मप्रह्लादयोगीश्वरकमलपदनृसिंहांश्च भक्त्या ॥

End :

देवगन्धर्वसिद्धाश्च सर्वसेव्याश्च काश्चन ।
बहुभिरिह वचोभिः किं मुने श्रीबदर्या—
ममिमतमखिलं स्याद्या सुराणां मवश्यत् । (?)
अपरिचितमुकुन्दध्यानवर्माशयाना-
मपि परमनववश्रीपतेर्यात्रयैव ॥

Colophon :

इति सनत्कुमारसंहितायां ऊर्ध्वभागे श्रीबदरीमाहात्म्ये दशमोऽध्यायः ॥

518

Sl. No : 18547 बालिकावनक्षेत्रमाहात्म्यम् Ms. No : C. 9993/4

Beginning:

राजा—

भगवन् क्षेत्रमाहात्म्यं यथावत् कथितं त्वया ।
सुधासारं महाब्रह्मन् श्रुतं श्रोत्रसुखावहम् ॥
नदीनां पुण्यतोयानां वरिष्ठा या महामते ।
ताम्रपर्ण्याः तटे रम्ये शुभवस्तुचरे पुरः ॥

End :

सनकः—

द्विजकुलतिलकोऽसौ वेदसारोक्तिहृष्टः
कमलनयनमाद्यं बालिकारण्यमुख्ये ।
नृपवरतनयां तां तस्य वक्षःस्थलस्थां
शुभमतिरथ दृष्ट्वा वस्तुमैच्छत् सभार्यः ॥

Colophon :

इति ब्रह्माण्डपुराणे बालिकावनक्षेत्रमाहात्म्यं नाम चतुर्दशोऽध्यायः ॥

519

Sl. No : 18548 बृहद्गौरीव्रतमाहात्म्यम् Ms. No : P. 2971/6

Beginning:

राजो उवाच—

अथान्यां बृहतीगौरीव्रतं वक्ष्यामि कन्यकाः ।
मासे भाद्रपदे कृष्णतृतीयायतव्रत ॥
आमये बृहतीं शस्यां समूलफलसंयुताम् ।
निक्षिप्य देवता पूर्वं अश्वत्थाश्रितं शुभम् ॥ (?)

End :

सनन्दिसहितां नद्यां गौरीं तत्र विसर्जयेत् ।
आहूताऽसि महादेवि पूर्वस्था यमकिङ्करात् ॥
तस्मात्कुरुध्वं व्रतमेतदेव
आयुःप्रदं सर्वसमृद्धिदं च ।
पुत्रैर्धनैश्चापि सदैव वृद्धि
भविष्यदानन्दसमृद्धवित्ताः ॥

Colophon :

इति श्रीस्कन्दपुराणे गौरीकाण्डे बृहद्गौरीकथा समाप्ता ॥

520

Sl. No : 18550 **वेराक्षेत्रमाहात्म्यम्** **Ms. No : P. 2971/9**

Beginning :

राजा —
भगवन् सर्वधर्मज्ञ पुराणार्थविचक्षण ।
वक्तुमर्हसे भूयस्त्वं क्षेत्राख्यानं मद्बुद्धिषः ॥
इत्थं सुपृष्टस्य विधातृनन्दनः
भक्तः पुराणे पुरुषोत्तमोत्तमे ।
हरेः कथामङ्गलनादहर्ष
उवाच वाक्यं जगतीपतिं तदा ॥

End :

इतीदमाकर्ण्य नृपोऽतिधीरः
सम्पूज्य योगिप्रवरं वरेण्यम् ।
श्रीविग्रहाधीशकथाविचित्रं
ननन्द चानन्दपयोधिमग्नः ॥

Colophon :

इति ब्रह्माण्डपुराणे क्षेत्रकाण्डे श्रीवेराक्षेत्रमाहात्म्यं नाम एकविंशोऽध्यायः ॥

521

Sl. No : 18552 ब्रह्मवृद्धपुरमाहात्म्यम् Ms No : P. 4140

Beginning :

शिवं शीतरश्म्युल्लसन्मौलिभागं
शिवाविघ्नराजाग्निभूसंपरीतम् ।
शुनासीरवन्द्यामरैरर्च्यमानम्
शरच्चन्द्रिकानिर्मलाङ्गं भजेऽहम् ॥
नमोऽस्तु राजोरगभूषणाय
नगेन्द्रपुत्रीमनसः प्रियाय ।
नित्याय शुद्धाय निरञ्जनाय
सत्याय सर्वप्रभवे नमस्ते ॥

End :

पुण्यौघानां प्रसङ्गेषु लोकेषु महितामपि ।
क्षे × श्रेष्ठो भारतं वर्ष × ॥
× × × सम्यग्विचार्यते ।
तत्रापि दक्षिणा गङ्गा ताम्रपर्णी प्रशस्यते ॥
ब्रह्मवृद्धपुरं तत्र श्लाघ्यते तन्मया मुने ॥
× × × × × × ले ॥

Colophon :

इत्यादिमहापुराणे श्रीस्कान्दे विष्णुनारदसंवादे ब्रह्मवृद्धपुरमाहात्म्ये षड्विंशच्छततमोऽध्यायः । ब्रह्मवृद्धपुरमाहात्म्यं संपूर्णम् ॥

522

Sl.No : 18554 भक्तवत्सलमाहात्म्यम् Ms. No : P. 298/2

Beginning :

श्रीमन्तो नैमिशारण्ये निवसन्तस्तपस्विनः ।
सूतपुत्रं समायातं अभ्यागच्छन्महामतिम् ॥
अर्घ्यपाद्यादिभिः × पूज्यकर्मभिः ।
वेदसमासनं प्राप्य × सर्वानुवाच ह ॥

End :

नामत्रयं समुपदिश्य हरिर्विधात्रे
श्रीभक्तवत्सल इति प्रथतां जगाम ।
क्षेमाय सर्वजगतां रमया च भूम्या
सार्धं च विष्णुप × सन्निधत्ते ।।

Colophon :

इति पाद्मपुराणे पञ्चमखण्डे मन्त्रसिद्धिक्षेत्रकल्पे भक्तवत्सलमाहात्म्ये सप्ताशीतितमोऽध्यायः ।।

523

Sl. No : 18555 कृष्णमङ्गलमाहात्म्यम् **Ms. No : P. 3857/1**

Beginning :

उत्पलावेदके दिव्ये विमाने × पूरुषम् ।
कलये भक्तजीवेशं कमलायास्तपःफलम् ।।
उत्पलावेदकं नाम सिद्धर्षिगणसेवितम् ।
यस्य दर्शनमात्रेण सर्वं नश्यति पातकम् ।।

End :

प्रातः सन्ध्या कृता सम्यक् सहस्रगुणितं फलम् ।
एकरात्रमहोवापि यो वसेत् कृष्णमङ्गले ।
अनेकशोकसंवीतं गर्भवासं न याति सः ।।

Colophon :

इति स्कान्दे तृतीयपरिच्छेदे नागरखण्डे हारकक्षेत्रमाहात्म्ये श्री कृष्णमङ्ग लक्षेत्रकथने पञ्चविंशोऽध्यायः ।।

524

Sl.No : 18556 भक्तिमाहात्म्यम् **Ms. No : P. 8725/6**

Beginning :

ಆನಂತರದಲ್ಲಿ ಶೌನಕಾದಿ ಮುನಿಗಳು ಸೂತಪೌರಾಣಿಕನಿಗೆ ಇಂತೆಂದರು. ಎಲೆ ಸೂತ ಪೌರಾಣಿಕನೆ! ಲೋಕದಲ್ಲಿ ವೇದ ಶಾಸ್ತ್ರಜ್ಞನಾದಂಥಾ ಬ್ರಹ್ಮನಿಷ್ಠನಾದ ಗುರುಗಳಿಂದ ಉಪದೇಶವಂ ಪಡೆದವರಿಗೆ ಶೀಘ್ರದಲ್ಲಿಯೇ ಸಿದ್ಧಿಯಾಗುವುದು

ವಿಶೇಷಜ್ಞರಲ್ಲದಂಥ ಸಾಧಾರಣರಾದ ಗುರುಗಳಿಂದ ಉಪದೇಶವೇ ಪಡೆದವರಿಗೆ ಆವ ಪ್ರಕಾರ ಸಿದ್ಧಿಯಾಗುವುದು ? ನಮಗೆ ಇದಂ ತಿಳಿಸಿಸೆಂದು ಕೇಳಲು —

End :

ಸ್ಮೃತಿಪುರಾಣಾರ್ಥ ವಿಚಾರವುಳ್ಳ ವಿದ್ಯೆಯಿಂದಲೂ ಮನುಷ್ಯನು ಧನ್ಯನಲಾ. ಮತ್ತೇನೆಂದರೆ, ಆವನ ಹೃದಯದಲ್ಲಿ ನಿರಂತರವು ಪರಮೇಶ್ವರನ ಭಕ್ತಿ ಇರುವುದೊ, ಅವನೇ ಮೂರು ಲೋಕಂಗಳಲ್ಲಿಯೂ ಧನ್ಯನೆಂದು ಸೂತಪೌರಾಣಿಕನು ಶೌನಕಾದಿ ಮುನಿಗಳಿಗೆ ನಿರೂಪಿಸಿದನು.

Colophon :

ಸ್ಕಂದ ಪುರಾಣೋಕ್ತವಾದ ಬ್ರಾಹ್ಮೋತ್ತರ ಖಂಡದಲ್ಲಿ ಭಕ್ತಿಪ್ರಾಧಾನ್ಯವಂ ಪೇಳ್ದಲ್ಲಿಗೆ ಅಧ್ಯಾಯ ೧೭ಕ್ಕಂ ಮಂಗಳಮಹಾಶ್ರೀ.

525

Sl. No : 18561 **गीतामाहात्म्यम्** **Ms. No : P. 9987/3**

Beginnig :

श्रीहनुमानुवाच —

स्तोत्राण्यनेकरूपाणि गीताश्चापि महामते ।
गीतासु चापि शास्त्रेषु विशेषः कोऽस्ति तद्वद ॥

श्रीवायुः —

शृणु वक्ष्यामि तत्वज्ञ गुह्यानां गुह्यमुत्तमम ।
गरीयसां गरिष्ठं च वरेण्यं च वरीयसाम् ॥

End :

स राक्षसोऽप्यस्थिमुखेन केवलं
मुक्त्वा शत × पेत्य वै स्वकम् ।
स्थित्वा चिरं कालमिहाप्यतःपरं
मोक्षं समायाति हरेः प्रसादतः ॥

Colophon :

इति श्रीमद्वायव्यरहस्ये गरुडवायुसंवादे गीताप्रकाशिकायां ब्रह्मराक्षसमोचनं नाम दशमोऽध्यायः ॥

526

Sl. No : 18563 भगवन्नाममाहात्म्यम् Ms. No : P. 4588/1

Beginning :

× × × नं सच्चिदानन्दविग्रहम् ।
नाममाहात्म्यबोधाय ग्रथ्यते नाममालिका ॥
नानापुराणवचनान्यवलोक्य शश्वत्
ज्ञात्वा तथागमशिरो बहुधर्मशास्त्रम् ।
यत्नादधीत्य विलिखामि हरेर्विशुद्ध
नामावलिं बुधमुदे कृतिकर्णभूषाम् ॥

अत्र श्रीमद्भगवन्नाममाहात्म्यप्रतिपादकानि अशेषपुराणागमादिवचनानि लिख्यन्ते । तत्र तावद्ब्रह्मपुराणे—

End :

पञ्चत्रिंशत् संहिताश्च चतुराशी दशागमात् ।
पञ्चदशोद्धृताः श्लोकाः पुरुषोत्तमभूभुजा ॥

Colophon :

नामावली समाप्ता ॥

527

Sl. No : 18564 भगवन्नाममाहात्म्यम् Ms. No: P. 5622/20

Beginning :

महावराहदंष्ट्राग्रमल्लीकोशमधुव्रताम् ।
प्रलयोद × दुत्तीर्णा प्रपद्येऽहं वसुन्धराम् ॥
नमस्तस्मै वराहाय लीलयोद्धर × म् ।
खुरमध्यगतो यस्य मेरुः कणकणायते ॥

श्री भगवानुवाच—

जागरे तु विशालाक्षी जानतो वाविजानतः ।
यो × × गाय × ।
× × × भक्त्या व्यवस्थितः ॥

End :

एतत्ते कथितं देवि महत्पुण्यं महौजसम् ॥
× क्तिहितार्थाय सर्वसंसारमोक्षणम् ।
कौमुदे शुक्लपक्षे च द्वादश्यामरुणोदये ।
यः शृणोति कथामेतां मम लोके महीयते ॥

Colophon :

इति श्री वराहपुराणे भूवराहसंवादे श्रीभगवन्नामसंकीर्तनफलकथनं नामे सप्तमोऽध्यायः ॥

528

Sl. No : 18566 भस्ममाहात्म्यम् Ms. No : P. 3386

Beginning :

नत्वा गणेश्वरं स्कन्दं × × ।
भूतिरुद्राक्षमाहात्म्यनिष्पत्यादि प्रकाश्यते ॥
प्रथमग्रहणेनैव द्वयोरर्थ उ × ते ।
तत्र भस्मधारणस्य . . .

End :

तथा ललाटे हृदये चक्रकक्षौ सुदोदये । (?)
ब्रह्मा हरीश्वर × × × ॥
वैतानिकं वर्णिन एव नान्यत्
पूर्वोक्तमन्त्रैर्जलयुक्तभस्म
× × × कारयितारममन्त्र
हंसेन पुण्ड्रं विधि × तिर्यक् ॥
अवशिष्टं सत्राप्तौ द्रष्टव्यम् ॥

Colophon : — — —

529

Sl. No : 18568 भागवतमाहात्म्यम् Ms. No : C. 1021/1

Beginning :

सच्चिदानन्दरूपाय स्वध्यस्तोल्लासिने नमः ।
नैमिषे सूतमासीनमभिवाद्य कृताञ्जलिः ॥

कथामनुरसास्वाद कुशल × नकोऽब्रवीत् ।
अज्ञानध्वंस × कोटिसूर्यसमप्रभम् ॥

Erd :

श्री भागवतमाहात्म्यं कथितं चाखिलं मया ।
यस्याः श्रवणतो नृणां भक्तिरुत्पद्यते हरौ ॥
लेखयित्वा तु यो दद्याद्ब्राह्मणाय विधानतः ।
सिंहासनेन सहितं सवस्त्रं सान्वक्षिदणम् ॥
सालङ्कारं स स × रं सुश्चिंत सुनमस्कृतम् ।
नश्यन्ति सर्वपापानि सत्यं सत्यं शुकोदितम् ॥
शृणोति यो नरो भक्त्या श्रीमद्भागवते मही ।
सोऽपि मुक्तिं सुलभते तद्विक विष्णोर्न संशयः ॥

Colophon :

इति श्री पद्मपुराणे उत्तरखण्डे भागवतमाहात्म्ये षष्ठोऽध्यायः ॥

530

Sl. No : 18569 भागवतमाहात्म्यम् Ms. No : C. 1021/2

Beginning :

स्कान्दे चतुर्दशाध्याये मार्गशीर्षमाहात्म्ये—
कृष्णः ब्रह्माणं प्रति—

गृह्णीयात्पुत्र मन्त्रं तु मार्गशीर्षे महामते ।
वैष्णवानां व्रतं कुर्यात्तस्य स्वीकरणं बुधः ॥
मत्प्रियं शृणुयाद्यावत् श्रीमद्भागवतं परम् ।
श्रीमद्भागवतं नाम पुराणं लोकविश्रुतम् ॥
ममोत्सवेषु सर्वेषु ह्यादौ भागवतं परम् ।
समर्चयन्ति भक्त्या ये ममाभेदेन पुत्रक ॥
वस्त्रालङ्कार × धूपदीपे पहारकैः ।
वशीकृतो दृढं वत्स सत्रयस्सप्रतिं यथा ॥ (?)

इति स्कान्दपुराणे आनन्दकाननमाहात्म्ये भागवतमाहात्म्यवर्णनं नाम त्रयोविंशोऽधय: ॥

531

Sl. No : 18570 भागवतमाहात्म्यम् Ms. No : C. 1021/3

Beginning:

जनमेजय उवाच —

कथं प्रोक्तः शुकायास्मै तव पुत्राय धीमते ।
कथं पृष्टः शुको युष्मान् श्रीमद्भागवतस्य च ॥
पारायणात्कथंवापि सोद्यापनविधिं तथा ।
प्रतिस्कन्धफलं चापि वक्तॄणां चापि तोषणम् ॥

End:

य एतत्पठितस्यास्य विधानं श्रवणस्य च ।
शृणुयाच्छ्रावयेद्वापि सर्वपापैः प्रमुच्यते ॥
प्रोष्ठपद्यां पौर्णमास्यां हैमसिंहासने स्थितम् ।
ददाति यो भागवतं स याति परमां गतिम् ॥

Colophon:

इति श्री वायुपुराणे आनन्दकाननमाहात्म्ये भागवतमाहात्म्यवर्णनं नाम त्रयोविंशोऽध्याय: ॥

532

Sl. No : 18571 भार्गवपुरीमाहात्म्यम् Ms. No : A. 609

Beginning:

कदाचिदृषयस्सर्वे नैमिशारण्यवासिनः ।
सूतं सर्वार्थतत्वज्ञं पप्रच्छुर्विनयान्विताः ॥
सूत सूत महाभाग सर्वशास्त्रार्थकोविद ।
त्वत्तो वयं समस्तार्थान् श्रुतवन्तः सविस्तरम् ॥ + +
इदानीं श्रोतुमिच्छामो यदुक्तं भवता पुरा ।
भार्गवाख्यं पुरमिति रामस्यायतनं महत् ॥

End :

एवमुक्तं मुनिश्रेष्ठाः पार्वत्यै शङ्करेण च ।
भार्गवेन्द्रस्य चरितं तथा क्षेत्रस्य वैभवम् ॥
साधु साधु महाभाग सम्यगुक्तं त्वया मुने ।
रामस्य चरितं दिव्यं भार्गवाख्यपुरेशितुः ॥

Colophon :

इति श्रीमति स्कन्दे महापुराणे उमामहेश्वरसंवादे भार्गवपुरी क्षेत्रमाहात्म्ये फलश्रुतिर्नाम चतुर्दशोऽध्यायः । भार्गवपुरमाहात्म्यं सम्पूर्णम् ॥

533

Sl. No : 18572 **भावनाऋषिमाहात्म्यम्** **Ms. No: P. 3191**

Beginning :

ब्रह्मन् तव प्रसादेन श्रुता विस्तरतो मया ।
आचारा दण्डनीतिश्च राजधर्माश्च शाश्वताः ॥
वर्णश्रमाणां सर्वेषां त्रयश्चापि पृथक्पृथक् ।
दानानि तद्विधानानि व्रतानि सुमहान्त्यपि ॥

End :

दारैः प्रियैः भृत्यजनैश्च बन्धुभिः
पुत्रैः स्वकीयैः सुहृदां गणैश्च ।
समेत्य तुष्टाः परिपालयन्तः
स्वान्येव धर्माणि चिरं वदन्ति ॥
य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किञ्चिदिह लोके परत्र च ॥

Colophon :

इति श्रीमार्कण्डेयपुराणे भावनाऋषिवंशसम्भवे पद्मशालीयवंशप्रकारे तपःप्रभावे भावनाऋषिमाहात्म्ये दशमोऽध्यायः ॥

534

Sl. No : 18574 **भीमेश्वरव्रतमाहात्म्यम्** Ms. No : P. 4614/2

Beginning :

ऋषयः—

वद सूत महाभाग सर्वशास्त्रार्थकोविद ।
येन व्रतेन नारीणां सौमङ्गल्यं विवर्धते ॥
पुत्रपौत्रसमृद्धिश्च पशुधान्यार्थसंपदः ।

सूतः—

शृणुध्वं ऋषयः सर्वे व्रतानामुत्तमं व्रतम् ॥

End :

इतीदं कथितं विप्राः व्रतनामुत्तममं व्रतम् ।
एतच्छृण्वन्ति सततं श्रावयिष्यन्ति मानवाः ॥
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्री स्कान्दपुराणे भीमेश्वरव्रतकथा सम्पूर्णा ॥

535

Sl. No : 18578 **मङ्गलगौरीव्रतमाहात्म्यम्** Ms. No : P. 4614/4

Beginniug :

पाण्डवान् वीक्षितुं कृष्णो बनमध्ये निवासिनः ।
अययौ तं समायान्तं पाण्डवा द्रौपदीयुताः ॥
समाहूयार्घ्यपाद्यादि दत्वा पीठे निवेश्य च ।
कृष्णाय चरिते स्वीये धर्मराजेन भाषिते ॥

End :

ब्राह्मणान् भोजयेत्पश्चात् स्वयं भुञ्जीत वाग्यतः ।
एवं कृते व्रते देवि सौमङ्गल्यं भवेद्ध्रुवम् ॥
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सर्वपापविनिर्मुक्तः शिवसायुज्यमाप्नुयात् ॥

Colophon :

इति गौरीकाडे द्रौपदीकृष्णसंवादे मङ्गलगौरीव्रत[कथा]माहात्म्यं सम्पूर्णम् ॥

536

Sl. No :18579 मञ्जुक्षेत्रमाहात्म्यम् **Ms. No : C. 1979/2**

Beginning :

सूत सूत महाप्राज्ञ सर्वशास्त्रविशारद ।
विरूपाक्षोदयं त्वत्तः श्रोतुमिच्छामहे वयम् ॥
कस्मिन् देशे जन्मभूमिः कस्य गोत्रे समुद्भवः ।
प्रवरः किमृषेस्तस्य तत्सर्वं विस्तराद्वद ॥

End :

प्रदक्षिणीकृत्य ययौ घृणितीर्थमनुस्मरन् ।
ब्रह्मेशान्महतः साम्बः शुद्धस्तत्राभवत्पुरा ॥
तस्यैवोत्तरदिग्भागे क्षयरोगहरं महत् ।
यत्र चन्द्रस्तपस्तप्त्वा क्षयरोगादमुच्यत ॥

Colophon :

इति श्री उत्तरसह्याद्रिखण्डे मञ्जुक्षेत्रमाहात्म्ये गुहाश्रमवर्णनं नाम सप्तमोऽध्यायः ॥

537

Sl. No : 18580 मञ्जुलेश्वरमाहात्म्यम् **Ms. No : B. 980**

Beginning :

ऋषयः ऊचुः—
सह्यपूर्वोद्भवा सूत न दीक्षेत्रादिकाश्रमान् ।
महर्षीणां च तीर्थानां महिमानं वदस्व नः ॥
सूतः —
नैमिषेऽनिमिषक्षेत्रे ऋषयस्सत्रमासत ॥

Colophon :

कुजनाय न दश्येत पिशुनाय कथञ्चन ।
विष्णुद्वेषपरा ये च तेषामग्रे न वाचयेत् ॥

इत्थं वः कथितं विप्राः सर्वधर्मोत्तमोत्तमम् ।
ये पठन्ति च शृण्वन्ति तेषां लक्ष्मीः करे स्थिता ।।

Colophon :

इति स्कन्दपुराणे सनत्कुमारसंहितायां सह्याद्रिखण्डे उपरिभागे मञ्जुलेश्वरमाहात्म्ये चतुर्विंशोऽध्यायः ॥

538

Sl. No : 18582 मन्दाकिनीधराचलमाहात्म्यम् Ms. No : P. 4537/1

Beginnig :

श्री सूतः—

इत्थं वः कथितं विप्राः श्रीगिरेः वैभवं शुभम् ।
कर्माणीतः परं कृत्वा भुक्त्वाचम्य ततः परम् ।।
यास्येऽहमाश्रमपदं नित्यकर्म निवर्त्य च ।
आयास्येऽहं पुनः तत्र युष्माकं महदाश्रमम् ।।

End :

ततो हर्षान्विताः सर्वे शौनकाद्या महर्षयः ।
सशिष्याः पूर्णमाजग्मुः गिरिं गङ्गाधराचलम् ॥
तत्र सर्वेषु तीर्थेषु स्नानं कृत्वा तु सर्वशः ।
नत्वा स्तुत्वा हरं पश्चात् ययुः सर्वे ततः क्रमात् ॥

End :

इति श्रीस्कन्दपुराणे तीर्थकाण्डे मन्दाकिनीधराचलमाहात्म्ये पूजाफलवर्णनं नाम द्वादशोऽध्यायः ।।

539

Sl. No : 18584 मत्स्यजयन्तीव्रतमाहात्म्यम् Ms. No: C. 9993/10

Beginning :

पार्वत्युवाच—

प्राणेश्वर नमामि त्वां लोकोद्धरणकारक ।
पापं जन्मान्तरे वापि जन्मान्यस्मिन्नथापि वा ।।
येन चीर्णेन पुण्येन कथं नश्यति तद्वद ।।

ईश्वर उवाच —

वक्ष्यामि परमं गुह्यं सर्वपुण्यप्रदं शुभम् ।
एकान्तभवने देवि पृच्छन्त्यास्तव तच्छृणु ॥

End :

इत्थमाचरणं पुंसां जयन्तीं मत्स्यसंज्ञिताम् ।
तेषां पुणमहं वक्तुं न क्षमो नास्ति संशयः ॥
इति देववचः श्रुत्वा पार्वती करुणान्विता ।
लोके प्रख्यापयामास व्रतं पापप्रणाशनम् ॥

Colophon :

इति भविष्योत्तरपुराणे मत्स्यजयन्तीव्रतकथा संपूर्णा ॥

540

Sl. No : 18585 **मधुगिरिमाहात्म्यम्** **Ms. No : P. 4857**

Beginning :

× × × मे मनस्सदा ।
पार्वतीकुचमज्ञात × × ॥
× × × रेर्महत ।
माहात्म्यं सर्वलोकानां × × माहात्म्यमद्भुतम् ।
उपदेशकतया देवः भरद्वाजस्य × ॥

End :

अन्नदानरतौ नित्यं विद्वत्पोषणतत्परौ ।
आचरन्तौ प्रियौ × कोशवृद्धिकरौ सदा ॥
उभौ च भ्रातरौ तत्र पुण्यवन्तौ बभूवतुः ।
अथ यो × स्तस्मात् गङ्गातीरमवाप सः ॥

Colophon :

८८ तमपत्रे —

इति स्कान्दे पुराणे मधुगिरिमाहात्म्ये ऋणविमोचनदारिद्र्यविनाशकतीर्थमहिमानुवर्णनं नाम द्विचत्वारिंशोऽध्यायः ॥

541

Sl. No : 18586 मधुरामाहात्म्यम् Ms No : C. 125

Beginning :

सूत उवाच —

श्रुत्वा देवस्य माहात्म्यं लोकार्गलनिवासिनः ।
त्रैलोक्यनाथादित्यस्ते धरणी विस्मयं गता ॥

धरणी उवाच—

पद्मपत्रविशालाक्ष पद्मनाभ जगत्पते ।
त्वत्प्रसादाच्च देवेश श्रुतं शास्त्रं महोदयम् ॥
× × × × ।
समत्वं मधुरायाहि प्रियं मम वसुन्धरे ॥

End :

ज्ञानानां परमं ज्ञानं लाभानां लाभमुत्तमम् ।
श्रवणीयं महाभागे पुण्यं भागवतं स्मृतम् ॥
एतत् श्रुत्वा महेशस्य धरणी विस्मयान्विता ।
पुनः पप्रच्छ मुदिता प्रतिमास्थापनं तदा ॥

Colophon :

इति श्रीआदिवराहपुराणे भगवच्छास्त्रे मधुरामाहात्म्य × वर्णनो नाम एकोनविंशोऽध्यायः ॥

542

Sl.No : 18587 मध्वावतारप्रशंसा Ms. No : C. 1682/2

Beginning :

ब्रह्मोवाच —

भगवन् ब्रूहि मे वायोरवतारं महत्तरम् ।
सर्वपापप्रशमनं सर्वोपद्रवनाशनम् ॥
दीर्घदुःखोद्भवहरं धुर्युत्तरणं हि यत् ।
परं कौतूहलं यस्मात् ततः पूर्वं त्वया श्रुतम् ॥

End :

इदं स्तोत्रं ततः सिध्यत्यन्यथा न भविष्यति ।
त्रिसन्ध्यां यः पठेन्नित्यं मांजीत्रे ?) प्रातरेव वा ॥
सर्वपापविनिर्मुक्तो याति ब्रह्म सनातनम् ॥

Colophon :

इति श्रीवायुपुराणे हरिविरिञ्चिसंवादे मध्वावतारो नाम एकोनविंशोऽध्यायः ॥

543

Sl. No : 18588 मलमासमाहात्म्यम् Ms. No : C. 3031/1

Beginning :

युधिष्ठिर उवाच—
अधिमासस्य माहात्म्यं मार्कण्डमुनिसत्तम ।
जप × दिकं पुण्यं गङ्गास्नानं तथैव च ॥

End :

यस्यानुष्ठानमात्रेण गोत्रहत्या प्रणश्यति ।
तद्वत्कुन्ती च पुत्रेण तं भक्त्या च य × तम् ॥
भुवचक्रं जितं तेन मार्कण्डेयप्रसादतः ॥

Colophon :

इति श्री भविष्योत्तरपुराणे मलमासकथा सम्पूर्णा ॥

544

Sl. No : 18589 मलापहारिमाहात्म्यम् Ms. No : C. 4657/3

Beginning :

राजोवाच—
मुनेः पुत्र महाभाग मार्कण्डेय नमो नमः ।
मलापहारेर्माहात्म्यं न श्रुतं च मयानघ ॥

End :

ततः परेद्युः कर्तव्यं × मन्त्रेन भोजयेत् ।
विलम्बं कुरुते यस्तु नरकं चाधिगच्छति ॥

तत्र दाने पुण्यक्षेत्रविशेषमाह—

रेवातीरे तपः × मलहार्यामिदं भयम् ॥

Colophon :

इति श्री स्कान्दपुराणे पश्चिमकाण्डे युधिष्ठिरमार्कण्डेयसंवादे मकरमलापहारिविधिः । इति मत्स्यकूर्मपुराणेऽपि ॥

545

Sl. No : 18590 मल्लारिमाहात्म्यम् Ms. No : P. 7766

Beginning :

ब्रह्मा विष्णुर्महेश्वरश्च जगता नथो × यः ।
स्वर्गस्थित्यवसानकारणरमे चान्यां तथा देवताः ।
कार्योपक्रमणेषु यस्य दयया भूवन् कृतार्थाः सदा
तं विश्वेशमनन्तकामफलदं वन्दे कुमारात्मजम् ॥९ ॥

End :

मल्लारिरिति नामैकं पुरुषार्थप्रदं शुभम् ।
सहस्रनाममिच्छायाः कः फलं वेत्ति तत्वतः ॥ ४४ ॥
वेदस्याध्ययने पुण्यं योगाभ्यासेन यत्फलम् ।
तत्फलं समवाप्नोति मल्लारिभजनात् प्रिये ॥ ४५ ॥
तव प्रीत्यै मयाख्यातं लोकोपकृतिकारणात् ।
सहस्रनाम मल्लारेः किमन्य च्छ्रोतुमिच्छसि ॥ ४६ ॥

Colophon :

इति श्री पद्मपुरागे शिवोपाख्याने मल्लारिप्रस्ताने मल्लारिप्रकृतिभावे शिवशक्तिसंवादे महारहस्ये मल्लारलिङ्गसहस्रनामस्तोत्रं सम्पूर्णम् ॥

546

Sl. No : 18592 मल्लारिमाहात्म्यम् Ms. No : C- 1018

Beginning :

वाग्वल्लीपल्लवोल्लोलसरागकरभासुरम् ।
गजास्यं सुन्दरं वन्दे बृन्दारकगणार्थितम् ॥
विघ्नेशचरणाम्भोजमकरन्दोदबिन्दवः ।
सिञ्चन्तु भारतीं वल्लीं नतानां वदनालये ॥

End :

इति श्रुत्वा तदा देव्या मल्लारिकवचं मुदा ।
नारदस्य मुखात्प्रीत्या त्रैलोक्ये प्रकटीकृतम् ॥
ऋषयः किञ्चिदन्यच्च प्रष्टुमिच्छास्ति वः पुनः ।
कथयिष्ये कथां शम्भोर्भवतोऽहं शुभावहाम् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे पञ्चमेंऽशे क्षेत्रखण्डे मल्लारिमाहात्म्ये मल्लारिकवचं नाम पञ्चविंशोऽध्यायः ॥

547

Sl. No : 18597 **महाकूटमाहात्म्यम्** **Ms. No : B. 1156**

Beginning :

× × × भस्मोद्धूलितविग्रहम् ।
कुण्डलोद्भासिसद्गण्डं नवरत्नसमप्रभम् ॥
नागहारनागवेशं नागयज्ञोपवीतिनम् ।
कर्पूरदेहं सर्वेशं सर्वदेवसमन्वितम् ॥

End :

भूतवस्विन्द्रियाणां च संख्यासंयुतमुत्तमम् ।
महाकुटमाहात्म्यं च सर्वं × ख्यसहायकम् ॥
स्कान्दे पुराणे विस्तारे व्यासेनोक्तं पुराविदा ।
महाकूटमाहात्म्यं च श्रुत्वा मुक्तिमवाप्नुयात् ॥

Colophon :

इति स्कान्दे महापुराणे ईश्वरपार्वतीसंवादे क्षेत्रखण्डे महाकूटमहात्म्ये ब्रह्मराक्षसमोक्षो नाम सप्तदशोऽध्यायः ॥

548

Sl. No : 18598 **महापद्माकरमाहात्म्यम्** **Ms. No : P. 363/2**

Beginning :

श्रीगङ्गाधरभूधराग्रिमगुहागेहेषु जाग्रन्मुनिः
भूयान्नो भवतापथापनपरो पद्माकरः कश्चन ।

कदाचिन्नैमिषेऽरण्येऽनिमिषाणां विशेषतः ।
निषेव्ये चाप्यशेषाणां ऋषीणां वृषवृद्धिदे ॥

End :

प्रतीतेऽथ सूते प्रयाते द्विजास्ते
नृसिंहस्य तीर्थं मयेदं निषेव्यम् ।
इदानीमितीत्थं विनिश्चित्य जग्मुः
प्रमोदादहंपूर्विकापूर्वमेव ॥

Colophon :

इति स्कान्दपुराणे महापद्माकरमाहात्म्ये सोमेश्वरव्यक्तिमहिमाकथनं नाग चतुर्थोऽध्यायः ॥

549

Sl. No : 18601 महायोगिमाहात्म्यम् Ms. No : P. 9546/1

Beginning :

श्रीशौनकादयः —
सर्वधर्मार्थतत्वज्ञ सर्वशास्त्रविशारद ।
तत्वार्थविदुषां श्रेष्ठ श्रुतद्वैपायनप्रिय ॥
यानि कर्माणि लोकेषु चरित्राण्यपि शार्ङ्गिणः ।
तव प्रसादादस्माभिः श्रुतानि वदतां वर ॥

End :

इत्येतदाख्यानमनुत्तमं शुभं
योगीश्वराणां महतां मनोहरम् ।
भक्त्या नरो यः शृणुयात्पठेद्वा
सौभाग्यवान् गच्छति तत्परं पदम् ॥

Colophon :

इति श्रीमद्भार्गवे उपपुराणे उत्तरखण्डे नरनारायणसंवादे महायोगिमाहात्म्ये चत्वारिंशोऽध्यायः । महायोगिमाहात्म्यं संपूर्णम् ॥

550

Sl. No : 18529 महालक्ष्मीमाहात्म्यम् **Ms. No : C. 1341**

Beginning :

अथ इदानीं महालक्ष्मीमाहात्म्यं संग्रहेण निरूप्यते । तत इत्यादिना । ततः चतुर्मुखात् कोटिगुणाधिका । कोटिगुणश्रेष्ठा गुणशब्दो गणनार्थः । विरिञ्चापेक्षया कोटिसंख्यातोधिकतया गुणितानन्दादिगुणपरिपूर्णेति भावः ॥

End :

अनिर्देश्यौ तथाव्यक्तौ अचिन्त्यौ श्रीश्च माधवावित्यादि निमित्तप्रदर्शन पूर्वकमुपसंहरति । को नामेति । अन्ये ऋषिगन्धर्वपित्राद्याः मादृशा मानुषाः । कुतः सुतरामित्यर्थः ॥

Colophon :

इति महालक्ष्मीप्रकरणं संपूर्णम् ॥

551

Sl. No : 18532 महावीरमाहात्म्यम् **Ms. No : P. 4001/22**

Beginning :

हरिहरेन्द्र नृपश्रेष्ठ श्रृणुष्वाद्भुतमादरात् ।
महावीरस्य माहात्म्यं पुण्यश्लोकमहीपतेः ॥
स च वीरवरो गृहीतधना
विपिने भृत्यगणैस्ससेव्यमानः ।
मृगयाभिरतो विशालकिर्तिः
विचरिष्यन्नुरसिन्धुजातीरे ॥

End :

लोकपूज्यान् त्रयः पुत्रान् विष्णुभक्तान् प्रदास्यति ।
असंख्यातान गुणांस्तस्य वीरप्रवरभूपतेः ॥
को वा वर्णयितुं शक्तो लोकेऽस्मिन् पण्डितो जनः ।
इत्याकर्ण्य नृपश्रेष्ठः कृताञ्जलिपुटः कृती ॥
पुनः पप्रच्छ तस्यैव माहात्म्यं वीरभूभुजः ॥

Colophon :

इति विद्यारण्यकृतौ पालनाथसिद्धसंहितायां पञ्चमः पटलः ॥

552

Sl. No : 18605 माण्डव्यकुटीमाहात्म्यम् Ms. No : A. 614/5

Beginning :

श्रीमाण्डव्यनाथो × जगतः कारणं विभुः ।
श्री भूनीला सहितस्सर्वात्मा सर्वकामदः ॥
श्रीमान्माण्डव्यवरदः प्रसन्नकमलेक्षणः ।
शरणागतसन्त्राणदीक्षितः पातु वस्सदा ॥

End :

बोधयन्त्यर्थसहितं तेषां मुक्तिः करेस्थिता ।
पुत्रार्थी पुत्रमाप्नोति धनार्थी लभते धनम् ॥
राज्यकामस्तथा राज्यं विद्यार्थी विद्वदग्रणीः ।
भविता नात्र सन्देहः देवस्य कृपया हरेः ॥

Colophon :

इति ब्रह्माण्डपुराणे महेश्वरनारदसंवादे क्षेत्रमाहात्म्यखण्डे स्वर्णाचल माण्डव्यकुटीमाहात्म्ये मधुशैलादिकथनं नाम दशमोऽध्यायः ॥

553

Sl. No : 18607 माघमाहात्म्यम् Ms. No : P. 363/5

Beginning :

श्री पार्वती —
विश्वात्मन् सर्वलोकेश सर्वभूतदयानिधे ।
त्वामिदानीं पुनःश्रोतुमिच्छामि परमेश्वर ॥
त्वद्वाचामृतजालानि + + विश्वपावन ॥

End :

इति श्रुत्वा शौनकाद्याः मुदमापुर्मुनीश्वराः ।
सूतं पौराणिकं ते तु पूजयामासुरोजसा ।
अनेकभक्तिसंपन्नाः पुनः प्राहुस्ततोऽनघाः ॥

Coiophon :

इति स्कन्दपुराणे धर्मकाण्डे माघमाहात्म्ये उमामहेश्वरसंवादे त्रिंशोऽध्यायः ॥

554

Sl. No : 18621 माघमाहात्म्यम् Ms. No: P. 7612

Beginning :

नारदः —

संसारे क्लिश्यमानानां जन्तूनां पापकर्मणाम् ।
कर्मणा ब्राह्मणानां च का गतिः कमलोद्भव ॥
सुखमिच्छन्ति ते मूढाः नेच्छन्ति सुखकारणम् ।
× दुःखलेशं वा तद्धेतौ सततं नराः ॥

End :

किमत्र बहुनोक्तेन मोक्षार्थी मोक्षमाप्नुयात् ।
इति श्रुत्वा शौनकाद्याः माघमाहात्म्यमुत्तमम् ॥
सन्तोषमतुलं प्रापुः विस्मितोत्फुल्ललोचनाः ।
सूतं पौराणिकं ते तु पूजयामासुरञ्जसा ॥

Colophon :

इति श्रीवायुपुराणे माघमाहात्म्यं सम्पूर्णम् ॥

555

Sl. No :18627 माघमाहात्म्यम् Ms. No : B. 1211/6

Beginning :

अष्टाविंशतिपुरुषा ऊचुः—

अतिभूरीणि कर्माणि कृतान्यस्माभिरंजसा ।
अनायासकृतेनास्य सुयज्ञस्यैव कर्मणा ।
कथं नष्टानि ब्रह्मर्षेश्चैतद्विस्तार्य नो वद ॥

शाण्डिल्यः—

अनायासमहायासौ न फले तु प्रयोजकौ ।
किन्तु कर्मस्वरूपं हि कारणं तद्विदो विदुः ॥

Eud :

रोगाद्युपहतो यस्तु पादौ प्रक्षाल्य वाग्यतः ।
धौतवस्त्रं परीधाय त्रिराचम्य च वारिणा ॥

गायत्र्या मन्त्रितं चाम्भः प्रोक्षयेन्मूर्ध्नि तद्विजः ।
सोऽपि स्नानफलं प्राप्य मोदते विष्णुमन्दिरे ॥

Colophon :

इति श्रीवायुपुराणे माघमाहात्म्ये त्रयोविंशोऽध्यायः ॥

556

Sl. No :18631 माघमाहात्म्यम् Ms. No : C: 3958

Beginning :

आरब्धुन्नैमिषारण्यं सत्रं द्वादशवार्षिकम् ।
आजग्मुरखिलास्तत्र मुनयो ब्रह्मवादिनः ॥ १ ॥
असितो देवलश्चैव सुमन्तुः पैल एव च ।
सुमतिर्वामदेवश्च जाबालिः काश्यपो भृगुः ॥

End ;

निष्कलानि भवन्तीह नराणां नृपसत्तम ।
तस्मात्सर्वप्रयत्नेन वर्तितानि नरैः सदा ॥
स्नात्वैवं मकरादित्ये श्रुत्वा माहात्म्यमेव च ।
वित्तशाठ्यमकृत्वैव वक्तारं संप्रपूजयेत् ॥
सिंहासने शुभे स्थाप्य पुस्तकं तस्य चाग्रतः ॥ ५२ ॥

Colophon :

इति श्रीपद्मपुराणे माघमाहात्म्ये वसिष्ठदिलीपसंवादे अष्टत्रिंशोऽध्यायः ॥

557

Sl. No : 18641 माधवस्तवराजगीतामाहात्म्यम् Ms. No : A. 228/2

Beginniug :

यः स्नाति माधवप्रीत्यै प्रातर्माघे बहिर्जले ।
सम्पूज्य मालतीपुष्पैर्विष्णुलोकमवाप्नुयात् ॥ १ ॥
गीतापाठं तु यः कुर्यात् बहिर्माघे जलाप्लुतः ।
तस्य पुण्यफलं वक्तुं विष्णुनापि न शक्यते ॥ २ ॥

Eud :

व्यासंगो देवतार्चाय क्षेत्रादीनां विसर्जनम् ।
आज्याभिघारहीनस्य नैवेद्यस्य समर्पणम् ॥ २२३ ॥

आर्द्रवस्त्रेण देवस्य पूजायाः करणं तथा ।
एकादशीपरित्यागः पर्वे मैथुनमेव च ॥
अपराधशतं चैतत्क्षमस्व पुरुषोत्तम ॥

Colophon :

इति माधवस्तवराजगीतामाहात्म्यं समाप्तम् ॥

558

Sl. No : 18644 | **मार्गशीर्षमाहात्म्यम्** | **Ms. No : P. 4668/45**

Beginning :

यशोदानन्दनं वन्दे जगदानन्दकारणम् ।
भुक्तिमुक्तिप्रदं कृष्णं माधवं भक्तवत्सलम् ॥
सूतः —
माहात्म्ये मार्गमासस्य शौनकप्रश्नमुत्तमम् ।

End :

चण्डालसदृशो यस्स्यात्सदाचारबहिष्कृतः ॥
सोऽपि पूतो भवत्याशु स मत्पादाम्बुसेवनात् ।
अपेयं पिबते यस्तु भुङ्क्ते यश्चाप्यभोजनम् ।
सोऽपि सद्गतिमाप्नोति यो हि पादोदकं पिबेत् ॥

Colophon :

२०तमपत्रे — इति श्रीस्कन्दपुराणे मार्गशीर्षमाहात्म्ये सप्तमोऽध्यायः ॥

559

Sl. No : 18646 | **मृकण्डुक्षेत्रमाहात्म्यम्** | **Ms. No: P. 4643**

Beginning :

सच्चिदानन्दवपुषं सर्वमङ्गलया युतम् ।
सामिचन्द्रजटाजूटं शर्वं सर्वेश्वरं नुमः ॥
समाप्ते दीर्घसत्रे तु शौनकाद्या महर्षयः ।
सूतं पुराणवक्तारं संपूज्य विनयान्विताः ।
तस्यानुज्ञां समादाय द्रष्टुं क्षेत्राणि निर्ययुः ॥

End :

साम्बं चन्द्रार्धमकुटं सच्चिदानन्दविग्रहम् ।
दहराकाशनिलयं स्वात्माभेदेन भावयन् ॥
विलोक्य तन्मयं सर्वं आनन्दाश्रुपरिप्लुतः ।
परानन्दकरीपूर्णमानसस्समवर्तत ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे उत्तरभागे पञ्चमोऽध्यायः ॥

560

Sl. No : 18650 यादवगिरिमाहात्म्यम् Ms. No : P. 3657/2

Beginning :

एकदा मुनयस्सर्वेऽप्यैकान्त्येन व्यवस्थिताः ।
प्रादुर्नारायणं देवं नरनारायणाश्रमे ॥
व्यासो वसिष्ठः कपिलः मार्कण्डेयश्च काश्यपः ॥

End :

मुनिवरगिरमेनां इत्थमाकर्ण्य केचित्
व्यधिषत यदुशैले वीतरगा निवासम् ।
कति वन सहसाऽऽयं धाम संप्राप्य विष्णोः
अकृषत सह सेवां शेषशेषाशनाद्यैः ॥

Colophon :

इति श्री नारदीये पुराणे ज्ञानकाण्डे श्रीमद्यादवगिरिमाहात्म्ये भगवत्संदर्शनं नाम द्वादशोऽध्यायः ॥

561

Sl. No : 18651 यादवगिरीमाहात्म्यम् Ms. No : P. 3657/3

Beginning :

पार्वत्युवाच—

न काशीसदृशं क्षेत्रं वैष्णवं जन्मपावनम् ।
इति श्रुतं त्वया कान्त तन्मे विस्तरतो वद ॥
न तेऽस्ति सदृशः कश्चित् विष्णुशास्त्रप्रवर्तकः ॥

End :

अतः क्षेत्रमिदं श्रेष्ठं षोडशेनांशकेन हि ।
वाराणस्यां सन्निहितं तेन वाराणसी वरा ॥
क्षेत्राण्यन्यानि भागेन तुरीयेनेति निश्चितम् ॥

Colophon :

इति श्री काशीमाहात्म्ये पूर्वखण्डे ब्राह्मे क्षेत्रवैभवप्रशंसायां गौरीशङ्कर संवादे यादवाचलप्रसङ्गो नाम तृतीयोऽध्यायः ॥

562

Sl. No : 18652 यापवगिरिमाहात्म्यम् **Ms. No : P. 3657/4**

Beginning :

पद्मपुराणे माघमाहात्म्ये यादवाचलप्रभावः । वसिष्ठः—
शृणु राजन् प्रवक्ष्यामि प्रभावं माघमासजम् ।
यमाकर्ण्य नरो भक्त्या सर्वपापैः प्रमुच्यते ।
पुरा रथन्तरे कल्पे वर्तमाने कृते युगे ॥

End :

इति पितृवचनं निशम्य सत्यं
मुदितमना मृगशृङ्गनामधेयः ।
पुनरपि पितरं प्रणम्य मूर्ध्ना
हृदि हरिमेव दिवानिशं स दध्यौ ॥

Colophon :

इति श्री पद्मपुराणे माघमाहात्म्ये यादवाचलप्रसंङ्गो नाम पञ्चमोऽध्यायः ॥

563

Sl. No : 18653 यादवगिरिमाहात्म्यम् **Ms. No : P. 3663/2**

Beginning :

यस्यानुस्मरणेन सर्वजनता प्राप्नोति वाक्पाटवं
यत्पादाम्बुजदर्शनात् स्फुरति सच्छास्त्रार्थसिद्धान्तता ।

नामनिकेतनं पदयुगं तस्याश्रये सद्गुरोः ।
श्रीपुण्यारण्यशरणाः पुण्यशीला महाबुधाः ।
वैभवं क्षेत्रतीर्थानां वर्णितं पापनाशनम् ।

शौनकः —

सौते धर्मविशेषज्ञ सर्वशास्त्रविशारद ।
\+ \+ \+ \+ \+
पीतमस्माभिरमृतं त्वन्मुखाम्भोजनिस्सृतम् ॥
तत्र यादवशैलस्य माहात्म्यश्रवणे विभो ।
कुतूहला वयं सर्वे वर्णनेऽतिकुतूहल ॥

End:

शृण्वन् लिखन् पठन् बिभ्रन् क्षेत्रमाहात्म्यमुत्तमम् ।
मुक्त्वा शुभाशुभे याति तद्विष्णोः परमं पदम् ॥

Colophon:

इति श्री मात्स्ये पुराणे क्षेत्रखण्डे यादवगिरिमाहात्म्ये द्वादशोऽध्यायः ॥

564

Sl. No: 18662 रजतपीठपुरमाहात्म्यम् Ms. No: P. 6373/2

Beginning:

सूत उवाच —

पुण्ये भारतवर्षेऽस्मिन् कर्मभूमावघच्छिदे ।
अतिपुण्यप्रदे रम्ये क्षेत्रेऽब्जाशयसंज्ञके ॥
रूप्यात्मकं पाणिपी × × × ।
लिङ्गाकारशिलामूर्तावास्तेऽनन्तासनो हरिः ॥

End:

जयत्यनन्तासनोऽयं कृष्णश्च जयति प्रभुः ।
\+ \+ \+ \+ \+
गोप्यतमाः बहुपुण्यप्रदा द्विजाः ।
मयाव्यास × मुखतः श्रुत्वा योगीन्द्रसंसदि ॥

Colophon :

इति ब्रह्माण्डपुराणे × × × भागे रजतपीठपुरमाहात्म्ये अष्टा विंशोऽध्याय: ॥

565

Sl. No : 18663 रामतत्त्वमाहात्म्यम् Ms. No : C. 3724

Beginning :

+ + + + + +

रामायणपुराणेषु संहितास्वागमादिषु ।
एवं तत्तच्चरित्रादौ विशेषास्सन्ति भूरिशः ।।
एकत्रैव विशेषांस्तानवगाहितुमिच्छिताम् ।
यत्र ये ये विशेषास्तु तांस्तान् संगृह्य सारतः ।

+ + + + + + +

कुर्वे रामायणं तत्वसंग्रहाख्यं मनोरमम् ।।

End :

एवमादिष्वनेकेषु शास्त्रेषु बहुदर्शिभिः ।
रामावतारकथनात्संशयस्तूपजायते ।।
तदेकं वद निश्चित्य सर्वशास्त्राविरोधतः ।
संगृह्य रामतत्त्वं नो वक्तुमर्हस्यसंशयः ।।

Colophon :

इति श्रीमत्तत्वसंग्रहरामायणे बालकाण्डे श्री रामस्य शिवत्वब्रह्मत्वहरि हरात्मकत्वत्रिमूर्तित्वप्रतिपादनं नाम तृतीयस्सर्गः ।।

566

Sl. No : 18664 रामनवमीव्रतमाहात्म्यम् Ms. No: P. 2370/58

Beginning :

सूत उवाच—

ज्ञानं मया रहस्यं यत पुण्य पापप्रणाशनम् ।
श्रीरामस्य व्रतादन्यत् वाञ्छितार्थप्रदं द्विजाः ॥

ऋषय ऊचुः—

कस्मिन काले च कर्तव्यं तद्व्रतं ब्रूहि तत्त्वतः ।।

End :

कोटीसूर्योपरागानां लभते नात्र संशयः ।
सर्वव्रतानां यत्पुण्यं दानानां तपसां तथा ॥
तुलापुरुषदानानां लभते नात्र संशयः ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे श्रीरामनवमीव्रतं समाप्तम् ॥

567

Sl. No : 18667 रामनामस्मरणमाहात्म्यम् Ms. No : P. 6258

Beginning :

अतः परं प्रवक्ष्यामि शृणुष्व मुनिसत्तम ।
नामस्मरणसञ्जातफलार्पणविधिं मुदा ॥
श्रीमद्रामायणं गायन्मध्ये मध्ये नरोत्तमः ।
श्रीरामाय नमश्चेति स्मरन् × र्गान्त एव वा ॥

End :

समर्प्यान्ते हनुमतेऽप्यनेन सुखमाप्नुयात् ।
समर्पणादकर्तृत्वं लोपोद्रिक्तफलं न च ॥
निष्कामिकं भवत्येव सकामकृतमप्यलम् ।
× श्च लभते × .भविष्यति ॥

Colophon :

इति ब्रह्माण्डपुराणे ब्रह्मवसिष्ठसंवादे रामायणपारायणसंख्यासमर्पणविधिः समाप्तः ॥

568

Sl. No : 18668 राममाहात्म्यम् Ms. No : P. 10367/11

Beginnig :

कपिलपुराणे सूत उवाच —

स्वसमासीनमेकाग्रे सत्यलोकेऽम्बुजासनम् ।
मरीचिः सुस्थिरो भूत्वा पप्रच्छ विनयान्वितः ॥

भगवन् सर्वधर्मज्ञ कमलासन मे मुदा ।
राघवस्य चरित्रस्य विस्तारं कथय प्रभो ॥

Eud :

विभूतिश्च प्रतापं च देवदेवस्य चक्रिणः ।
सर्वासामपि विद्यानां मातरौ काधुक्सदा ॥
बहुनात्र किमुक्तेन सुप्रयत्नेन मानवाः ।
शृण्वन्ति रामचरितं ते यान्ति परमां गतिम् ॥

Colophon :

इति श्रीकपिलपुराणे ब्रह्ममरीचिसंवादे रामायणग्रन्थसंख्याकविभागवर्णनं नाम पञ्चमोऽध्यायः ॥

569

Sl. No : 18670 **रामसेतुमाहात्म्यम्** **Ms. No : P. 1545/3**

Beginning :

× × × × ×
× विदनीलाश्च ये चान्ये वानरास्तथा ।
ते सर्वे रामदत्तेन वारिणा शुद्धचक्षुषः ॥
आकाशान्वर्हितं वीरमपश्यन् रावणात्मजम् ।
ततस्तमभिदुद्राव सौमित्रिर्दृष्टिगोचरम् ॥

End :

ततो व्यासोऽपि सूतेन शिष्येण च समन्वितः ।
अनुज्ञाप्य मुनीन्सर्वान् कैलासं पर्वतं ययौ ॥
ऋषयो नैमिषारण्य निलयास्तुष्टिमागताः ।
प्रत्यहं सेतुमाहात्म्यं शृण्वन्ति च पठन्ति च ॥

Colophon :

इति श्रीस्कान्दे पुराणे शतसाहस्रिकायां वैयासिक्यां श्रीरामसेतुमाहात्म्यं समाप्तम् ॥

570

Sl. No : 18671 रामानुजचार्यमाहात्म्यम् Ms. No : P. 5605/13

Beginning :

स्कान्दे पुराणे रामानुजचरितं यथा — —
राजन् कलियुगे प्राप्ते धर्मे नष्टे श्रुतीरिते ।
मद्भक्तः सर्वधर्मज्ञः तव गोत्रसमुद्भवः ॥
शारीरकमहाभाष्यग्रन्थकर्ता जितेन्द्रियः ॥

End :

तेन त्वया कृता वत्स स्मृतिः सात्त्विकगामिनी ।
प्रतिष्ठां वर कांक्षस्व गमिष्यसि महा × ॥
तस्य संवन्धिनः शिष्याः सुराणामपि दुर्गमम् ।
मां प्राप्य प्राप्तनिपुणाः भविष्यन्ति कलौ युगे ॥
× × × × × सुखमासीत ॥

Colophon :

— — —

571

Sl. No : 18674 रामायणमाहात्म्यम् Ms. No : P. 4503

Beginning:

पुरा कैलासशिखरे पार्वत्या सह शङ्करः ।
विचचार महायोगी स्वरूपमनुचिन्तयन् ॥
नानाप्रसूनवितते नानावृक्षसमाकुले ।
नानावल्लीसमाकीर्णे सिद्धचारणसेविते ॥

End :

यः × अञ्जलिसम्पुटैरहरहः सम्यक्पिबत्यादरात्
वाल्मीकेः वदनारविन्दगलितं रामायणाख्यं मधु ।
जन्मव्याधिजराविपत्तिमरणैः अत्यन्तसोपद्रवं
संसारं स विहाय गच्छति पुमान् विष्णोः पदं शाश्वतम् ॥

Colophon :

इति श्रीस्कान्दे उमासंहितायां रामायणमाहात्म्ये युद्धकाण्डे × नाम द्वादशोऽध्यायः ॥

572

Sl. No : 18676 **रामायणमाहात्म्यम्** **Ms. No : P. 4734**

Beginnig :

श्री सूतः—

प्रणम्य देवदेवेशं ब्रह्माणं शाश्वतं विभुम् ।
वसिष्ठः परिप्रच्छ सर्वज्ञानवतां वरः ॥

वसिष्ठः—

पितामह महाप्राज्ञ सर्वशास्त्रविदां वर ।
त्वत्तः कृतान्यशेषाणि व्रतानि विविधानि च ॥

End :

इतीश्वरेणोपविष्टा स्मृत्यानीत्प्रीतमानसा ।
श्रुत्वा रामायणं देवि शङ्कार्थमुपागता ॥ (?)

ईश्वरः—

रामायणस्य माहात्म्यं संक्षिप्योक्तं मयाऽनघे ।
पुनर्यच्छ्रोतुकामासि तत्पृच्छस्व हिमाद्रिजे ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे उमामहेश्वरसंवादे श्री रामायणमाहात्म्यकथनं नाम चतुष्षष्टितमोऽध्यायः ॥

573

Sl. No : 18681 **रामयणणमाहात्म्यम्** **Ms. No : P. 7441/2**

Beginning :

पार्वत्युवाच —

देवेश करुणासिन्धो लोकानुग्रहकारक ।
श्रुतं रामायणं त्वत्तः सविशेषं मया × ।
रामायणस्य माहात्म्यं वक्तुमर्हसि मे शिव ॥

End :

तत्वसंग्रहरामायणमिदं योर्षतः पठेत् । (?)
न संशयस्तस्य रामतत्वे सञ्जायते क्वचित् ॥

अथ श्रवणान्मननादस्य तदर्थानुस्मृतेर्नराः ।
भुक्त्वेह वाञ्छितान्भोगान् मोदन्ते विष्णुमन्दिरे ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दसरस्वतीस्वामिविरचिते नानापुराणागमादिनिष्ठरामतत्वसंग्रहरामाय उत्तराण्डेकरामायणपठनश्रवणमहिमानुवर्णनं नाम द्वाविंशः सर्गः ॥

574

Sl. No : 18689 रामेश्वरमाहात्म्यम् Ms. No : C. 2144

Beginning :

विश्वेशं माधवं + वन्दे + मणिकर्णिकाम् ॥
श्रीमत्स्वयम्भुरामेशः पायाद्विश्वमपायतः ।
आनन्दनायिकारम्यकुचकुङ्कममुद्रितः ॥
पावने नैमिषारण्ये नानवृक्षसमाकुले ।
नानपुष्पसमाकीर्णे नानामृगगणान्विते ॥

End :

इदं स्वयम्भुरामेशमाहत्म्यं न प्रकाशयेत् ।
अभक्ताय शिवे नित्यं दुराचाराय पापिने ॥
प्रकाश्यं शिवभक्तेषु शिवभक्तिरतेषु च ।
इत्युक्तास्तेन सूतेन नैमिषारण्यतापसाः ॥
प्रणम्य हृष्टमनसः प्रययुः स्वस्वमाश्रमम् ॥

Colophon :

इति श्रीशैवे महापुराणे त्रिकोटकरुद्रसंहितायां स्वयम्भुरामेश्वरमाहात्म्यं पञ्चविंशोऽध्यायः । श्रीस्वयम्भुरामेश्वरमाहात्म्यं सम्पूर्णम् ॥

575

Sl. No : 18692 रुद्रकोटिमाहात्म्यम् Ms. No: C. 3719/3

Beginning :

अथान्यदपि वक्ष्यामि रुद्रकोटीशवैभवम् ।
शृण्वतां वदतां चैव सर्वपापप्रणाशनम् ॥

शृणुध्वं श्रद्धया युक्ता यूयं तापसपुङ्गवाः ।
विवाहं कथयाम्यद्य पार्वतीपरमेशयोः ॥

End :

इति ते मुनयः सर्वे नैमिशारण्यवासिनः ।
प्रणनन्दुः परं सूतं प्रशंसू रोमहर्षणम् ।
चीराजिनकुशैःपुष्पैः पूजयामासुरादरात् ॥

Colophon :

इति लैङ्गे पुराणे रुद्रकोटिमाहात्म्ये शिवभक्तिप्रशंसनं नाम त्रिंशोऽध्यायः ॥

576

Sl. No : 18694 रुद्राक्षमाहात्म्यम् **Ms. No : C. 1132/1**

Beginning :

श्री सनत्कुमारः —
भवतोक्तं तु यत्सर्वं श्रुतं तन्मनसः प्रियम् ।
श्रोतुमिच्छामि माहात्म्यं रुद्राक्षाणां च धारणे ॥
वद मे करुणासिन्धो नमस्ते शिखिवाहन ।
त्वदन्यो नास्ति मे वक्ता सारात् सारतरं मम ॥

End :

रुद्राक्षधारणादेव स रुद्रो नात्र संशयः ।
अमन्त्रधारणादेव गुणा एते प्रकीर्तिताः ॥
किं पुनर्मन्त्रसंयुक्तं धारयेद्यदि मानवः ।
गुणानां तस्य माहात्म्यं कथितुं नैव शक्यते ॥

Colophon :

इति श्री स्कान्दे महापुराणे मलयाचलखण्डे शिवतत्त्वसुधानिधौ रुद्राक्षमहिमावर्णनम् ॥

577

Sl.No : 18695 रेणुकामाहात्म्यम् **Ms. No : B. 9669/1**

Beginning :

ततः परशुरामस्य [illegible] ।
दत्वायुतोपवलवान् शल्यो युद्धमिवार्जुनः ॥ (?)

End :

तत्त्वं गच्छ ममादेशात् कुरु युद्धं यथाद्भुतम् ।
इहैव सुरगन्धर्वैः मुनिभिस्सह पूर्वकम् ॥

Colophon :

इति स्कान्दे × त्रिपञ्चाशोऽध्यायः ॥

578

Sl. No : 18697 लोहाचलमहिमा Ms. No : B. 1155/2

Beginning :

सूत उवाच —
× महात्मानस्तापसा नैमिषे शुभे ।
सर्वे संभूय च मिथः द्विजेन्द्राः क्षीणकल्मषाः ॥
शौनकाद्या महेशस्य साक्षात्कारमचिन्तयन् ॥

End :

लोहाचलस्य माहात्म्यपुस्तकं रक्षयन्ति ये ।
ते सर्वे मुक्तिकान्ताभिरामा हि शिवशासनात् ॥
नमस्ते देवदेवेश नमस्ते गिरिजापते ।
नमस्ते पापविध्वंस भक्तप्रिय नमोऽस्तु ते ॥

Colophon :

इत्यादिकाव्ये महापुराणे लोहाचलमाहात्म्ये ग्रन्थसमाप्तिसूचनं नाम एकविंशोऽध्यायः । समाप्तं लोहाचलमाहात्म्यम् ॥

579

Sl. No : 18699 वरगुणक्षेत्रमाहात्म्यम् Ms. No : P. 2971/3

Beginning :

सूतः —
इति तेषां वचःश्रुत्वा तस्करा वाक्यमब्रुवन् ।
वीरगुप्तसुतेनाद्य चोरनाथेन वैभवम् ॥
कालदूषकनाम्ना तु नीतं युष्मद्धनं बहु ।
इतिप्राणपरीप्सार्थं सत्यमेव वचोऽब्रुवन् ॥

End :

सनकमुनिवरोक्तं वाक्यमाकर्ण्य भूपः
मुदमगमदनन्तां भूय एवाद्भुतश्रीः ।
हरिचरितमुदग्रं श्रोतुकामो मुनीन्द्रं
वचनमपि बभाषे वासुदेवाङ्घ्रिभक्तम् ॥

Colophon :

इति ब्रह्माण्डपुराणे वरगुणक्षेत्रमाहात्म्यं नाम अष्टमोऽध्यायः ॥

580

Sl. No : 18700 वरमहालक्ष्मीव्रतमाहात्म्यम् **Ms. No : P. 10697/8**

Beginning :

× × नानागणनिषेविते ।
मन्दारवि × पप्राच्ये नानामणिविराजिते ॥
रत्नपीठे सुखासीनं शंकरं लोकशंकरम् ॥
पप्रच्छ गौरी सन्तुष्टा लोकानुग्रहकारणम् ॥

End :

तेषां पुत्रांश्च पौत्राश्च भविष्यन्ति न संशयः ।
× × भद्राणि पश्यति ॥
पुण्याचारमती चैव भूयो भाग्यमती चिरम् ।
इदं यः श्रृणुयाद्भक्त्या तस्य भद्रं भविष्यति ।
इतीदं कथितं सूत सर्वपापनिवृत्तये ॥

Colophon :

इति स्कन्दपुराणे उमामहेश्वरसंवादे वरलक्षीव्रतकथाश्रवणं सेम्पूर्णम् ॥

581

Sl. No : 18701 वरमहालक्ष्मीव्रतमाहात्म्यम् **Ms. No: C. 4654/50**

Beginning :

कैलासशिखरे रम्ये नानामणिनिषेविते ।
मन्दारवाटिकाकान्ते नानामणिविभूषिते ॥
रत्नपीठे समासीनं शङ्करं लोकशङ्करम् ।
पप्रच्छ गौरी सन्तुष्टा लोकानुग्रहकांक्षया ॥

End :

वरलक्ष्मीव्रतं नाम तदादि भुवि विश्रुतम् ।
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ॥
सिध्यन्ति सर्वकार्याणि धनधान्यादिसम्पदः ॥

Colophon :

इति श्री भविष्योत्तरपुराणे उमामहेश्वरसंवादे वरमहालक्ष्मीव्रतकथा श्रवणं सम्पूर्णम् ॥

582

Sl. No : 18703 वराहजयन्तीव्रतमाहात्म्यम् **Ms. No : B. 9993/14**

Beginning :

ईश्वरः —
वाराहाख्यजयन्ती च सर्वाभीष्टफलप्रदा ।
यः कुर्यात्सोऽपि पापेभ्यो मुच्यते पूर्वसञ्चितैः ॥
वाराहाख्यजयन्तीं च मोहाद्वा यस्समाचरेत् ।
तस्य पापानि नश्यन्ति धर्मवृद्धिः समेष्यति ॥

End :

भ्रूणहत्यादिपापघ्नं ज्ञानाज्ञानकृतं तथा ।
व्रतं पुण्यप्रदं पुंसां पुरुषार्थप्रदायकम् ॥
य इदं कीर्तयेद्भक्त्या श्रवयेद्वा समाहितः ।
आयुरारोग्यमैश्वर्यं भवत्येव न संशयः ॥

Colophon :

इति स्कन्दपुराणे वराहजयन्तीकथा समाप्ता ॥

583

Sl. No : 18704 वामदेवमाहात्म्यम् **Ms. No : P. 8725/4**

Beginning :

ಅನಂತರದಲ್ಲಿ ಸೂತಪೌರಾಣಿಕನು ಶೌನಕಾದಿ ಮುನಿಗಳಿಗೆ ಮತ್ತಿಂತೆಂದನು. ಕೇಳಿರೈ ಋಷಿಗಳಿರ! ಋಷಭನೆಂಬ ಶಿವಯೋಗಿಯ ಪ್ರಭಾವಮಂ ಹೇಳಿದವನಾದೆನು. ಇನ್ನು ಮೇಲೆ, ಮತ್ತೊಬ್ಬ ಶಿವಯೋಗಿಯ ಮಹಿಮೆಯಂ ಹೇಳುತ್ತಿದ್ದೇನೆ. ಇದಂ ಕೇಳಿ ಪಾಪಿಗಳು ಮೊದಲಾಗಿಯುಂ ಕೃತಕೃತ್ಯರಾಗುವರು.

End :

ಪರರಿಂದ ತಮಗೆ ಒಂದಿಷ್ಟಾದರೂ ಉಪಕಾರವಂ ಬಯಸರೆಂದು ಬ್ರಹ್ಮರಾಕ್ಷಸನು ಪ್ರಾರ್ಥಿಸಲಾಗಿ ವಾಮದೇವನು ಬ್ರಹ್ಮರಾಕ್ಷಸನಿಗೆ ಮತ್ತೂ ವಿಭೂತಿಯ ಮಹಿಮೆಯನ್ನು ಆ ವಿಭೂತಿ ಧಾರಣ ವಿಧಾನವನ್ನು ಹೇಳುವುದಕ್ಕೆ ಉಪಕ್ರಮಿಸಿದನೆಂದು ಸೂತಪೌರಾಣಿಕನು ಶೌನಕಾದಿ ಮುನಿಗಳಿಗೆ ನಿರೂಪಿಸಿದನು.

Colophon :

ಸ್ಕಂದ ಪುರಾಣೋಕ್ತವಾದ ಬ್ರಾಹ್ಮೋತ್ತರ ಖಂಡದಲ್ಲಿ ವಾಮದೇವ ಮಹಿಮೆಯಂ ಪೇಳ್ದಲ್ಲಿಗೆ ಅಧ್ಯಾಯ ೧೭ಕ್ಕಂ ಮಂಗಳ ಮಹಾಶ್ರೀ ॥

584

Sl. No : 18705 **वामनजयन्तीव्रतमाहात्म्यम्** **Ms No : P. 10048/1४**

Beginning :

याज्ञवल्क्यमुनिश्रेष्ठो भास्करं गृहमागतम् ।
कृताञ्जलिपुटो भूत्वा इदं वचनमब्रवीत ।।
व्रतानां चैव सर्वेषां दानानां चैव सर्वश: ।
यज्ञानां चैव सर्वेषां जपादीनां विशेषत: ।।

End :

विप्रान् सन्तोषयेद्द्याद्यथाशक्त्या च दक्षिणाम् ।
यै: कृता द्वादशी श्रेष्ठा अनेन विधिना मुने ।।
ब्रह्मलोकमवप्नोति ताबत्कालं च तिष्ठति ।
पुत्रपौत्रै: परिवृत: स ह लोके सुखी भवेत् ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे वामनजयन्तीव्रतकथा संपूर्णा ।।

585

Sl.No : 18707 **वाराहक्षेत्रमाहात्म्यम्** **Ms. No : B. 757/1**

Beginning :

श्रीमन्नारायणकथासुधास्वादनतत्पर: ।
प्रातस्सवनहोमान्ते मुनयस्सूतमाययु: ।।
पांड्येषु यत्तु वाराहक्षेत्रं नामातिपावनम् ।
सर्वसिद्धिप्रदं पुंसां विष्णो: क्षेत्रं सनातनम् ।।

End :

माहात्म्यस्य पाठेन श्रवणेन च देहिनाम् ।
आयुरारोग्यमैश्वर्यं विद्यापुत्रादिसम्पदम् ॥
धर्मार्थकाममोक्षाश्च भविष्यन्ति न संशयः ।
बहुना किमिहोक्तेन यद्यत्कामयते नरः ।
वाराहक्षेत्रमाहात्म्यश्रवणात् तदवाप्नुयात् ॥

Colophon :

इति श्री वाराहशेषे रहस्यखण्डे वाराहक्षेत्रमाहात्म्ये अष्टमोऽध्यायः ॥

586

Sl. No : 18708 वाराहतीर्थमाहात्म्यम् Ms. No : B. 757/2

Beginning :

तस्य तीर्थस्य माहात्म्यं विस्तरेण ब्रवीमि ते ।
वनस्पतिगते चन्द्रे भास्करे कटकं गते ॥
पुण्ये नदीत्रये तीर्थे स्नात्वा नियतमानसः ।
यत्तु तत्तीरसामीप्ये पितृभ्यः श्राद्धमाचरेत् ॥

End :

इत्युक्त्वा वचनं तत्र तानि तीर्थानि पद्मभूः ।
पश्यतां सर्वतीर्थानां तत्रैव च तिरोदधे ॥
यत्तु तस्यां तिथौ स्नाति तस्मिन् तीर्थवरे नरः ।
सर्वतीर्थफलं लब्ध्वा भुक्तिं मुक्तिं च विन्दति ॥

Colophon :

इत्थं नदीत्रयस्योक्तं वैभवं परमाद्भुतम् ॥ (?)

587

Sl. No :18709 विनायकचतुर्थीव्रतमाहात्म्यम् Ms. No : P. 10048/13

Beginning :

ऋषयः ऊचुः—
निर्विघ्नेन तु कार्याणि कथं सिद्ध्यन्ति सूतज ।
अर्थसिद्धिः कथं नृणां पुत्रसौभाग्यसम्पदम् ॥

दम्पत्योः कलहे चैव बन्धुभेदे तथा नृणाम् ।
उदासीनेषु लोकेषु कथं सुमकथं भवेत् ॥

End :

चण्डिकाद्या मातृगणाः परितुष्टा भवन्ति च ।
तस्मिन् सम्पूजिते विप्र भक्त्या सिद्धिविनायके ॥
यद्वेदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सिध्यन्ति सर्वकार्याणि सिद्धिदस्य प्रसादतः ॥

Colophon :

इति श्री भविष्योत्तरपुराणे द्वितीयकाण्डे विष्णुप्रोक्ते सिद्धिविनायकव्रतं संपूर्णम् ॥

588

Sl. No : 18711 विनायकचतुर्थीव्रतमाहात्म्यम् **Ms. No : P. 10567/1**

Beginning :

सूत उवाच—
अरण्ये वर्तमानन्तं पाण्डुपुत्रं युधिष्ठिरम् ।
सबान्धवं सुखासीनं प्रययौ व्यास आदरात् ॥
तं दृष्ट्वा मुनिशार्दूलं व्यासं प्रत्याययौ नृपः ।

End :

तेन व्रतप्रभावेन स्वराज्यं प्राप्तवान्नृपः ।
हत्वा रिपून कुरुक्षेत्रे कर्णदुर्योधनादिकान् ।
चातुर्वर्ण्यं नियोज्याथ स्वे स्वे धर्मे महायशाः ।
कृष्णेन सहितो रेमे भ्रातृभिस्सह भार्यया ॥

Colophon :

इति श्री नारदीयपुराणे कृष्णयुधिष्ठिरसंवादे संकष्टहरणेशचतुर्थीव्रत कथाश्रवणं संम्पूर्णम् ॥

589

Sl. No : 18714 विनायकचतुर्थीव्रतमाहात्म्यम् **Ms. No : C. 4680/13**

Beginning :

चन्द्रादित्यैश्च धरणी विद्युदग्निस्त्वमेव च ।
तथैव सर्वज्योतींषि राजनीराजनं प्रभो ॥

ऋषयः ऊचुः —

निर्विघ्नेन तु कार्याणि कथं सिध्यन्ति सूतज ।
अर्थसिद्धिः कथं नृणां पुत्रसौभाग्यसम्पदः ॥

End :

हव्यवाहमुखा देवाः पूजितास्स्युर्न संशयः ।
चण्डिकाद्या मातृगणाः परितुष्टा भवन्ति च ॥
तस्मिन् संपूजिते विप्र भक्त्या सिद्धिविनायके ।
य इदं श्रुणुयान्नित्यं श्रावयेद्वा समाहितः ॥
सिध्यन्ति सर्वकार्याणि सिद्धिदस्य प्रसादतः ॥

Colophon :

इति श्रीस्कान्दपुराणे सिद्धिविनायकव्रत कल्पोक्तं सम्पूर्णम् ॥

590

Sl. No : 18715 विरूपाक्षमहोदयः Ms. No : C. 1979/1

Beginning :

सूतः—

अतः परं प्रवक्ष्यामि विरुपाक्षमहोदयम् ।
तीर्थयात्रात्मकं पुण्यं तीर्थस्नानफलप्रदम् ॥
सह्याद्रेः पश्चिमे भागे रामक्षेत्रेऽतिपावने ।
सुदर्शनो नाम द्विजो वेदवेदाङ्गपारगः ॥

End :

पद्मसंख्यानिधिस्थाने कोशाध्यक्षेण चान्वितः ।
तं समाराध्य विप्रेन्द्रः कोङ्कणः पूर्वभक्तिमान् ॥
तयोर्दत्तवरः काले भविष्यति महायशाः ।
इति ते कथितं सर्वं क्षेत्रमाहात्म्यमुत्तमम् ॥

Colophon :

इति श्रीस्कान्दे सह्याद्रौ विरूपाक्षमहोदयो नाम चतुस्त्रिंशोऽध्यायः ॥

591

Sl. No : 18716 विष्णुपदीगङ्गामाहात्म्यम् Ms. No : B. 298/3

Beginning :

सूतः —

तत्र विष्णुपदं नाम तीर्थं तीर्थवरोत्तमम् ।
परमं ब्राह्मणश्रेष्ठाः सर्वपातकनाशनम् ॥
अयने दक्षिणे प्रातः यस्संपूज्य समाहितः ।
निवेदयत्तदात्मानं सम्यक् श्रद्धासमन्वितः ॥

End :

दानहोमजपाद्यैश्च तपस्विनियमैस्तथा ।
प्रातस्सन्ध्यां तु कृत × सहस्रगुणितं फलम् ॥
एकरात्रमहर्व्याप्त × × × ।
अनेकश्लोकसंगीत × × × ॥

Colophon :

इति स्कान्दे पुराणे तृतीयपरिच्छेदे नागरखण्डे हाटकक्षेत्रमाहात्म्ये श्रीकृष्णमङ्गलक्षेत्रकथने विष्णुपदीगङ्गामाहात्म्यं नाम पञ्चविंशोऽध्यायः ॥

592

Sl. No : 18717 विष्ण्वाश्रयणमाहात्म्यम् Ms. No : C. 2524/10b

Beginning :

मुनय ऊचुः—

विस्तरेण समाख्याहि हरिसंश्रयणं परम् ।
कथमाश्रयणं नृणां कथमाराधनं विभो ॥

श्री पराशर उवाच—

वक्ष्यामि मुनयस्सर्वे विष्णोराश्रयणक्रियाम् ।
मन्त्रदीक्षाविधिं चैव तत्तत्पूजाविधिं तथा ॥

End :

कर्मसंस्कारशुध्यर्थं जातकर्मादि कारयेत् ।
मन्त्रसंस्कारसिध्यर्थं मन्त्रदीक्षाविधौ तथा ॥

उद्वाहसमये स्त्रीणां पुंसां चैवोपनायने ।
चक्रस्य धारणं प्रोक्तं मन्त्रैः पञ्चायुधानि च ।।

Colophon :

इति श्रीपाराशर्यस्मृतौ उत्तरखण्डे प्रथमोऽध्यायः ॥

593

Sl. No : 18718 वीक्षारण्यमाहात्म्यम् Ms. No : P. 79/3

Beginning :

अहो महत्त्वया प्रोक्तं विष्णोराराधनं मम ।
फलन्तु तद्विशेषश्च देशकाले विशेषतः ।।
द्रव्ययोगविशेषैश्च तथा कर्मविशेषकैः ।
वर्णाश्रमविशेषैश्च तथा भक्तिविशेषकैः ।।

Eud :

धन्यं यशस्यं सकलप्रशस्यं
य: शालिहोत्रस्य चरित्रमेतत् ।
यस्मिन् गृहे तिष्ठति पुस्तकस्थं
तदेव वैकुण्ठपुरोपमं स्यात् ।।

Colophon :

इति मार्कण्डेयपुराणे क्षेत्रकाण्डे वीक्षारण्यमाहात्म्ये एकादशशततमोऽध्यायः ।।

594

Sl. No : 18722 वीरभद्रमहिमा Ms. No : C. 1619/2

Beginning :

गणाधीश सुराधीश गुणाधीश शिवावश ।
प्रजाधीश भवावेश नमोऽर्धेश मनो विश ।।
ततः परं किमभवच्छर्वाण्याश्चरितं शुभम् ।
श्रोतुमिच्छाम भगवन् वदस्व करुणाकर ।।

End :

इदं पवित्रं पापघ्नं पुण्यं सन्तापनाशकम् ।
शिवेन प्रोक्तमत्यन्तं श्रृण्वतां फलदायकम् ॥
यडवीरसमं क्षेत्रं न भूतं न भविष्यति ।
दर्शनादस्य लिङ्गस्य पुनर्जन्म न विद्यते ॥
श्री वीरशम्भो वृषभध्वजेश
कालीपतें कामितदायकस्त्वम् ।
त्रियम्बक त्राहि हरामरेश
मामद्य संत्राहि शरण्यमूर्ते ॥
॥ इति दशमः ॥

Colophon :

आश्वयुक्सितपौषस्य दशम्यां ईश्वराब्दके ।
नारायणेन रचिता कृतिरेषा हि मोददा ॥

595

Sl. No : 18723 वृन्दावनमाहात्म्यम् Ms. No: P. 9147/1

Beginning :

वद सूत महाभाग पुराणार्णवपारग ।
व्यासप्रसादाल्लोकानां अवने समवस्थित ॥
पुरा धर्माः श्रुताः सर्वे प्रोक्ताः पापविनाशकाः ।
इदानीं श्रोतुमिच्छामि ह्यन्यं धर्मं सुविस्मयम् ।
वृन्दावनं महत्पुण्यम् . . . .

End :

तुलस्याः पुरतो येन कण्डकैरावृत्तिः कृता ।
कृतं वा भित्तिनिर्माणं तस्मादाढ्यो भवेत् क्षितौ ॥
सर्वतीर्थाभिगमनं सर्वदानकृपापि च ।
अग्निष्टोमादियज्ञाश्च तुलसीरोपणाद्भवेत् ॥

Colophon :

(७ पुटे) – इति श्रीकपिञ्जलसंहितायां आथर्वणरहस्ये वृन्दावनतुलसी उत्सवकथनं नाम षष्ठितमाध्यायः ॥

596

Sl. No : 18725 वृद्धगिरिमाहात्म्यम् Ms. No : P. 3601/2

Beginning :

देववर्मा —

उक्तं समस्तं भवतां महात्मैनां
माहात्म्यमेतद्धि कवेरजायाः ।
वृद्धाचलस्यापि मुनेः प्रभावं
वक्तुं त्वमर्हस्यखिलं च मह्यम् ॥

End :

त्वमपि नृप गच्छ श्रेयसे ते यदीच्छेः
अभिगिरिमथ नद्यां स्नाहि तावच्चयेशौ ।
प्रवितर तव वित्तं शंभवे चारु भक्त्या
परममृतममर्त्यं यास्यसीशास्पदं तत् ॥

Colophon :

इति ब्रह्मकैवर्ताख्ये महापुराणे तीर्थप्रशंसायां वृद्धगिरिमाहात्म्ये पार्वती अनवधानाथप्रश्ने कलि × गप्राप्तिकथनं नाम षोडशोऽध्यायः ॥

597

Sl. No :18727 वेङ्कटगिरिमाहात्म्यम् Ms. No : P. 1744/2

Beginning :

ऋषयः —

कथितानि महाभाग पुण्यक्षेत्राण्यनेकशः ।
प्रशस्तानि च तीर्थानि तानि तानि महीतले ॥
तेभ्योऽपि कतमं पुण्यं क्षेत्रं पापप्रणाशनम् ।

Colophon :

भृगुरपि वृषभाचलप्रभावं
मुनिवरकथितं निशम्य भूयः ।
तदनु स विलोकितुं रमेशं
स्थिरतरचित्ततया गिरीन्द्रम् ॥

Colophon :

इति ब्रह्माण्डपुराणे क्षेत्रखण्डे भृगुनारदसंवादे श्रीवेंकटगिरिमाहात्म्ये कृष्णशर्मकथनं नाम दशमोऽध्यायः ॥

598

Sl. No : 18729 वेङ्कटगिरिमाहात्म्यम् **Ms. No : P. 2378/I**

Beginning :

कथितं रङ्गमाहात्म्यं त्वया हस्तिगिरीशितुः ।
जगन्नाथस्य वै विष्णोः माहात्म्यमतुलं मुने ॥
इदानीं श्रोतुमिछामि माहात्म्यं वेङ्कटेशितुः ॥

श्री सूतः —

साधु पृष्टं त्वया ब्रह्मन् चरितं वेङ्कटेशितुः ।
यथा श्रुत यथापूर्वं व्यासेनामिततेजसा ॥

End :

य एनं पूजयेद्भक्त्या यश्च नाम जपेत्सुधीः ।
न तस्य सदृशो लोके भक्तो हि त्रिषु विद्यते ॥
इमां पवित्रां पापघ्नीं श्रीनिवासकथां शुभाम् ।
ये शृण्वन्ति पठन्तीह भक्त्या मर्त्या निरन्तरम् ।
तेषां गृहे महालक्ष्मी निश्चयात्स्यान्न संशयः ॥

Colophon :

इति श्रीमद्भविष्योत्तरपुराणे वेङ्कटगिरिमाहात्म्ये चतुर्दशोऽध्यायः ॥

599

Sl. No : 18734 वेङ्कटगिरिमाहात्म्यम् **Ms. No : P. 4497/4**

Beginning :

सूतः उवाच —

यच्छरीरं त्रयो वेदा यच्छ्रेष्ठा धर्मणस्मृतः । (?)
यदङ्गानि षडङ्गानि तस्मै वागात्मने नमः ॥

व्यास उवाच —

कदाचिद्दुःखितः प्राह जनको मिथिलाधिपः ।
दानानन्दं महाभागं सर्वज्ञं तत्वदर्शिनम् ॥

End :

इतीरितं वै मुनिना समस्तं
श्रुत्वा महौजा जनको महात्मा ।
प्रफुल्लनेत्रः पुलकाञ्चिताङ्गो
नारायणाद्रिं प्रययौ प्रहृष्टः ॥
सामाप्य सत्रं जनको महात्मा
\+ + + +
स्वयं ययौ मैथिलराजराजः ॥

Colophon :

इति वामनपुराणे वेङ्कटगिरिमाहात्म्ये दानमाहात्म्यं नाम चतुर्विंशोऽध्यायः ॥

600

Sl. No : 18735 वेङ्कटगिरिमाहात्म्यम् Ms. No : P. 4497/5

Beginning :

जनकः—
कदा सर्वाणि तीर्थानि स्वामिपुष्करणीं द्विज ।
आयान्ति काले कस्मिन्वा स्वात्मनां शुद्धिकारणात् ॥
तं कालं मे शतानन्द ब्रूहि कालविदुत्तम ।
शतानन्दः—
पुरा भागीरथीतीरे मार्कण्डेयो महामुनिः ।
तपः परममास्थाथ स तेपे परमं तपः ॥

End :

वेङ्कटाचलमाहात्म्यं ये शृण्वन्ति नरोत्तमाः ।
तेषां भुक्तिश्च मुक्तिश्च इह लोके परत्र च ॥
वेङ्कटाचलमाहात्म्यं संक्षिप्य कथितं तव ।
अतः परं महानद्याः प्रभावः कथ्यतेऽधुना ॥

Colophon :

इति स्कन्दपुराणे सुवर्णमुखरीमाहात्म्ये वेङ्कटगिरिमाहात्म्ये अगस्त्यसंख्यादीनां (?) दशमोऽध्यायः ॥

601

Sl. No :18743 **वेङ्कटगिरिमाहात्म्यम्** Ms. No : P. 9187/2

Beginning :

दिलीपः—

ज्ञानवैराग्यदानां च तीर्थानां नामवैभवम् ।
श्रोतुमिच्छामि चात्रेय तीर्थानां साष्टषष्टिनाम् ॥
माहात्म्यं च महाप्राज्ञ सद्यः पापविमोचनम् ॥

End :

अष्टोत्तरशतं तीर्थं सन्ति नारदकोणके ।
काश्यपाश्रममारभ्य अर्धयोजनमध्यतः ॥
कुमारधारिकातीर्थं पश्चिमेऽष्टोत्तरं शतम् ।
अस्ति तीर्थसहस्रं च सद्यः सिद्धिप्रदायकम् ॥

Colophon :

इति श्रीब्रह्मपुराणे वेङ्कटगिरिमाहात्म्ये षष्ठोऽध्यायः ॥

602

Sl. No : 18747 **वेङ्कटगिरिमाहात्म्यम्** Ms. No : P. 9236/2

Beginning :

श्रीमते भूवराहाय नमः कृत्स्ना वसुन्धरा ।
उद्धृता येन पातळात् वासार्थं सर्वदेहिनाम् ॥

मुनयः ऊचुः—

भगवन् सूत सर्वज्ञ वेदव्यासकृपानिधे ।
विष्णोः स्थानेषु सर्वेषु स्वयंव्यक्तस्थलेषु च ॥
यत्र विष्णोरतिप्रीतिः यत्र सिद्ध्यन्ति सिद्धयः ॥

End :

यः श्रावयेद्यः शृणुयात् विष्णुलोकं स गच्छति ।

सूतः—

इत्येवं देवदेवस्य सभविष्यं सहोत्तरम् ॥
शृणुयाद्यः पठेद्भक्त्या कथां पुंसां पुरातनीम् ।
स तु भुक्त्वाऽखिलान् कामान् अन्ते विष्णुपदं व्रजेत् ॥

Colophon :

इति वराहपुराणे भूगोळोपाख्याने श्रीवेङ्कटगिरिमाहात्म्ये दशमोऽध्यायः ॥

603

Sl. No : 18748 **वेङ्कटगिरिमाहात्म्यम्** Ms. No: P. 9236/3

Beginning :

पुरा मृकण्डुतनयः पुरुषोत्तमसेवया ।
दीर्घमायुरवाप्याथ मुदां पदमभून्मुनिः ॥
स्वमाश्रमपदं गत्वा तपस्विजनसन्निधौ ।
मातृदेवेति मतिमान् प्रणाममकरोन्मुनिः ॥

End :

एतत्तीर्थस्य माहात्म्यं बुद्धं वा सर्वदेवताः ।
प्रतिवर्षं स्नानमात्रं मां द्रष्टुं च तपोधनाः ॥
आयातं सावधानेन मा विस्मरणमस्तु वः ।
इत्युक्त्वा तं तु हस्तेन पस्पर्श गुहमच्युतः ॥
कुमारधारिकातीर्थतीरे पठति यस्त्विदम् ।
शृणोति वा तस्य तस्य सर्वाभीष्टप्रदो हरिः ॥

Colophon :

इति श्रीमार्कण्डेयपुराणे वेङ्कटगिरिमाहात्म्ये पञ्चमोऽध्यायः ॥

604

Sl. No : 18749 **वेङ्कटगिरिमाहात्म्यम्** Ms. No : P. 9236/4

Beginning :

गरुडपुराणस्थवेङ्कटगिरिमाहात्म्यप्रारम्भः —
अरुन्धती समस्तानामङ्गनानां प्रतिव्रता ।
पतिं स्वां परिपप्रच्छ लोकानां हितकाम्यया ॥
अरुन्धती—
ब्रह्मात्मज नमस्तुभ्यं विज्ञापनमिदं शृणु ।
पतिशुश्रूषणादन्यत् स्त्रीणां धर्मो न विद्यते ॥

End :

अन्नं ते मत्प्रियाज्ञेया भुक्तिमुक्त्योस्तु भाजनम् ।
आरोग्यकाम आरोग्यं अपत्यं पुत्रकामिनी ॥ + +
पतिव्रतानां प्रसिद्धा भव त्वं च सुपुत्रिणी ॥
इति सर्वं वरं दत्वाऽन्तर्दधे वेङ्कटेश्वरः ॥

Colophon :

इति श्री गरुडपुराणे वेङ्कटगिरिमाहात्म्ये त्रिषष्टितमोऽध्यायः ॥

605

Sl. No : 18762 **वेङ्कटेशमाहात्म्यम्** **Ms. No: P. 10742/1**

Beginning :

शौनकः —

कथितं रङ्गमाहात्म्यं त्वया हस्तिगिरीशितुः ।
जगन्नाथस्य वै विष्णोः माहात्म्यमतुलं मुने ॥
इदानीं श्रोतुमिच्छामि माहात्म्यं वेङ्कटेशितुः ।

सूतः —

साधु पृष्टं त्वया ब्रह्मन चरितं वेङ्कटेशितुः ।
अथ श्रुतं मया पूर्वं व्यासेनामिततेजसा ॥

End :

साक्षाद्रामं जगद्योनिं जामातारमनामयम् ।
प्राप्तवान् राजशार्दूलो यत्कथाश्रवणादरात् ॥
किमनेन विशेषेण शाश्वतं वैष्णवं पदम् ।
यद्यत्कांक्षति यो मर्त्यस्तत्तदाप्नोत्यसंशयः ॥

Colophon :

इति श्री भविष्योत्तरपुराणे वेङ्कटगिरिमाहात्म्ये शतनान्दजनकसंवादे भक्ताधीनत्वप्रकटनं नाम षोडशोऽध्यायः ॥

प्रोष्ठपद्यां शुक्लपक्षे नवम्यां गुरुवासरे ।
लिखितं वेङ्कटेशस्य माहात्म्यं पूर्णतामगात् ॥

606

Sl. No: 18763 **वेङ्कटेश्वरमाहात्म्यम्** Ms. No: C. 397

Beginning:

सूतः—

पुरा मृकण्डुतनयो पुरुषोत्तमसेवया ।
दीर्घमायुरवाप्याथ मुदां पदमभून्मुनिः ॥
स्वमाश्रमपदं गत्वा तपस्विजनसन्निधौ ।
मातृदेवेति मतिमान्प्रणाममकरोद्भुवि ॥

End :

वेङ्कटाद्रेस्तु माहात्म्यं कुमार × स्तथा ।
श्रृणोति वा पठति वा तस्य पुण्यमनन्तकम् ॥
कुमार धारितीर्थनीरे(ये)पठतियास्त्विदम् । (?)
शृणोति वा तस्य तस्य सर्वाभीष्टप्रदो हरिः ॥

Colophon :

इति श्रीमार्कण्डेयपुराणे श्रीवेङ्कटगिरिमाहात्म्ये पञ्चमोऽध्यायः ॥

607

Sl.No: 18764 **वेङ्कटेशमाहात्म्यम्** Ms. No: C. 1284/1

Beginning:

शौनकादयः —

श्रीवेङ्कटेशमाहात्म्यं श्रीनिवासप्रसादतः ।
श्रीप्रदं सर्वतः सूत दयया प्रोक्तवानसि ॥ १ ॥
इतः परं श्रीनिवासः श्रीपतिः सर्वशो हि सः ।
कथं प्रीतो भवेत्सद्यो ह्यभीष्टानि प्रवर्षयेत् ॥

End :

वक्तुः श्रोतुः पाठकस्य पारायणपरस्य च ।
परा × वेङ्कटेशः प्रसन्नो भवति क्षणात् ॥
स्तोत्रेणैव हि सन्तुष्टो वेङ्कटेशो रमापतिः ।
यान् यान् कामान् कामयति तान् तान् मुक्तिं ददाति च ॥ ६८ ॥

End :

इति श्रीमदादित्यपुराणे श्रीवेङ्कटेशमाहात्म्ये पञ्चमोऽध्यायः ॥

608

Sl. No : 18771 वेङ्कटेशमाहात्म्यव्याख्या Ms. No : P. 1284/2

Beginning :

श्रीवेङ्कटेशं बहुपापदाहं
सर्वाद्य × हं सुविचित्रचर्यम् ।
भक्तेष्टवर्षं रमणं रमायाः
वन्दे गुणाढ्यं करुणामृताब्धिम् ॥
श्रीवेङ्कटेशमाहात्म्यं वेङ्कटेशपदाश्रयः ।
वेङ्कटेशप्रेरितस्सन् व्याकरोमि यथामति ॥

End :

ज्ञानानन्तरं लोकोत्तरलोकात् स्वर्गादि × ऊर्ध्वं वैकुण्ठं प्रति तारयति । वैकुण्ठप्रदमित्यर्थः । कदाचित्पारायणकरः पाठकः सदा पारायणपरः ॥ ६५ ॥

Colophon :

इति श्रीमदादित्यपुराणे वेङ्कटेशमाहात्म्यटीकायां श्रीवेङ्कटेशप्रेरितेन छलारिशिष्येण कृतायां पञ्चमोऽध्यायः ॥

609

Sl. No : 18773 वेदान्तदेशिकमाहात्म्यम् Ms. No: P. 2149/1

Beginning :

अर्जुनः —
भगवन् सर्वलोकेश कृष्ण केशिनिषूदन ।
कथं वेदान्तविज्ञानं को वा तस्य प्रवर्तकः ॥
कथं विरोधिसमयनिराकृतिरनुत्तमा ॥

End :

इदमाख्यानमायुष्यं सर्वारिष्टनिवारणम् ।
परमां पदमापन्नो यश्च तत्कीर्तयेत्सकृत् ॥

आपदं स निरस्यैव सम्पदं च समश्नुते ।
य एतत्कीर्तयेद्भक्त्या न तस्मान्मे प्रियो भुवि ।।

Colophon :

इति ब्रह्माण्डपुराणे उत्तरखण्डे श्रीमद्वेदान्तदेशिकोपाख्याने चत्वारिंशतितमोऽध्यायः ।।

610

Sl. No :18774 वेदारण्यमाहात्म्यम् Ms. No : P. 849

Beginning :

शुक्लाम्बरधरं ।। यस्य द्विरद ।। वागीशाद्याः ।।
कालमेघप्रतीकाशं . . . नारायणांशकम् ।।
सरस्वतीमहं वन्दे . . . सुपूजिताम् ।।
वेदमौलिपुराधीशं . . . वेदारण्यगतं भजे ।।
प्रवृत्ते नैमिशारण्ये सत्रे द्वादशवार्षिके ।
पप्रच्छुस्सूतमनघं नैमिशारण्यवासिनः ।।

End :

यो नरः सततं भक्त्या माहात्म्यं पठते हरेः ।
न स पापेन लिप्येत मोक्षसिद्धिश्च जायते ।।

Colophon:

इति पाद्मपुराणे उमामहेश्वरसंवादे वेदारण्यक्षेत्रवैभवं नाम पञ्चमोऽध्यायः ।।

611

Sl. No : 18775 वेलापुरीमाहात्म्यम् Ms. No : P. 1752/4

Beginning :

जगरे तु विशालाक्षी जानतो वाप्यजानतः ।
यो मे प्रभायते गीतं मम भक्त्या व्यवस्थितः ।।
पुत्रवान् गुणवान् शुद्धः सर्वधर्मविदां वरः ।।
नित्यं पश्यति वै शक्रं वज्रहस्तं न संशयः ।।

End :

नमः केशवनाथाय वेलापुरनिवासिने ।
सन्मायाय च सत्याय नित्याय परमात्मने ।।

Colophon :

इति श्रीमदादिपुराणे अष्टादशपुराणसारे विष्णुरहस्ये हारीतसंहितायां वेलापुरीकेशवमहिमानुवर्णनं नाम चतुर्थोऽध्यायः ।।

612

Sl. No : 18776 वैकुण्ठक्षेत्रमाहात्म्यम् **Ms. No : P. 2971/2**

Beginning :

ऋषयः —
कानि क्षेत्राणि तत्रासन् कानि तीर्थानि तत्र तु ।
केषामर्थे हरिस्तत्र प्रसादमकरोद्विभुः ।
कोऽयं स तिन्त्रिणीवृक्षः कीमर्थं केशवः स्वयम् ।
ज्ञानमुद्रां वहन्नित्यं समास्ते मुनिसत्तम ।।

End :

उक्तं मिया नेतरतो भवद्भिः
निपात्यते ह्युग्रतरो हि दण्डः ।
युष्माकमित्येव रिपोर्निशम्य
ते तस्कराः सत्यमथ ब्रुवन्ति ॥

Colophon :

इति ब्रह्माण्डपुराणे वैकुण्ठक्षेत्रमहात्म्यं नाम तृतीयोऽध्यायः ।।

613

Sl. No :18709 वैकुण्ठचतुर्दशीमाहात्म्यम् **Ms. No : P. 10048/13**

Beginning :

पुरा वै नैमिशारण्ये नानामृगगणैः युते ।
नानावृक्षसमाकीर्णे दिव्यपुष्करणीयुते ।।
तत्रासन् ऋषयः सर्वे सूर्यवैश्वानरप्रभाः ।
वामदेवः शतानन्दः पुलस्त्योऽत्रिर्भृगुस्तथा ।।

End :

त्रिशतं द्विशतं वापि शतं वा भोजयेत् द्विजान् ।
एवं कृते महाभागे उद्यापनविधिः क्रमात् ॥
वैकुण्ठलोके निवासन् मोदते स नरोत्तमः ।
वैकुण्ठाख्यचतुर्दश्यां कुर्यादपि महीतले ॥

Colophon :

इति श्री भविष्योत्तरपुराणे उमामहेश्वरसंवादे वैकुण्ठचतुर्दशीव्रतकथासम्पूर्णा ॥

614

Sl. No : 18778 **वैकुण्ठचतुर्दशीमाहात्म्यम्** **Ms. No : P. 6299/3**

Beginnig :

अङ्गिराः—
या करोति व्रतं भक्त्या चतुर्दिश्यां तु कार्तिके ।
शिवपूजां निशायां सा शम्भोरालयमावसेत् ॥
या कार्तिके चतुर्दश्यां उपवासं करोति सा ।
शिवराज्ययुतानां च फलं प्राप्नोत्यसंशयम् ॥

End :

ऐहिकानखिलान् भुक्त्वा राजकन्यासमन्वितः ।
जगाम सप्तजन्मान्ते शम्भोस्तत्परमं पदम् ॥
य एतच्छिवपूजायां माहात्म्यं परमाद्भुतम् ॥
श्रावयेत् किर्तयित्वाऽपि स याति शिवमुत्तमम् ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे वैकुण्ठचतुर्दशीव्रतमाहात्म्यं संपूर्णम् ॥

615

Sl. No : 18779 **वैकुण्ठचतुर्दशीमाहात्म्यम्** **Ms. No : B. 10074/7**

Beginning :

सूत उवाच —
दरिद्रभयहारार्थं शोकरोगनिवारणम् ।
पुत्रपौत्रधनं वृद्धिः सर्वसौभाग्यसम्पदम् ॥
कृष्णं रामं तथाब्रह्मा इन्द्रधर्मन् । (?)

End:

भक्तियुक्तेन सम्पूज्य प्रसन्नं परमेश्वरम् ।
इह लोके सुखीभूत्वा अन्ते शिवपदं व्रजेत् ॥
इदं रहस्यमाहात्म्यं सर्वपापप्रणाशनम् ।
सर्वान्कामानवाप्नोति सत्यं सत्यं मयोदितम् ॥

Coiophon:

इति श्री स्कान्दपुराणे कार्तिकमाहात्म्ये वैकुण्ठचतुर्दशीव्रतकथाश्रवणं संपूर्णम् ॥

616

Sl. No: 18716 वैशाखमाहात्म्यम् Ms No: P. 363/3

Beginning:

भूयोऽप्यङ्गभुवं राजा ब्रह्मणः परमेष्ठिनः ।
पुण्यं माधवमासस्य माहात्म्यं पृष्टवान्मुनिः ॥
अम्बरीषः—
सर्वेषामेव मासानां माधमाहात्म्यमञ्जसा ।
श्रुतं मया पुरा ब्रह्मन् यदा चोक्तं तदा त्वया ॥

End:

य इदं पुण्याख्यानं पापघ्नं पुण्यवर्धनम् ।
शृणुयाच्छ्रावयेद्वाऽपि स याति परमां गतिम् ।
लिखितं पुस्तकं येषां गृहे तिष्ठति मानद ।
तेषां मुक्तिः करस्था हि किमुत श्रवणात्मनाम् ॥

Colophon:

इति श्री स्कान्दपुराणे वैशाखमाहात्म्ये चतुर्विंशोऽध्यायः ॥

617

Sl. No: 18800 शङ्खतीर्थमाहात्म्यम् Ms. No: B. 3719/2

Beginning:

मुनयः ऊचुः—
व्यासशिष्य मुनिश्रेष्ठ नमः पौराणिकोत्तम ।
पुनश्च श्रोतुमिच्छामो वेदाद्रिक्षेत्रवैभवम् ॥

× × × दययास्माशु × × ।
रुद्रकोटिस्थले पुण्यकतितीर्थानि सन्ति हि ॥

End:

स वेदाचलनाथोऽस्य प्रीयतां पठनाच्छिवः ।
या परा शक्तिरखिलं × व्याप्यावतिष्ठते ॥
सा देवी प्रीयतामस्य श्रवणात्पठनादपि ।
सत्यज्ञानानन्दरूपी सर्वव्यापी सदाशिवः ॥
पुराणस्यास्य पठनात् श्ररणात्प्रीयतां शिवः ॥

Coiophon:

इति श्रीमत्स्कान्दे महापुराणे सनत्कुमारसहितायां शङ्खतीर्थमाहात्म्ये ब्रह्मणः शिवशापविमोचनवर्णनं नाम विंशोऽध्यायः ॥

618

Sl. No : 18801 शङ्खोद्भवमाहात्म्यम् Ms. No : C. 4676/4

Beginning :

शालिग्रामशिला यत्र यत्र द्वारवती शिला ।
उभयोः संगमो यत्र मुक्तिस्तत्र न संशयः ॥
एकचक्रस्तु पाषाणे द्वारावत्यां सुशोभनम् ।
सुदर्शनं नाम देवेसौ सुखं मोक्षमाप्नुयात् ॥

End :

कृत्यकृत्यो नवोन्मृत्यो दृष्ट्वा देवं तु शाखिनम् ।
मुच्यते पातकैः घोरैः बहुजन्मकृतैरपि ॥
यथा × लिखितान्कामान् शंखी तस्य प्रयच्छति ।
विधिवच्चैव दृश्यते लभते लोकमवाप्स्यसि ॥

Colophon :

इति श्री प्रह्लादप्रोक्तश्रीद्वारकामाहात्म्ये श्रीशंखोद्भवमाहात्म्ये पञ्चविंशति तमोऽध्यायः ॥

619

Sl. No : 18802 | शठकोपमाहात्म्यम् | Ms. No : B. 10605/5a

Beginning :

मार्कण्डेयपुराणे—सनत्कुमारः

भगवन् ब्रूहि सकल × शर ॥
भक्तेषु वर्तमानेषु शठकोप इति श्रुतः ।
मुनिः प्रोक्तस्त्वया देव श्रुतपूर्वो मयानघ ।
तस्यास्तु भावं भगवा१ अशेषं वक्तुमर्हसि ॥

End :

संस्कृतश्रुतयो यद्वत द्रामिडश्रुतयस्तथा ।
नित्याः तद्वत् प्रणीयन्ते मुनिभिश्च कलौ युगे ॥
तद्भदस्य च देश्यानां × श्चैव लक्षणम् ।
श्रुतं पूर्वं मुनीन्द्रैस्तैः तस्मात् त्याज्या पराः स्मृताः ॥

Colophon :

इति मार्कण्डेयपुराणे मध्यमभागे भगवद्धर्मे षोडशोऽध्यायः ॥

620

Sl. No : 18803 | शतकोटिसारः | Ms. No : P. 1634

Beginnig :

हरिणा जगदीशेन कृतं सर्वं जग × जम् ।
पाल्यते येन तस्मै श्रीहरये गुरुमूर्तये ॥
नमामि करुणासारं तमोघ्नं रघुनन्दनम् ।
अमोघज्ञानदातारं समस्तभुवनेश्वरम् ॥

End :

रामायणं कृतं श्रुतं संक्षेपात्त्वन्मुखाद्वयम् ।
कृत्स्नं चारित्रवत्सर्वं श्रृणुवाम मुनीश्वर ॥
शेषाः कथास्तु चारित्रे शतकोटिपविस्तरे ।
यास्ताः संक्षेपतो भूयो पदशः श्रोतुमिच्छताम् ॥

Colophon :

इति श्री स्कान्दे शतकोटिसारे अतिरहस्ये द्वादशोऽध्यायः ॥

621

Sl. No : 18805 **शनिप्रदोमाहात्म्यम्** Ms. No : P. 10236/8

Beginning :

लोमशः उवाच—

पुरा वृत्रादिभिः दैत्यैः वर्तमाने महाहरे ।

हतः शक्रेण णमुचिर × × × ।

दैत्यान्पलायितान्दृष्ट्वा हन्यमानान्सुरैर्भृशम् ॥

End :

शनिप्रदोषविधिना ध्रुवं शत्रुं विजेष्यसि ।

एवं निशम्य गुरुणा कथितं तदा ×

× अनेन विधिना गिरिशं प्रपूज्य ।

लोकान् प्रसन्तमिव दैत्यपतिं प्रत्र ×

तं तत्क्षणा + गमयक्षमीशतुष्ट्या ॥

Colophon:

इति स्कन्दपुराणे केदारखण्डे शनित्रयोदशीव्रतकथा ॥

622

Sl. No : 18806 **शर्मीगिरिमाहात्म्यम्** Ms No : A. 614/4

Beginning :

श्री सूतः—

इत्थं वः कथितं विप्राः क्षेत्राणां वैभवं शुभम् ।

मध्याह्नकालस्सम्प्राप्तो गच्छामि निजमाश्रमम् ॥

End :

एतत्पुण्यपुराणमङ्गलकरश्लोकं तदर्धं तु वा

पादं वापि शमीगिरीति शुभदं वाक्यं (?) पठेद्यो नरः ।

चोराद्यामयसर्पजं भयमसौ नाप्नोति किंचोत्तमं

साम्राज्यं समवाप्य गच्छति शचीनाथस्य दिव्यं पदम् ॥

Colophon :

इति स्कान्दपुराणे स्कन्दमहेश्वरसंवादे शमीगिरिमाहात्म्ये भूदेवीकल्याण-कथनं नाम दशमोऽध्यायः ॥

623

Sl. No: 18809 शिलातलक्षेत्रमाहात्म्यम् Ms. No: P. 5012/2

Beginning:

ऋषयः —

सूत सूत दयासिन्धो मुनिवर्य नमोऽस्तु ते ।
श्रोतुकामा वयं त्वत्तः पुनः × च्छ सादरम् ॥
कावेर्याः पार्श्वयोर्मध्ये क्षेत्राणि विविधानि च ।
ईशविष्ण्वादिदेवाश्च तत्र तत्र × हि ॥

End:

सर्वपापविनिर्मुक्तः इह लोकेऽसितान् बहून् ।
भुक्त्वान्ते ते तु मल्लोकं मम प्रीता हि मानवाः ॥
प्राप्य पश्चात्तु वैकुण्ठं विष्णुना सह मोदते ॥

Colophon:

इति श्री ब्रह्माण्डपुराणे उत्तरखण्डे शिलातलक्षेत्रे सोनेश्वरमहिमानुवर्णनं नाम सप्तदशोऽध्यायः ॥

624

Sl. No: 18810 शिवकवचमाहात्म्यम् Ms. No: P. 10611/3

Beginning:

ऋषभ उवाच —

इत्येतत्कवचं शैवं परमं व्याहृतं मया ।
सर्वबाधाप्रशमनं रहस्यं सर्वथा × ॥
यस्सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् ।
न तस्य जायते कापि भयं शम्भोरनुग्रहात् ॥

End:

. . . .
द्विषन् सहस्रनागानां बलेन महतापि च ।
भस्मधारणसामर्थ्यात् शत्रुसैन्यं विजेष्यसि ॥
प्राप्य सिंहासनं पित्र्यं गोप्तासि पृथिवीमिमाम् ।
इति भद्रायुषं सम्यगनुशास्ति समन्ततः ॥

Colophon :

इति श्री ब्रह्मोत्तरखण्डे शिवकवचमहिमानुवर्णनं नाम द्वादशोऽध्याय ॥

625

Sl. No : 18814 शिवगङ्गामाहात्म्यम् Ms. No : P. 6478

Beginning :

सनत्कुमारः —

नन्दीश्वर महाप्राज्ञ सर्वलोकप्रियङ्कर ।

ककुद्गिरेश्च माहात्म्यं वद सर्ववि(शारद)दां वर ॥

नन्दी—

सनत्कुमार साधो त्वं सर्वलोकहिते रतः ।

बुद्धिमानसि योगी त्वं सौख्यदं पृष्टवानसि ॥

Eud :

इति ब्रुवाणः सततं मुक्तिर्हस्तगता तदा ।

इति पुण्यकथां श्रुत्वा शिवभक्तो नरः सकृत् ।

कृतकृत्यो भवत्येव नान्यथा कर्मकोटिभिः ॥

Colophon :

इति श्री स्कन्दपुराणे कल्याणकाण्डे शिवगङ्गामाहात्म्ये पञ्चमोऽध्यायः ॥

626

Sl. No : 18818 शिवभक्तमाहात्म्यम् Ms. No : P. 2532

Beginning :

नमश्शिवाय षट्त्रिंशत्तत्त्वातीताय शम्भवे ।

मायाद्वयमुपादाय चिच्छक्त्या सृजतेऽध्वनः ॥

नमस्तस्मै गणेशाय पीत्वाब्धिनाधिकच्छवे । (?)

विश्वं लीलायितं यस्य वेदोऽपि बिरुदावलिः ।

श्रीमत्यादिमदम्पत्योर्विलासवसुधाधरे ॥

परानन्दपरीवाहहारीणे प्रमथान्विते ।

योगाध्वर्यवमूर्धन्यनिरन्तरगुहान्तरे ॥

623

Sl. No : 18809 शिलातलक्षेत्रमाहात्म्यम् Ms. No : P. 5012/2

Beginning :

ऋषयः —

सूत सूत दयासिन्धो मुनिवर्य नमोऽस्तु ते ।
श्रोतुकामा वयं त्वत्तः पुनः × च्छ सादरम् ॥
कावेर्याः पार्श्वयोर्मध्ये क्षेत्राणि विविधानि च ।
ईशविष्ण्वादिदेवाश्च तत्र तत्र × हि ॥

End :

सर्वपापविनिर्मुक्तः इह लोकेऽप्सितान् बहून् ।
भुक्त्वान्ते ते तु मल्लोकं मम प्रीता हि मानवाः ॥
प्राप्य पश्चात्तु वैकुण्ठं विष्णुना सह मोदते ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे उत्तरखण्डे शिलातलक्षेत्रे सोनेश्वरमहिमानुवर्णनं नाम सप्तदशोऽध्यायः ॥

624

Sl. No : 18810 शिवकवचमाहात्म्यम् Ms. No : P. 10611/3

Beginning :

ऋषभ उवाच —

इत्येतत्कवचं शैवं परमं व्याहृतं मया ।
सर्वबाधाप्रशमनं रहस्यं सर्वथा × ॥
यस्सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् ।
न तस्य जायते कापि भयं शम्भोरनुग्रहात् ॥

End :

द्विषन् सहस्रनागानां बलेन महतापि च ।
भस्मधारणसामर्थ्यात् शत्रुसैन्यं विजेष्यसि ॥
प्राप्य सिंहासनं पित्र्यं गोप्तासि पृथिवीमिमाम् ।
इति भद्रायुषं सम्यगनुशास्ति समन्ततः ॥

Colophon :

इति श्री ब्रह्मोत्तरखण्डे शिवकवचमहिमानुवर्णनं नाम द्वादशोऽध्याय ॥

625

Sl. No : 18814 **शिवगङ्गामाहात्म्यम्** Ms. No : P. 6478

Beginning :

सनत्कुमारः —

नन्दीश्वर महाप्राज्ञ सर्वलोकप्रियङ्कर ।
ककुद्गिरेश्च माहात्म्यं बद सर्ववि(शारद)दां वर ॥

नन्दी—

सनत्कुमार साधो त्वं सर्वलोकहिते रतः ।
बुद्धिमानसि योगी त्वं सौख्यदं पृष्टवानसि ॥

Eud :

इति ब्रुवाणः सततं मुक्तिर्हस्तगता तदा ।
इति पुण्यकथां श्रुत्वा शिवभक्तो नरः सकृत् ।
कृतकृत्यो भवत्येव नान्यथा कर्मकोटिभिः ॥

Colophon :

इति श्री स्कन्दपुराणे कल्याणकाण्डे शिवगङ्गामाहात्म्ये पञ्चमोऽध्यायः ॥

626

Sl. No : 18818 **शिवभक्तमाहात्म्यम्** Ms. No : P. 2532

Beginning :

नमश्शिवाय षट्त्रिंशत्तत्त्वातीताय शम्भवे ।
मायाद्वयमुपादाय चिच्छक्त्या सृजतेऽध्वनः ॥
नमस्तस्मै गणेशाय पीत्वाब्धिचनाधिकच्छवे । (?)
विश्वं लीलायितं यस्य वेदोऽपि विरुदावलिः ।
श्रीमत्यादिमदम्पत्योर्विलासवसुधाधरे ॥
परानन्दपरीवाहहारीणे प्रमथान्विते ।
योगाध्वर्यवमूर्धन्यनिरन्तरगुहान्तरे ॥

End :

श्रीलज्ञानकपर्दिप्रचुरित चरिताकर्णने दत्तकर्णं
स्त्वत्पाठेवारसंज्ञः प्रकटितरसना यो भवेत्सावधानः ।
तस्य श्री श्रीरज्ञति श्रूविलनकलितव्यावृतिर्गेहसीम्नः
प्रायः प्राप्तैव मुक्तिस्सततपरिमतानन्दसाम्राज्यलक्ष्मीः ॥

Colophon :

इति शिवभक्तमाहाम्ये उत्तरभागे श्रीलज्ञानिकपर्दिचरितं नाम पञ्चचत्वारिंशोऽध्यायः ॥
इति शिवभक्तिमाहात्म्यं पूर्वमध्यमउत्तरभागं सम्पूर्णम् ॥

627

Sl. No : 18821 शिवभक्तमाहात्म्यम् **Ms. No : P. 4348**

Beginning :

गिरिजाहस्तलिखितचित्रभित्तिविभूषणम् ।
महागणपतिं वन्दे मनोरथसमृद्धये ॥
हरभक्तमुनिप्रोक्तं वक्तुं समुपचक्रमे ॥

सूतः—

साधु पृष्टं मुनिश्रेष्ठाः श्रोतव्यं यद्विशेषतः ।
उपमन्युमुनिप्रोक्तं यथा कैलासपर्वते ॥
श्रुतं यथा गुरुमुखाद्यथा × मभिवदामि ।

End :

तेषां भक्तविलासानां संग्रहोऽयमुदीरिता ।
ये वा भक्तविलासस्य सङ्ग्रहं भक्तिपूर्वकम् ॥
प्रातः काले च मध्याह्ने सायाह्ने च दृढव्रताः ।
पूजापसारे वा शम्भोः संशृण्वन्ति पठन्ति ये ।
तेषां वाञ्छितमिह प्राप्यश्चान्मुक्तिं व्रजति वैः ॥ (?)

Colophon:

इति श्री स्कन्दोपपुराणे शिवभक्तविलासे सङ्ग्रहको नाम द्विशततमोऽध्यायः ॥

628

Sl. No : 18824 शिवमाहात्म्यम् Ms. No: P. 3155/2

Beginning :

गजवदनमचिन्त्यं तीक्ष्णदन्तत्रिणेत्रं
बृहदुदरमशेषं पूतरूपं पुराणम् ।
अमरवरसुपूज्यं रत्नवर्णं सुरेशं
पशुपतिसुतमीशं विघ्नराजं नमामि ॥

ऋषय ऊचुः —
आख्यातं भवता सूत . . . . . .

End :

यः पठेच्छृणुयाद्वै तत् पुराणं शैवमुत्तमम् ।
विधूय सर्वकर्माणि शिवलोके महीयते ॥

Colophon :

इति ब्रह्मोत्तरखण्डे पुराणश्रवणमहिमानुवर्णनं नाम चतुश्चत्वारिंशोऽध्यायः ॥

629

Sl. No : 18826 शिवाचलमाहात्म्यम् Ms. No : P. 3490

Beginning :

पुण्यक्षेत्रे कुरुक्षेत्रे नैमिशारण्यवासिनः ।
मरीच्यत्रिभरद्वाजजाबालिः कश्यपोऽङ्गिराः ॥
नारदो भार्गव × पुलस्त्यः पुलहो महान् ।
ये चान्ये मुनयः सर्वे समवेता × त्सुकाः ॥

End :

तस्माद्गाङ्गेय देशेऽस्मिन् यजन्तु द्विजपुङ्गवाः ।
तपः कुर्वन्तु सुजनाःस्कन्द सायुज्यकांक्षिणः ॥
गाङ्गेयसिद्धिकथामिमां यः
पुमान् पठेद्यः शृणुयात्स एव ।
अनन्तगाङ्गेयसमृद्धिमान् स्या
दन्तेऽपि गङ्गेयपदं प्रयायात् ॥

Colophon:

इति श्री स्कान्दोपपुराणे श्री शिवाचलमाहात्म्ये गाङ्गेयदेशमहिमानुवर्णनं नाम विंशोऽध्यायः

630

Sl. No :18828 शीविक्षेत्रमाहात्म्यम् **Ms. No : P. 4928**

Beginning:

एवं मया निगदितं क्षेत्रमाहात्म्यमुत्तमम्।
इतः परं नित्यकर्म यथाविधि निजाश्रमे ॥
कृत्वा यास्यामि विप्रेन्द्राः युष्माकं महदाश्रमम्।
इच्छध्वं किं पुनः श्रोतुं तदा पृच्छध्वमादरात् ॥

शौनकः—

सूत सूत महाप्राज्ञ सर्वशास्त्रविशारद।
कथां पुण्यतमां तानु श्रोतुमिहामहे वयम् ॥
अथोवाच मुनिस्सूतः × × ।
शीविक्षेत्रस्य माहात्म्यं कीर्तितं ब्रह्मणा पुरा ॥
+ + + वक्ष्यामि सुखहेतवे।
शीविर्नाम मुनिश्रेष्ठः तस्य क्षेत्रं मुनीश्वराः।

End:

सत्यं तेभ्यो नरहरिः सर्वदा सर्वदो भवेत्।
श्रुत्वैतां मुनयस्सर्वे परां प्रीतिमुपागमन् ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे शीविक्षेत्रमाहात्म्ये चतुर्थोऽध्यायः ॥

631

Sl.No : 188829 शुकपुरीमाहात्म्यम् **Ms. No : A. 614/2**

Beginning:

शौनकः—

श्रुतं मया यादवाद्रेर्ज्ञानाश्वत्थस्य वैभवम्।
वदर्याः कल्याणनाम्न्याः पुष्करिण्याश्च वैभवम् ॥

End :

व्यासप्रसादात् श्रुतवान् अहं तीर्थकथादिषु ।
किमन्यच्छ्रोतुकामोऽसि वद शौनक मां प्रति ॥
शुकाश्रमस्य माहात्म्यं पठतां शृण्वतामपि ।
वाजपेयफलं चैव वाजिमेधफलं लभेत् ॥

Colophon :

इति श्री ब्रह्मवैवर्ते उत्तरखण्डे तीर्थक्षेत्रकाण्डे शताधिके शुकाश्रमवर्णनं नाम पञ्चदशोऽध्यायः ॥

632

Sl. No : 18830 शुक्लयजुर्वेदमाहात्म्यम् Ms. No : P. 5033

Beginning :

वरदं द्विरदाद्रीशं श्रीनिधिं करुणाधिम् ।
शर × शरणं यामि प्रणतार्तिहरं हरिम् ॥
अथ स्वयंप्रभातवेदो वासुदेवो ब्रह्मणे दिष्णवे × शुक्लयजुर्वेदसंहितां त्रेधा विभज्यादात् ॥

End :

जलमध्ये त्रिरावृत्य सर्वपापं व्यपोहति ।
जुम्बका नाम गायत्री वेदे वाजसनेयके ।
अन्तर्जले त्रिरावृत्य ब्रह्महत्यां व्यपोहति ॥

Colophon :

इति शुक्लयजुर्वेदमाहात्म्यविधिः ॥

633

Sl. No : 18833 श्रावणमासमाहात्म्यम् Ms. No : C; 118

Beginning :

शौनक उवाच—
सूत सूत महाभाग व्यासशिष्य महामते ।
त्वदीयवदनाम्भोजान्नानाख्यानानि शृण्वताम् ॥

तृप्तिर्न जायते भूयः श्रवणेच्छा प्रवर्धते । + +
धर्मेरीश प्रियत्वाच्च तन्नः कथय साम्प्रतम् ॥

End :

भोजनस्य महादेव कोऽरसो गोरसं विना ।
एतेऽन्येऽपि वरा देया प्रसन्नोऽसि यदि प्रभो ॥
इति नन्दिवचः श्रुत्वा तु हमधि × × ॥

Colophon :

— — —

634

Sl. No : 18834 श्रीनिवाससरोवरमाहात्म्यम् **Ms. No : P. 1998/1**

Beginning :

व्यास नारायण श्रीमन् सर्वर्षिगणपूजित ।
त्रिकालज्ञ दयासिन्धो श्रितानन्दप्रदायक ॥
श्रीवासक्षेत्रसारस्य श्रीनिवाससरस्तयोः ।
उभयोरपि माहात्म्यं चित्रदुर्गे महच्चरे ॥

End :

मार्कण्डेयादिवल्लोके दीर्घायुष्मान् महाप्रभुः ।
राजते राजतेजोभिस्सकुटुम्बी युगे युगे ॥

Colophon :

इति भविष्योत्तरपुराणे श्रीनिवासनृसिंहक्षेत्रश्रीनिवाससरोवरमाहात्म्यं सम्पूर्णम् ॥

635

Sl. No : 18837 श्रीपर्वतमाहात्म्यम् **Ms. No : P. 6476**

Beginning :

रविशशिफणिगङ्गा + + नमामि ॥

ऋषयः —

श्रीमानगस्त्यः सर्वज्ञः संस्थितो दक्षिणां दिशि ।
किमुद्दिश्य कथं सूत संशयं छेत्तुमर्हसि ॥

सूतः —

श्रृण्वन्तु ऋषयस्सर्वे यदागस्त्यो महामुनिः ।

End :

इति सूतसमीरितं सुवाक्यं
प्रवरमुनिप्रवीरा निशम्य हृष्टाः ।
पुनरधिकजगद्गुरुः ककुधिसंज्ञ
कलशजदर्शनात्सिद्धतीर्थसारम् ।।
य इदं श्रृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सर्वपापविनिर्मुक्तो रुद्रलोकं स गच्छति ।।

Colophon :

इति श्री स्कन्दपुराणे तीर्थकाण्डे ईश्वरागस्त्यसंवादे श्रीपर्वतमाहात्म्ये प्रथमोऽध्यायः ।।

636

Sl. No : 18814 शिवगङ्गामाहात्म्यम् Ms. No : P. 6471

Beginning :

पराशरः —

षष्टिर्वर्षसहस्राणि विष्णोराराधनात्परम् ।
सकृद्वैष्णवपूजायाः कलां नार्हन्ति षोडशीम् ।।

शाण्डिल्यः —

गृहे भागवतं प्राप्तं अज्ञानाद्योऽवमन्यते ।
नष्टश्रीको भवेत्सद्यः क्षीणायुःपुण्यसञ्चयः ।।

End :

वैष्णवानां तु यो मर्त्यः पिबेत्पादोदकं सदा ।
क्षयरोगादिकुष्ठान्तं सर्वे नश्यन्ति भारत ।।

पराशरः —

तिस्रः कोट्यर्धकोटी च तीर्थानि भुवनत्रये ।
वैष्णवांघ्रिजलात्पुण्यं कोटिभागेन नो समम् ।।

Colophon :

— — —

637

Sl. No : 18840 **श्रीमुष्णमाहात्म्यम्** Ms. No : C. 3039

Beginning :

ऋषयः ऊचुः—

सूत सूत महाप्राज्ञ पुराणर्षे महामते ।
कलौ कलुषचित्तानां कथं स्याद्गतिरुत्तमा ॥
अल्पायासेन मर्त्यानां वद नो वदतां वर ।

सूतः—

अयमेव पुरा प्रश्नः भरद्वाजेन धीमता ।
अङ्गिरा ब्रह्मपुत्रस्तु पृष्टस्तेन समीरितः ॥

End :

ततः प्रातः समुत्थाय शिष्यसङ्घनिषेवितः ।
श्रीमुष्णे शतशस्तत्वा ययौ तद्धाम वैष्णवम् ॥

सूतः—

शृणुध्वं मुनयस्सर्वे कृष्णद्वैपायनात्पुरा ।
निरूपितं भवद्भ्यस्तु सर्वपापहरं शुभम् ॥

Colophon :

इति श्रीनारदीयपुराणे श्रीमुष्णमाहात्म्ये द्वादशोऽध्यायः ॥

638

Sl.No : 18864 **श्रीरङ्गमाहात्म्यम्** Ms. No : P. 2064/2

Beginning :

नारदः—

देवदेव विरूपाक्ष श्रुतं सर्वं मयाऽधुना ।
त्रैलोक्यान्तर्गतं वृत्तं त्वन्मुखाम्भोजनिःसृतम् ॥
प्रस्तुतं रङ्गमित्युक्त्वा विष्णोरायतनं महत् ।
तस्याहं श्रोतुमिच्छामि विस्तरेण महेश्वर ॥
माहात्म्यमघनाशाय पुण्यस्य च विवृद्धये ॥

End :

प्रदक्षिणं यः कुरुते × ऽपि वा नरः ।
विभूतियुग्मं दत्त्वापि तस्मै तृप्तिर्न मे भवेत् ।।
इति लक्ष्म्या जगन्नाथः रहस्यं धर्ममादिशत् ।
तस्मात् श्रेयोऽर्थिभिः पुत्र कुर्यात् रङ्गप्रदक्षिणम् ।।

Colophon :

इति ब्रह्माण्डपुराणे महेश्वरनारदसंवादे श्रीरङ्गमाहात्म्ये(ब्रह्मसनत्कुमारसंवादे) श्रीरङ्गविमानप्रदक्षिणवैभवं नाम नवमोऽध्यायः ।।

639

Sl. No : 18845 | श्रीरङ्गमाहात्म्यम् | Ms. No : C. 2818

Beginning:

व्यासाय विष्णुरूपाय + नमोनमः ।।
मुनयो नैमिषारण्ये सत्रं द्वादशवार्षिकम् ।
समाहिता महात्मानः ब्रह्मण्याहितचेतसः ।।
तत्रान्येऽपि च गच्छन्ति दिग्भ्योऽपि च तपस्विनः ।
हिमालये च ये चान्ये विन्ध्यपर्वतवासिनः ।।

End :

ज्वरार्तस्याभितप्तस्य जीर्णस्य च गतायुषः ।
आख्यानश्रवणात् सद्यः तच्छान्तिच्छादनाहत ।। (?)
नारी सूतिपरिक्लिष्टा श्रवणाच्च द्विजोत्तम ।
नीरुजा वाथ सहसा सूयते चाचिरात् सुतम् ।।

Colophon :

इति श्रीगारुडपुराणे श्रीरङ्गमाहात्म्ये द्विशततमोऽध्यायः ।।

640

Sl. No : 18857 | श्रीशैलमाहात्म्यम् | Ms. No : P. 5086

Beginning :

अथ तद्वचनास्वादप्रमादोद्बुद्धमानसः ।
सनत्कुमारः प्राहेति ब्रह्ममानसनन्दनः ।।

सनत्कुमार उवाच—

शृणु शक्तिमुनेः पौत्र त्रिणेत्रचरितं शुभम् ।
धर्म्यं यशस्यमायुष्यं पवित्रं श्रुतिसम्मतम् ॥

End :

द्विविधं नियमात् सम्यक् कुर्वतामिष्टसिद्धिदम् ।
पद्मप्रदक्षिणं पुण्यं पुण्यं पद्मप्रदक्षिणम् ॥
प्रसङ्गतः समायातं विष्णोस्तस्य महात्मनः ।
रामै × × विजयप्रदम् ॥
एतद्गुह्यतमं पवित्रमनघं संसेवतां सिद्धिदम् ।

Colophon :

इति स्कान्दमहापुराणे सनत्कुमारसंहितायां श्रीशैलखण्डे × महेश्वर संवादे उत्तरखण्डे पुराणश्रवणफलकथनं नाम चतुष्षष्टितमोऽध्यायः ॥

641

Sl. No : 18858 **श्रीशैलदक्षिणद्वारमाहात्म्यम्** Ms. No: C.266

Beginning :

सूतः—

पुरा तु जाह्नवीतीरे ब्रह्मा मानससम्भवम् ।
सनत्कुमारं योगीन्द्रं सिद्धयोगिप्रसेवितम् ॥
महासिद्धाश्रमे रम्ये देशे कुञ्जगुहान्तरे ।
श्रीशैलं राजते पद्मपुष्पकर्णिककूपवत् ।
दर्शनात्पापनिर्मुक्त स्मरणात्सर्वसिद्धिदम् ॥

End :

इदं दिव्यं शुभाख्यानं चित्रे युक्तेन संसमः । (?)
यत्र शृण्वन्ति गायन्ति तस्य पापानि नश्यति ॥
आयुरारोग्यमैश्वर्यं पुत्रपौत्रप्रवर्धनम् ।
राज्यलाभं शुभं सौख्यं विष्णुसायुज्यमाप्नुयात् ॥

Colophon :

इति श्रीस्कान्दे पुराणे श्रीपर्वतखण्डे शिवाशिवरहस्ये व्याससनत्कुमार संवादे श्रीशैलदक्षिणद्वारस्थलकल्पे पञ्चमार्गस्थितदेवसंदर्शनजपपूजाहोम माहात्म्यनिरूपणं नाम पञ्चमोऽध्यायः ॥

642

Sl. No : 18859 श्वेताद्रिमाहात्म्यम् Ms No : P. 6907/1

Beginning :

पुरा तु नैमिशारण्ये ऋषयः संशितव्रताः ।
वसिष्ठो गौतमश्चाथ जाबालिरथ काश्यपः ॥
जमदग्निर्भरद्वाजः पौलस्त्यो भगवानृषिः ।
नैमिशो गौतमश्चैव कण्वोऽत्रिर्भृगुरेव च ॥

End :

यः पठेच्छृणुयाद्वापि भक्तियुक्तेन चेतसा ।
इह लोके सुखी भूत्वा देहान्ते मोक्षमाप्नुयात् ॥
एतत् श्रुत्वा महाभागा मुनयो ब्रह्मवादिनः ।
शौनकं पूजयन्ति स्म श्लाघयन्तः परस्परम् ॥

Colophon :

इति ब्रह्माण्डपुराणे तीर्थप्रशंसाखण्डे श्वेताचलमाहात्म्ये पञ्चमोऽध्यायः ॥

643

Sl. No : 18861 षडक्षरीमाहात्म्यम् Ms. No : C. 2517/7

Beginning :

सूत उवाच —

षडक्षरं प्रवक्ष्यामि समासेन सुशोभनम् ।
येन संसारविच्छित्तिः ब्रह्मेन्द्रादिविभूतयः ॥
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्रं छन्द उच्यते ।
देवताऽस्य शिवस्साक्षात् सत्यज्ञानसुखाद्वयः ॥

End :

तस्मात्सर्वं परित्यज्य षडक्षरपरो भवेत्
षडक्षरेण सर्वाणि सिध्यन्त्येव न संशयः ॥

Colophon :

इति श्री स्कन्दपुराणे सूतसंहितयां पञ्चाक्षरविरणं नामाष्टमोऽध्यायः ॥

644

Sl. No : 18863 **सत्यपुरीमाहात्म्यम्** **Ms. No : P. 5012/1**

Beginning :

मुनयः—

सूत सूत महाभाग दयालो तव दर्शनात् ।
कृतार्थोऽस्मि सदा शंभोः क्षेत्रमाहात्म्यमुत्तमम् ॥
उपदिष्टं पुनस्तत्र ब्रह्मणे किमु तेन वै ।
सनन्दनेन देवेन तद्वक्तव्यं मुनीश्वराः ॥

End :

अभीष्टार्थप्र × × नित्यं भक्तिसमन्वितः ।
वन्ध्याया × × लोके वाञ्छितार्थफलप्रदम् ॥
ये पठन्तीममध्यायं शृण्वन्ति श्रद्धयान्विताः ।
तस्य × × द्धयायुक्तः विष्णुसायुज्यमाप्नुयात् ॥

Colophon :

इति श्री स्कन्दपुराणे उत्तरखण्डे सनत्कुमारसंहितायां सत्य[पुरी]क्षेत्रे गदाधरमहिमानुवर्णनं नाम अष्टमोऽध्यायः ॥

645

Sl. No : 18715 **विरूपाक्षमहोदयः** **Ms. No : C. 1979/1**

Beginning :

मार्कण्डेयपुराणे सनत्कुमारः —

भगवन् ब्रूहि सकलान् भक्तान् पारिषदेश्वर ।
भक्तेषु वर्तमानेषु शठकोप इति श्रुतः ॥
मुनिः प्रोक्तस्त्वया देव श्रतपूर्वो मयानघ ।
तस्यानुभावं भगवन् अशेषं वक्तुमर्हसि ॥

End :

तस्मात् शुभाशुभे विप्र विशेषेण तु वैदिकम् ।
सहस्रशाखाध्ययनं धारयेद्द्विजपुङ्गवैः ॥
अध्येयं तु द्विजश्रेष्ठ वेद्यं वेदमिदं तथा ।
स्त्रीभिश्शूद्रादिभिश्चैव तेषां मुक्तिः करे स्थिता ॥

Colophon :

इति ब्रह्माण्डपुराणे उत्तरखण्डे सहस्रशाखागीतामाहात्म्यं नाम षोडशोऽध्यायः ॥

646

Sl. No : 18868 सालग्रमार्चनमाहात्म्यम् **Ms. No : B. 545/3**

Beginning :

सालिग्रामशिलापूजारतानां किं महाध्वरैः ।
सालिग्रामशिलापूजारहितानां किमध्वरैः ॥
सालिग्रमशिलाचक्रं यो दद्याद्दानमुत्तमम् ।
भूचक्रं तेन दत्तं स्यात् सशैलवनकाननम् ॥

End :

यः श्राद्धं कुरुते विप्रः सालिग्रामशिलाग्रतः ।
पितॄणां तस्य तृप्तिः स्या१ गयाश्राद्धशताधिकम् ॥
स्तोत्रं हुतं दत्तं अर्चनं च क्रिया × ।
साळग्रामार्चने हीने तत्सर्वं निष्फलं भवेत् ॥

Colophon :

— — —

647

Sl. No : 18869 सिन्धुमाहात्म्यम् **Ms. No : C. 1956**

Beginnig :

शौनक उवाच —
नैमिषेऽनिमिषक्षेत्रे मुनयः शौनकादयः ॥
सूतं पप्रच्छ ते सर्वे तीर्थानां स्नानजं विधिम् ॥

शौनक उवाच—

भो सूत त्वत्प्रसादेन नानातीर्थफलं श्रुतम् ।
तथापि श्रोतुमिच्छामि विशेषात्तीर्थमुत्तमम् ॥

End:

सिन्धुनाथस्य माहात्म्यं भवतां परिभाषितम् ।
यत् श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥
अपुत्राः पुत्रिणः सन्तु पौत्रिणः सन्तु पौत्रिणः ।
अधनाः सधनाः सन्तु जीवन्तु शरदां शतम् ॥

Colophon:

इति भविष्यपुराणे नारदविष्णुसंवादे सिन्धुमाहात्म्यम् ॥

648

Sl. No: 18874 **सीमन्तिनीप्रभावः** **Ms. No: B. 832**

Beginning:

ऋषय ऊचुः—

साधु साधु महाप्राज्ञ त्वया कथितमुत्तमम् ।
आख्यानं पुनरन्यच्च विचित्रं वक्तुमर्हसि ॥

सूत उवाच —

विदर्भविषये पूर्वमासीदेको द्विजोमत्तः ।
वेदमित्र इति ख्यातः वेदशास्त्रार्थविंत्सुधीः ॥

End:

इत्येतच्छिवभक्तायाः सीमन्तिन्या नृपस्त्रियः ।
प्रभावः कथितः शम्भोः माहात्म्यमपि वर्णितम् ।
भूयोऽपि शिवभक्तानां प्रभावं विस्मयावहम ।
सम्यक् संवर्णयिष्यामि श्रोतृणां मङ्गलालयम् ॥

Colophon:

इति श्री स्कन्दपुराणे ब्रह्मोत्तरखण्डे सीमन्तिन्याः प्रभावकथनं नाम नवमोऽध्यायः ॥

649

Sl. No :18879 **सेतुमाहात्म्यम्** Ms. No : P. 364/5

Beginning :

विनायकमहं वन्दे विघ्नतूलविभावसुम् ।
विनायकं तथा शंभुं विश्वरक्षणतत्परम् ॥
नैमिशारण्यनिलयाः मुनयः शौनकादयः ।
अष्टांगयोगनिरताः जपयज्ञैकतत्पराः ॥

End :

अनुज्ञाप्य मुनीन् सर्वान् कैलासं पर्वतं ययौ ।
ऋषयो नैमिशारण्यनिलयास्तुष्टिमागताः ॥
प्रत्यहं सेतुमाहात्म्यं शृण्वन्ति च पठन्ति ॥

Colophon :

इति स्कन्दपुराणे सेतुमाहात्म्ये सेतुमाहात्म्यफलश्रुतिर्नाम द्विपञ्चाशो ऽध्यायः ॥

650

Sl. No : 18888 **सौभरिक्षेत्रमाहात्म्यम्** Ms. No : P. 8995/4

Beginning :

सूतमेकान्तमासीनं नैमिशारण्यवासिनः ।
मुनयो दीर्घसत्रान्तो व्यासशिष्यं तपोनिधिम् ॥
भस्मोद्धूलितसर्वाङ्गं जटामण्डलमण्डितम् ।
पञ्चवक्त्रमुदाराङ्गं शुद्धस्फटिकसन्निभम् ॥

End :

एवं विप्रं समादिश्य लिङ्गे चान्तर्दधे शिवः ।
सौभरिस्तु वरं लब्ध्वा स्त्रीभिः साकं द्विजोत्तमाः ।
सर्वपापविनिर्मुक्तः सर्वसौख्यमवाप च ॥

Colophon :

— — —

651

Sl. No : 18889 **स्तम्भोदधिमाहात्म्यम्** **Ms. No : A. 614/1**

Beginning:

श्री शौनकः —

शान्तं सर्वं मया सूत नारायणकथामृतम् ।
बिभ्रतःश्रोत्रचुलकैस्तृप्तिर्नाद्यापि मेऽभवत् ॥
यस्त्वया कथितं विप्र × र्यायाः प्रसङ्गतः ॥
अर्कावत्यास्समीपे तु नारसिंह्मस्थलं महत् ॥

Eud :

× × × ऋषिणा कृतम् ।
यश्शृणोति च सद्विप्रान् सर्वकामानवाप्नुयात् ॥
स्तम्भाच्छिरिति विख्यातं स्थलं वै ब्रह्मनिर्मितम् ।
अनन्तपुण्यदं लोके स्थलानामपि चोत्तमम् ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे रुद्रनारदसंवादे स्तम्भोदधिमाहात्म्ये सुमतिपूजा विधिर्नाम षड्विंशोत्तरशततमोऽध्यायः ॥

652

Sl. No : 18892 **स्वर्णनदीमाहात्म्यम्** **Ms. No : C. 2291**

Beginning :

श्री सूतः —

शृणुध्वमृषयस्सर्वे माहात्म्यं जगदीशितुः ।
शरीरस्य च माहात्म्यं तथा नीलगिरेश्शुभम् ॥
मारीचस्य च माहात्म्यं शापमोक्षं सुरद्विषः ।
नदीनां चैव माहात्म्यं शिवविष्ण्वोर्विशेषतः ॥

End :

फलं ब्रह्माथ रुद्रो वा विष्णुर्वा वक्तुमक्षमः ।
यं यं कामयते मर्त्यः तं तमाप्नोत्यसंशयः ॥

उक्तवाक्यं समाकर्ण्य सर्वे ते ऋषयस्सुखम् ।
स्वाश्रमं प्रतिजग्मुस्ते सोऽपि × श्रममेयिवान् ॥

Colophon :

इति श्रीस्कान्दे पुराणे तीर्थवैभवखण्डे नीलाचलमाहात्म्ये पुराणश्रवणपठनफलवर्णनं नाम द्वादशोऽध्यायः ॥

653

Sl. No : 18893 स्वर्णनदीमाहात्म्यम् Ms. No : P. 2818/6

Beginning :

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अफाललोचनश्शम्भुः भगवान् बादरायणः ॥
सूतं सुखासनासीनं नैमिशारण्यवासिनः ।
ऋषयो दीर्घसत्रान्ते पप्रच्छुर्नैमादृताः ॥

End :

हनुमत्तीर्थसदृशं तीर्थं भुवि न दिवि ।
इत्येवमाख्यानमिदं महात्मा
मुनीश्वराणां श्रवणोत्सुकानाम् ।
माहात्म्यमाश्चर्यकरं हनूम-
त्तीर्थस्य सर्वं निजगाद सूतः ॥

Colophon :

इत्यादिमहापुराणे स्कान्दे शतसाहस्रिकायामीशानसंहितायां उपरिभागे हनुमत्तीर्थमाहात्म्ये दशमोऽध्यायः ॥

654

Sl. No : 18894 हनुमत्तीर्थमाहात्म्यम् Ms. No : C. 2244

Beginning :

श्री × × उवाच —
कलौ कलुषचित्तानां पापिनां च दुरात्मनाम् ।
कर्मणा अदयमानानां × × कमलोद्भव ॥

पञ्चाशत्कोटिविस्तीर्णभूमौ सन्ति ह्यनेकशः ।
× × × मोक्षंविन्धन्ति मानवाः ॥

End :

कौण्डिन्यायन × महामलौ ।
× × नुकथां सुसादरम् ।
स्नानं म × वसु तस्य दर्शनं
त्रयं हि लोकेऽपि सुदुस्तरं महत् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे हनुमदाख्याने त्रयोदशोऽध्यायः ॥

655

Sl. No : 18895 **हरतीर्थमाहात्म्यम्** **Ms. No : P. 4079**

Beginning :

ऐश्वरं परमं तन्त्रमादिमध्यान्तवर्जितम् ।
आधारं सर्वभूतानां अनाधारमविक्रियम् ॥
अनन्तानन्दबोधाम्बुनिधिमद्भुतविग्रहम् ।
अम्बिकापतिमीशानं अनीशं प्रणमाम्यहम् ॥
पुरा कदाचिन्मुनयः नैमिशारण्यवासिनः ।
सत्रावसानसमये समवेता स्थिता बुधाः ॥

End :

स पश्चाद्बहुरत्नानि धान्यानि विविधानि च ।
धनानि कोटिसंख्यानि ब्राह्मणेभ्यो ददौ मुदा ।
ततः परं नामकर्म × कान्ते चकार सः ॥
नाम्ना स्वं हरदत्तेति नामकर्म तथाऽकरोत् ।
चतुर्थे निष्क्रमणं × × × ॥

Colophon :

इति ब्रह्माण्डे पुराणे ब्रह्मनारदसंवादे श्री हरतीर्थमाहात्म्ये शेषपूज विधानं नाम एकादशोऽध्यायः ॥

656

Sl. No : 18897 हरदत्तमाहात्म्यम् Ms. No : B. 131

Beginning :

उपमन्युः—

पुरा कैलासविचरन् सृष्टिसामर्थ्यमात्मभूः ।
आत्मनो चेष्टसिद्ध्यर्थं त × निर्विण्णमानसः ॥
एतस्मिन्समये द्वैवाद भूदाकाशभारती । (?)
भूतलेऽस्ति महत्क्षेत्रं पावनं सह्यजातटे ॥

End :

इति भक्तवर्यहरदत्तसन्मुनेः
चरितं समस्तदुरितौघभञ्जनम् ।
शृणुयात्पठेत विमलाशयस्सः
शिवरूपमेति शिवभक्तिमान्तरम् ॥

Colophon:

इति भविष्योत्तरपुराणे हरदत्ताचार्यचरिते शिवभक्तमाहात्म्ये द्वादशो ऽध्यायः ॥

657

Sl. No : 18901 हस्तिगिरिमाहात्म्यम् Ms. No : P. 1453

Beginning :

भृगुरुवाच —

भगवन् मुनिशार्दूल वर्णाश्रमसमाश्रयाः ।
आख्याता बहवो धर्मा भवता मे सनातनाः ॥
उत्पत्तिः कथिता धातुः विष्णुनाभिसरोरुहात् ।
देवतिर्यङ्नराणां च सम्भवः कथितः तथा ॥

End :

सालोक्यं तस्य दत्वाथ ययौ हस्तिगिरिं प्रति ।
निरुक्तगजरूपं च महाशान्तं तपोधनन् ॥
दिव्यरूपधरं शान्तं आरोप्य गरुडोपरि ।
माहात्म्यं विष्णुभक्तानां सर्वं × × ॥

Colophon :

इति श्रीब्राह्मे पुराणे भृगुनारदसंवादे श्रीहस्तिगिरिमाहात्म्ये मृकण्डुगजेन्द्र संवादो नामा चतुर्दशोऽध्यायः ॥

658

Sl. No : 18905 हस्तिगिरिमाहात्म्यम् **Ms. No : P. 5425**

Beginning :

श्रीमद्रहस्यजालानां सम्प्रदायप्रवर्तकान् ।
नमस्यामि गुरून् सर्वान् आरम्भेऽभीष्टसिद्धये ॥
सकललोकहिततमविषयविविधवेदान्तोपबृंहणसत्यव्रतक्षेत्रमाहात्म्य—

End :

कविकथकपञ्चवक्त्रः त्रैय्यन्तगुरुस्त्रिलोकमहनीयम् ।
सत्यव्रतक्षेत्रमाहात्म्यं व्यतनुत ल × × वितमिति वेङ्कटेशकविः ॥

Colophon :

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सत्यव्रतक्षेत्रमाहात्म्यं सम्पूर्णम् ॥

659

Sl. No : 18910 हाटकेश्वरमाहात्म्यम् **Ms. No : P. 3634**

Beginning :

× × × × तनूतत ॥
तेषां तद्वचनं श्रुत्वा भगवान् वृषभध्वजः ।
प्रोवाच प्रणतान् सर्वान् तान् देवान् कृपयाऽन्वितः ॥
मया योगार्तियुक्तेन स्वरसक्तम × × ।

End :

यस्त्वेतच्छृणुयाद्भक्त्या चतुर्दश्यां समाहितः ।
तथाष्टम्यां विशेषेण प्राप्नोति परमां गतिम् ॥

Colophon:

इवि स्कान्दे महापुराणे सनत्कुमारसंहितायां तृतीयपरिच्छेदे नागरखण्डे हाटकेश्वरमाहात्म्ये अम्बापादुकामाहात्म्यं नाम एकोननवतितमोऽध्यायः ॥
नगरपूर्वखण्डः समाप्तः ॥

660

Sl. No : 18916 **हालास्यमाहात्म्यम्** Ms. No : P. 3979

Beginning :

श्री कैलास इति ख्यातः श्रीमतां भूभृतां वरः ।
श्रीदादीनामपि श्रीदः श्रीकण्ठप्रथितालयः ॥
श्रियोऽपि हेतोः क्षीराब्धेः श्रियं जित्वा समुन्नतः ।
जनानां श्रवणादेव जन्ममृत्युभयापहः ॥

End :

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः स्वर्गमवाप्नोतु सर्वस्य भवतां शिवम् ॥
एवं संप्रार्थ्य सर्वज्ञः सूतः सर्वान् मुनीश्वरान् ।
कृपावृष्ट्यानुगृह्याथ शिवध्यानपरोऽभवत् ॥

Colophon :

इति स्कान्दे महापुराणे अगस्त्यसंहितायां श्रीहालास्यमाहात्म्ये द्विसप्तति
तमोऽध्यायः ॥

661

Sl. No : 18922 **हिमकेदारगौरीव्रतमाहात्म्यम्** Ms. No : C. 4680

Beginning :

युधिष्ठिर उवाच—
धर्मा बहुविधाः प्रोक्ताः इह मुक्तिफलप्रदाः ।
इदानीं श्रोतुमिच्छामि वद कृष्ण व्रतं मम ॥

End :

वचः श्रुत्वा शिवस्यास्य व्रतमाचरिताशिवः ।
प्रसन्नो यदि देवेश ममाभीष्टफलप्रद ।
किन्तदिच्छसि देवेशि तद्ददामि तव प्रिये ॥
देहि शङ्कर देहार्धं भुक्तभोगान् य ॥

Colophon :

— — —

662

Sl. No : 18923 **हेमावतीमाहात्म्यम्** **Ms. No : P. 5135**

Beginning :

× × × आसनसंस्थिता: ।
शृण्वन्ति मत्कथां तेवै भवन्त्यर्जुनपादपाः ।।
आसंप्रणम्य शृण्वन्ति × वृद्धा भवन्ति ते ।
तथा शयाना: शृण्वन्त: भवन्त्यजगरा हि ते ।।
य: शृणोति कथां वक्तु: समानासनसंस्थित: ।।

End :

वैष्णवीभक्तवाराशिमग्न आनन्दसागरे ।।
हृष्टो मुनीन्द्रानतिशुद्धमानसान्
प्रोवाच सूत: परमार्थतत्त्ववित् ।
हेमावतीपुण्यकथां सुरम्यां
वक्तुं प्रचक्रे मनसातिहृष्ट: ।।

Colophon :

इति श्रीस्कन्दे पुराणे सह्याद्रिखण्डे सनत्कुमारसंहितायां हेमावत्युद्भवप्रश्न कथा × × × (द्वादशोऽध्याय:) ।।

663

Sl. No : 18925 अवधूतगीता Ms. No : B. 712

Beginning :

अस्य श्री अवधूतगीतास्तोत्रमन्त्रस्य अवधूत ऋषिः । अनुष्टुबादिनानाविधानि च्छन्दांसि । श्रीभगवान् निरञ्जनो देवता । × × बीजम् । क्रौं शक्तिः । दत्तात्रेय तिलकम् ॥

End :

विन्दति विन्दति न हि न हि मन्त्रं
न हि न हि छन्दोलक्षणतन्त्रम् ।
समरसमार्गे भावितपूतः
प्रलपितमेतत्कथवधूतः ॥

इति श्रीस्वात्मसंवित्युपदेशप्रकरणविषयवैराग्यवर्णनं नाम नवमोऽध्यायः ॥

Colophon :

— — —

664

Sl. No : 18927 अष्टावक्रगीता Ms. No : B. 692

Beginning :

मुक्तिमिच्छसि चेत्तात विषयान्विषवस्त्यज ।
क्षमार्जवदयाशौचं सत्यं पीयूषवद्भज ॥
न पृथ्वी न जलं नाग्निर्नवायुर्द्यौर्न वा भवान् ।
तेषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये ॥

End :

अष्टकं आत्मविश्रान्तौ जीवन्मुक्तौ चतुर्दश ।
षट् संख्या क्रमविज्ञाने ग्रन्थैकात्म्यमतः परम् ॥
विंशत्येकमतैः खण्डे श्लोकैरात्माग्निमध्यकैः ।
अवधूतानुभूतैश्च श्लोकास्संख्याः क्रमादमी ॥

Colophon :

इत्यष्टावक्रगीतायां विंशतिप्रकरणं समाप्तम् ॥

665

Sl. No : 18929 अष्टावक्रगीताव्याख्या Ms. No: C. 1049/2

Beginning :

सच्चिदानन्दमद्वैतं सर्वाधिष्ठानमद्भुतम् ।
नत्वाऽष्टवक्रसूक्तस्य दीपिका तन्यते परा ॥

इह खलु ज्ञानविज्ञानसम्पन्नः परमकारुणिकोऽष्टावक्रमुनिः मुक्तिकामनया समुपेतं + + + मुपादिशति ॥

End :

अवधूतानुभूतिरूपो ग्रन्थस्तस्य संख्याक्रमो विद्यते येषु संख्याक्रमादीदृशाः श्लोकाद्यमी कथिता इत्यर्थः ॥

Colophon :

इति श्रीमद्विश्वेश्वरविरचितायां अष्टावक्रटीका समाप्ता ॥

666

Sl. No : 18930 ईश्वरगीता Ms. No : P. 2314/3

Beginning :

ऋषयः उचुः —

भवता कथितं सम्यक् सर्गः स्वायम्भुवश्शुभः ।
ब्रह्माण्डस्यास्य विस्तारो मन्वन्तरविनिश्चयः ॥
तत्रेश्वरः परो देवो वर्णिभिर्धर्मतत्परैः ।
ज्ञानयोगरतैर्नित्यमाराध्यः कथितस्त्वया ॥

End :

य इमं पठते नित्यं संवादं कृत्तिवाससः ।
सनत्कुमारप्रमुखैः सर्वपापैः प्रमुच्यते ॥
परात्परतरं गुह्यं ईश्वरेणाभिभाषितम् ।
योऽपि भाषयते सम्यक् स याति परमां गतिम् ॥

Colophon :

इति श्रीकूर्मपुराणे उत्तरभागे ईश्वरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे सर्वो द्वादशोऽध्यायः ॥

667

Sl. No : 18931 | उत्तरगीता | Ms. No : P. 59/1

Beginning :

अर्जुन उवाच —

उत्पत्तिस्थितिनाशानां कारणाय महात्मने ।
जगदीशाय वै तुभ्यं सर्वज्ञाय नमो नमः ॥
विश्वं केन समुद्भूतं विश्वं केन स्थितं महत् ।
विश्वं केन लयं याति विश्वेशः केन संभवः ॥

End :

ज्ञानिनो मुमुक्षवः सम्यक् सकृदेव पठन्ति शृण्वन्ति × × ×
तत्वं च मां च गच्छन्तीति वेत्थ त्वमर्जुन इति ।।

Colophon :

इति श्रीमहाभागते कृष्णार्जुनसंवादे श्रीमदुत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे सकलशास्त्रोपनिषत्सारभूते श्रीमद्विश्वोत्पत्तिवेदान्ते ज्ञानप्रदीपिकोपनिषन्नाम चतुर्थपञ्चमषट्सप्तमाष्टमनवमोऽध्यायः ।।

668

Sl.No : 18957 | उत्तरगीताव्याख्या | Ms. No : P. 447/3

Beginning :

अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥

इह खलु भगवन्तं अर्जुनः धर्मक्षेत्रे कुरुक्षेत्रे भगवदुपदिष्टमात्मतत्त्वोपदेशं विषयभोगप्रावण्येन विस्मृत्य पुनः तदेवात्मतत्त्वं ज्ञातुं भगवन्तं पृच्छत्यर्जुनः ।

End :

आगामिवस्तुनिरपेक्षत्वे सिद्धे वर्तमानवस्तुनि लब्धे हर्षराहित्ये सिद्धे च पुनर्जन्म न विद्यत इत्यर्थः ।

आत्मयोगमवोचद्यो भक्तियोगशिरोमणिम ।
तं वन्दे परमानन्दं नन्दनन्दनमीश्वरम् ॥

Colophon :

इति श्री गौडपादाचार्यविरचितायां उत्तरगीताव्याख्यायां तृतीयोऽध्यायः ॥

669

Sl. No : 18973 — उत्तरगीतासारः — Ms. No : B. 1001

Beginning :

अर्जुन उवाच —
वेदादिमूलं सकलस्वराणां
त्रयोदशस्थं शशिबिन्दुरूपम् ।
वेदान्तिगतं सूत्रभुजङ्गरूपं
त्रिरत्नमूलं पुरुषं नमामि ॥

End :

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥
स्वाभ्यां तु सुलभा भो) ह्यात्मा नाभ्यामुपरि तिष्ठति ।
द्वाभ्यां त्रिभिश्चतुर्भिश्च पञ्चभिः पंक्तिभिर्जगदिति ॥

Colophon :

इति श्रीमहाभारते शतसाहस्रसंहितायां वैयासिक्यां श्रीभीष्मपर्वणि श्रीम-
दुत्तरगीतासारेषूपनिषत्सु परब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
गीतासारयोगो नाम द्वाविंशोऽध्यायः ॥

670

Sl. No : 18974 — ऋभुगीता — Ms. No : P. 2062

Beginning :

गुरुं गणपतिं दुर्गां + विभूतये ॥
ओं चैतन्यमात्रं ब्रह्मैव आत्मा केवलमद्वयः ।
परानन्दस्वरूपैव अखण्डैकरसः परम् ॥
पुरा सर्वे ब्रह्मनिष्ठाः कदाचिन्मिलिताः पराः ॥
सनत्कुमारमागत्य पप्रच्छुः ज्ञानमुत्तमम् ॥

End:

सारात्सारतरं सारं सारात्सारतरं महत् ।
एतद्ग्रन्थस्य न समं त्रैलोक्येऽपि च दुर्लभम् ॥

न प्रसिद्धिं गतो लोके न स्वर्गेऽपि च दुर्लभम् ।
ब्रह्मलोकेऽपि वेदेषु शास्त्रेष्वपि सुदुर्लभम् ॥

Colophon :

इति श्री ऋभुगीतायां अन्तिमं त्रिचत्वारिंशत्प्रकरणं समाप्तम् ॥

671

Sl. No : 18977 कपिलगीता Ms. No : C. 788

Beginning :

नत्वा श्री गुरुपादाब्जं स्मृत्वा मोक्षार्थसिद्धिदम् ।
तारकाभ्यन्तरे पञ्चब्रह्मतत्वं तदुच्येत ॥
पञ्चब्रह्मपञ्चदेवपञ्चस्थानेषु पञ्चधा ।
पञ्चमातृका पञ्चवाचा पञ्चशून्यस्तथैव च ॥

End :

मुहुर्मुहुर्मुखे स्तोत्रं हर्षेण गद्गदस्वरम् ॥
स मुक्तसर्वलोकेन ब्रह्मसायुज्यमाप्नुयात् ।
राजराजेश्वरं योगं सेवामार्गे प्रशस्यते ।
यः पठेद्भक्तियुक्तेन स मुक्तो नात्र संशयः ॥
ऋषिः कपिलसिद्धं च वाक्यममृतबिन्दुवत् ।
प्राशणे मुक्तिप्राप्तं च यतत्चेन न संशयः ॥ (?)

Colophon :

इति श्रीपद्मपुराणे सिद्धान्तसारे कपिलर्षि सिद्धसंवादे राजराजेश्वरयोगकथनं नाम पञ्चमोऽध्यायः ॥

672

Sl. No : 18980 कर्मगीता Ms. No : P. 2190/7

Beginning :

अर्जुन उवाच—

केन पुण्येन × × केन पुण्य ध × वृतः ।
केन वा व भवेत्कृष्ण कथयस्व जनार्दन ॥

श्रीभगवानुवाच —

परदाररतावन्यः परद्रव्यपरिव्रतः ।
परहत्या भवेत्कुष्ठी शृणु त्वं पाण्डुनन्दन ॥

अर्जुनः—

केनैव हेतुं लभते केनेव गजवाजिनः ।
केन पुण्यसुखप्राप्तिः कथयस्व जनार्दन ॥
क्षेत्राणि जीवयोग्यानि समासात्कथयाम्यहम् ।
× × रम्यं केदारं सेतुबन्धनम् ॥
गोकर्णं नैमिशारण्यं × × × ।
शिवमुद्दिश्य यत्किञ्चिद्दत्तं जप्तं हुतं व्रतम् ।
तदनन्तफलं प्रोक्तं सर्वागमविनिश्चितम् ॥

Colophon :

— — —

673

Sl. No : 18981 गर्भगीता **Ms. No : P. 2670/14**

Beginning :

अर्जुन उवाच—

गर्भवासजरामृत्युः किमर्थं भ्रमते नरः ।
किमर्थं रहिते जन्म कथं जीवो निरंजनः ॥

श्री भगवानुवाच—

मानवा मूढ अन्धस्य संसारप्यन्युप्यते । (?)
आशामेकां न जानाति जीवनं धनसंपदम् ।

End :

गीतार्थं गृह्य कृष्णेन ह्यर्जुनस्य निवेदितम् ।
सर्वकर्ममवाप्नोति पठन्ति श्रूयतां नरैः ॥

Colophon :

इति श्रीमन्महाभारते शतसहस्रसंहितायां वैयासिक्यां अश्वमेधपर्वणि गर्भगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे कृष्णार्जुनसवादे ज्ञानयोगो नाम प्रथमोऽध्यायः ॥

674

Sl. No : 18996 गीतासारः Ms. No : P. 892/1

Beginning :

ओं अस्य श्रीगीतासारस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । गायत्री त्रिष्टुप्छन्दः आहवनीयगार्हपत्यदक्षिणाग्नि स्थानानि ॥ × × अर्जुन उवाज —

ओङ्कारस्य च माहात्म्यं रूपं स्थानं परं तथा ।
तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरुषोत्तम ॥

श्रीभगवानुवाच —

साधु पार्थ महाबाहो यन्मां त्वं परिपृच्छसि ।
विस्तरेण प्रवक्ष्यामि तन्मे निगदतः शृणु ॥

End :

भारतोदधिमन्थस्य गीतानिर्मन्थनस्य च ।
सारमुद्धृत्य कृष्णेन अर्जुनस्य मुखे हुतम् ॥
सर्ववेदमयी गीता सर्वशास्त्रमयो मनुः ।
सर्वतीर्थमयी गङ्गा सर्वदेवमयो हरिः ॥
पादं वाप्यर्धपादं वा श्लोकं श्लोकार्धमेव वा ।
नित्यं पाठ्यते विप्रः स मोक्षमधिगच्छति ॥

Colophon :

इति गीतासाराध्यायः समाप्तः ॥

675

Sl. No : 19006 गुरुगीता Ms. No : P. 1716/24

Beginning :

अस्य श्रीगुरुगीतास्तोत्रमहामन्त्रस्य परमशिव ऋषिः विराट्छन्दः ॥
श्रीपरमात्मा देवता — ध्यानम् —

नमामि सद्गुरुं + .सिद्धये ॥

ऋषिरुवाच —

गुह्याद्गुह्यतरा विद्या गुरुगीता विशेषतः ॥

End :

दुर्लभोऽयं गुरुर्देवि शिष्यसन्तापहराकः ।
संसारसागरसमुत्तरणैकमन्त्रं
ब्रह्मादिदेवमुनिपूजितसिद्धमन्त्रम् ।
दारिद्यदुःखभयशोकविनाशमन्त्रं
वन्दे महाभयहरं गुरुराजमन्त्रम् ॥

Colophon :

इति श्रीस्कन्दपुराणे उत्तरखण्डे ईश्वरपार्वतीसंवादे गुरुगीतासम्पूर्णा ।
गुरवे सर्वलोकानां + दक्षिणामूर्तये नमः ॥

676

Sl. No : 19021 **गुरुगीता** **Ms. No : C. 4686/65**

Beginning :

अस्य श्रीगुरुगीतामालामन्त्रस्य । सदाशिव ऋषयः । नानाविधानि छन्दांशि । श्रीगुरुः दैवता । अनुष्टुप्छन्दः । श्रीगुरुब्रह्मप्रीत्यर्थे मम मोक्षार्थे जपे विनियोगः ॥

End :

म म रूपोऽसि देव त्वं त्वद्भक्त्यर्थं वदाम्यहम् ।
लोकोपकारकं पश्य नैकेनापि हृतं पुरा ॥
दुर्लभं त्रिषु लोकेषु त्वं तुष्ट × वदाम्यहम् ।
गुरुब्रह्म विनानन्ते सत्यं × × ॥

Colophon :

— — —

677

Sl. No : 19026 **गोपिकागीता** **Ms. No : P. 6370**

Beginnig :

जयतु तेऽधिकं जन्मना व्रजः
श्रयतु इन्दिरा साधु तत्र हि ।
दतित दृश्यतां दिक्षु तावकाः
त्वयि धृतासवस्त्वां विचिन्वते ॥

End :

यत्ते सुजात चरणाम्बुरुहं स्तनेषु
भीताश्शनैः प्रिय दधीमहि कर्कशेषु ।
तेनाटवीमटति तद्व्यथते न किंस्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥

Colophon :

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे गोपस्त्रीणां विरहोद्गीतवर्णनं नाम एकत्रिंशोऽध्यायः ॥

678

Sl. No : 19032 गोपिकायुगलगीतम् Ms. No : P. 9054/5

Beginning :

श्रीशुकः —
गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः ।
कृष्णलीलाः प्रगायन्त्यः निन्युर्दुःखेन वासरम् ॥

गोप्यः —
वामबाहुकृतवामकपोलो
वल्गितभ्रुरधरार्पितवेणुम् ।
कोमलाङ्गुलीभिराश्रितमार्गं
गोप्य ईरयति यत्र मुकुन्दः ॥

End :

श्रीशुकः —
एवं व्रजस्त्रियोराजन् कृष्णलीलानुगायनीः ।
रेमिरेऽहस्सुतच्चित्ताः तन्मनस्काः महोदयाः ॥

Colophon :

इति गोपिकायुगलगीतम् ॥

679

Sl. No : 19034 देवीगीता Ms. No: P. 2360/1

Beginning :

जनमेजय उवाच —

धराधराधीशमौलौ आविरासीत्परं महः ।
यदुक्तं भवता पूर्वं विस्तरं तद्वदस्व मे ॥
को विरज्येत मतिमान् पिबन् शक्तिकथामृतम् ॥

End :

सर्वमुक्तं समासेन यत् पृष्टं तत्त्वयाऽनघ ।
पवित्रं पावनं दिव्यं किं भूयः श्रोतुमिच्छसि ॥

Colophon :

इति श्रीदेवीभागवते महापुराणे अष्टादशसाहस्रिकायां सप्तमस्कन्धे देवी गीतायां दशमोऽध्यायः ॥

680

Sl.No : 19046 पाण्डवगीता Ms. No : P. 9390/1

Beginning :

महादेव उवाच —

ये मानवा विगतरागपरावरज्ञाः
नारायणं सुरगुरुं सततं स्मरन्ति ।
ध्यानेन तेन हतकिल्बिषचेतनास्ते
मातुः पयोधररसं न पुनः पिबन्ति ॥

\+ \+ \+ \+ \+

भीमसेन उवाच —

जलौघमग्ना सचराचरा धरा
विषाणकोट्याखिलविश्वमूर्तिना ।
समुद्धृता येन वराहरूपिणा
स मे स्वयम्भूर्भगवान् प्रसीदतु ॥

End:

एवं ब्रह्मादयो देवाः ऋषयश्च तपोधनाः ।
पठन्ति प्रातरुत्थाय वैष्णवं स्तवमुत्तमम् ॥
दुस्स्वप्ननाशनं धर्म्यं पाण्डवैः परिकीर्तितम् ।
यः पठेत्प्रातरुत्थाय वैष्णवं पदमश्नुते
कायेन वाचा + नारायणायेति समर्पयामि ॥

Colophon:

इति पाण्डवगीतास्तोत्रं सम्पूर्णम् ॥

681

Sl. No: 19084 प्रणवगीता Ms. No: P. 2360/2

Beginning:

पार्थाय प्रतिपादितां + गीते भवद्वेषिणि ॥
अस्य श्री प्रणवगीतामहामन्त्रस्य — + +
अर्जुन उवाच —
ओंकारस्य माहात्म्यं रूपं स्थानं परंतप ।
तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरुषोत्तम ॥

End:

एतत्पुण्यं पापहरं धन्यं दुस्स्वप्ननाशनम् ।
यः पठेच्छृणुयाद्वाऽपि सर्वपापैः प्रमुच्यते ॥

Colophon:

ओं तत्सदिति प्रणवगीतासूपनिषत्सु परब्रह्मविद्यायां योगशास्त्रे कृष्णार्जुन संवादे सर्वोपनिषत्सारसंग्रहो नाम चतुर्थोऽध्यायः ॥
ध्यानं—
हृदिविकसित + वासुदेवप्रतिष्ठाम् ।
प्रणवगीता समाप्ता ॥

682

Sl. No : 19049 ब्रह्मगीता Ms No : P. 153

Beginning :

मुनयः ऊचुः —

भवता सर्वमाख्यातं संक्षेपाद्विस्तरादपि ।
इदानीं श्रोतुमिच्छामो ब्रह्मगीतामनुत्तमाम् ॥
+ + + + +
यदि प्रसन्नो भगवान् तन्नो वक्तुमिहार्हसि ॥

End :

पुराणसंहितामिमामतिप्रियेण यः पुमान्
शृणोति संसृतिं पुनर्न याति याति शङ्करम् ।
पगानु एतिग्द्बया विजायते च तस्य सा
शिवा च वाचि नृत्यति प्रियेण शङ्करोऽपि च ॥

Colophon :

सूतगीता समाप्ता ॥

683

Sl. No : 19052 ब्रह्मगीता Ms. No : P. 556/1

Beginning :

ऋषय ऊचुः —

भवता सर्वमाख्यातं संक्षेपाद्विस्तरादपि ।
इदानीं श्रोतुमिच्छामो ब्रह्मगीतामनुत्तमाम् ॥
सर्वविज्ञानरत्नानां आकरस्य महात्मनः ।
कृष्णद्वैपायनस्यैव भवांछिष्यः सुशिक्षितः ॥

End :

इति परशिवभक्त्या प्राप्तविद्यस्तु सूतः
सुखतरशिवतत्त्वप्रापिकां देवगीताम् ।
मुनिगणहितबुद्ध्या प्रोच्य निर्वाणबुद्ध्या
परतरमवलोक्य प्रज्ञया मौनमाप ॥

मुनयश्च गुरुं परवेदनं
प्रणिपत्य समस्तहितप्रदम् ।
हृदयस्थमहंपदलक्षितं
परतत्त्वतयैव विदुः स्थितम् ॥

Colophon:

इत्यादिमहापुराणे स्कान्दे सूतसंहितायां यज्ञवैभवखण्डे उपरिभगे ब्रह्म गीतासूपनिषत्सु द्वादशोऽध्यायः ॥

684

Sl. No: 19056 ब्रह्मगीताव्याख्या Ms. No: P. 153

Beginning:

नमः श्री शङ्करानन्दगुरुपादाम्बुजन्मने ।
सविलासमहामोहतमोग्रासैकधर्मिणे ॥

एवमुपनिषदेकसमधिगम्यस्य समस्तोपनिषदर्थस्य साकल्येन प्रतिपादिकां ब्रह्म गीतां वक्तुं मुनीनां प्रश्नमवतारयति ।

End:

वेदपद्मनिकरस्य भास्करम्
देवदेवसदृशं घृणानिधिम् ।
व्यासमिष्टफलदं गुरुं नुमः
शोकमोहविषरोगभेषजम् ॥
ये वेदवेदान्तधना महाजनाः
शिवाभिमानैकनिरस्तकिल्बिषाः ।
नमामि वाचा शिरसा हृदा च तान्
भवाहिवेगस्य निवारकानहम् ॥

Colophon:

इति श्रीमत्काशीविलासक्रियाशक्तिपरमभक्तश्रीमत्त्र्यम्बकपादाब्जसेवापरा यणेन उपनिषन्मार्गप्रवर्तकेन श्रीमाधवाचार्येण विरचितायां सूतसंहितातात्पर्य दीपिकायां यज्ञवैभवखण्डस्य उपरिभागे सूतगीताव्याख्यायां अष्टमोऽध्यायः । सूतगीता समाप्ता ॥

685

Sl. No : 19069 भगवद्गीता Ms. No : P. 1036

Beginning:

अस्य श्रीभगवद्गीतामालामन्त्रस्य वेदव्यासो भगवान् ऋषिः अनुष्टुप् छन्दः । श्रीगोपालकृष्णः परमात्मा देवता ।

धृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

End :

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

Colophon :

इति श्रीमन्महाभारते चतुःसाहस्रिकायां संहितायां वैयासिक्यां भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु परब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षनिर्णयो नामाष्टादशोऽध्यायः ॥

686

Sl. No : 12290 भगवद्गीता Ms. No : P. 9496

Beginning :

× × × × ×
ಗಾತ್ರ, ವಿಕಸಿತ ಲೋಲ ಸರಸಿಜನೇತ್ರ,
ವರಮುನಿಜಾಲ ಸನ್ನುತ ಪಾತ್ರ
ಸರ್ವೇಶ್ವರ ಸುಚಾರಿತ್ರ

End :

ನಲ್ಲೆ ನಾನಿದಯುನ್ನ ಮಃದಲ್ಲಿ
ಫುಲ್ಲ ನಾಭನ ಸತ್ಕಟಾಕ್ಷದಿ
× × × × ×
ವನವಿಹಾರೀಶನ ಕರುಣಧ್ರುವವೆಂದು ॥

Colophon :

ಅಂತೂ ಅಧ್ಯಾಯ ೧೮ ಕ್ಕಂ ಪದನು ೭೦೪ ಕ್ಕಂ ಮಂಗಳಮಹಾಶ್ರೀ ॥

687

Sl. No : 19299 भगवद्गीताभाष्यम् Ms. No : C. 3030/2

Beginning :

ओंनमो गुरवे तस्मै स्वेष्टदेवस्वरूपिणे ।
यस्य वागमृतं हन्ति विषं संसारसंज्ञकम् ॥
नारायणः परोऽव्यक्तादण्डमव्यक्तसंभवम् ।
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥

स भगवान् सृष्ट्वेदं जगत् तस्य च स्थितिं चिकीर्षुः मरीच्यादीनग्रे सृष्ट्वा प्रजापतीन् —

End :

किं बहुना यत्र यस्मिन् पक्षे योगेश्वरः सर्वयोगानामीश्वरः सर्वयोगेश्वरः तत्प्रभावात् सर्वयोगबीजस्य सर्वयोगेश्वरः कृष्णः यत्र पार्थो यस्मिन् पार्थो यस्मिन् पक्षे धनुर्धरो गाण्डीवधन्वा तत्र श्रीः तस्मिन् पाण्डवानां पक्षे विजयः तत्रैव भूतिः ध्रुवा अव्यभिचारिणी नीतिर्नय इत्येवं मतिर्ममेति ॥

Colophon :

इति श्रीगोविन्द भगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशङ्करभगवतः कृतौ गीताभाष्ये अष्टादशोऽध्यायः ॥

688

Sl. No : 19231 भगवद्गीताभाष्यटिप्पणम् Ms. No: P. 745/1

Beginning :

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

श्रीगीताशास्त्रं व्याचिख्यासुः भगवान् भाष्यकारः विघ्नोपशमनादिप्रयोजन सिध्यर्थं + पुराणान्तर्गतमेव श्लोकं पठति ॥

End :

अनुभूतिस्वरूपाख्यो यतिश्चक्रेऽत्र टिप्पणम् ।
व्याख्यासामर्थ्यसन्तापिपुंसां चित्तानुरञ्जकम् ॥

Colophon:

इति श्रीगीताभाष्यटिप्पणे अष्टादशोऽध्यायः ॥

689

Sl. No : 19232 गीताभाष्यटीका **Ms. No: P. 985/1**

Beginning :

दृष्टिं मयि विशिष्टार्थे कृपापीयूषवर्षिणीम् ।
हेरम्ब देहि प्रत्यूहक्ष्वेलव्यूहनिवारिणीम् ॥ + +
प्रत्यञ्चमच्युतं नत्वा गुरूनपि गरीयसः ।
क्रियते शिष्यशिक्षायै गीताभाष्यविवेचनम् ॥

End :

शास्त्रार्थमुपसंहर्तुं इतीत्युक्तम् ॥
काण्डत्रयात्मकं शास्त्रं पदवाक्यार्थगोचरम् ॥
आदिमध्यान्तषट्केषु व्याख्याया गोचरीकृतम् ॥

Colophon :

इति श्री गीताभाष्यानन्दगिरीयसंग्रहे अष्टादशोऽध्यायः ॥

690

Sl.No : 19243 गीताभाष्यम् **Ms. No : P. 2022/b**

Beginning :

श्रियःपतिरखिलहेयप्रत्यनीककल्याणैकतानानन्तज्ञानानन्दैकस्वरूपः स्वाभाविकानवधिकातिशय ज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येय गुण गण महोदधिः + पुरुषोत्तमो नारायणः + पाण्डुतनययुद्धप्रोत्साहनव्याजेन + वेदान्तोदितं भक्तियोगमवतारयामास । तत्र पाण्डवानां कुरूणां च युद्धे प्रारब्धे स भगवान् —

End :

यत्र योगेश्वरः कृत्स्नस्योच्चावचरूपेणावस्थितस्य चेतनस्याचेतनस्य च वस्तुनो ये ये स्वभावयोगाः + तत्र श्रीः विजयः भूतिः नीतिश्च ध्रुवा निश्चलेति मे मतिः ॥

Colophon :

इति श्रीभगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये अष्टादशोऽध्यायः ॥

691

Sl. No : 19250 भगवद्गीताभाष्यव्याख्या **Ms. No : P. 2068**

Beginning :

तृतीयषट्कसङ्गतिं वक्तुं प्रथमद्वितीयषट्कं वक्तुं प्रथमद्वितीयषट्कार्थं सङ्ग्रहेणाह– पूर्वस्येति । अत्र पदानां भावाः × भूतिसिध्यर्थे पूर्वषट्केण चोदिते इति प्रथमषट्कार्थसङ्ग्रहः ॥

End :

अवस्ते घुणा नैवमिति मम तु एवं समीचिना मतिः सञ्जातेति भावः ।
कविकथकसिंहगीततिः
तां तात्पर्यचन्द्रिकां व्यलीखन् ।
देशिकनिदेशवदक्षणं
लङ्केशकिङ्करः सुमतिरिति ॥ (?)

Colophon :

इति श्री कवितार्किकसिंहस्य कृतिषु + तात्पर्यचन्द्रिकायां अष्टादशोऽध्यायः ॥

692

Sl. No : 19252 भगवद्गीतातात्पर्यनिर्णयः **Ms. No : P. 394**

Beginnig :

समस्तगुणसम्पूर्णं सर्वदोषविवर्जितम् ।
नारायणं नमस्कृत्य गीतातात्पर्यमुच्यते ॥
शास्त्रेषु भारतं सारः तत्र नामसहस्रकम् ।
वैष्णवं कृष्णगीता च तज्ज्ञानान्मुच्यतेऽञ्जसा ॥

End :

यस्य त्रीण्युदितानि वेदवचनै रूपाणि दिव्यान्यलंवट्
तादृश मित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥
निश्शेषदोषरहित + वन्द्यं त्वां नौमि मे प्रियम् ॥

Colophon :

इति श्रीमदानन्दतीर्थ + विरचिते श्रीमद्भगवद्गितातात्पर्यनिर्णये अष्टादशोध्यायः ॥

693

Sl. No : 19253 भगवद्गीतातात्पर्यनिर्णयटीका Ms. No : C. 9

Beginning :

इन्दिरावदनाम्भोजराजहंसाय विष्णवे ।
अमन्दानन्दसन्दोहसुन्दराकृतये नमः ॥
धर्मविज्ञानवैराग्य + जीवनम् ।
प्रणम्य चरणद्वन्द्वं गुरूणां + गीतातात्पर्यनिर्णयम् ॥
अथाशेषपुरुषार्थहेतुभूतां + ग्रन्थारम्भं च प्रतिजानीते — समस्तेति ।

End :

यस्येति । अथ तमेव हरिमादरविशेषात्पुनस्स्तौति । निर्दोषेति ॥
इति श्रीमदानन्दतीर्थमलमन्दिरः इन्दिरारमणःप्रीतिं यातु दीनदयापरः ।
वचनप्रसूनमाला जयतीर्थाख्येन भिक्षुणा रचिता ॥
ध्रियतां सदये हृदये कमलमहिलेन पुरुषेण ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्गीतातात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां न्यायदीपिकायामष्टादशोऽध्यायः ॥

694

Sl. No : 19256 भगवद्गीतातात्पर्यटिप्पणी Ms No : C. 2254

Beginning :

लक्ष्मीनारायणं नत्वा पूर्णबोधादिसद्गुरून् ।
गीतातात्पर्यटीकाया भावदीपं करोम्यहम् ॥
सकलवाङ्मनसदेवतेन्दिरोपसर्जक भगवन्नतिरूपं मङ्गलं ग्रन्थादावाचरति — इन्दिरेति ।

End :

अच्युत इति उभयेति । तत्कृतचन्द्र × गेन × धिकप्राप्त्या च × तदमुच्यते इत्यत्रेत्यर्थः तद्व्यनक्ति यदेति । एकमेवेति × × स्थितमित्यन्वयः । सर्वाधिकत्वेनान्ते स्थित इत्यर्थः ॥

Colophon :

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते चतुर्दशोऽध्यायः ॥

695

Sl. No : 19257 भगवद्गीतातात्पर्यनिर्णयटीका Ms. No : C. 2112

Beginning :

चिदानन्दतनू श्रीशौ सदा पद्मादिसेवितौ ।
मुदा कृष्णौ श्रये सर्वविदौ वासिष्ठयादवौ ॥
श्रीशपादाब्जसंसक्तो वीशरुद्रादिसेवितः ।
आशोत्तमो मध्वमुनिराशये मम संवसेत् ॥ --

End :

इत्थं सत्यव्रतश्रीचरणकरसरोजोद्भवो मध्वशास्त्रं
शुद्धं तस्मादधीत्य स्वमतिविमलतासिद्धये तत्प्रसादात् ।
सत्यप्रज्ञाभिधानो यतिरकृत जयार्यस्य सम्भूतगीता
तात्पर्यव्याकृतार्थविवृतिमरिधरप्रीतिदेयं सदा स्यात् ॥

Colophon :

इति श्रीमत्पूज्यपादशिष्यसत्यप्रज्ञभिक्षुविरचिते गीतातात्पर्यनिर्णयन्याय दीपिकाभावप्रकाशे अष्टादशोऽध्यायः ॥

696

Sl. No : 19258 भगवद्गीतातात्पर्यपञ्चिका Ms. No : P. 2384

Beginning :

इन्दीवरदलश्याममिन्दिरानन्दवर्धनम् ।
वन्दे नन्दसुतं × नन्दसुन्दरविग्रहम् ॥
यद्व्याख्या सर्वगीर्वाणैरचिन्त्या चाद्भुतामला ॥
निजप्रति × × × ॥
अस्मद्देशिकपादाब्दे स्मृत्वा तत्करुणाबलात् ।
व्याकरिष्ये यथाबोधं गीतातात्पर्यपञ्चिकाम् ॥

End :

इति श्री तीर्थाचार्यशिष्यश्रीनिवासाचार्यरचितन्यायदीपकिरणावल्यामष्टमोऽध्यायः ॥ यद्वा स्वतो वृक्षादिजीवानां मानुष्याद्यापदकर्मभोगी ॥

Colophon :

— — —

697

Sl. No : 19259 — भगवद्गीतातात्पर्यम् — Ms. No : P. 2969

Beginning :

श्रियः पतिं हरिं नत्वा गीतातात्पर्यनिर्णयम् ।
ग्रन्थमानन्दतीर्थार्यकृतं साक्षीकरोम्यहम् ।।
अथाशेषवेदपञ्चरात्रादिसदागमैकवेद्यं विष्णुं नमस्कृत्य ग्रन्थारम्भं प्रतिजानीते – समस्तेति । गीतातात्पर्योपयुक्तं पुराणवचनं तावदाह–शास्त्रेष्विति ॥

End :

समस्त इति । समस्तगुणगणसम्पूर्णं सर्वदोषविवर्जितं नारायणसिद्ध्यर्थे गीतातात्पर्यनिर्णयाख्यं स्वकृतं ग्रंथं × × समर्पयति – यस्येति ॥
लक्ष्मीविरिञ्चिशर्वेन्द्रप्रमुखामरवन्दितम् ।
वन्दत्यानन्दतीर्थाख्ययतिवर्णितमच्युतम् ।।

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य श्रीमद्भगवद्गीतातात्प × स्य प्रकाशिकायां पद्मनाभतीर्थभट्टारकविरचितायां अष्टादशोऽध्यायः ।।

698

Sl. No : 19260 — भगवद्गीताभाष्यम् — Ms. No : P. 5530/2

Beginning :

देवं नारायणं नत्वा सर्वदोषविवर्जितम् ।
परिपूर्णं गुरूंश्चान्गीतार्थं वक्ष्यामि लेशतः ।।
नष्टधर्मलोककृपालुभिः + ज्ञानप्रदर्शनाय भगवान् व्यासोऽवततार ।।

End :

साधनान्युपसंहरति सर्वकर्माणीत्यादिना । परोक्षवचनं तु द्रोणं प्रति भीम वचनात् ।। कर्मत्यागो फलत्यागः । कथमन्यथा युद्धविधिः । यस्तु कर्मफलत्यागी स त्यगीत्यभिधीयत इतीहोक्तम ।।
ओं पूर्णबोधमहाविष्णो गीतामाश्रित्य लेशतः ।
निरूपणं कृतं तेन प्रीयतां मे सदा विभुः ॥

Colpohon:

इति श्रीमदातन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गिताभाष्येऽष्टादशोऽध्यायः ॥

699

Sl. No : 19263 गीताभाष्यम् Ms. No : P. 3587

Beginning :

गुणगणनिलयं पतिं रमायाः
जगदघदहनं च वासवीसूनुम् ।
मुनिकुलतिकं च पूर्णबोधं
गुरुमपि परमं गुरुं च मे वन्दे ॥
आनन्दतीर्थभगवत्पादाचार्यविनिर्मितम् ।
व्यासाख्यास्ये भगवद्गीताभाष्यं तत्करुणाबलात् ॥

End :

नमामि व्यासदासस्य पूर्णबुद्धेः पदाम्बुजे ।
नतामरशिरोरत्नराजिनीराजिते सदा ॥
अक्षोभ्यतीर्थगुरुणा शुकवच्छिक्षितस्य मे ।
वचोभिरमृतप्रायैः प्रीयन्तां सततं बुधाः ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्गीताभाष्यस्य टीकायां जयतीर्थमुनिविरचितायां प्रमेयदीपिकायां अष्टादशोऽध्यायः ॥

700

Sl. No : 19268 गीताभाष्यटीकाव्याख्या Ms. No : C. 340

Beginning :

लक्ष्मीनारायणं वन्दे तथा मध्वादिदेशिकान् ।
प्रमेयदीपिकाभावदीपं कुर्यां यथामति ॥
ग्रन्थादौ मङ्गलमाचरति — गुणगणेति ॥ गुणपदेन ज्ञानानन्दबलौदार्य द्युतिप्रभृतयो भावधर्माः जरामरणाद्यभावधर्माश्च गृह्यन्ते ॥

End :

विशेषाकांक्षायां उक्तं — निमित्तमात्रमिति ॥ तमित्युक्त्या प्रयोजनकर्तृत्व मेवेति भ्रमनिरासायोक्तं कर्तृत्वादिति ॥ वचोभिः विद्वांसः प्रीयन्तामित्यर्थः ॥
कल्याणगुणपूर्णाय दोषदूराय विष्णवे ।
अमन्दानन्दसन्दोहसुन्दराकृतये नमः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीगीताभाष्य टीका भावदीपे
राघवेन्द्रयतिकृते अष्टादशोऽध्यायः ॥

701

Sl. No: 19268 गीताभाष्यटीकाव्याख्या **Ms. No: C. 340**

Beginning:

विष्णोर्नाम्नां सहस्रस्य वेदव्यासो महानृषिः ।
छन्दोऽनुष्टुप्तथा देवो भगवान् देवकीसुतः ॥
इति प्रयोगाच्चेति भावः । इत्थंभूतेति ॥

End:

ज्ञानसंपन् कामादिजयद्वारा संसारविजयः स्वरूपानन्दव्यक्तिः अनन्त
कालीना विचित्रानन्दोन्नतिरुद्रेक इति मतिरित्यशेषमतिमङ्गलम् ॥

Colophon:

इति प्रमेयदीपिकाविवरणे अष्टादशोऽध्यायः ॥

702

Sl. No: 19271 गीताभाष्यटीकाव्याख्या **Ms. No: C. 1648**

Beginning:

नमामि भक्ताभयचक्रशङ्ख
पाणी सदा मध्वकराभिपूज्यौ ।
श्रीवासकृष्णौ परिपूर्णबोधं
तथा जयार्यानितरान् गुरूंश्च ॥
अथैतत्कृपया श्रीनिवासाख्यायुतसूरिणा ।
गीताभाष्यस्य टीकायाः क्रियते भावदीपिका ॥

सर्वज्ञकल्पाष्टीकाकाराः जयतीर्थश्रीचरणाः श्रीमद्भगवद्गीताभाष्यं यथा
वद्व्याख्यातुकामाः + मङ्गलं कृत्वा शिष्यशिक्षायै ग्रन्थाद ावुपनि
बध्नन्ति — गुणगणनिलयमिति ॥

End :

साधनेभ्यो अधिकमित्यर्थस्य प्रकृतानुपयोगात् तदनूद्य व्याचष्टे — साधनाधिकमिति ॥

इति यदुपतिगीताभाष्यटीका सुयुक्ता-
शयमतिललिताभिः गीर्भिरावेदयन्ती ।
सुललितविवृतिर्या वृष्णिरीटात्त्ररीणि
समगयदयमध्यायोन्तमस्या × षष्ठः ॥

Colophon :

इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां श्रीमद्भगवद्गीताभाष्यविवृतौ भावप्रदीपिकायां षष्ठोऽध्यायः ॥

703

Sl. No : 19272 भगवद्गीताभाष्यटीका Ms. No : C. 1668

Beginning :

नमामि तर्काभयचक्रशङ्खपाणी सदा मध्वकराभिपूज्य ।
श्रीव्यासकृष्णौ परिपूर्णस्तथा जयार्यानितरान् गुरूंश्च ॥

सर्वज्ञकल्पाः टीकाकाराः जयतीर्थश्रीमच्चरणाः श्रीमद्भगवद्गीताभाष्यं यथावद्व्याख्यातुकामाः + मङ्गलं कृत्वा शिष्यशिक्षायै ग्रन्थादावुपनिबध्नन्ति ॥

End :

श्रीयादवार्यगुरुमानसनीरजस्थः
श्रीमध्वहृत्कमलवासिरमानिवासः ।
व्यासोत्स्वनेन जयतीर्थमुनीन्द्रवाक्य
गूढाशयप्रकटनेन ममाशु भूत्यै ॥
गीताभाष्यस्य टीकेयं यादवार्यकृपाबलात् ।
विवृता श्रीनिवासेन भूयाद्व्याख्योपकारिणी ॥

Colophon :

इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां श्रीमद्भगवद्गीताभाष्यटीकौ भावप्रदीपिकाख्यायां अष्टादशोऽध्यायः ।

श्रीयादवार्यपदसेवकमानि + + सत्कमलप्रदिश्यात् ॥
गीताभाष्यस्य टीकायाः + विवृतिः भावदीपिका सम्पूर्णा ॥

704

Sl. No : 19274 भगवद्गीताभाष्यव्याख्या **Ms. No : P. 6067**

Beginning :

श्रीमन्तः जानकीजानेः पदपङ्कजपांसवः ।

जयन्ति श्रीशवक्षोजकुङ्कुमश्रीविडम्बिनः ॥ १ ॥

श्रीमान् जयतीर्थार्यः प्रारिप्सितविघ्नपरिसमाप्त्यादिप्रयोजनं निबध्नाति ॥ गुणगणेति ॥

End :

आत्मस्वरूप × रूपमुक्तम् । तत आध्यायपरिसमाप्तेः ज्ञानसाधनं योगलक्षणमुच्यत इति प्रकरणभेदप्रदर्शनायाभिहितमित्यर्थः ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमद्भगवद्गीताटीकाव्याख्यायां श्रीमत्सुधीन्द्रतीर्थपूज्यपादशिष्य सुमतीन्द्र भिक्षु विरचितायां भावरत्नकोश समाख्यायां द्वितीयोऽध्यायः ॥

705

Sl. No : 19275 भगवद्गीताभाष्यव्याख्याटिप्पणी **Ms. No : P. 5125/2**

Beginning :

श्रीमतिं मध्वसुहृदं नत्वा जयमुनीन् गुरून् ।

प्रमेयदीपिकां × त्त्या व्याकुर्वे तत्कृपाश्रयः ॥

+ श्रोतॄणां गीताभाष्यटीकासु + + मयोद्योगिनः शुश्रूषां जनयन् प्रतिजानीते – सानन्देति ॥

End ;

प्रमेयदीपिकाव्याख्याष्टादशाध्यायगोचरा ।

भीमसेनपदोपेततिम्मणाचार्यसूरिणा ।

कृता दीधितिनामेयं × तया प्रीतये भवेत् ॥

जन्मान्तरेकृतं × गुरुदेवादि × रार्पणम ॥

Colophon :

इति श्रीमज्जयतीर्थपूज्यचरणविरचितप्रमेयदीपिकादीधितौ कट्टे तिम्मणाचार्य कृतायां अष्टादशोऽध्यायः ॥

706

Sl. No : 19049 ब्रह्मगीता Ms No : P. 153

Beginning :

गीताभाष्यतात्पर्ययोः भारतस्य सर्वोत्तमत्वं उक्तम् । अतो नैतादृशं किञ्चित् प्रमाणतममिष्यते इत्यनुव्याख्याने ब्रह्मसूत्रस्य ब्रह्मशास्त्रोत्तमत्वं उक्तम् । अतो विरोधः ॥ सत्यम् ॥

End :

अब्रह्मणः तत्सात्विकत्वरूपचतुर्थसात्विकत्वस्यैव अभिप्रेतत्वेन द्वितीयतात्पर्यानुसारेणात्रापिशब्देन शेषादित्रयाणां तद्भार्याणां च अभिप्रेतत्वेन चतुर्थ विरोधाभावादिति ॥

Colophon :

इति गीताभाष्यविरोधः समाप्तः ॥

707

Sl. No : 19278 भगवद्गीताभाष्यम् Ms. No : A. 773/2

Beginning :

कृष्णात्सैक्यमवाप यत्प्रकटितैर्योगैः सदैवार्जुनो
यस्यामेव समस्तवेदशिरसामर्था निगूढाः स्वयम् ।
यामाश्रित्य तरन्ति संसृतिमिमां सर्वेऽपि लोका इमां
गीतां भागवतीं सुभाष्यसहितां निर्माय शर्माप्नुयाम् ॥

× अत्र खलु मुमुक्षूणां सकलवेदान्तरहस्यार्थान् × भगवता वेदव्यासेन × मया भाष्यं यथावदारच्यते— धर्मक्षेत्र इति ॥

End :

तस्मादुत्तरगीताशेषत्वादनेन पूर्वगीताशास्त्रेण साधकस्य जीवन्मुक्तिरेव स्यादिति सिद्धम् ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ भगवद्गीताभाष्यस्य अष्टादशोऽध्यायः ॥

708

Sl. No : 19280 भगवद्गीताभाष्यम् Ms. No : B. 1758/1

Beginning :

प्रणम्य परमात्मानं विष्णुं जिष्णुं जगद्गुरुम् ।
परमात्मावबोधार्थं गीताव्याख्या मयोच्यते ॥

अस्य सम्बन्धाभिधेयप्रयोजनान्युच्यन्ते मोक्षं तावत्प्रयोजनम् । स च गीताशास्त्रप्रतिपादनात् परमात्मसम्बन्धादेवेति परमात्मस्वरूपमभिधेयम् ।

End :

इति यत्र यस्मिन् पक्षे श्रीर्देवता विजार्थं विजयः शत्रूणां धर्षणार्थं भूति र्विभूतिः ध्रुवा नित्या नीतिः नयः प्रतिज्ञाताधिका इति इत्थं मम मतिः निश्चयः मम सञ्जयस्य । इतिकरणं शास्त्रस्य परिसमाप्त्यर्थम् ।

Colophon :

इति पैशाचे श्रीभगवद्गीताभाष्ये अष्टादशोऽध्यायः ॥

709

Sl. No : 19283 भगवद्गीतार्थसंग्रहः Ms. No : P. 3180/3

Beginning :

संचिन्तयेद्भगवतश्चरणारविन्दं वज्रांकुशध्वज + हृदयान्धकारम् ॥
वेङ्कटवरदाचार्यः स जयति शान्त्यादिसद्गुणैकनिधिः ।
श्रियः पतिरखिलहेयप्रत्यनीक —

End :

यदि कृष्णार्जुनावस्मिन् समये प्रसादनीयौ तवेति फलितार्थः ।
यस्य कृष्णात्तु वर्तन्ते स वै नारायणः स्मृतः ॥
\+ \+ \+ \+ \+
पादं वाऽप्यर्धपादं वा श्लोकं श्लोकार्धमेव वा ।
नित्यं धारयते विप्रः स मोक्षमधिगच्छति ॥

Colophon :

इति गीतार्थसंग्रहे अष्टादशोऽध्यायः ॥

710

Sl.No : 19287 **भगवद्गीताविवृतिः** Ms. No : C. 1298/2

Beginning :

लक्ष्मीनारायणं नत्वा पूर्णबोधादिसद्गुरून् ।
कुर्मः श्रीकृष्णगीतायाः भाष्याद्युक्तार्थसङ्ग्रहम् ॥
स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।
इति भारतमाख्यानं कृपया मुनिना कृतम् ॥
इति भागवतोक्त्या वेदार्थज्ञानानधिकारिणाम् —

End :

ध्रुवा निश्चलेति मम मतिः निश्चयः इत्यर्थः ॥
अशेषगुणपूर्णाय दोषदूराय विष्णवे ।
नमः श्री प्राणानाथाय भक्ताभीष्टप्रदायिने ॥
इति श्रीकृष्णगीताया भाष्याद्युक्तार्थसङ्ग्रहः ।
राघवेन्द्रेण यातिना कृतः सज्जनसंविदे ॥

Colophon :

इति श्रीमत्सर्वतन्त्रस्वतन्त्रश्रीमत्सुधीन्द्रपादशिष्यराघवेन्द्रयतिकृते श्रीमद्भगवद्गीतार्थसंग्रहे अष्टादशोऽध्यायः ॥

711

Sl. No : 19291 **भगवद्गीताविवृतिः** Ms. No : P. 2982

Beginning :

× श्रीमदानन्दतीर्थार्यमतमाश्रित्य यत्नतः ।
क्रियते कृष्णगीताया विवृतिः साधुसंविदे ॥
इह हि संसारक्लि × × विष्टैः ब्रह्मरुद्रादिभिरर्थितो भगवान्व्यासत्वेनावतीर्य सर्ववेदार्थोपबृंहितं + तत्वनिर्णयं चकार ॥

End :

व्यासेन हि दिवा च × स्तोत्रादि तस्मै स्तायोगरुवसामर्थ्य × स्वयमेव कथयतः कृष्ण × दव्यवधानेन तदुक्तं × धृतशब्दाभिप्रायमनुसृत्याह — यत्रेति । यो नित्यसिद्धाणिमाद्यैश्वर्यनामकः । भूतिरैश्वर्यम् ॥

End :

इति श्रीमद्भगवद्गीताविवृतौ विद्याधिराजभट्टोपाध्यायविरचितायां श्रीमध्व मतानुवर्तिन्यामष्टादशोऽध्यायः ॥

712

Sl. No : 19292 भगवद्गीताव्याख्या Ms. No : A. 490

Beginning :

गीतार्थं प्रत्यगद्वैतं अविभक्तचतुष्पदम् ।
आत्मारामं नतिपदं कुर्वे नारायणाभिधम् ॥
नत्वा श्रीगुरुपादाब्जं भाष्यसूक्त्यनुरोधतः ।
मन्दबुद्ध्यनुरोधेन गीता व्याक्रियते मया ॥

End :

येन वेदान्तसिद्धान्तसारः सम्यक् प्रकाशितः ।
यान्ति यद्ज्ञानतो मुक्तिं तस्मिन् शाम्यतु मे मनः ।
येन पार्थाय गीतान्त्यषट्कतस्तत्त्वमर्थयोः ॥
लक्ष्यैक्यं भणितं मेऽद्य कैवल्यं स प्रयच्छतम् ॥

Colophon :

इति श्रीमत्परमहंसपरिजकाचार्यश्रीवासुदेवेन्द्रशिष्यरामचन्द्रेन्द्रकृतौ श्रीमद्भ गवतद्गीतार्थप्रकाशिकायां सर्ववेदान्तसिद्धान्तनैष्कर्म्यमोक्षयोगो नाम अष्टादशो ऽध्यायः ॥

713

Sl. No : 19293 भगवद्गीताव्याख्या Ms. No : P. 2982/b

Beginning :

श्रीरामादिदशावतारसमये रक्षोवधं कुर्वता
कृष्णे जन्मनि राजगोपललनासक्तेन यल्लम्पटम् ।
तन्मोक्तुं हरिरेव जीवकलया सा ×
ब्रह्मानन्दसरस्वतीति यतिराट् तद्दासदासोऽस्म्यहम् ॥
भाष्यं पैशाचिकं दृष्ट्वा शङ्करीयं च टिप्पणम् ।
श्रीधरीयं समालोड्य लिख्यते पदयोजना ॥

श्रियः पतिः अखिलजगदुत्पत्तिलयहेतुभूतः + वासुदेवः कुरुपाण्डव युद्धे धनञ्जय × त्साहोत्पादनव्याजेन × ज्ञानयोगमवतारयामास ।

End :

तस्यैते कथिता ह्यर्थाः × तेन लभ्यत इत्यादिश्रुतिस्मृतिपुराणवचनानि एवं सति समञ्जसानि भवन्ति । तस्माद्भगवद्भक्तिरेव मोक्षहेतुरिति सिद्धम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्ब्रह्मानन्दसरस्वतीशिष्यराजचन्द्रानन्दसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां सकलोपनिषदर्थप्रतिपादकसाक्षान्मोक्षयोगो नामाष्टादशोऽध्यायः ॥

714

Sl. No : 19294 भगवद्गीताव्याख्या **Ms. No : P. 3070/b**

Beginning :

अथ प्रतिज्ञातमर्थं साङ्गमाह—सर्वद्वाराणीति द्वाभ्याम् । सर्वद्वाराणीन्द्रिय द्वाराणि चक्षुरादीनि । संयम्य विषयेभ्यः प्रत्याहृत्य,

End :

यत्रेति । यत्र येषां पक्षे योगमायेश्वरः कृष्णो वर्तते । टिप्पणिकाबु कर्षणेन मनोभूमेर्निर्वृत्तिफलं प्राप्यते । कृष्णनाम्ना समाम्नातः + +

अभिप्रायः प्रायस्सकलनिगमानामधिगतः
सुधीभिर्येऽपि स्युर्भगवदनुकंपाश्रयवशात् ।
चिरं सान्द्रानन्दानुभवरसिकास्तत्र सुजनाः
सुविश्रान्ति यान्ति प्रसभमपरे नेह विवृतौ ॥

\+ + + + +

तत्सूनुर्निगमार्थतत्त्वनिपुणः सूर्याभिधानः कविः
कृष्णप्रेरणया तदर्पितधिया गीतार्थभाष्यं व्यधात् ॥

Colophon :

इति श्रीमद्दैवज्ञपण्डितसूर्यविरचितायां श्रीमद्भगवद्गीताटीकायां परमार्थप्रपायां सकलगीतार्थसंग्रहे ब्रह्मार्पणसन्न्यासयोगो नामाष्टादशोऽध्यायः ॥

715

Sl. No : 19296 भगवद्गीताव्याख्या **Ms. No : P. 8266/2**

Beginning :

भगवत्पादभाष्यार्थमालोच्यातिप्रयत्नतः ।
प्रायः प्रत्यक्षरं कुर्वे गीतागूढार्थदीपिकाम् ॥
सहेतुकस्य संसारस्यात्यन्तोपरमात्मकम् ।
परं निश्रेयसं गीताशास्त्रस्योक्तं प्रयोजनम् ॥

End :

वंशीविभूषितकरा + + न जाने ॥
काण्डत्रयात्मकं शास्त्रं गीताख्यं येन निर्मितम् ।
आदिमध्यान्तषट्केषु तस्मै भगवते नमः ॥
श्रीगोविन्दमुखारविन्द × × × ॥

Colophon :

× विश्वेश्वरसरस्वतीपूज्यपादशिष्यश्रीमधुसू × × रचितायां श्रीभगवद्गीतागूढार्थदीपिकायामष्टादशोऽध्यायः ॥

716

Sl. No : 19302 भगवद्गीताव्याख्या **Ms. No : P. 4118/1**

Beginning :

ओं महेशं दक्षिणामूर्तिं मन्दहाससमन्वितम् ।
अर्धेन्दुशेखरं पूर्णं वन्दे गौरीशमच्युतम् ॥
नारायणः परोऽव्यक्त + सप्तद्वीपा च मेदिनी ॥

प्रज्ञाचक्षुर्धृतराष्ट्रः चक्षुरिन्द्रियरहितत्वेन बाह्यार्थान् प्रत्यक्षत्वेन ज्ञातु मशक्तः सन् स्वस्य हितोपदेष्टारं समीपवर्तिनं सञ्जयं प्रत्युवाच धर्मक्षेत्रे कुरुक्षेत्रे + + सञ्जय ॥

End :

श्रीः राज्यलक्ष्मीः विजयश्च परेभ्य उत्कृष्टत्वेन भूतिः सकलसम्पद्विस्तरः नीतिर्न्यायश्च ध्रुवा अव्यभिचारिणी इति मे मम मतिर्निश्चयः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीरामचन्द्रेन्द्रसरस्वतीपूज्यपादशिष्य श्रीराघवानन्दतीर्थविरचिता भगवद्गीतालघुव्याख्या समाप्ता ॥

717

Sl. No : 19303 भगवद्गीताव्याख्या **Ms. No : P. 154**

Beginning :

श्रीरामादिदशावतारसमये + + ।
ब्रह्मानन्दसरस्वतीतियतिराट् नीलाद्रिसिंहासने ॥
भाष्यं पैशाचिकं दृष्ट्वा शाङ्करीयं सटिप्पणम् ।
श्रीधरीयं समालोड्य लिख्यते पदयोजना ॥

End :

यत्र यस्मिन् पक्षे योगीश्वरः योगमायेश्वरः कृष्णः, यत्र यस्मिन् पक्षे धनुर्धरो गाण्डीवधन्वा पार्थः, तत्र तस्मिन् पाण्डवानां पक्षे राज्यलक्ष्मीः ध्रुवा स्थिरा तत्रैव विजयः ध्रुवः तत्रैव भूतिः श्रियो विशेषविस्तारः ध्रुवा तत्रैव नीतिर्नयः ध्रुवा इति मे मम मतिर्निश्चयः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीशिष्यरामचन्द्रानन्द सरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां परमार्थतत्त्व निर्णयमोक्षयोगो नाम अष्टादशोऽध्यायः ॥

718

Sl. No : 19307 भगवद्गीताव्याख्या **Ms. No : C· 2058/2**

Beginning :

श्रीमध्वमुनिं च तद्गतमहं नारायणं मुक्तिदं
निर्दोषं गुणसंयुतं च रघुपं व्यासं नृहर्यात्मकम् ।
आनन्याधिपुतायुतं च यदुपं गीतार्थपारप्रदं
बीभत्सुं जयतीर्थपूर्वकगुरून् संप्रार्थयेऽर्थज्ञताम् ॥
गीता भागवती श्रीमन्मध्वसिद्धान्तमाविशत् ।
प्रपञ्चीक्रियेतऽन्यक्ता संता ज्ञानप्रसिद्धये ॥

End :

किं च यत्र येषां पक्षे योगस्य चित्तशक्तेरीश्वरः कृष्णो वर्तते । यत्र पार्थो गाण्डीवधन्वी वर्तते । तत्र श्रीः राजलक्ष्मीः विजयः भूतिः उत्तरोत्तरवृद्धिः नीतिः न्यायः ध्रुवा निश्चलेति सर्वत्र सम्बन्धः इति मे मम मतिः × इति भावः ॥

Colophon :

इति श्रीमद्भगवद्गीताव्याख्यायां विद्याधिराजभट्टोपाध्यायविरचितायां श्रीमध्वमतानुवर्तिन्यां अष्टादशोऽध्यायः ॥

719

Sl. No : 19308 भगवद्गीताव्याख्या **Ms. No: C. 20/b**

Beginning :

श्रीमन्मध्वमुनिं च तद्गतमहं + सम्प्रार्थयेऽर्थज्ञताम् ॥
गीता भागवती श्रीमन्मध्वसिद्धान्तमादरात् ।
प्रपञ्चीक्रियतेऽव्यक्तसंसृत्यज्ञानसिद्धये ॥

इह हि परापरतत्वज्ञानाभावाच्चि × त धर्माज्ञानाच्च संसारे × ज्ञेयमानं

End :

अत्रावद्यं भवेत्किञ्चित् शोधयन्तु विचक्षणाः ।
यथा पिता × × शाम्यति ॥
तथा सन्तोऽपि मद्वाक्यं क्षन्त्वा सन्तोषमाप्नुयुः ॥

Colophon :

इति श्रीमद्गीताशास्त्रविवरणे श्रीमन्मध्वमता × गीतासारार्थसङ्ग्रहाख्ये गीताव्याख्याने आर्यनरहरिकृतौ सर्वशास्त्रार्थसङ्क्षेपो नामाष्टादशोऽध्यायः ॥

720

Sl. No : 19309 भगवद्गीताव्याख्या **Ms. No : C. 1899/2**

Beginning :

श्रीमन्मध्वमुनिं च तद्गतमहं नारायणं मुक्तिदं
निर्दोषं गुणसंयुतं च रघुपं व्यासं नृहर्यात्मकम् ।
आनम्य × × संप्रार्थयेऽर्थज्ञताम् ॥

गीता भागवती श्रीमन्मध्वसिद्धान्तमादरात् ।
प्रपञ्चीक्रीयते व्यक्ता संश्रित्य ज्ञानसिद्धये ॥
इह हि + वृत्तान्तं पृच्छति धर्मक्षेत्रे इत्येकेन ॥

End :

रक्षणादिकं कुरु इति सञ्जय आहेत्याह भगवान् श्री वेदव्यासः इत्यशेष मिति मङ्गलम् ॥

+ + + + +

यथा पिता बालवाक्यं अबद्धमपि क्षाम्यति ।
तथा सन्तोऽपि मद्वाक्यं क्षान्त्या सन्तोषमाप्नुयुः ॥

Colophon :

ओं तत्सदिति श्रीमद्भगवद्गीताविवरणे श्री मन्मध्वमतानुसारिणि गीतासारार्थ सङ्ग्रहाख्ये गीताव्याख्याने सर्वशास्त्रार्थसंक्षेपो नामाष्टादशोऽध्यायः ॥

721

Sl. No : 19310 भ्रमरगीताव्याख्या **Ms. No : B. 1096**

Beginning :

कश्चिदिति । कश्चित् सज्जनप्रजा मधुकरं, मधु इव मधु ज्ञानं, सुख कारित्वसाम्यात्, तत्करोतीति मधुकरो गुरुः तं दृष्ट्वा कृष्णसङ्गमं भगवता साकं सङ्गतिः मोक्षो मम कथं स्यादिति ध्यायन्ति ॥

End :

इदं ब्रह्मातिसामीप्यादिति वचनात् अतिसमीपस्थं दहराकाशस्थमिति यावत् । परं ब्रह्माभाषत व्याचख्याविस्पर्थः ॥

इति भ्रमरगीतायाः व्याख्या ह्यध्यात्मगोचरा ।
श्रीनिवासेन रचिता गुरुशिक्षानुसारतः ।
सन्तोषकारिणी भूयात् बुधानां श्रीपतेरपि ॥

Colophon :

श्रीमद्यदुपत्याचार्यपूज्यपादाराधकश्रीनिवासाचार्यकृता भ्रमरगीताव्याख्या अध्यात्मविषयिणी समाप्ता ॥

722

Sl. No : 19311 भगवद्गीताव्याख्या **Ms. No : P. 5829/2**

Beginning :

शेषशेषमुखव्याख्याचातुर्यंन्त्वेकवक्त्रतः ।
दधानमद्भुतं वन्दे परमानन्दसद्गुरुम् ।।
श्रीमाधवं प्रणम्योमाधवं विश्वेशमादरात् ।
तद्भक्तियन्त्रितः कुर्वे गीताव्याख्यां सुबोधिनीम् ।।

End :

तेनैव दत्तया मत्या तद्गीताविवृतिः कृता ।
स एव परमानन्दः तया प्रीणातु माधवः ।।
परमानन्दपादाब्जरजःश्रीधारिणाऽधुना ।
श्रीधरस्वामियतिना कृता गीतासुबोधिनी ।।

Colophon :

इति श्रीधरस्वामिनः कृतौ भगवद्गीताटीकायां सुबोधिन्यां मोक्षयोगो नामाष्टादशोऽध्यायः ॥

723

Sl. No : 19327 भगवद्गीताव्याख्या **Ms. No : A. 755/2**

Beginning :

मार्ताण्डतिलकस्वामिमहागणपतीन् वयम् ।
विश्ववन्द्यान्नमस्यामस्सर्वसिद्धिविधायिनः ॥
\+ \+ \+ \+ \+
प्रणम्य परमात्मानां कृष्णं तद्भक्तियन्त्रितः ।
गीताव्याख्यामहं कुर्वे ब्रह्मतत्त्वप्रकाशिनीम् ।।

End :

ज्ञाननिष्ठा साक्षादेव मोक्षहेतुरिति गीताशास्त्रार्थनिर्णयः ।।
काण्डत्रयात्मकंशास्त्रं पदवाक्यार्थगोचरम् ।
आदिमध्यान्तषट्केषु व्याख्यायां गोचरीकृतम् ।।

संक्षेपविस्तराभ्यां यो लक्षणैरुपपादितः ।
सोऽर्थोऽन्तिमेन संक्षिप्य लक्षणेन विवक्षितः ॥
प्राचामाचार्यपादानां पदवीमनुगच्छता ।
हरिप्रीत्यै कृता व्याख्या ब्रह्मतत्त्वप्रकाशिनी ॥

Colophon :

इति श्री महाभारते + श्रीभगवद्गीताव्याख्यायां ब्रह्मतत्त्वप्रकाशिन्यां सकलशास्त्रपरमार्थतत्त्वनिर्णयसाक्षान्मोक्षयोगो नामाष्टादशोऽध्यायः ॥

724

Sl. No : 19335 **Ms. No : P; 5915/2**

Beginning :

ಶ್ರೀಮತ್ಕ್ಷೀರ ಪಯೋಧಿ ರಾಜತನಯಾ ಹೃತ್ಪದ್ಮ ಹಂಸಂ ಮುನಿ
ಸ್ತೋಮಾರಾಧಿತ ನಾರದಾದಿವಿಲಸದ್ಯೋಗೀಂದ್ರ ಸಂಸೇವಿತಂ ।
ಭೂಮಾನಂದ ಚಿದೇಕವಿಗ್ರಹನಜಂ ಶ್ರೀವೆಂಕಟಾಧೀಶ್ವರಂ
ಪ್ರೇಮೋದ್ವಾಪಿ ಕಟಾಕ್ಷದಿಂ ಸಲಹುಗೆ ಬ್ರಹ್ಮಾದಿದೇವಾಧಿಪಂ ॥
× ವ್ಯಾಖ್ಯಾನಂಗಳು ಸಂಸ್ಕೃತ ಭಾಷಾತ್ಮಕಂಗಳಾಗುವುದರಿಂದ × ಕರ್ಣಾಟ ಭಾಷೆಯಿಂ ವ್ಯಾಖ್ಯಾನವನು ಮಾಡುತ್ತಿದ್ದೇನು, ಧೃತರಾಷ್ಟ್ರನು ಪ್ರಶ್ನೆಯು ಮಾಡಿದನು.

End :

ಉತ್ತರಾಭಿವೃದ್ಧಿಯು ಅಲ್ಲಿ ಸ್ಥಿರವಾಗಿ ಇಹುದು. ನೀತಿಃ ನ್ಯಾಯವು ಅಲ್ಲಿ ಸ್ಥಿರವಾಗಿ ಇಹುದು. ಇತಿ ಹೀಗೆಂದು ಮಮ ನನ್ನ ಮತಿಃ ಬುದ್ಧಿಯು.

Colophon :

इति श्रीमद्भगवद्गीताकर्णाटटीकायां रामकृष्णसूरिविरचितायां सर्वोपनिषदर्थप्रतिपादकयोगो नामाष्टादशोऽध्यायः ॥

725

Sl. No : 19339 **Ms. No : P. 2762/2**

Beginning :

× × × × × दक्षिणामूर्तिम् ।
× न्दुशेखरं पूर्णं वन्दे × × × ॥
धृतराष्ट्रः चक्षुरिन्द्रियरहितत्वेन बाह्यार्थं × × स्वस्य हितोपदेष्टारं समीपवर्तिनं सञ्जयं प्रत्युवाच ॥

End :

अहं त्वत्प्रसादात् कृतार्थः, मम कर्तव्यं कर्म नास्ति इत्यभिप्रायः ॥
शास्त्रार्थे समाप्ते सति तस्यामवस्थायां सञ्जयवचनं × त्रोपयुक्तमित्याशङ्क्य
कथासम्बन्धप्रदर्शनाय इति एवं अहं सञ्जयः ॥

Colophon :

इति श्रीमद्भगवद्गीताव्याख्याने सप्तदशोऽध्यायः ॥
(इति १७८ पत्रे)

726

Sl. No : 19342 **भगवद्गीताटीका** **Ms. No : P. 6399/2**

Beginnig :

ಧರ್ಮಕ್ಷೇತ್ರೇ — ಸಕಲ ಧರ್ಮ ಸಾಧನ ಪರಮ ಪವಿತ್ರವಾದಂಥಾ
ಶ್ರೀ ಲಕ್ಷ್ಮೀನಾರಾಯಣನ ನಿತ್ಯ ಸನ್ನಿಧಾನವುಳ್ಳಂಥಾ ಕುರುಕ್ಷೇತ್ರೇ ಕುರುಕ್ಷೇತ್ರದಲ್ಲಿ,

End :

ಅರ್ಜುನನು ಧನುರ್ಧರಃ — ಗಾಂಡೀವವನ್ನು ಹಿಡಿದಿದ್ದಾನು. × ×
ನಿನ್ನ ಮಗನಿಗೆ ಬುದ್ಧಿ ಗಲಿಸಿ ಕೃಷ್ಣಾರ್ಜುನರ ಶರಣಾಗತನ ಮಾಡು.

Colophon :

रामचन्द्राचार्यविरचितायां मध्वमतानुवर्तिन्यां व्यक्तान्वये मोक्षयोगो नामा
द्वादशोऽध्यायः ॥

727

Sl. No : 19349 **भगवद्गीतासप्तश्लोकी** **Ms. No : P. 2343/1**

Beginning:

कविं पुराणमनुशासितारं
अणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूपं
आदित्यवर्णं तमसः परस्तात् ॥

End :

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥

इमां सप्तश्लोकी जपतः, अष्टादशाध्यायिनीं भगवद्गीतां सत्पूर्णां जपतो यत् फलं तदेव फलम् ॥

Colophon:

— — —

728

Sl. No : 19377 भगवद्गीताध्यायसारः Ms. No: C. 4686/4

Beginning :

पार्थाय प्रतिबोधितां + भवेद्द्वेषिणि ॥

अर्जुन उवाच—

न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च ।

किन्नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥

ओं तत्सदिति अर्जुनविषादयोगो नाम प्रथमोऽध्यायः ॥

End :

ओं तत्सदिति गुणत्रययोगो नाम सप्तदशोऽध्यायः ॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।

तत्र श्रीः विजयो भूतिः ध्रुवा नीतिर्मतिर्मम ॥

Colophon :

ओं तत्सदिति श्रीमहाभागवते शतसहस्रसंहितायां वैयासिक्यां श्रीभीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षयोगो नाम अष्टादशोऽध्यायः ॥

729

Sl.No : 19384 रामगीता Ms. No : C. 3263/2

Beginning :

मलनिर्मोचनं पुंसां + मोक्षमधिगच्छति ॥

ततो जगन्मङ्गलमङ्गलात्मा

विधाय रामायणकीर्तिमुत्तमम् ।

चचार पूर्वाचरितं रघूत्तमो

राजर्षिवर्यैरभिसेवितं यथा ॥

End :

विज्ञानमेतदखिलं श्रुतिसारमेकं
वेदान्तवेद्यचरणेन मयैव गीतम् ।
यः श्रद्धया परिपठेत् गुरुभक्तियुक्तः
मद्रूपमेति यदि मद्वचनेषु भक्तिः ॥

Colophon:

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकाण्डे पञ्चमोऽध्यायः ॥ इयं रामगीता ॥

730

Sl. No : 19385 रामगीता Ms. No: C. 3968/1

Beginning :

रामो हनुमन्तं प्राह आत्मानं पुरुषोत्तमः ।
वत्स वत्स हनूमत्त्वमतो यत्पृष्टवानसि ॥
ततोऽहं संप्रवक्ष्यामि शृणुष्वावहितो मम ।
अवाच्यमेतद्विज्ञानमात्मगुह्यं सनातनम् ॥

End :

स तस्य स्तवमाकर्ण्य वायुपुत्रस्य धीमतः ।
प्राह गम्भीरया वाचा हनुमन्तं रघूत्तमः ॥
स्तोष्यन्ति ये तया स्तुत्यास्ते यास्यन्ति परां गतिम् ।
स्थिरो भव हनुमांस्त्वं कर्मौपयिकं कुरु ॥

Colophon :

इत्यार्षरामायणे हनुमद्रामसंवादे रामगीतायां हनुमत्कृतस्तवराजो नाम पञ्चमोऽध्यायः ॥

731

Sl. No : 19386 रामगीता Ms. No : C. 4611/1

Beginning :

देव्युवाच —

देव देव महादेव सर्वज्ञ जगतां पते ।
श्रोतुमिच्छाम्यहं त्वत्तो सममाहात्म्यमद्भुतम् ॥

भवता कथितं पूर्वं रामस्य चरितं मम।
आदौ प्रादुर्भवं तस्य पश्चात्पट्टाभिषेचनम् ।।

End :

सम्यगुक्तं हि भवता गोप्यमेव न संशयः।
न तृप्तिमाययौ चित्तं पुनः पृच्छामि विस्मृतम् ।।
चक्रस्य लक्षणं किं वा किं माहात्म्यं कियत्फलम्।
तत्सर्वं श्रोतुमिच्छामि विस्तरेण वद प्रभो ।।

Colophon :

ओं तत्तदिति श्रीमद्ब्रह्मयोगकाण्डे श्रीरामगीतासूपनिषत्सु परब्रह्मविद्यायां उमामहेश्वरसंवादे श्रीरामत्रिशतीप्रभावनिरूपणं नाम पञ्चमोऽध्यायः ।।

732

Sl. No : 19387 रामगीताटीका **Ms. No : C. 3255/2**

Beginning :

अथ भगवान् शिवः परामलक्ष्मणसंवादमुखेनैव परतत्वमुपदेष्टुमाह तत इति।

End :

मद्वचनेषु भक्तिर्विश्वासो यदीत्यर्थः। गुरुवाक्यविश्वासस्यैव फलदायकत्वा दिति भावः ।।

Colophon :

इति श्रीमत्सकलराजद्विपदुद्धरणसमर्थेत्यादि बिरुदावलीविराजमानस्य हिम्मतिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतावध्यात्मरामायणसेतौ उत्तरकाण्डे श्रीरामगीताटीकायां पञ्चमस्सर्गः ।।

733

Sl. No : 19389 रामहृदयगीता **Ms. No : P. 8305/3**

Beginning :

वागीशाद्यास्सुमनसः + गजाननम् ।।
वीणापाणीं + उपास्महे ।।
रामं रत्नकिरीटकुण्डलधरं केयूरहारान्वितं
सीतालंकृतवामभागममलं सिंहासनस्थं विभुम्।

End :

तत्र श्री रामहृदयं यः पठेत्सुसमाहितः ।
स ब्रह्मघ्नोऽपि पूतात्मा त्रिभिरेव दिनैर्भवेत् ॥
श्रीरामहृदयं यस्तु × × ॥
अध्यात्मरामचरितस्य + + सुरपूज्यमानः ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे श्रीरामहृदयगीतामाहात्म्यं नाम षष्टितमो ऽध्यायः ॥

734

Sl. No : 19390 लघुगीता **Ms. No : C. 1990/1**

Beginning:

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥
श्रीभगवानुवाच —
न जायते म्रियते वा कदाचि
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यं शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥

End :

अर्जुन उवाच —
नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युता ।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥
सञ्जय उवाच—
यत्र योगीश्वरः कृष्णो यत्र पार्थो धनञ्जयः ।
तत्र श्रीर्विजयो भूतिः ध्रुवा नीतिर्मतिर्मम ॥

Colophon :

इति श्रीमन्महाभारते भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अष्टादशश्लोकीगीता समाप्ता ॥

735

Sl. No : 19391 | वनगीता | Ms No : B. 1178/4

Beginning :

ಶ್ರೀವಿದ್ಯಾದಿ ಸಮಸ್ತ ದೇವತೆಗಳಾ ಶ್ರೀಪದ್ಮಪಾದಂಗಳಾ
ಹೇ ವಾಚಾ ಗುರು ಪೂರ್ಣಬೋಧಮವರಂ ದಿವ್ಯಾಂಘ್ರಿಪಂಕಜಗಳಾ
ಪೂರ್ವಾಶೇಶುಕ ಬೇಡಿಕೊಂಬ ಮನಿಂದ್ರಾಗೊಜ್ಞೇಯರಾನೆಲ್ಲವಂ
ಲಾವಣ್ಯಾಂಬುಧಿ ನೀಲಲೇಷು ಶ್ರುತಿ ಕೇಳಾ ಹೇ ವಿಘ್ನಪಾ ಕರುಣಿಸು ॥
ಒಂದಾನೊಂದು ದಿನ + + ಬೃಂದಾವನಂ ಶೇರಿದಾ ॥

End :

ನಿಂದ್ಯಾಮಾತ್ರಕೆ ಪಾತ್ರಳಾದೆ ಬಹಳಾ ಸಂದೇಹವಂ ಬೇಡಿರೆ
ಒಂದಾರೆ ಸುಖ ತೋರರಿಲ್ಲ ಎನಗೆ ಈದೇನು ಮಾಡಿದ್ದನು ॥

Colophon :

— — —

736

Sl. No : 19394 | शिवगीता | Ms. No : P. 2661/1

Beginnig :

सूत उवाच—
अथातः संप्रवक्ष्यामि शुद्धकैवल्यमुक्तिदम् ।
अनुग्रहान्महेशस्य भवदुःखस्य भेषजम् ॥
न कर्मणामनुष्ठानैः न दानैः तपसाऽपि वा ।
कैवल्यं लभते मर्त्यः किन्तु ज्ञानेन केवलम् ॥

End :

उत्पादकब्रह्मदात्रोः गरीयान् ब्रह्मदः पिता ।
यतः सूतात्मजः त्वत्तः सत्यं नान्योऽस्ति नो गुरुः ॥
व्यासः—
इत्युक्त्वा प्रययुः सर्वे सायंसन्ध्यामुपासितुम् ।
स्तुवन्तः सूतपुत्रं ते सन्तुष्टाः गोमतीतटम् ॥

Colophon :

इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिपादकपद्मपुराणे शिवगीतासूपनिषत्सु ब्रह्म विद्यायां योगशास्त्रे शिवराघव संवादे पूजाविधिर्नाम षोडशोऽध्यायः ॥

737

Sl. No : 19396 शिवगीता **Ms. No: P. 3569/1**

Beginning :

ईश्वरः —

अतः परं प्रवक्ष्यामि योगं परमदुर्लभम् ।
येनात्मानं प्रपश्यन्ति भानुमन्तमिवेश्वरम् ॥

End :

श्रोतव्यं चाथ मन्तव्यं विशेषाद्ब्राह्मणैस्सह ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥

Colophon :

इति श्रीमत्कूर्मे महापुराणे षट्सहस्रिकायां ब्राह्म × त् उपरिभागे ईश्वरगीतायां ब्रह्मशिवयोगविद्याया × पनिषत्सु द्वादशोऽध्यायः ॥

738

Sl. No : 19416 शिवगीताव्याख्या **Ms. No : P. 3402/1b**

Beginning :

उमापत्यमुमाजानिं उमाञ्चोमासहोदरम् ।
उमाननदरं पद्मं विधिं वयमुपास्महे ॥
प × तनुः पञ्चवदनं प्रणवं शिवम् ।
× इह खलु देवा रावणादिरक्षःपीडीताः × शिवराघवसंवादानुरू × वादः-

End :

करशङ्करान्यो वितरेत भाग्यं
करशङ्करान्यो वितरेत मोक्षम् ।
करशङ्करान्यः तनुते सुखानि
करशङ्करान्यः विधिविष्णुसेव्यः ॥
यत्पादपद्मं निगमान्तवेद्यं + तत्पादपद्मं शरणं व्रजामि ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्याभिनवनारायणेन्द्रसरस्वतीपूज्यपाद ाष्य श्रीमत्परमशिवेन्द्रसरस्वतीविरचितायां × शिवगीतातात्पर्यप्रकाशिकायां दशो ऽध्यायः ॥

739

Sl. No : 19421 **शिवगीताव्याख्या** Ms. No : C. 487/2

Beginning :

शुद्धाद्वैतसमर्थने कृतमतेर्यस्य प्रभावं सकृत्
श्रुत्वा ह्यैक्यरुचिं सदा विदधते त्यक्तैषया वेदिनः ।
ये द्रव्येषु गुणेषु कर्मसु तथा जातावशेषेषु च
प्रौढाहंकृतयोऽपि यस्य सततं पादाब्जभृङ्गायिताः ॥
सोऽयं व्याख्यासनारूढः परं प्रव्राजकेश्वरः ।
यमाद्यष्टाङ्गनिलयः शङ्करानन्दभारती ॥
अनाद्य × विवृणुते शिवगीतां कृतादरः ।
येयं पद्मपुराणस्था × प्रसीदतु ॥

सूत उवाच ऋषीन् प्रतीति शेषः। अथेति । अथ ऋषय उत्तमाधिकारिणो बुभुत्सया पृच्छन्ति ॥

End :

प्रययुरिति । बहिस्सन्ध्योपासनस्य विशिष्टफलत्वादिति भावः । यदाह व्यासः । अस्यायमाशयः यद्यपि बहिरेव सन्ध्यात्रयं प्रशस्तं तथापि यदा विहरणाद्यङ्गलोपप्रसक्तिस्तदा श्रौतस्य विहरणस्य प्राबल्यात्तदनुरोधेन द्वे सन्ध्ये गृहेऽप्यनुष्ठेये इति । स्फुटं चैतन्माधवादिग्रन्थेष्विति दिक् ॥

Colophon :

इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकश्रीमच्छङ्करानन्दभारतीविरचितायां शिवगीताव्याख्यायां षोडशोऽध्यायः ॥

740

Sl. No : 19423 **शिवरामगीता** Ms. No : P. 1716/14

Beginning :

ओं नमोऽव्यक्तरूपाय परब्रह्मस्वरूपिणे ।
शब्दस्पर्शस्वरूपाय रसगन्धस्वरूपिणे ॥
साधनैश्च परिछिन्नमेवाद्वैतं न सिद्धिदम् ।
सृष्टिपालनसंहार × त्रिधात्मकम् ॥

End:

स्नानं तेन समस्ततीर्थनिचये दत्तं महीमण्डलं
यज्ञैश्चापि हुतं सहस्रमयुतं देवाश्च संपूजिताः ।
नित्यं तेन सुतर्पिताश्च पितरः स्वर्गं च नीताः परं
यस्य ब्रह्मविचारणे क्षणमपि प्राप्नोति धैर्यं मनः ॥

Colophon:

इति श्रीसुखोदये अद्वैतसुधारसे सकलयोगसारे श्रीशिवरामगीतायां परार्थनिरूपणं नामैकादशोऽध्यायः ॥

741

Sl. No: 19429 श्रुतिगीता **Ms. No: P. 386./1**

Beginning:

राजा—
ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः ।
कथं चरन्ति मुनयः साक्षात् सदसतः परे ॥
श्रीशुकः—
बुद्धीन्द्रियमनःप्राणान् जनानामसृजत् प्रभुः ॥
मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च ॥

End:

यस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो
यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्ति ताः ।
यः सम्पद्य जहात्यजमनुशयी सुप्तः कुलायं यथा
तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम् ॥

Colophon:

इति श्रुतिगीतासमाप्ता श्रीमद्भागवते दशमस्कन्धे सप्ताशीतितमः अध्यायः ॥

742

Sl. No : 19436 श्रुतिगीता Ms. No : C. 4376/1

Beginning :

श्रुतयः ऊचुः —

जय जय जह्यजामजितदोषगृहीतगुणा
त्वमसि यदात्मना समवरुद्धसमस्तभगः ।
अगजगदोकसामखिलशक्त्यवबोधक ते
क्वचिदजयात्मना च चरतोनुचरे निगमः ॥

End :

श्रुतय एव ते न ययुरन्तमन्ततया
त्वमपि यदन्तराण्डनिचया ननु सावरणाः ।
ख इव रजांसि वान्ति वयसा सहयतश्रुतयः
त्वयि हि फलन्ति तन्निरसनेन भवन्निधनाः ॥

Colophon :

— — —

743

Sl. No : 19438 श्रुतिगीताव्याख्या Ms. No : P. 9047/3

Beginning :

नारायणमहर्षिणा नारदायोपदिष्टश्रुतिगीतोपाख्यानप्रारम्भघट्टः । सप्ताशीतितमे नारायणनारदसंवादतः —

संम्प्रदायविशुद्ध्यर्थं स्वीयनिर्बन्धयन्त्रितः ।
श्रुतिस्मृतिमितां व्याख्यां करिष्यामि यथामति ॥

End :

सर्वश्रुतिशिरोरत्नविराजितपदाम्बुजम् ।
भोगयोगप्रदं वन्दे माधवं करणत्रयैः ।
ईक्षन्तामिच्छया सन्तः क्षमन्तां मम साहसम् ।
मया हि स्वीयबोधाय कृतमेतन्न सर्वतः ॥

Colophon :

इति भावार्थदिपिकायां सप्ताशीतितमोऽध्यायः ॥

744

Sl. No : 19439 **श्रुतिगीताव्याख्या** Ms. No : P. 1326/6

Beginning :

विष्णुरातः— विष्णुना भगवता रातः— दत्तः द्रोण्यस्त्रविप्लुष्टाङ्गत्वेऽपि भगवत्कृपया संरक्षिताङ्गत्वात् तेन दत्तः रादाने इति धातोः कर्मणि क्तः ॥ सः वैयासिकिं पप्रच्छ ब्रह्मन्निति । हे ब्रह्मन् ब्राह्मण.त्तम । गुणवृत्तयः– त्रिगुणवृत्तयः विभक्तनामरूपवस्तुप्रतिपादिन्यः—

End :

श्रुतिषु निखिलजगत्कारणत्वनिखिलचेतनाचेतननियन्तृत्वमुक्तिप्रदत्वादि कल्याणगुणविशिष्टतया प्रतिपादितःश्रीमन्नारायण एवेति प्रतिपादितं भवति ।

Colophon :

इति श्रीवेङ्कटकृष्णविरचितायां श्रीभागवततात्पर्यचन्द्रिकायां दशमस्कन्धे सप्ताशीतितमोऽध्यायः । श्रुतिगीताव्याख्या समाप्ता ।।

745

Sl. No : 19442 **श्रुतिगीताव्याख्या** Ms. No : P. 1326/9

Beginning :

श्री विष्णुरातः— तत्र तावत् मुख्यलक्षणगुणभेदेन त्रिधा शब्द प्रवृत्तिः । मुख्यापि रूढियोग भेदेन द्विधा । रूढिश्च स्वरूपेण जात्या गुणेन च ॥

End :

साक्षात् पितुरिति । योनिव्यवधानं विना जनकस्य अग्निमथनावसरे कथ ञ्चिदरणौ रेतः पतितं ममन्थ व्यासः तदैव तदुत्पन्नः शुक इति वदन्ति । सभाजितो भगवता कृतासनपरिग्रहः ॥

Colophon :

इति श्रीमद्भागवते महापुराणे सव्याख्याने श्रीधरीये श्रुतिगीता नाम सप्ता शीति तमोऽध्यायः ॥

746

Sl. No : 19446 **श्रुतिगीताव्याख्या** **Ms. No : P. 1326/7**

Beginning :

ब्रह्मन्निति । अनिर्देश्ये चेतनाचेतनसजातीयतया निर्देष्टुमशक्ये निर्गुणे निर्गतत्रिगुणे त्रिगुणप्रत्यनीके तद्गुणप्रवृत्तिनिवृत्ताश्रं श्रुतयः कथं प्रवर्तन्ते ॥

End :

यस्येति । आत्मेक्षकः स्वयमेवात्मसाक्षात्कर्ता यद्वा आत्मनां शुभसाक्षि द्वितियं पर्यायं कश्चित् कदाचित् दर्शनमिति पदमित्यादि लिखितव्यम् ।

Colophon :

इति हरितकुलतिलकवाग्विजयसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन श्रीसुदर्शनसूरिणा विरचिते श्रीमद्भागवतमहापुराणव्याख्याने शुकपक्षे श्रुतिगीतार्थो नाम सप्ताशीतितमोऽध्यायः ॥

747

Sl. No : 19449 **सप्तश्लोकीगीता** **Ms. No : C. 435/33**

Beginning :

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥

End :

यो मां गीतासमूहेन स्तोतुमिच्छति पाण्डव ।
तेनाहं सप्तभिः श्लोकैः स्तुत एव न संशयः ॥

Colophon:

इते श्री सप्तश्लोकीगीता सम्पूर्णा ॥

748

Sl. No : 19452 **सिद्धान्तगीता** **Ms. No : C. 2577**

Beginning :

तत्वज्ञानं तत्वयोगं तत्वं तत्वार्थदर्शनम् ।
ब्रूहि मे कृपया नाथ शरणागतवत्सल ॥

श्री भगवानुवाच—

नमामि परमं ज्योतिं अवाङ्मनसगोचरम् ।
निर्मलं तत्वविज्ञानं तत्वब्रह्मावबोधनम् ॥

End :

सकलभुवनज्ञानं मोक्षमार्गैकज्ञानं
गुरुरूपनिजज्ञानं सारसिद्धान्तज्ञानम् ।
सगुणभजनज्ञानं निर्गुणं बोधज्ञानं
निजपदपरिज्ञानं सद्गुरुदिव्यज्ञानम् ॥

Colophon :

इति सिद्धान्तगीता सम्पूर्णमस्तु । अध्यायः ८ ॥

748

Sl. No : 19456 सूतगीता **Ms. No: C. 2521/1**

Beginning :

ऐश्वरं परमानन्दमनन्तं सत्यचिद्घनम् ।
आत्मत्वेनैव पश्यन्तं निस्तरङ्गसमुद्रवत् ॥
निर्विकल्पं सुसम्पूर्णं सुप्रसन्नं शुचिस्मितम् ।
भासयन्तं जगद्भासा भानुमन्तमिवापरम् ॥

End :

वेदपद्मनिकरस्य भास्करं
देवदेवसदृशं घृणानिधिम् ।
व्यासमिष्टफलदं गुरुं नमः
शोकमोहविषवेगभेषजम् ॥
ये वेदवेदान्तमहाधना जनाः
शिवाभिमानैकनिरस्तकिल्बिषाः ।
नमामि वाचा शिरसा हृदा च तान्
भजामि वेगस्य निवारकानहम् ॥

Colophon :

इति श्रीस्कन्दपुराणे सूतसंहितायां यज्ञवैभवखण्डे उपरिभागे सूतगीताया
मष्टमोऽध्यायः ॥

750

Sl. No : 19459 सूतगीताव्याख्या Ms. No : P. 2521/2

Beginning :

अथ विद्यार्थिना गुरुनमस्कारस्तुती प्रथमतः कर्तव्ये इति व्युत्पादयितुं सूत गीतायां नैमिर्षीयैः कृते नमस्कारस्तुती उपनिबध्नाति – ऐश्वरमिति ।

End :

इत्थं ज्ञानयज्ञवैभवप्रतिपाद्यमानमानमवाचिककायिकभेदे नावस्थितसकलयज्ञ वैभवं प्राक्प्रतिपादितं निगमयति — यज्ञवैभवेति ॥

Colophon :

इति श्रीमत्काशीविलासक्रियाशक्तिपरमभक्तश्रीमत्त्र्यम्बकपादाब्जसेवाप रायणेनोपनिषन्मार्गप्रवर्तकेम माधवाचार्येण विरचितायां सूतसंहितातात्पर्यदीपि कायां यज्ञवैभवस्योपरिभागे सूतगीताव्याख्यायामष्टमोऽध्यायः । ग्रन्थसङ्ख्या १९०० । सूतगीता समाप्ता । सूतगीताव्याख्यापुस्तकं सम्पूर्णमगमत् ॥

751

Sl. No : 19462 सौम्यगीता Ms. No : P. 5039/1

Beginning :

सौम्य उवाच —

वर्णसङ्करकं ज्ञानमद्वैतं विश्वरूपिणम् ।
तत्सर्वं ज्ञातुमिच्छामि ब्रूहि मे सङ्करात्मक ॥

श्रीशङ्करः—

वरं पृच्छसि त्वं सौम्य ज्ञानानां ज्ञानमुत्तमम् ।
यद्ज्ञात्वा न पुनर्जन्म जायते स्वयमीश्वरः ॥

End :

पृथिव्यां यानि तीर्थानि तानि तीर्थानि सर्वशः ।
शङ्करैक्यप्रबोधस्य कलां नार्हन्ति षोडशीम् ॥
ब्रह्महत्यासहस्राणि गोहत्यानां तथैव च ।
अस्य श्रवणमात्रेण मुच्यन्ते नात्र संशयः ॥

Colophon :

इति वर्णसङ्करकारके योगशास्त्रे शङ्करसौम्यसंवादे वेदान्तप्रकरणे चतुर्थोऽध्यायः ॥

सहस्रनाम

752

Sl. No : 19468 अनादिजङ्गमाष्टोत्तरशतनामस्तोत्रम् Ms. No : P. 10670/12

Beginning :

श्रीवीरशैवज्ञानावलम्बी नित्यो निरामयः ।
सिद्धप्रसादसंलब्धसारवक्ता च चिन्मयः ॥

End :

अनादिजङ्गमस्यैतत् नामाष्टकशतं सदा ।
यः पठेत्परया भक्त्या सर्वसिद्धिमवाप्नुयात् ॥

Colophon :

अनादिजङ्गमाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

753

Sl. No : 19469 अर्धनारीश्वरसहस्रनामावलिः Ms. No : P. 3498/1

Beginning :

कैलासशिखरे रम्ये नानामणिनिषेविते ।
कल्पकानोकहाक्रान्ते कैवल्यपददायिनि ॥
स्तोत्रं च ल देव्या नाम सहस्रजपतः । (?)
ओं बिम्बसमानायै नमः । इनेन्दुपाग्निनाथाय नमः । इन्दुचूड ×

End :

ध्यायन्ति नामसाहस्रं देवानां हितकाम्यया ।
ब्रूहि ब्रह्मन् मया प्रोक्तमिदं नामसहस्रकम् ॥
देवाश्च मुनयस्सर्वे मनुष्याश्च द्विजादयः ।
पठित्वा सकलान् कामान् लभन्ते शाश्वतं पदम् ॥

Colophon :

इति भविष्योत्तरपुराणे शिवविरिञ्चिसंवादे उभयात्मकसहस्रनामस्तोत्रं नाम चतुर्विंशोऽध्यायः ॥

754

Sl. No : 19471 **अश्वत्थनारायणाष्टोत्तरम्** **Ms. No : P. 9946/5**

Beginning :

अस्य श्री अश्वत्थनारायणस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः ।
अश्वत्थनारायणो देवता । ह्रां बीजम् । ह्रीं शक्तिः । ह्रं कीलकम् ।
श्री अश्वत्थनारायणप्रसादसिध्यर्थे मम सर्वाभीष्टफलसिध्यर्थे जपे विनियोगः ।

End :

अश्वत्थसेवा तिलपात्रदानं
गोस्पर्शनं ब्राह्मणतर्पणं च ।
एतानि सद्यः प्रहरन्ति पापं
गङ्गानदी भारतकीर्तनं च ॥
गङ्गा गङ्गेति यो ब्रूयात् योजनानां शतैरपि ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे अश्वत्थनारायणस्तोत्रं संपूर्णम् ॥

755

Sl. No : 19477 **उपनिषत्सारनामाष्टोत्तरम्** **Ms. No : P. 6519/4**

Beginning :

उत्थाय योगादभ्येत्य मान्यं रङ्गिणमार्जितैः ।
अञ्जेराराध्य वरदं नौमि वेदान्तनामभिः ॥
विष्णुर्वेदान्तजिज्ञास्यो जगज्जन्मादिकारणम् ।
शास्त्रैकवेद्यः परमः पुरुषार्थः समीक्षिता ॥

End :

रूपादधिकसौहार्दो देवयानैकदेशिकः ॥
द्रमिडोपनिषत्सारनाम्नामष्टोत्तरं शतम् ।
नारायणेन मुनिना श्रीवत्साङ्केन दर्शितः ॥
द्रमिडोपनिषत्सारनामामृतनिषेवणात् ।
संसारोऽपि ससारः स्यादलं सारस्वतान्तरैः ॥

Colophon :

— — —

756

Sl. No : 19481 उमाष्टोत्तरशतनामस्तोत्रम् **Ms. No : P. 5756/13**

Beginning:

नामाष्टकशतं वक्ष्ये उमायाः शृणु षण्मुख ।
महासम्मोहिनी देवीसुन्दरी भुवनेश्वरी ॥
एकाक्षरी महामाया एकाकी लोकनायिका ॥

End :

द्विवारन्तु पठेन्नित्यं धनधान्यसमाकुलम् ।
त्रिवारन्तु पठेन्नित्यं सर्वशत्रुविनाशनम् ।
चतुर्वारं पठेन्नित्यं प्रसन्ना स्यात् सरस्वती ॥

Colophon :

— — —

757

Sl. No : 19482 उमाष्टोत्तरस्तोत्रम् **Ms. No : P. 6013/4**

Beginning :

श्रीउमाष्टोत्तरप्रारम्भः—
रजताचलशृङ्गाग्रगृहस्थायै नमो नमः ।
हिमाताचलमहावंशपावनायै नमो नमः ॥ (?)

End :

महादेवसमायुक्तमहादेव्यै नमो नमः ।
इदं श्रीगिरिजादेव्याः नाम्नामष्टोत्तरं शतम् ।
व्यासेन कथितं सर्वरोगकर्मनिबर्हणम् ॥
स्तोत्रं श्रीगिरिजादेव्याः यो नरः पठतेऽन्वहम् ।
स नरो महदैश्वर्यं लभते वाञ्छितं फलम् ॥
आयुर्वित्तं च पुत्रांश्च भार्यामपि मनोरमाम् ।
देहान्ते मुक्तिमाप्नोति पुनरावर्तिवर्जितम् ॥

Colophon :

इति उमाष्टोत्तरशतनामं सम्पूर्णम् ॥

758

Sl. No : 19468 कार्तवीर्यार्जुनसहस्रनामस्तोत्रम् Ms No : P. 709/2

Beginning :

अस्य श्रीकार्तवीर्यार्जुनसहस्रनामस्तोत्रमहामन्त्रस्य महादेव ऋषिः । अनुष्टुप् छन्दः । श्रीकार्तवीर्यार्जुनो देवता । ओं बीजम् । ह्रीं शक्तिः क्रों कीलकम् । मम सर्वकामार्थसिद्धये जपे विनियोगः ॥

कार्तवीर्यार्जुनो राजा हैहयाधिपतिर्बली ।
धनुर्धरो महावीर्यः सत्यसन्धः प्रतापवान् ॥

End :

सहस्रनामस्तोत्राख्यं कार्तवीर्यस्य भूपतेः ।
कवचं पूर्वमेवोक्तं मया ते परमेश्वरि ॥
सहस्रनामस्तोत्रं च साम्प्रतं परिकीर्तितम् ।
महाफलं महापुण्यं महापातकनाशनम ॥
सहस्रनामग्रन्थाः ११२ । ग्रन्थाद्यन्ताः १३२ ॥

Colophon :

इति श्रीउड्डामरेश्वरतन्त्रे उमामहेश्वरसंवादे कार्तवीर्यार्जुनसहस्रनाम स्तोत्रम् ॥

759

Sl. No : 19489 कार्तवीर्यार्जुनसहस्रनामस्तोत्रम् Ms. No : C. 2682

Beginnig :

दीपदानविधिं श्रुत्वा तथा पूजाविधिं शुभाम् ।
प्रपच्छ गिरिजा देवी शङ्करं लोकशङ्करम् ॥
भगवन् देवदेवश शशाङ्कार्धविभूषण ।
\+ \+ \+ \+ \+

ईश्वरः—

कथयिष्यामि ते देवि सर्वसिद्धिविधायकम् ।
सहस्रनामस्तोत्रं च कार्तवीर्यस्य भूभुजः ॥

End:

सहस्रनामस्तोत्राख्यं कार्तवीर्यस्य भूपतेः ।
कवचं पूर्वमेवोक्तं मया ते परमेश्वरि ॥
सहस्रनामस्तोत्रं च साम्प्रतं परिकीर्तितम् ।
महाफलं महापुण्यं महापातकनाशनम् ॥

Colophon:

इति उड्डामरेश्वरन्त्रे पार्वतीपरमेश्वरसंवादे कार्तवीयार्जुनसहस्रनाम स्तोत्रं सम्पूर्णम् ॥

760

Sl. No : 19491 काश्यायोष्टोत्तरशतम् **Ms. No : C. 4688/5**

Beginning :

काशीजनलोकालाचित्सुख कालाकरी अनेकाला ।
नासीदुर्मदनालाहुः सहनालाहुरन्तदहन्वल ॥ (?)

End :

काशीनिवासगुरुदीक्षितसामराज
श्री सामराजसमता च जयाविराजे ।
तत्पादपंकजयुगीभ्रमरस्वभावे
विश्वासराय भवभीतिज्वलीं निभावे ॥

Colophon :

इति श्रीमत्केशवरायतनयविश्वासरायविरचितेश्री काश्यार्याष्टोत्तरशतं संपूर्णम् ॥

761

Sl. No : 19492 कावेर्यष्टोत्तरम् **Ms. No : P. 8181/8**

Beginning :

कावेर्यष्टोत्तरम् —
यस्या मध्ये हरिः शेते यन्मूलं ब्रह्मणा श्रितम् ।
पार्श्वद्वयं शिवैर्जुष्टं तस्यै सह्यभुवे नमः ॥
अस्य श्री कावेर्यष्टोत्तरशतदिव्यनाममृतस्तोत्रमन्त्रस्य । भार्गव ऋषिः ॥

End :

कावेर्याः कलिपापघ्नमगतीनां गतिप्रदम् ।
अनेनोपास्य नदीं कावेरीं नृपसत्तम ॥
प्रसन्ना स्तोत्रय गतिं प्रत्यावृत्य चिरेण ह ॥

Colophon :

इति श्रीपद्मपुराणे कावेर्यष्टोत्तरं संपूर्णम् ॥

762

Sl. No : 19495 कृष्णसहस्रनामस्तोत्रम् Ms. No : P. 9644/9

Beginning :

श्रीसूतः—

श्रीमत्कृष्णमहीपालः वंशरक्षामणिः स्थिरः ।
राजा हरिहरः क्षोणीं रक्षत्यम्बुधिमेखलाम् ॥
स राजा सर्वमन्त्रज्ञः समभ्यर्च्य वरप्रदम् ।
देवं श्रियःपतिं स्तुत्या मस्तकाद्वेदवेदितम् ॥

End :

सर्वसिद्धिप्रदं नृणां सर्वविघ्ननिवारणम् ।
कृष्णप्रसादाज्जनकं सत्यमेतन्न संशयः ॥
किमिदं बहुनोक्तेन यः पठेत्सततं मुदा ।
ब्रह्मानन्दमवाप्यन्ते कृष्णसायुज्यमाप्नुयात् ॥

Colophon :

इति श्रीविष्णुधर्मोत्तरे सूतशौनकसंवादे श्रीकृष्णसहस्रनामस्तोत्रं संपूर्णम् ॥

763

Sl. No : 19500 कृष्णाष्टोत्तरशतनामस्तोत्रम् Ms. No : P. 5760/8

eginning :

श्रीकृष्णः कमलानाथो वासुदेवस्सनातनः ।
वसुदेवात्मजः पुण्यो लीलामानुषविग्रहः ॥
श्रीवत्सकौस्तुभधरः यशोदावत्सलो हरिः ।
चतुर्भुजात्तचक्रासिगदाशङ्खाद्युदायुधः ॥

End :

इमं मन्त्रं महादेवि जपन्नेव दिवानिशम् ।
सर्वग्रहानुग्रहभाक् सर्वप्रियतमो भवेत् ।
निविश्य भोगानन्ते च विष्णोः सायुज्यमाप्नुयात् ॥

Colophon :

इति ब्रह्माण्डपुराणे धरणीशेषसंवादे उत्तरखण्डे कृष्णाष्टोत्तरशतदिव्यनाम स्तोत्रं सम्पूर्णम् ॥

764

Sl. No : 19510 **कृष्णाष्टोत्तरम्** **Ms. No : P. 9644/8**

Beginning :

वसुन्धरे वरारोहे नानानाम समृद्धिदम् ।
सर्वमंङ्गलमूर्धिन्यामणिमाद्यष्टसिद्धिदम् ॥
महापातककोटिघ्नं सर्वतीर्थफलप्रदम् ।
समस्तवेदयज्ञानां फलदं पापनाशनम् ॥

End :

ज्ञानमुद्राय कृष्णाय गीतामृतह्रदे नमः ।
इदं मन्त्रं महादेवि जपन्नेव दिवानिशम् ।
युक्त्यभोगानन्तश्रीः विष्णुसायुज्यमाप्नुयात् ॥ (?)

Colophon :

इति धरणीशेषसंवादे कृष्णदिव्यनामामृतस्तोत्रं सम्पूर्णम् ॥

765

Sl. No : 19545 **गङ्गासहस्रनामस्तोत्रम्** **Ms. No : P. 7051**

Beginning :

अगस्त्य उवाच—
विना स्नानेन गङ्गायां नृणां जन्म निरर्थकम् ॥
उपायान्तरमस्त्यद्य येन स्नानफलं लभेत् ॥
अशक्तानां × गङ्गास्नानं कथं भवेत् ।
यद्यस्ति किञ्चित् × गङ्गास्नानफलप्रदम् × तद्ब्रूहि प्रणताय मे ॥

स्कन्दः उवाच —

नाम्नां सहस्रं गङ्गायाः स्तवराजं सुशोभनम् ।
जप्यानां परमं जप्यं वेदोपनिषदां समम् ॥ + +
ओङ्काररूपिण्यजरा कुलानन्तामृतास्रवा ।
अत्युदाराभयाशोकालकनन्दामृतालया ॥

End ..

एतत् स्तोत्रं परं पुण्यं पुरा प्रोक्तं पिनाकिना ।
विष्णवे निजभक्ताय मुक्तिबीजाक्षरास्पदम् ॥
गङ्गास्नानप्रतिनिधि स्तोत्रमेतन्मयोदितम् ।
सिष्णासुर्जाह्नवीं तस्मादेतत्स्तोत्रं जपेत्सुधीः ॥

Colophon:

इति श्रीस्कन्दपुराणे काशीखण्डे गङ्गासहस्रनाम एकोनत्रिंशोऽध्यायः ॥

766

Sl. No : 19553 गङ्गासहस्रनामस्तवव्याख्या Ms. No : C. 1503/b

Beginning:

नमो भगवते तस्मै ब्रह्मविष्णुशिवात्मने ।
परब्रह्मस्वरूपिण्यै गङ्गायै च नमो नमः ॥
एकोनत्रिंशदध्याये गङ्गानामसहस्रकम् ।
वर्ण्यते भूरि माहात्म्यं सर्वदोषविदारणम् ॥

पूर्वोक्तापरिमितगुणगणाया गङ्गायाः स्नानमन्तरेण नृणां जन्म व्यर्थं स्यात् × × अस्त्युपाय इति इदं नाम्नां सहस्रमित्यन्वयः ॥

End:

सिष्णासुर्गङ्गायां मज्जनस्नानमन्तरेण गङ्गास्नानेप्सुः । मातापि सन्त्यजे त्पुत्रमिति शास्त्रप्रमाणतः त्राहि मां त्रिजगन्मातः गङ्गे विष्णुपदोद्भवे इति ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यरामेन्द्रवनभगवत्पूज्यपादशिष्येण रामानन्देन चैतन्यवनापरपर्यायेण कृतायां काशीखण्डटीकायां एकोनत्रिंशत्तमोऽध्यायः ॥

767

Sl. No : 19557 गणेशशतनामस्तोत्रम् **Ms. No : P. 55/11**

Beginning :

अस्य श्री विघ्नेश्वरद्वादशनामस्तोत्रमन्त्रस्य ईश्वर ऋषिः विघ्नेश्वरो देवता त्रिष्टुप्छन्दः ॥

\+ + + + +

गण्डभ्रमद्भ्रमरपूरितकर्णतालम् ।
गन्धर्वयक्षसुरपूजितपादपद्मं
गङ्गाधरस्य तनयं शरणं प्रपद्ये ॥

End :

यदिदं पठति स्तोत्रं षण्मासेन वरं लभेत् ।
संवत्सरेण सिध्यन्ति लभते नात्र संशयः ॥

Colophon :

— — —

768

Sl. No : 19558 गणेशद्वादशनामस्तुतिः **Ms. No : P. 4526/26**

Beginning :

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्त्या यः संसरेन्नित्यं आयुः काम्यार्थसिद्धये ॥
प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ॥

End :

जपन् गणपतिस्तोत्रं षड्भिः मासैः फलं लभेत् ।
संवत्सहरेण सिद्धिं तु लभते नात्र संशयः ॥
अष्टौ ब्राह्मणान्भावयित्वा ततो विद्यां प्रदापयेत् ॥

Colophon :

इति ब्रह्मनारदसंवादे गणपतिद्वादशनामस्तुतिः ॥

769

Sl. No : 19561 **गणपतिसहस्रनामाष्टोत्तरम्** **Ms. No : P. 2210/3**

Beginning :

देव्युवाच —

भगवन् गणनाथस्य वरदस्य महात्मनः ।
श्रोतुं नामसहस्रं मे हृदयं चोत्सुकायते ॥

श्री भैरवउवाच —

शृणु देवि रहस्यं मे यन्मया कीर्तितं पुरा ।
तव भक्त्या गणेशस्य वक्ष्ये नामसहस्रकम् ॥

End :

इतीदं पुण्यसर्वस्वं मन्त्रनाम्नां सहस्रकम् ।
महागणपतेर्गोप्यं गोपनीयं स्वयोनिवत् ॥

Colophon :

इति रुद्रयामळे तन्त्रे महागणपतिस्तवः ॥

770

Sl. No : 19564 **गणपतिसहस्रनामाष्टोत्तरम्** **Ms. No : P. 5946/13**

Beginning :

देवः पूर्वं पुरारातिः पुरत्रयजयोद्यमे ।
अनर्चनाद्गणेशस्य जातो विघ्नाकुलः × लः ॥

श्रीगणपतिरुवाच —

गणेश्वरो गणक्रीडो गणनाथो गणाधिपः ।

End :

अनन्तनामानन्तश्रीः अनन्तोऽनन्तसौख्यदः ॥

अथ फलस्तुतिः —

इति वैनायकं नाम्नां सहस्रमिदमीरितम् ।
उपायनं ददेद्भक्त्या मनागत्र न संशयः ।
नमो + + गजाननाय ते ॥

olophon :

— — —

771

Sl. No : 19569 **गणेशसहस्रनामस्तुतिः** **Ms. No: C. 530/1**

Beginning :

देवः पूर्वं पुरारातिः पुरत्रयजयोद्यमे ।
अनर्चनाद्गणेशस्य जातो विघ्नाकुलः किल ॥
मनसा स विनिर्धार्य ततस्तद्विघ्नकारणम् ।
महागणपतिं भक्त्या समभ्यर्च्य यथाविधि ॥

End :

नमो नमः सुरवरपूजिताङ्घ्रये
नमो नमो विपुलमङ्गलात्मने ।
नमो नमो विपुलदयैकसिन्धवे
नमो नमः करिकलभाननाय ते ॥

Colophon :

इति वैनायकपुराणे गणेशसहस्रनामस्तोत्रं सम्पूर्णम् ॥

772

Sl. No : 19573 **गणेशसहस्रनामस्तोत्रव्याख्या** **Ms. No : C. 4035/2**

Beginning :

गणेशो वः पायात् प्रणमत गणेशं जगदिदं
गणेशेन त्रातं नम इह गणेशाय महते ।
\+ + + + +

व्यासेन पृष्टमर्थं दीनजनानुजिघृक्षयोपदिदिक्षुर्भगवान् ब्रह्मा सहस्रनाम स्तोत्रं जपितव्यः ।

End :

मंगलमाचरति नमो नम इति । विपुलपदं परं धाम तस्य मुख्या सिद्धिः यस्मात्सः स्पष्टमन्यदिति सर्वं शिवम् ।

गम्भीरबुधयज्वनस्तनुभवोऽपिवाराणसि
त्रिलोचनपदानुगः + कृतमखोऽग्निचिद्भास्करः ॥

महागणपतेर्महान्त्यपि सहस्रनामानि ।
तद्दयाजनितया धिया सुजनतुष्टये व्याकरोत् ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारवारपारीणभारत्युपनामकगंभीररायदीक्षितसूरिसूनुभास्कररायदीक्षिताग्निचिता रचितो गणपतिसहस्रनामार्थप्रकाशकः खद्योतः सम्पूर्णः ॥

773

Sl. No : 19586 **गणेशाष्टोत्तरशतनामस्तोत्रम्** Ms. No : P· 1759/11

Beginning :

गणेशो गणनाथश्च गणादेशो गजाननः ।
गणेश्वरो गणाध्यक्षः गणपो गणनायकः ॥

End :

अभ्यर्च्य गणनाथं च श्रद्धाभक्तिसमन्वितः ।
सर्वान् कामानवाप्नोति विघ्नेशः सुप्रसीदति ॥

Colophon :

इति श्री रुद्रयामले विघ्नेशाष्टोत्तरशतं समाप्तम् ॥

774

Sl· No : 19587 **गणपत्यष्टोत्तरम्** Ms. No: C. 694/35

Beginning :

श्रीचामुण्डाप्रेमपुत्रः श्रीकण्ठेश्वरलालितः ।
श्रीब्रह्मविष्णुरुद्रार्च्यः श्रीशैवागमसंस्तुतः ॥
एकदन्तो द्विदेहाढ्यस्त्रिलोचनविराजितः ।
चतुर्बाहुः पञ्चकरः षडाननसुपूर्वजः ॥

End :

श्रीराजराजसेव्याङ्घ्रिः श्रीकृष्णवरदायकः ।
एवमष्टोत्तरशतं विघ्नराजस्य कीर्तितम ।
यः पठेत्सततं भक्त्या सर्वसिद्धिमवाप्नुयात् ॥

Colpohon:

इति गणेशपुराणे गणपत्यष्टोत्तरशतं सम्पूर्णम् ॥

775

Sl.No : 19608 गायत्रीसहस्रनामस्तोत्रम् Ms. No : P. 8029

Beginning :

तकाररूपा तद्रूपी तत्पदार्थस्वरूपिणी ।
तपस्स्वाध्यायनिरता तपस्वी वाग्विदां वरा ॥
तत्कीर्तिगुणसम्पन्ना तत्त्ववादी तपोनिधिः ।
तत्त्वानुसन्धानतपोलोकनिवासिनी ॥ (१)

End :

इदं रहस्यं परमं परं स्वस्त्ययनं महत् ।
यः सकृद्वा पठेन् स्तोत्रं शृणुयाद्वा समाहितः ॥
लभते च ततः कामान् अन्ते ब्रह्मपुरं ययौ ।
सर्वयज्ञफलं देवि भवत्येव न संशयः ॥

Colophon :

इति श्रीरुद्रयामिले उमामहेश्वरसंवादे गायत्रीसहस्रनामस्तोत्रं सम्पूर्णम् ॥

776

Sl. No : 19610 गायत्रीसहस्रनामस्तोत्रम् Ms. No : P. 8781/1

Beginning :

नारद उवाच —
भगवन् सर्वलोकेश सर्वशास्त्रार्थपारग ।
श्रुतिस्मृतिपुराणानां रहस्यं त्वन्मुखात् श्रुतम् ॥
सर्वपापहरं किं वा केनाविद्या निवर्तते ।
केन वा ब्रह्मविज्ञानं किं नु मोक्षैकसाधकम् ॥

End :

सर्वशत्रुक्षयं याति जपमात्रान्न संशयः ।
मोक्षैश्वर्यमवाप्नोति वारं वारं जपेत्क्रमात् ॥
शुक्रवारे गुरोर्वारे अमाया सङ्क्रमे जपेत् ।
विशेषदिवसे प्राप्ते सर्वाभीष्टं लभेद्ध्रुवम् ॥

Colophon :

इति विष्णुयामले गायत्र्या अष्टसहस्रकम् समाप्तम् ॥

777

Sl. No : 19611 गायत्रीसहस्रनामस्तोत्रम् Ms. No: P. 8781/7

Beginning :

कैलासे सुखमासीनं तुषारकरशेखरम् ।
बद्धाञ्जलिः नमस्कृत्य पर्यपृच्छत पार्वती ॥

श्रीपार्वत्युवाच —

किं विन्यस्य त्वया देव स्वशरीरे निरन्तरम् ।
कथं मे तादृशी कान्तिः कथिताष्टसमृद्धयः ॥

End :

यः सकृद्वा पठेत् स्तोत्रं शृणुयाद्वा समाहितः ।
लभते च ततः कामान् अन्ते ब्रह्मपुरं ययौ ॥
सर्वयज्ञफलं देवि भवत्येव न संशयः ।
स च शत्रुं जयेत्सद्यः मातङ्गानिव केसरी ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे गायत्रीदिव्यसहस्रनामस्तोत्रं सम्पूर्णम् ॥

778

Sl. No : 19615 गायत्रीसहस्रनामस्तोत्रम् Ms. No : B· 916

Beginning :

ओंकाररूपा तद्रूपी तत्पदार्थस्वरूपिणी ।
तपःस्वाध्यायनिरता तपस्वी वाग्विदां वरा ॥
तत्कीर्तिगुणसम्पन्ना तत्त्ववादी तपोनिधिः ।
तत्पदैक्यानुसन्धाना तपोलोकनिवासिनी ॥

End :

यः सकृद्वा पठेत् स्तोत्रं शृणुयाद्वा समाहितः ।
लभते च ततः कामान् अन्ते ब्रह्मपुरं व्रजेत् ॥
सर्वयज्ञफलं देवी भवत्येव न संशयः ।
स च शत्रून् जयेत्सद्यो मातङ्गानिव केसरी ॥

Colophon :

इति श्रीशिवपुराणे उमामहेश्वरसंवादे गायत्रीसहस्रनामस्तोत्रं सम्पूर्णम् ॥

779

Sl.No : 19620 गायत्र्यष्टोत्तरम् Ms. No : P. 55/17

Beginning :

श्रीरामचन्द्र उवाच —
विश्वामित्र महाप्राज्ञ गायत्रीमन्त्रपारग ।
श्रोतुमिच्छामि यत्नेन नाम्नामष्टोत्तरं शतम् ॥
विश्वामित्र उवाच—
साधु पृष्टं त्वया प्राज्ञ रघुवंशसमुद्भव ॥

End :

पुत्रप्रदमपुत्राणां दरिद्राणां धनप्रदम् ।
रोगिणां रोगशमनं सर्वैश्वर्यप्रवर्धनम् ॥
किमत्र बहुनोक्तेन स्तोत्रं सर्वफलप्रदम् ।
इति रामो जपित्वा तु सर्वान् कामानवाप्नुयात् ॥

Colophon :

इति विश्वामित्रकल्पे विश्वामित्रराघवसंवादे गायत्र्यष्टोत्तरशतं सम्पूर्णम् ॥

780

Sl. No : 19629 गायत्र्यष्टोत्तरम् Ms. No : C. 4681/45

Beginning :

गायत्री च जगन्माता परब्रह्मस्वरूपिणी ।
परमार्थप्रदा जाया ब्रह्मतेजोविवर्धिनी ॥
ब्रह्मास्त्ररूपिणी भव्या त्रिकालध्येयरूपिणी ।
त्रिमूर्तिरूपा सर्वज्ञा वेदमाता मनोन्मनी ॥

End :

मध्यदा पालकामात्या महामात्रफलप्रदा ।
इत्यष्टोत्तरनामानि गायत्र्याः प्रोक्तवान् मुनिः ॥
एतदष्टोत्तरशतं नित्यं भक्तियुक्तः शुचिः ।
त्रिसन्ध्यं यः पठेत्सर्वमन्त्रसिद्धिमवाप्नुयात् ॥

Colpohon:

इति विश्वामित्रसंहितायां गायत्री अष्टोत्तरशतनामश्लोकं सम्पूर्णम् ॥

781

Sl. No : 19631 **गुरुसहस्रनामस्तोत्रम्** **Ms. No : C. 3780/25**

Beginning :

पार्वत्युवाच —

हिमाद्रिशिखरे रम्ये नानामुनिसुशोभिते ।
कल्पद्रुमलताकीर्णे नानापुष्पोपशोभिते ॥
मुनिसिद्धसमाकर्णे भूतमध्ये सुशोभिते ।
तं कदाचित्सुखासीनं पदं गुरुमहेश्वरम् ॥

End :

त्वद्रूपं सकलं प्राप्तो हंसोहंसः प्रजापतिः ।
हंसोज्वलोलसत्कीर्तिसोहंतः सदक्षरः ॥
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।
गोपनीयं प्रयत्नेन जननीजारगर्भवत् ॥

Colophon :

इति श्री रुद्रयामले उत्तरतन्त्रे परमहंसोपाख्याने श्री परमभैरवसंवादे श्री गुरुसहस्रनामस्तोत्रं सम्पूर्णम् ॥

782

Sl. No : 19632 **गो-अष्टोत्तरम्** **Ms. No : P. 4217/1**

Beginning :

कामधुक्कामफलदा वागीशाद्यमिवन्दिता ।
नन्दिनी जननी चैव नन्दितामरसंस्तुता ॥
सर्वाघौघप्रशमनी सुनिर्वाणफलप्रदा ।
निस्सीमकरुणापूरा नीतिमार्गविहारिणी ॥
सदामन्देष्टफलदा वन्दारुजनवर्षिणी ।
करुणारसकल्लोलतरङ्गितदृगञ्चला ॥

विश्वातिशायी सुगुणा विरूपाक्षदयाप्रदा ।
सर्ववेदस्तुता देवी सर्वाभीष्टफलप्रदा ॥

Colophon :

— — —

783

Sl. No : 19633 गोपालाष्टोत्तरम् Ms No : P. 3136/19

Beginning :

कैलासे शङ्करं देवी पप्रच्छ रहसि स्थितम् ।
केनोपायेन मर्त्यानां मन्त्रसिद्धिर्भवेत्सदा ॥ + +
शृणु पार्वति वक्ष्यामि गोपालाष्टोत्तरं शतम् ॥

End :

गोग्रासहारी गोकण्डू विमोचननखावलिः । × ×
इत्येवं गोपिकानाथनाम्नामष्टोत्तरं शतम् ॥

Colophon :

इति गोपालाष्टोत्तरशतं सम्पूर्णम् ॥

784

Sl. No : 19643 चामुण्डात्रिशती Ms. No : B. 326/20

Beginning :

एकदा मुनयस्सर्वे नैमिशारण्यवासिनः ।
नमस्कृत्वाथ पप्रच्छुः सूतं पौराणिकोत्तमम् ॥
ऋषयः ऊचुः—
वद सूत महाप्राज्ञ रहस्यं भुक्तिमुक्तिदम् ।

End:

श्रीराजराजेन्द्रवंशपालनैकधुरन्धरा ।
श्रीचामुण्डिकानाम्नां त्रिशती भक्तिमुक्तिदा ॥

Colophon :

इति स्कान्दे शिवरहस्ये हयग्रीवागस्त्यसंवादे श्रीचामुण्डात्रिशतीनामावली श्लोकरूपा सम्पूर्णा ॥

785

Sl. No : 19645 चामुण्डाद्विशतनामस्तोत्रम् Ms. No : B. 326/23

Beginning :

श्रीकण्ठेशमनःकान्तां श्रीमहाविष्णुसोदरीम् ।
महाबलचलावासां चामुण्डाम्बां भजाम्यहम् ॥
महाकाली महालक्ष्मी महावाणी मनोन्मनीम् ।
महामायां ज्वालाज्जिह्वां चामुण्डाम्बां भजाम्यहम् ॥

End :

श्रीदेवीकरुणाकटाक्षकलितः श्रीकृष्णपृथ्वीश्वरो
लक्ष्मीसिद्धिकरप्रभेदलसिते वार्धीन्द्रसद्मान्विते ।
चक्रे पार्श्वविलोमकोणतुरगप्लुत्यर्धचन्द्रस्फुर-
न्नागाकारमनोज्ञशैलतनयास्तोत्रं करोत्यद्भुतम् ॥

Colophon :

इति श्रीचामुण्डाद्विशतीनामस्तोत्रं सम्पूर्णम् ॥

786

Sl. No : 19649 जगद्गुर्वष्टोत्तरशतनामरत्नमाला Ms. No : B. 551/1

Beginning :

मत्तेभवदनं बन्दे सर्वविघ्नोपशान्तये ।
भक्ता यस्य प्रसादेन भोगमोक्षाववाप्नुयुः ॥
श्रीशारदां शारदचन्द्रवक्त्रां
शुचिस्मितां मंजुलवाग्विलासाम् ।
वर्णाक्षमालादिविराजमानां
चिद्रूपिणीं सन्ततमानतोऽस्मि ॥

End :

परिपूर्णः पूजया वै तोषं प्राप्नोति निश्चितं गुरुराट् ।
इत्यालोच्य स्वान्ते कृतवानष्टोत्तरं भक्त्या ॥
खराब्दे चाश्विने कृष्णपञ्चम्यां गुरुवासरे ।
जगद्गुरूणां सान्निध्ये ह्यर्पयामास भक्तितः ॥

Colophon :

इति श्रीजगद्गुर्वष्टोत्तरशतनामरत्नमाला सम्पूर्णा ॥

787

Sl. No : 19650 जगद्गुर्वष्टोत्तरशतनामव्याख्या **Ms. No: B. 551/2**

Beginning :

अथ श्री जगद्गुरूणां अष्टोत्तरशतनामरत्नमालयाः रत्नप्रभानामकटीका लिख्यते । तत्रादौ अवतरणिका ॥

नारायणसमारंभां शङ्कराचार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

प्रारिप्सितस्य ग्रन्थस्य × गणेशशारदाजगद्गुरूणां नमस्काररूपं मङ्गलमातनोति – मत्तेभेति ।

End :

तं तं लोकं जयते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद्भूतिकाम इति मुण्डकोपनिषदि तृतीयमुण्डके प्रथमखण्डे उक्तत्वात् सकलेष्टार्थसिद्धिश्च भवतीत्याशयः ।

Colophon :

इति श्रीकाशीमणिकर्णिकातीरवासि श्रीरामब्रह्मानन्दगुरुसेवापरायणश्रीनिजानन्दयोगीन्द्रशिष्यवर्यश्रीकृष्णानन्दगुरुपदसेवापरायणेन कृष्णेन विरचिता श्री-जगद्गुर्वष्टोत्तरशतनामरत्नमालायाः रत्नप्रभानामकटीका समाप्ता ॥

788

Sl. No : 19653 जिनसहस्रनाम **Ms. No : P. 3817/28**

Beginning :

प्रसिद्धाष्टसहस्रेद्धलक्षणं त्वां गिरां पतिम् ।
नाम्नामष्टसहस्रेण तोष्टुमोऽभीष्टसिद्धये ॥
श्रीमान् स्वयंभूवृषभः शम्भवः शम्भुरात्मभूः ॥

End :

तं देवं त्रिदशाधिपार्चितपदं हेतिक्षयानन्तरं
प्रोत्थानन्तचतुष्टयं जिनमिनं भव्याब्जिनीनामिनम् ।
मानस्तम्भविलोकनानतजगन्मान्यं त्रिलोकीपतिं
प्रास्ताचित्यबहिर्विभूतिमनघं भक्त्याप्रवन्दामहे ।।

Colophon :

सहस्रनामस्तवनं संपूर्णमङ्गलमहा ॥

789

Sl. No : 19660 तुलसीद्वादशनामस्तोत्रम् Ms. No : P. 4171/1

Beginning :

ओं नमस्तुलसि कल्याणि नमो विष्णुप्रिये शुभे ।
नमो मोक्षप्रदे देवि नमः सप × × ।।
× महालक्ष्म्या लक्ष्मविधें यशस्विनि ॥

End :

सुमाञ्जलिसमायुक्तैः तुलस्याः कोमलैर्दलैः ।
ये कुर्वन्ति हरेः पूजां ते कृतार्थाः कलौ युगे ॥

Colophon :

× × रते तुलसीद्वादशनामस्तोत्रं सम्पूर्णम् ॥

790

Sl. No : 19665 तुलस्यष्टोत्तरशतनामस्तोत्रम् Ms. No : P. 1045/39

Beginning :

तुलसी श्रीसखी देवी देवपालादिवस्सुखी ।
धारणी × धात्री सावित्री सत्यसङ्गरा ।।

End :

श्याम × निधिश्शीता शतानन्दा शतदूतीः ।
इतीदं तुलसीदेव्या नाम्नामष्टोत्तरं शतम ॥

Colophon :

इति तुलसीनामाष्टोत्तरं सम्पूर्णम् ।।

791

Sl. No : 19666 त्रिपुरसुन्दरीसहस्रनाम Ms. No : P. 188/12

Beginning :

इक्षुकोदण्डपुष्पेक्षुपशांकुशचतुर्भुजाम ॥
उद्यत्सूर्यनिभां वन्दे महात्रिपुरसुन्दरीम् ।

देव्युवाच—

भगवन् भाविताशेषविशेषकरुणानिधे ।
देव्यास्त्रिपुरसुन्दर्या मन्त्रनामसहस्रकम् ॥

End :

न शक्यते वरारोहे कल्पकोटिशतैरपि ।
पाशाङ्कुशेक्षुचापप्रसवशरस्तोमचारुकरकमलाम् ॥
अम्बामपारकरूणां वन्देऽहं त्रिपुरसुन्दरीम् ॥

Colophon :

— — —

792

Sl. No : 19669 त्रिपुरसुन्दरीसहस्रनाम **Ms. No : P. 4999/15**

Beginning:

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
शिलापादपमध्यस्थे सिद्धगन्धर्वसेविते ॥
मणिमण्डपमध्यस्थे नानारत्नोपशोभिते ।
तं कदाचित्सुखीनं स्कन्दः पप्रच्छ शङ्करम् ॥

End :

तत्पुण्यकोटिगुणितं सकृज्जप्त्वा लभेन्नरः ।
कृत्वा महान्तं बलवान् पुत्रवान् सर्वसंपदः ॥
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ।
स यास्यति न सन्देहः स्तवराजस्य कीर्तनात् ॥

Colophon :

इति श्रीमद्यामलेश्वरतन्त्रे कार्तिकेयहरसंवादे श्रीमहात्रिपुरसुन्दरीसहस्र
नामस्तोत्रं सम्पूर्णम् ॥

793

Sl. No : 19672 त्रिपुरसुन्दर्यष्टोत्तरतम् **Ms. No : P. 7982/82**

Beginnig :

आर्या कात्यायिनी गौरी कौमारी विन्ध्यवासिनी ।
वागीश्वरी महामाया काली कङ्कालधारिणी ॥
षोडशा तरुणी चोग्री स्थूलजङ्घी महेश्वरी ॥

End :

जपन्ती रक्तया वीरा हातातुंकारनादिनी ।
नारायणी विश्वरूपी मेरुमन्दरवासिनी ॥
श्री मेरुमन्दरवासिन्यै नमः ॥
श्रीमत्त्रिपुरसुन्दर्यै नमः ॥

Colophon :

त्रिपुरी अष्टोत्तरं सम्पूर्णम् ॥

794

Sl. No : 19673 **त्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रम्** Ms. No : P. 10670/3

Beginning :

उमा महेश्वरी कालि गिरिजा शाङ्करी शिवा ।
पार्वती चण्डिका गौरी जगन्माता शिवप्रिया ।
चन्द्रचूडा त्रिनेत्रा च शाम्भवी सिंहवाहिनी ॥

End :

अष्टोत्तरशतं नाम पार्वत्याश्च महामतम् ।
यः पठेच्छृणुयाद्वापि रहस्यं परमामृतम ॥
तस्य मृत्युभयं नास्ति तस्य व्याधिभयं तथा ।
तस्य शत्रुभयं नास्ति लोकपूज्यस्स एव हि ॥

Colophon :

त्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥

795

Sl. No : 19677 **दक्षिणामूर्तिसहस्रनाम** Ms. No : P. 118/8

Beginnig :

पराशक्तिरुवाच —

देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकम् ।
सुगुप्तमपि देवेश कथयस्व महेश्वर ॥
\+ \+ \+ \+ \+

\+ + × + +

अस्य नाम सहस्रेह्यावेदसाररहस्यकम् ।
यस्सकृत्पठनादेव ब्रह्मा वेदार्थपारगः ॥

End :

गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।
तस्मात्सर्वप्रयत्नेन ब्रह्मविद्यासमं भवेत् ॥
स्वयोनिरिव गोप्तव्यं न देयं यस्य कस्यचित् ।
इति संक्षेपतः प्रोक्तः किमन्यच्छ्रोतुमिच्छसि ॥

Colophon :

इति श्रीचिदम्बरनटनतन्त्रे × रसोपाख्याने पूर्वषट्के श्रीदक्षिणामूर्ति सहस्रनामस्तोत्रं सम्पूर्णम् ॥

796

Sl. No : 19679 दक्षिणामूर्तिसहस्रनामस्तोत्रम् **Ms. No : P. 5946/14**

Beginning :

पार्वत्युवाच—
देवदेव जगन्नाथ भगवन् परमेश्वर ।
चतुर्विंशतिमूर्तीनां नामान्युक्तान्यनुक्रमात् ॥
दक्षिणामूर्तिनामानि नोक्तानि परमेश्वर ।
इदानीं श्रोतुमिच्छामि वक्तुमर्हसि साम्प्रतम् ॥

End :

इत्येतन्नामसाहस्रं कथितं तव पार्वति ।
रहस्यातिरहस्यं च गोपनीयं प्रयत्नतः ।
चतुर्वर्गप्रदं नृणां किमन्यच्छ्रोतुमिच्छसि ॥

Colophon :

इति श्रीचिदबरनटनतत्रे उमामहेश्वरसंवादे श्रीमेधादक्षिणामूर्तिसहस्रं नाम पञ्चदशोऽध्यायः ॥

797

Sl. No : 19682 **दक्षिणामूर्तिसहस्रनाम** Ms. No : C. 4195/6

Beginning :

श्रीपराशक्तिरुवाच—

देवेश श्रोतमिच्छामि रहस्यातिरहस्यकम् ।
सुगुप्तमपि देवेश कथयस्व महेश्वर ।।

ईश्वर उवाच—

रहस्यातिरहस्यं च × × ।
इति संचिन्त्य देवस्य नामसाहस्रकं पठेत् ॥

End :

स्वयोनिरिव गोप्तव्यं न देयं यस्य कस्य चित् ।
इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ।।

Colophon :

इति श्री चिदम्बरनटतन्त्रे दक्षिणामूर्तिसहस्रनामामृतं संपूर्णम् ।।

798

Sl. No : 19686 **दक्षिणामूर्त्यष्टोत्तर** Ms. No: C. 4195/7

Beginning :

नारदं च मुनिश्रेष्ठं यदवोचतुरत्परम् । (?)
ब्रह्मा प्रोवाच तनयं काकपक्षशिखान्वितम् ।।
गुर्वन्तेवासिनं नित्यं सान्निध्यं च करोति यः ।
तस्योऽपनीतपुत्रत्वं शीघ्रं याहि गुरोर्गृहम् ॥

End :

राजयक्ष्मादिरोगाणां विनिहन्ता सुरेश्वरः ॥

ओं नमो भगवते गुर्वन्तेवासिने वत्सलाय सूक्ष्मरूपगुरवे × भूतप्रेत पिशाचब्रह्मराक्षसान् कृष्णावर्तेन प्रापय प्रापय क्लीं श्रीं ह्रीं ओं नमः ।।

Colpohon:

इति श्री मार्कण्डेयविरचिते काण्डशतके षड्विंशतिकाण्डे दीपदक्षिणामूर्ति प्रशंसायां दक्षिणामूर्त्यष्टोत्तरशतनाम सम्पूर्णम् ।।

799

Sl. No : 19693 **दत्तत्रेयसहस्रनामस्तोत्रम्** **Ms. No : C. 3447/1**

Beginning :

भृगुरुवाच—

ब्रह्मन् त्वया महाभाग सर्वलोकपितामह ।

नाम्नामष्टोत्तरं दिव्यसहस्रं वद मे गुरो ॥

ब्रह्मोवाच—

साधु पृष्टं त्वया ज्ञानिन् दत्तात्रेयस्य धीमतः ।

वक्ष्यामि श्रृणु निश्चित्तं नाम्नां दिव्यसहस्रकम् ।

\+ + + + +

विष्णुर्दत्तोऽत्रिपुत्रश्च योगीशः सच्चिदाकृतिः ॥

End :

कारुण्य पूर्णनेत्रश्च योगीशः स्मतृगामी जनार्दनः ॥

गौणनामसहस्रं ते साष्टोत्तरमिदं महत् ।

गुह्याद्गुह्यतमं मन्त्रं विद्धि ब्रह्मन्निदं परम् ॥

Colophon:

इति दत्ततत्वप्रदीपिकायां उत्तरखण्डे ब्रह्माण्डपुराणे सहस्रनामकथनं नाम नवमोऽध्यायः ॥

800

Sl. No : 19694 **दत्तत्रेयष्टोत्तरम्** **Ms. No : C. 3474/8**

Beginnig :

अस्य श्रीदत्तात्रेयाष्टोतरशतसहस्रदिव्यनामामृतस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः । + + + ध्यानम्—

सत्यानन्दविशिष्टरूपकमनिर्वाच्यप्रभावास्पदं

नित्याकारमतीन्द्रियस्फुटमहावैराग्यतेजोमयम् ।

सर्वस्वप्रदमात्मबोधविषयं विष्ण्वीश्वराब्जासना-

नन्दोत्कृष्टपदप्रदाननिरतं दत्तंविरक्तं भजे ॥

× × × × ×

दत्तात्रेयः स्वयं व्यक्तः सर्वज्ञः पुरुषोत्तमः ।
अवधूतो हरिः कृष्णः केशवः क्लेशनाशनः ॥

End :

थ इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति श्रीस्कान्दे पुराणे स्कन्दपुरन्दरसंवादे श्रीदत्तात्रेयसहस्रनामस्तोत्रं सम्पूर्णम् ॥

801

Sl. No : 19697 	दत्तात्रेयसहस्रनामस्तोत्रम् 	Ms. No: P. 4010/3

Beginning :

यतः प्रवृत्तिर्देवानां भूतानां भुवनात्मनाम् ।
ज्ञानविज्ञानप्राप्तिश्च तस्मै श्री गुरवे नमः ॥
यतः परतरं नान्यत् सर्वं येन जगत्ततम् ।
यत्र भूतानि लीयन्ते तस्मै श्री गुरवे नमः ॥
+ + + × ×
नाम्नां सहस्रं दिव्यानां दत्तात्रेयस्य योगिनः ।
× त्तहं परमं पुण्यं प्रवक्ष्ये पापनाशनम् ॥

End :

निरीहं च प्रमाशून्यं सत्वं च गगनोपमम् ।
परावरविनिर्मुक्तं दत्तात्रेयं स्मराम्यहम् ॥
देशकालार्थनिर्मुक्तं देशकालसमाश्रयम् ।
गुणादन्यत्पवित्रं च दत्तात्रेयं गुरुं नुमः ॥

Colophon :

श्रीमद्दिगम्बरानुविरचिते श्रीमद्दत्तात्रेयसहस्रनामस्तोत्रं सम्पूर्णम् ॥

802

Sl. No : 19701 दत्तात्तेयाष्टोत्तरशतनामस्तोत्रम् Ms. No : C. 694/112

Beginning :

भृगुरुवाच —

ब्रह्मन् सर्वज्ञ सर्वात्मन् सम्यगुक्तं त्वयानघ ।

नाम्नामष्टोत्तरशतं ब्रूहि शिष्याय मे प्रभो ॥

ब्रह्मोवाच —

अष्टोत्तरशतं नाम्नां दत्तत्रेयमहामुनेः ।

End :

नमोऽनन्ताय सिद्धाय कवये श्रीमते विदे ॥

अष्टोत्तरशतं नाम्नां दत्तात्रेयमनुत्तमम् ।

स्मरणात्सर्वपापघ्नं विष्णुसायुज्यदायकम् ॥

Colophon :

इति दत्तात्रेयाष्टोत्तरशतनामानि ॥

803

Sl. No : 19708 दामोदराष्टोत्तरशतम् Ms. No : C. 694/48

Beginning :

ब्रह्मोवाच —

दामोदराष्टकशतं ब्रूहि देव जगत्पते ।

येन सङ्कीर्त्यमानेन प्रयाति परमं प्रदम् ।।

श्रीहंस उवाच —

विष्णोः सहस्रनाम्नां तु षडावृत्या तु यत्फम् ।

तत्फलं समवाप्नोति एकावृत्या न संशयः ।।

End :

मनसोऽभीप्सितं ज्ञात्वा हितकर्त्रेऽमलाय च ।

शान्ताय दमयुक्ताय प्राणैरर्थैर्धनैरपि ।।

हिताय हितकाम्याय वक्तव्यं स्तोत्रमुत्तमम् ।।

Colophon :

इति पञ्चरात्रागमे दामोदराष्टोचशतं सम्पूर्णम् ॥

804

Sl. No : 19715 दुर्गासहस्रनामस्तोत्रम् Ms. No : P. 8759/1

Beginning :

कैलासशिखरे रम्ये देवदेवं महेश्वरम् ।
ध्यानोपरतमासीनं प्रसन्नमुखपङ्कजम् ॥
सुरासुरशिरोरत्ननिर्घृष्टचरणाम्बुजम् ॥
प्रणम्य नन्दिको देवं बद्धाञ्जलीरभाषत ॥
नन्दिकेश्वर उवाच —
देवदेव जगन्नाथ संशयोऽस्ति महान्मम ।
रहस्यं किञ्चिदिच्छामि द्रष्टुं त्वां भक्तवत्सल ॥
अस्य श्री दुर्गासहस्रनामस्तोत्रमहामन्त्रस्य श्रीभगवान् महादेव ऋषिः ।
आदिशक्तिः दुर्गा देवता । अनुष्टुप्छन्दः ।

End :

देवतानां देवताया ब्रह्माद्यैर्या च पूजिता ॥
भूयात्सा परलोकेश सात्रूनामपि मङ्गळा ॥
एतामेव पुराराध्य विद्यां त्रिपुरभैरवीम् ।
त्रैलोक्यमोहनं रूपं दुर्धर्षो भगवान् हरिः ॥

Colophon :

इति श्रीरुद्रयामाले उमामहेश्वरसंवादे दुर्गासहस्रनाम(स्तोत्रं) संम्पूर्णम् ॥

805

Sl. No : 19716 दुर्गासहस्रनामस्तोत्रम् Ms. No : C. 1135

Beginning :

आयुरारोग्यसुखदं पुत्रपौत्रकरं प म्
धनधान्ययशोलक्ष्मीकरं विघ्नविनाशनम् ।
सर्वसिद्धिकरं सद्यो महापातकनाशनम् ।
लोकापवादभीतिघ्नं कान्तिमेधावतारकम् ॥
स्तौमि नाम्नां सहस्रेण लोकस्यार्तिहरां शिवाम् ।

End :

सैव संहरते विश्वं सत्यं सत्यं द्विजोत्तमाः ।
तुष्टा भवति ज्ञानेन रहस्यमिदमुत्तमम् ।।
तया तोषितया तुष्टं त्रैलोक्यं स चराचरम् ।
त्रैलोक्येनेह तुष्टेन कृतकृत्यो भवेद्ध्रुवम् ।।

Colophon :

इति श्रीस्कन्दपुराणे चतुरशीतिसाहस्रे अंबिकाखण्डे दुर्गासहस्रनामस्तोत्रं समाप्तम् ।।

806

Sl. No : 19722 **देव्यष्टोत्तरशतनामस्तोत्रम्** **Ms. No: P. 10670/4**

Beginning :

नाम्नामष्टशतं वक्ष्ये उमायाः शृणु षण्मुख ।
महासम्मोहिनी देवी सुन्दरी भुवनेश्वरी ।।
एकाक्षरी महामन्त्री स्थूलसूक्ष्मपरायणी ।
एकरूपा महारूपा एकाकी लोकनायकी ।।

End :

सषोडशभुजा देवी विलेखा परमेश्वरी ।
त्रैलोक्यजननी देवी समस्तैश्वर्यनायकी ।।
एतच्छताष्टकं नाम स्तोत्रमीश्वरभाषितम् ।
भक्त्या तु यः पठेन्नित्यं सर्वामीष्टफलप्रदम् ।।

Colophon :

देव्यष्टोत्तरनामस्तोत्रं परिसमाप्तम् ।।

807

Sl. No : 19726 **देवेन्द्राष्टोत्तरशतनामस्तोत्रम्** **Ms. No : C. 694/23**

Beginning :

श्रीमन्तं कश्यपसुतं श्रीवामनसहोदरम् ।
त्रैलोक्यनाथं देवेन्द्रं शचीपतिमहं भजे ।।

सहस्रनेत्रमदितिदेवीगर्भसमुद्भवम् ।
सुधर्माख्यसभानाथं शचीपतिमहं भजे ॥

End:

श्रीपतिध्याननिरतं श्रीरामेष्टवरप्रदम् ।
श्रीराजराजवरदं शचीपतिमहं भजे ॥
इन्द्रनक्षत्रमालास्तोत्रं श्रीपुत्रनामकम् ।
यः पठेत्सततं भक्त्या सर्वसाम्राज्यमाप्नुयात् ॥

Colophon:

इति देवेन्द्राष्टोत्तरनामस्तोत्रं सम्पूर्णं मङ्गलम् ॥

808

Sl. No: 19732 देशिकाष्टोत्तरम् Ms. No: P. 9546/14

Beginning:

श्रीमद्वेङ्कटनाथार्यवेदान्ताचार्यवर्यतः ।
न मे गतिर्भवेदन्या जन्मजन्मान्तरेष्वपि ॥ १ ॥
वेदवैदिकविश्वासतदनुष्ठानशक्तयः ।
वेदान्ताचार्यकृपया सन्तु मद्वंशजन्मनाम् ॥ २ ॥

End:

परं नामशतं भक्त्या श्रुत्वा गुरुमुखाम्बुजात् ।
प्रसादाद्देशिकेन्द्रस्य भुक्तिं मुक्तिं समश्नुते ॥ २९ ॥
एकैकमपि तन्नाम कीर्तयन् सकृदुत्तमम् ।
सर्वान् कामानवाप्नोति किमुताष्टोत्तरं शतम् ॥ ३० ॥

Colophon:

— — —

809

Sl. No: 19739 नारायणाष्टोत्तरशतनामस्तोत्रम् Ms. No: P. 5514/3

Beginning:

श्री धरण्युवाच—

शुभानि तानि सर्वाणि शुभानि जगतः पते ।
नाम्नामष्टशतं पुण्यं श्रोतुं कौतूहलं हि मे ॥

End :

अचलमचलपूर्णं वर्णदोषादिहीनं
निखिलनिगमगुह्यं गुह्यमेकं सुसूक्ष्मम् ।
अमलममलसत्त्वा देवि वक्ष्यन्ति ये मां
हृदयकमलमध्ये जीवमुक्ता भवन्ति ॥

Colophon :

इति श्रीवराहपुराणे धरणीवराहसंवादे आदिवराहप्रोक्ते नारायणाष्टोत्तर शतदिव्यनामामृतस्तोत्रं सम्पूर्णम् ॥

810

Sl. No : 19742 नृसिंहभारत्यष्टोत्तरस्तोत्रम् **Ms. No : B. 1137/1**

Beginning :

श्रीमच्चामुण्डिकाम्बापदकमललसद्भृङ्गनैजान्तरङ्गः
श्रीमान् कर्नाटदेशप्रथितवरमहीशूरसिंहासनेशः ।
श्रीशृङ्गेरीनृसिंहाभिधभुवनगुरोः पूजनासक्तचित्तो
नाम्नामष्टोत्तराढ्यं शतमिति तनुते कृष्णराजेन्द्रचन्द्रः ॥

End :

भक्त्या विरचितं चैतन्नाम्नामष्टोत्तरं शतम् ।
समस्तश्रेयसां प्राप्तेः जीयादाचन्द्रभास्करम् ॥
श्रीशृङ्गेरीयतीन्द्रस्य नाम्नामष्टोत्तरं शतम् ।
त्रिसन्ध्यं यः पठेद्भक्त्या स सर्वाभीष्टमाप्नुयात् ॥

Colophon :

— — —

811

Sl. No : 19745 नृसिंहसहस्रनामस्तोत्रम् **Ms. No : P. 2158/1**

Beginning :

मार्कण्डेय उवाच—
वराह कथितो ह्येष प्रादुर्भावो हरेस्तव ।
साम्प्रतं नारसिंहं तं प्रवक्ष्यामि निबोध मे ॥

दितेः पुत्रो महावीर्यः हिरण्यकशिपुः पुरा ।
तपस्तेपे निराहारः बहुवर्षसहस्रकम् ॥

End :

शाकिनीढाकिनी ज्येष्ठा × × ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ॥
कथितं ते नृसिंहस्य समस्तारिष्टनाशनम् ।
सर्वेषां साधनं दिव्यं किं भूयः श्रोतुमिच्छसि ॥

Colophon :

इति श्रीनृसिंहपुराणे ब्रह्मणा निर्मितं लक्ष्मीनृसिंहसहस्रनामस्तोत्रं सम्पूर्णम् ॥

812

Sl. No : 19748 नृसिंहसहस्रनामस्तोत्रम् Ms. No : P. 4925/54

Beginning :

मार्कण्डेय उवाच—
पुरा युद्धमभूद्घोरं रौद्रं दैत्यबलैः सह ।
नृसिंहस्याङ्गसंभूतैर्नारसिंहैरनेकशः ॥
दैत्यकोट्यो हतास्तत्र केचिद्भीताः पलायिताः ।
तं दृष्ट्वातीव संक्रुद्धो हिरण्यकशिपु स्वयम् ॥
ब्रह्मोवाच —
ओं नमो नरसिंहाय वज्रदंष्ट्राय वज्रिणे ।
वज्रदेहाय वज्राय नमो वज्रनखाय च ॥

End :

वेदानां दूषकश्चापि मातापितृविघातकः ।
असत्यश्च तथा यज्ञनिन्दको लोकनिन्दकः ॥
स्मृत्वा सकृन्नृसिंहं तु मुच्यते सर्वकिल्बिषैः ।
बहुनात्र किमुक्तेन स्मृत्वा मां शुद्धमानसः ॥
यत्र यत्र चरन् मर्त्यो नृसिंहस्तत्र रक्षति ॥

Colophon :

इति स्तोत्ररत्नाकरे नृसिंहपुराणे नृसिंहप्रादुर्भावे सर्वार्थसाधनं नाम नृसिंह सहस्रनामस्तोत्रं नाम अष्टत्रिंशोऽध्यायः ॥

813

Sl.No : 19777 नृसिंहाष्टोत्तरदिव्यनामस्तोत्रम् Ms. No : P. 6806/11

Beginning :

अस्य श्री नृसिंहाष्टोत्तरदिव्यनामामृतस्तोत्रमहामन्त्रस्य महादेवः ऋषिः अनुष्टुप्छन्दः । अघोरवीरनृसिंहो देवता । दैत्यान्तक परब्रह्मेति शक्तिः श्रीवीरनृसिंहप्रसादसिध्यर्थे जपे विनियोगः ॥

End :

कुटिलनशिरहस्तं विस्फुरद्घोरवक्त्रं
ज्वलदनलशरीरं घोरलक्ष्मीनृसिंहम् ।
नखदलितहिरण्याक्षादिदैत्येन्द्रवक्षं
नरहरिमिह वन्दे सर्वभीतिप्रशान्त्यै ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे उत्तरकाण्डे उमामहेश्वरसंवादे नृसिंहाष्टोत्तरशत-दिव्यनामामृतस्तोत्रं सम्पूर्णम् ॥

814

Sl. No : 19783 नृसिंहाष्टोत्तरदिव्यनामस्तोत्रम् Ms. No : P. 10514/27

Beginning :

अस्य श्रीनृसिंहाष्टोत्तरदिव्यनामस्तोत्रमन्त्रस्य निटिलाक्षभगवान् ऋषिः अनुष्टुप्छन्दः अघोरवीरनरसिंहो देवता । श्रीनृसिंहप्रीत्यर्थे जपे विनियोगः ।
ओं श्रीनृसिंहो महासिंहो दिव्यसिंहो महाबलः ॥

End :

बालग्रहादिपीडैश्च मुच्यते नात्र संशयः ।
सर्वलोकैकनाथाय सर्वदेशहिताय च ॥
सर्वशत्रुविनाशाय नृसिंहाय नमोऽस्तु ते ॥

Colophon :

इति श्र.निटिलाक्षविरचितायां श्रीनृसिंहाष्टोत्तरशतदिव्यनामस्तोत्रं सम्पूर्णम् ॥

815

Sl. No : 19799 **प्रत्यङ्गिरात्रिशती** Ms. No : A. 587/8

Beginning :

देव देव महाभाग सर्वज्ञ करुणानिधे ।
प्रत्यङ्गिरामहादेव्याः नामसाहस्रतः परम् ॥
यदि सन्त्यन्यनामानि तान्याचक्ष्व महेश्वर ॥
ईश्वर उवाच—
साधु साधु महाभागे शृणु भक्त्या सदाशिवे ।
रहस्यनामसाहस्रादपि गुह्या सनातनी ॥

End :

एवं शिवेन पार्वत्यै कृत्यायाः त्रिशतीरिता ।
यः पठेदर्चयेद्वापि सर्वाभीष्टं स विन्दति ॥
प्रत्यङ्गिरे नमस्तुभ्यं नित्यं कुरु वचो मम ।
नित्यं संनिहिता भूत्वा भृत्यं मां परिपालय ॥

Colophon :

इति प्रत्यङ्गिरात्रिशतीनाम सम्पूर्णम् ॥

816

Sl. No : 19801 **प्रत्यङ्गिराष्टोत्तरशतनामस्तोत्रम्** Ms. No : P. 8755/1

Beginning :

व देव महादेव सर्वज्ञ करुणानिधे ।
प्रत्यङ्गिराष्टोत्तरशतं रहस्यमपि तद्वद ॥
श्रीशिवः—
× श्वरि सर्वज्ञे वरदे कामरूपिणि ।
रहस्यातिरहस्यं तदष्टोत्तरशतं महत् ॥

End :

कवचं प्रथमं जप्त्वा मन्त्राणि च जपेत्सदा ।
सर्वाभीष्टं च लभते सद्यः श्रीधनमाप्नुयात् ॥
पूर्वं जप्त्वा क्रमथ गुरोर्लब्ध्वा त्विमं पठन् ।
तारकादीन् महाशत्रून् हनिष्यति न संशयः ॥

Colophon :

इत्युत्तराथर्वणि निकुम्भिलायागकर्मणि शिवोक्ते अतिरहस्ये प्रत्यङ्गिराष्टोत्तरं नाम द्वाविंशोच्छ्वासः ॥

817

Sl. No : 19802 प्रतङ्गिराष्टोत्तरशतम् **Ms. No : A. 587/7**

Beginning :

श्रृणु देवि प्रवक्ष्यामि काल्याश्चाष्टोत्तरं शतम् ।
पुत्रदं पुत्रकामानां मृतवन्ध्यासुतप्रदम् ॥
सर्वशत्रुक्षयकरं सर्वसाम्राज्यदायकम् ।
भृग्वङ्गिरादयस्सर्वे नाम्नामष्टोत्तरं शतम् ।
पठित्वाऽनेन सम्पूज्य सर्वाभीष्टमवाऽप्नुयुः ॥

End:

एतदष्टोत्तरशतं मया प्रोक्तं हि पार्वति ।
यः पठेच्छृणुयान्नित्यं श्रद्धाभक्तिसमन्वितः ॥
अर्चयेन्नामभिर्दिव्यैः कृत्याप्रीतिकरैः शुभैः ।
स च कालीप्रसादेन सर्वाभीष्टं समश्नुते ॥

Colophon :

इति प्रत्यङ्गिराष्टोत्तरशतं नाम सप्तमोऽध्यायः ॥

818

Sl. No : 19805 प्रत्यङ्गिरासहस्रनामस्तोत्रम् **Ms. No : P. 8755/14**

Beginning :

प्रणम्य वक्रतुण्डाय सरस्वत्यै प्रणम्य च ।
प्रणमामि गुरूनाद्यानविघ्नं पाठकं कुरु ॥
भगवत्या महाकृत्या सहस्रं नाम चोत्तमम् ।
लेखनात्सर्वपापघ्नं शृण्वतां पावना मतिः ॥

ऋषय ऊचुः —

अस्य श्री प्रत्यङ्गिरासहस्रनामस्तोत्रमहामन्त्रस्य अङ्गिरा ऋषयः । अनुष्टुप्छन्दः प्रत्यङ्गिरा उग्रकृत्या महाकृत्याऽपराजिता भयङ्करी इति देवता ॥

End :

वर्षमेकं कृता पूजा कुबेरोऽनुपजायते ।
द्विमिर्वर्षं ह्यर्चयन्ति प्रत्यक्षं प्राह चाङ्गिरा ॥
नवरात्रं लिखेत्प्राज्ञः सहस्रनामानि पुस्तकन् ।
दद्याद्ब्राह्मणश्रेष्ठेभ्यः देवीभक्तिपरायणे ॥

Colophon :

इति श्रीशङ्करप्रोक्ते ब्रह्मऋषिसंवादे अथर्वणवेदे पिप्पलादशाखायां अङ्गिरा-सङ्कल्पे प्रत्यङ्गिरासहस्रनामस्तोत्रं सम्पूर्णम् ॥

819

Sl. No : 19806 प्रत्यङ्गिरासहस्रनामस्तोत्रम् Ms. No : A· 587/6

Beginning :

श्री देव्युवाच—
देवाधिदेव सर्वज्ञ सर्वभूतहिते रत ।
राजचोरारिपीडासु शस्त्राग्निविषपातने ॥
\+ + + + +
भवत्यभीष्टं जन्तूनां केन तद्वद मे शिव ॥

ईश्वर उवाच—
शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यन्तरं परम् ।
अङ्गिरानामसाहस्रं स्तवानामुत्तमं स्तवम् ॥

End :

अङ्गिराराधकानां तु भवेयुर्वशगा भयात् ।
एतत्सर्वं तव प्रीत्या मया प्रोक्तं हि पार्वति ॥
स्वयोनिरव गोप्तव्यं न देयं यस्य कस्यचित् ।
भक्तियुक्ताय वक्तव्यं नाभक्ताय कदाचन ॥

Colophon :

इति श्रीमहालक्ष्मीकल्पे सहस्रनाम सम्पूर्णम् ॥

820

Sl. No : 19808 बगलासहस्रनामस्तोत्रम् **Ms. No : C. 3780/20**

Beginning :

सुरालयप्रधाने तु देवदेवं महेश्वरम् ।
शैलाधिराजतनयां × हृदयमुवाच ह ॥
श्री देव्युवाच—
परमेश परंधाम प्रधानपुरुषेश्वर ।
नाम्नां सहस्रं बगलामुख्याः कथय वल्लभ ॥
ईश्वर उवाच—

End :

य इदं तु पठेन्नित्यं शिवेन सदृशो भवेत् ।
जपन् धर्मार्थभोगी स्यान्मृतो मोक्षपतिर्भवेत् ॥
सत्यं सत्यं महादेव सत्यं सत्यं महेश्वरि ।
स्तम्भिताश्च महासर्वे स्तवराजस्य कीर्तनात् ॥

Colophon :

इति उत्कटशाखरे नागेन्द्रप्रमाणतन्त्रे षोडनासहस्रेषु विष्णुशङ्करसंवादे बगलासहस्रनामस्तोत्रं संपूर्णम् ॥ (?)

821

Sl. No : 19809 बसवसहस्रनामावलिः **Ms. No : B. 1212**

Beginning:

श्रीमदखण्डतेजधृतराजसुरासुरभोगिराजनि
रामनिरामयांगभवभंगदयाभरितान्तरंगनि
स्सीमगजेन्द्रसान्द्रतरकृत्तिवासनिरामयांगनि
ष्कामदिगम्बरत्रिमलदूरनिरञ्जनलिंग पाहि मां बसवेश ॥
+ + + + +
ओं प्रमथगणेश्वरबसवाय नमः । ओं उग्रगणेश्वरबसवाय नमः । ओं निश्शङ्क गणेश्वरबसवाय नमः ॥

End :

त्रिकरणशुद्धताम्बूलप्रदबसवाय नमः । जितमायाबसवाय नमः । मनोतमन्ध × बसवाय नमः । लिंगजङ्गमदासबसवाय नमः । अनादिपरशिवतत्त्वचित्स्वरूपबसवाय नमः । अखण्डपरिपूर्णज्योतिर्मयबसवाय नमः ।

Colpohon:

विरताद्रणि शिवपूजा
निरतं सुज्ञानभक्तिवैराग्यदया ।
भरित अति शतिगालद
बसवेशं निरूपिसल्का बरदे ॥ (?)

822

Sl. No : 19810 बालकृष्णाष्टोत्तरशतनामस्तोत्रम् Ms. No : P. 863/10

Beginning :

अस्य श्रीबालकृष्णाष्टोत्तरमहामन्त्रस्य शेषः भगवान् ऋषिः +
श्रीकृष्णः कमलानाथो वासुदेवस्सनातनः ।
वसुदेवात्मजः पुण्यो लीलामानुषविग्रहः ॥

End:

बालाय नीलवपुषे नवकिङ्किणीक
जालाभिरामजघनाय दिगम्बराय ।
शार्दूलदिव्यनखभूषणभूषिताय
नन्दात्मजाय नवनीतमुषे नमस्ते ॥

Colophon :

— — —

823

Sl. No : 19812 बालाष्टोत्तरम् Ms. No: P. 8778/3

Beginning :

ओं कल्याणी त्रिपुराचारा माया त्रिपुरसुन्दरी ।
सौन्दर्युमा भाग्यवती हिङ्कारी सर्वमङ्गला ॥
ह्रीङ्कारी स्कन्दजननी परा पञ्चदशाक्षरी ।
त्रैलोक्यमोहनाधीशा सर्वेशी पुरवल्लभा ॥

End :

रहःपूजासमालोला रहोयज्ञस्वरूपिणी ।
त्रिकोणमध्यनिलया षट्कोणपुरवासिनी ॥
नवकोणपुरावासी बिन्दुस्थलसमन्विता ।
नाम्नामष्टोत्तरशतं भवेद्देव्या समन्वितम् ॥

Colophon :

इति रुद्रयामले शिवपार्वतीसंवादे बालाष्टोत्तरं सम्पूर्णम् ॥

824

Sl. No : 19815 बालासहस्रनामस्तोत्रम् **Ms. No : P. 1976/1**

Beginning :

अस्य श्रीबालासहस्रनामस्तोत्रमहामन्त्रस्य पुरन्दर ऋषिः । अनुष्टुप्छन्दः श्रीबाला श्रीं शक्तिः × × ध्यानम्—

बालां नीलदलाङ्क + कान्ताङ्गसंदीपिताम् ।
प्रालम्बस्फुटहीरहारलतिकां + बालां भजेऽहं सदा ॥
ओं बाला महेश्वरी देवी शिवा बालाब्जभूषिता ।
शेषभूषणवामाङ्गसङ्गताखिलभङ्गहा ॥

End :

सत्कलत्रप्रदं पुत्रपौत्रादिशुभवर्धनम् ।
बालायाः कृपया नित्यं भुक्तिमुक्तिफलं भवेत् ॥

Colophon :

इति श्रीरुद्रयामळे मन्द × × न्दनसंवादे बालासहस्रनामस्तोत्रं सम्पूर्णम् ॥

825

Sl. No : 19822 भवानीसहस्रनामस्तोत्रम् **Ms. No : P. 5886/4**

Beginning :

कैलासशिखरे रम्ये देवदेवं महेश्वरम् ।
ध्यानोपरतमासीनं प्रसन्नमुखपङ्कजम् ॥

सुरासुरशिरोरत्नरञ्जिताङ्घ्रियुगद्वयम् ।
× नन्दिको देवं कृताञ्जलिरभाषत ॥

End :

एकभावं सदा नित्यं येऽर्चयन्ति महेश्वरीम् ।
देवतायां देवतायां ब्रह्मधैर्यादपूजिता ॥
भूयात् स्थावरता लोके साधुना विश्वमङ्गला ।
एकवारं पठित्वा च सर्वपापं प्रणश्यति ॥

Colophon :

इति श्री रुद्रयामळे भवानीसहस्रनामस्तोत्रं सम्पूर्णम् ॥

826

Sl. No : 19828 भवान्यष्टोत्तरम् Ms. No : C. 4210/6

Beginning :

रजताचलशृंगारगृहस्थायै नमो नमः ।
हिमाचलमहावंशपावनायै नमो नमः ॥
शङ्करार्धाङ्गसौन्दर्यशरीरायै नमो नमः ।
लसन्मरकतस्वच्छविग्रहायै नमो नमः ॥

End :

इदं गिरीशगिरिजानाम्नामष्टोत्तरं शतम् ।
व्यासेन कथितं सर्वपापरोगनिवारणम् ॥
स्तोत्रं श्रीकण्ठदेवेशभवान्योः पठितोऽन्वहम् ।
स सदा महदैश्वर्यं लभते वांछितं फलम् ।
\+ \+ \+ \+ \+
एतन्नाम पठन्विप्रः सकृदो × त्यसंशयम् ।
देहान्ते मुक्तिमाप्नोति पुनरावृत्तिवर्जिताम् ॥

Colophon :

इति अष्टोत्तरम् ॥

827

Sl. No : 19830 भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रम् **Ms. No : B. 955/6**

Beginning :

नाम्नामष्टशतं वक्ष्ये उमायाः शृणु षण्मुख ।
महासंमोहिनी देवी सुन्दरी भुवनेश्वरी ॥
एकाक्षरी महामाया एकाकी एकनायकी ।
